आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः

(२५)

सूतसंहिता

द्वितीयो भागः (२)

S
294.1823
M264.III2
S

-पञ्चविंशतिपणकाधिकरूपकषट्कम् (६-२५)

S
294.182 3
Library IIAS, Shimla
S 294.182 3 M 264.1 S-M 264.11
00059526

॥ श्रीः ॥

अथ सूतसंहितायाश्चतुर्थं यज्ञवैभवखण्डम् ।

तत्र प्रथमोऽध्यायः ।

ऐशमाद्यन्तनिर्मुक्तमतिशोभनमादरात् ।
नमामि विग्रहं साम्बं संसारविषभेषजम् ॥ १ ॥

यद्यपि गतखण्डे ज्ञानस्य स्वरूपं मुक्तिसाधनता चोक्ता तथाऽपि—

" यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम "

इत्यादिभगवद्वचनाद्यज्ञशब्दस्य क्रियाभेदे केवलप्रसिद्धिदर्शनात्तद्विरोधेन ज्ञाने मा भूदनादर इति ज्ञानस्य यज्ञरूपता कर्मयज्ञेभ्यः श्रेयोरूपता च वक्तव्या। उक्ता च संग्रहेण भगवता—

" श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप " इति ।

साऽपि निरूपयितव्येति यज्ञवैभवखण्डं चतुर्थमारभमाणो भगवान्बादरायणः प्रथमतः परापरशिवप्रणिधानमुपनिबध्नाति—ऐशमिति । अत्र प्रथमार्धे नित्यनिरतिशयानन्दरूपत्वेन निष्कलस्य प्रणिधानं द्वितीये च परमपुरुषार्थप्रदत्वेन सकलस्य प्रणिधानं नमामीति त्रिकरणव्यापारस्य तत्र समर्पणं चोपनिबध्यते । यदैशं निष्कलं शरीरं स्वरूपं तदेव लोकानुग्रहाय स्वीकृतलीलावतारं सत्साम्बं नमामीति संबन्धः ॥ १ ॥

सत्रावसाने संनद्धाः सर्ववेदार्थवेदने[२] ।
सर्वलोकहिते युक्ताः सारासारविवेकिनः ॥ २ ॥

सर्ववेदार्थेति । परवेदार्थवदपरवेदार्थस्यापि वेदने सूतमुखादुक्तक्रमेण परवेदार्थं ज्ञात्वा कृतकृत्यानामपि मुनीनां पुनरपरवेदार्थप्रश्ने प्रयोजनं पराविद्याधिकारिणां कर्मयज्ञद्वारा तदधिकारप्रसिद्धिर्यथा स्यादिति लोकानुग्रह एव प्रयोजनमित्याह—सर्वलोकहित इति । निगदव्याख्यातोऽध्यायशेषः ॥ २ ॥

स्वाध्यायाध्ययने युक्ताः स्वस्थचित्ताः सुनिश्चलाः ।
सर्वोपद्रवनिर्मुक्ताः सर्वशत्रुविवर्जिताः ॥ ३ ॥

---

१ ङ. °ईश्वरू° । २ व. °बोधिनः । स° ।

अभ्यागतानामार्तानामतिथीनां प्रियंवदाः ।
मैत्र्या करुणया युक्ताः कुमतावप्युपेक्षकाः ॥ ४ ॥
परपुष्टौ महाप्रीताः प्रज्ञामानविवर्जिताः ।
गवां शुश्रूषणे युक्ता गुरुशुश्रूषणे रताः ॥ ५ ॥
वृद्धसेवाभिसंपन्ना वेदवित्पूजने रताः ।
ऋजवो मृदवः स्वस्थाः सर्वद्वंद्वविवर्जिताः ॥ ६ ॥
रुद्राक्षमालाभरणाः सितभस्मावगुण्ठिताः ।
त्रिपुण्ड्रावलिभिर्दीप्ता जटावल्कलसंयुताः ॥ ७ ॥
लिङ्गार्चनपरा नित्यं शिवस्यामिततेजसः ।
शिवाभिमानसंपन्नाः शिवभक्तिपरायणाः ॥ ८ ॥
शिवशब्दजपध्वस्तपापपञ्जरसुन्दराः ।
संसारविषवृक्षस्य मूलच्छेदनतत्पराः ॥ ९ ॥
श्रौतस्मार्तसदाचाराः सर्वगोत्रर्षयो वराः ।
व्यासप्रसादसंपन्नं विश्वज्ञानमहोदधिम् ॥ १० ॥
विश्वात्मवेदिनं साक्षाद्विध्वस्तभवकाननम् ।
स्मृत्वा भक्त्या महात्मानं तुष्टुवुः सूतमुत्तमम् ॥ ११ ॥
एतस्मिन्नन्तरे श्रीमान्महाकारुणिकोत्तमः ।
सर्वज्ञः सर्वभूतानामभीष्टफलदः प्रभुः ॥ १२ ॥
प्रादुरासीन्महातेजा रात्रौ सूर्य इव स्वयम् ।
तं दृष्ट्वा मुनयः सर्वे विस्मिता गद्गदस्वराः ॥ १३ ॥
प्रणम्य दण्डवद्भूमौ दत्त्वा तस्याऽऽसनं वरम् ।
पादप्रक्षालनं कृत्वा श्रद्धया परया सह ॥ १४ ॥
गन्धपुष्पादिभिर्दिव्यैः पूज्य[1] पुण्यवतां वरम् ।
समाश्वास्य चिरं कालं प्रसन्नमुखपङ्कजम् ॥ १५ ॥

---

१ ग. पूज्यं ।

पप्रच्छुः सर्ववेदार्थं प्रसन्ना भाग्यगौरवात् ।
सोऽपि सूतः स्वमाचार्यं स्मृत्वा शंभुं जगद्गुरुम् ॥ १६ ॥
सर्वविद्यामयीमीशां साक्षाद्विघ्नविनायकम् ।
षण्मुखं च सदा शुद्धं प्रणम्य भुवि दण्डवत् ॥ १७ ॥
कृताञ्जलिपुटो भूत्वा मुनीनालोक्य सुव्रतान् ।
वक्तुमारभते सूतः सर्ववेदार्थमुत्तमम् ॥ १८ ॥

महेश्वरं सर्वजगद्विभासकं
दिवाकरादिप्रथितौजसामपि ।
अगोचरं भक्तिपुरःसरं सदा
नमामि संसारमहाविषौषधम् ॥ १९ ॥
परानुभूतिं भवपाशनाशनीं
सदाशिवस्याप्यतिशोभनप्रदाम् ।
उमाभिधामुत्तमचित्तवृत्तिदां
नमामि नानाविधलोकवैभवाम् ॥ २० ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे सर्ववेदार्थप्रश्नो नाम प्रथमोऽध्यायः ॥ १ ॥

॥ २ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

इति श्रीसूतसंहिताटीकायां तात्पर्यदीपिकाख्यायां चतुर्थे यज्ञवैभवखण्डे सर्ववेदार्थप्रश्नो नाम प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

श्रीसूत उवाच——

अथ वक्ष्यामि वेदार्थं शृणुत श्रद्धया द्विजाः ।
श्रद्धया रहितं सर्वं फलाय न कदाचन ॥ १ ॥

मुनिप्रश्नानन्तर्यमथशब्दार्थः ॥ १ ॥

परापरविभागेन वेदार्थो द्विविधः स्मृतः ।
वेदार्थः परमः साक्षात्परात्परतरं परम् ॥ २ ॥

परापरविभागेनेति । उपनिषदर्थः परः । इतरस्त्वपरः । श्रूयते हि मुण्डकोपनिषदि " द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा, ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते " इत्यादि । तदेवाऽऽह—वेदार्थः परम इति । परात्सकलादतिशयेन यत्परं निष्कलं तदुक्तद्वितयमध्ये परमो वेदार्थ इत्यर्थः ॥ २ ॥

अपरो धर्मसंज्ञः स्यात्तत्परप्राप्तिसाधनम् ।
अधर्मः परिहाराय वेदार्थत्वेन भाक्तितः ॥
गीयते मुनिशार्दूलैः कदाचिन्न तु मुख्यतः ॥ ३ ॥

अपरोऽपि द्विविधः । विहितो यज्ञादिधर्मः । प्रतिषिद्धो हिंसादिरधर्मश्च । तत्राऽऽद्यस्य प्रयोजनमाह—अपर इति । तत्परेति । 'तमेतं वेदानुवचनेन' इत्यादिश्रुतेरित्यर्थः । अननुष्ठेयस्याधर्मस्य किमुपदेशेन तत्राऽऽह—परिहारायेति । उक्तं हि शाबरभाष्ये—"अधर्मोऽपि जिज्ञास्यः परिहाराय" इति । न तु मुख्यत इति । मुखमिव प्रथमः श्रेयःसाधनत्वेनानुष्ठेयो धर्मो मुख्यः । तत्परिपन्थित्वेन तु हानाय जिज्ञास्यः सन्नधर्मो जघन्य इत्यर्थः ॥ ३ ॥

अधर्मपरिहारेण धर्मस्त्वव्याकुलो भवेत् ॥ ४ ॥
अव्याकुलेन धर्मेण श्रद्धयाऽनुष्ठितेन तु ।
वेदार्थः परमः साक्षात्सिध्यत्येव न संशयः ॥ ५ ॥

अधर्मपरिहारेणेति । तदपरिहारे धर्मस्य व्याकुलता कृष्णं प्रत्यर्जुनेन प्रश्चिता गीतासु—

" अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः " इत्यादि ॥ ४ ॥ ५ ॥

सोऽयं स्वापरया[1] शक्त्या बद्धवत्प्रतिभासते ।
एकैव परमा शक्तिर्माया दुर्घटकारिणी ॥ ६ ॥

परमस्य वेदार्थस्य स्वप्रकाशस्य कथमसिद्धिः । येन धर्मानुष्ठानेन तत्सिद्धिरुक्तेत्यत आह—सोऽयं स्वापरयेति[2] । नित्यमुक्तोऽपि ह्यात्मा स्वाश्रितया[3] मायाशक्त्या बद्ध इव भासते । बद्धानां संसारिणामसंख्यत्वाद्बन्धहेतुर्मायाऽप्य-

१ घ. स्वपरया । २ घ. स्वपरयेति । ३ ग. °श्रितया ।

संख्यातेति मतं वारयति—एकैवेति । एकयैवानन्तजीवनिर्भासस्येन्द्रजालवदुपपत्तौ नानेका सा कल्पनीयेति ॥ ६ ॥

शिवस्यानन्तरूपा सा विद्यया तस्य नश्यति ।
या विनश्यति सा माया चिन्मात्रे परिकल्पिता ॥ ७ ॥

तस्या मायात्वं ज्ञानविनाश्यत्वेन समर्थयते—शिवस्येति । * यथा । आश्रयाश्रयिभावे विषयविषयिभावे वा षष्ठी । शिवाश्रया शिवविषया च माया जगदुपादानम् । आश्रयत्वोपाधिना तस्य जीवत्वम् । विषयत्वोपाधिना च परत्वमिति हि स्थितिः । ननु सर्वज्ञे निरवद्ये शिवे नाज्ञानं संभवति न चाज्ञे जीवे मायाधीनो जीवविभागो जीवाश्रया च मायेत्यन्योन्याश्रयादिप्रसङ्गादित्यत आह—चिन्मात्रेति । इह भूतले घट इति हि निर्घटस्य भूतलस्य घटसंबन्धव्यापारात्स्वात्मनैव घटवति तस्मिंस्तत्संबन्ध आत्माश्रयाद्वितीये घटवत्यन्योन्याश्रयात्तृतीयादिस्वीकारे चक्रकाद्यापतेत घटतदभावसाधारणभूतलमात्रे घटस्य संबन्धः । एवं मायातदभावसाधारणे चिन्मात्रे मायाऽऽश्रितेति ॥ ७ ॥

अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः ।
भावस्यैव ह्यभावत्वं नाशोऽभावस्य भावतः ॥
भावाभावस्वभावाभ्यामन्य एव हि कल्पितः ॥ ८ ॥

ननु विद्यया माया नश्यति चेन्मायया ऽविद्वानिव तन्नाशेन मुक्तो विद्वानपि सद्वितीयः स्यादित्यत आह—अधिष्ठानेति । मायायाः कल्पितत्वेन तन्नाशस्तदधिष्ठानान्न व्यतिरिच्यत इत्यर्थः । ननु प्रागसतो घटस्य नाशो नाम जातः सन्घट एव । सतश्च घटस्य प्रध्वंसो नाम प्रध्वंसत्वेनासन्घट एव । तत्रैव हि लोकस्य तत्प्रतीतिव्यवहारौ दृश्येते नाधिष्ठानमात्रे । तत्कथं नाशस्याधिष्ठानावशेषतेत्यत आह—भावस्यैवेति । सदसतोर्हि परस्परोपमर्दकत्वेन तन्नाशयोरन्योन्यासद्रूपता । सदसद्विलक्षणत्वात्तु मायायास्तन्नाशस्य नाधिष्ठानादतिरेकः । न हि शुक्तिं साक्षात्कुर्वन्तस्तद्रूपातिरेकेण तत्र कल्पितरजतस्य नाशं प्रतियन्ति व्यवहरन्ति वेत्यर्थः । कल्पितनाशमधिष्ठानव्यतिरेकेण व्यवहरन्तमुपहसन्ति कवयः—

'एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं वारिणो
यो मुक्तामणिरित्यमंस्त स जडः शृण्वन्नमुष्मादपि ।

* सर्वपुस्तकेषु यथेति वर्तते परं त्वनपेक्षितम् ।

१ घ. ङ. संख्येति । २ ग. स्थितं । घ. श्रुतिः । ३ ङ. °पत्तेर्घट° । ४ क. ख. घ. भावता । ५ घ. कल्पिता ।

अङ्गुल्यग्रलशुक्रियाप्रविरलेत्यादीयमाने शनैः
कुत्रोद्वीय गतो ममेत्यनुदिनं निद्राति नान्तः शुचा' इति ।
संप्रदायविदोऽप्याहुः ' आत्मैवाज्ञानहानिर्वा ' इति । तथा ' निवृत्तिरात्मा मोहस्य ज्ञानत्वेनोपलक्षितः ' इति ॥ ८ ॥

अधिष्ठानस्य नाशो न सत्यत्वादेव सर्वदा ।
सर्वाधिष्ठानमीशानं पश्यन्नेव विमुच्यते ॥ ९ ॥
ईशानविषयं ज्ञानं वेदान्तश्रवणादिना ।
जायते परहंसस्य यतेर्भुरुण्याधिकारिणः ॥ १० ॥
नाऽऽश्रमान्तरनिष्ठस्य क्रमात्तस्यापि जायते ॥ ११ ॥

कल्पितवस्तुनो नाशश्चेदधिष्ठानावशेषः, अधिष्ठानस्य नाशस्तर्हि किमवशेषः । न हि तस्याधिष्ठानान्तरमस्त्यनवस्थापातादित्यत आह—अधिष्ठानस्येति । प्रातीतिकं हि सत्यत्वं शुक्तिरूप्यादेः सत्येव प्रमातरि बाध्यमानस्य । सति प्रमातर्यबाध्यमानस्य घटादेस्तु व्यावहारिकं सत्यत्वम् । इहाधिष्ठानत्वेनाभिमतस्य ब्रह्मणस्तु पारमार्थिकं सत्यत्वमित्यभिप्रेत्य सर्वेदेत्युक्तम् । यत ईशान एवैकः स्वेतरसमस्तैकल्पितवस्तुजाताधिष्ठानम् । अतस्तज्ज्ञानात्तदज्ञानविलासकल्पितस्य निवृत्तिरिति । यदुक्तम्—'विद्यया तस्य नश्यति' इति तत्फलतीत्याह—सर्वाधिष्ठानमिति । उक्तस्य परमपुरुषार्थज्ञानस्य करणमधिकारिणं चाऽऽह—ईशानविषयमिति ॥ ९ ॥ १० ॥ ११ ॥

ब्रह्मलोकमवाप्नोति वनस्थो नैष्ठिकोऽपि च ।
गृहस्थः पितृलोकं च शिवज्ञानं तु भिक्षुकः ॥ १२ ॥

क्रमादित्युक्तं क्रममेवाऽऽह—ब्रह्मलोकमिति । क्रमाननुप्रविष्टस्यापि पितृलोकस्य वनस्थत्वानन्तरभाविगार्हस्थ्यफलत्वादत्रोपन्यासः । शिवज्ञानं तु भिक्षुक इति साक्षात्पारम्पर्याभ्याम् ॥ १२ ॥

तत्रापि प्रथमो भिक्षुर्ज्ञानेच्छोदयबाधकात् ।
महापापादयत्नेन मुच्यते मुनिपुङ्गवाः ॥ १३ ॥

चतुर्विधा हि भिक्षुकाः । कुटीचकबहूदकहंसपरमहंसाः । तत्राऽऽद्यस्य पारम्पर्यप्रकारमाह—तत्रापि प्रथमो भिक्षुरिति । जिज्ञासामतिबन्धकपापनिवृत्तिः कुटीचकाश्रमधर्मानुष्ठानफलम् ॥ १३ ॥

१. ङ. °विलसन्याद्रीय° । २ क. ग ज्ञानत्वे° । ३ ङ. °स्तवस्तुक° । ४ ख. °ने चोद्°।

द्वितीय शान्तिदान्त्यादिज्ञानाङ्गेच्छामवाप्नुयात् ।
तृतीयोऽखिलवेदान्तश्रवणेच्छामवाप्नुयात् ॥ १४ ॥

बहूदकधर्मानुष्ठानफलस्य तु शमदमादिलाभः फलम् । हंसधर्मस्य तु वेदान्तशुश्रूषा ॥ १४ ॥

चतुर्थो ज्ञानमाप्नोति वेदान्तश्रवणेन तु ।
स एव कर्मसंन्यासी परहंससमाश्रयः ॥
अन्ये काम्यपरित्यागाद्भिक्षुका इति कीर्तिताः ॥ १५ ॥

श्रवणपुरःसरतत्त्वज्ञानाप्तिश्चतुर्थाश्रमफलमित्यर्थः ॥ १५ ॥

परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकम् ।
बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥ १६ ॥
शाब्दं ब्रह्मात्मविज्ञानमपरोक्षं महत्तरम् ।
संसारनाशकं प्रोक्तं तमस्यण्डभानुवत् ॥ १७ ॥
अतो विज्ञानलाभाय परहंसो भवेद्द्विजः ॥ १८ ॥

श्रवणस्याप्यधिकारिभेदेन परोक्षापरोक्षज्ञानलक्षणफलविभागमाह—परोक्षं ब्रह्मेति ॥ १६ ॥ १७ ॥ १८ ॥

कुटीचकाश्च हंसाश्च तथाऽन्ये च बहूदकाः ।
ये भविष्यन्ति ते कुर्युः प्राजापत्येष्टिसंज्ञिताम् ॥ १९ ॥
आग्नेयेष्टिं द्विजाः कुर्युः परहंसाभिलाषिणः ।
पश्चात्त्रैधातवीं कुर्युः सर्वे संयतमानसाः ॥ २० ॥

प्राजापत्येष्टीति । कुटीचकादिसंन्यासत्रयारम्भे प्राजापत्येष्टिः कार्या । स्मर्यते हि—

" प्राजापत्यां निरुप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् " ॥ इति ।

परहंसस्त्वाग्नेयीम् । केचित्तु सोऽपि प्राजापत्यामेवेत्याहुस्तन्निरस्तं जाबालोपनिषदि—" तँद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति तँदु तथा न कुर्यादाग्नेयीमेव कुर्यादग्निर्हि प्राणः प्राणमेवैतया करोति " इति । त्रैधातवी-

१ ख. परो हंसो । २ ङ. सर्वेदसर्वद° । ३ ख. ग. °रमहं° । ४ क. ग. घ. तथैक । ५ घ. ङ. °दुत्थानं कु° ।

मिति । चतुर्विधैरपि यथोक्तेष्ट्यनन्तरं त्रैधातवीयेष्टिः कार्या । तत्स्वरूपमुक्तं तैत्तिरीयके—" तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे " इति । उक्तेष्ट्यनन्तरं त्रैधातवीया जाबालेऽप्युक्ता त्रैधातवीयामेव कुर्यादिति । कुर्यादेवेत्यर्थः ॥ १९ ॥ २० ॥

येऽनाहिताग्नयो विप्रास्तेषां नेष्टिर्विधीयते ।
स्वस्वमग्नौ तु होमं ते कुर्युः श्रद्धापुरःसरम् ।
विरजाख्यैर्महामन्त्रैराज्येन चरुणाऽपि च ॥ २१ ॥
हुतशेषं चरुं साज्यं प्राश्याऽऽचम्यैव सर्पिषा ।
पूर्णाहुतिं पुनः कुर्युः प्रणवेनाग्निजायया ॥ २२ ॥
सहाग्निं पुनराधाय अयं ते योनिर्ऋत्विजः ॥
इति मन्त्रेण कुर्युस्ते प्रैषोच्चारणमादरात् ॥ २३ ॥
संन्यासाध्वर्युणा दत्तं दण्डं काषायमेव च ॥ २४ ॥
परिगृह्य गुरोः पादं प्रणम्य श्रद्धया सह ।
वेदान्तश्रवणं कुर्युर्ज्ञानार्थं भिक्षुकोत्तमाः ॥ २५ ॥

अग्निजायया स्वाहाकारेण ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

काम्यकर्मफले दोषं विदित्वा प्रतिषिद्धवत् ।
काम्यकर्म त्यजंस्तुल्यो भिक्षुणा फलतो भवेत् ॥ २६ ॥

काम्यकर्मफले दोषमिति । फलभोगेन हि तज्जातीये रागस्तेन तादृशस्य कर्मणः पुनरारम्भस्ततः फलं ततो राग इति संसारादनिर्मोक्षलक्षणो दोषः । तत्त्यागिनस्तु नूतनफलानुदयात्पूर्वकृतस्य च भोगेन क्षयान्नित्यनैमित्तिककरणेन प्रत्यवायानुदयात्तत एव सत्त्वशुद्धया जिज्ञासाश्रवणमननादिज्ञानसाधनसंपत्त्या भिक्षुतुल्यतैषामित्यर्थः ॥ २६ ॥

न सन्ति जप्या मन्त्राश्च परहंसस्य सर्वदा ।
त्रयीसारमिमं मन्त्रं जपेन्नित्यं समाहितः ॥
प्रणवादपरं जप्त्वा कदा मुक्तो भविष्यति ॥ २७ ॥

१ ग. °शमष्टाद°। २ ख. कुर्युरेवेत्यर्थः। ३ क. ग. घ. °निऋत्वि°। ४ ग. घ. जपन्नित्यं।

ओङ्कारः सर्वमन्त्राणामुत्तमः परिकीर्तितः ।
ओङ्कारेण प्लवेनैव संसाराब्धिं तरिष्यति ॥ २८ ॥

त्रयीसारमिति । " प्रजापतिर्लोकानभ्यतपत् " इत्यत्र हि लोकत्रयसारा अग्निवाय्वादित्यास्तत्सारा ऋग्यजुःसामवेदास्तत्सारा भुर्भुवः स्वरिति तिस्रो व्याहृतयस्तत्सारा अकारोकारमकारास्ते मिलित्वा प्रणव इत्युक्तम् " अकार उकारो मकार इति तानेकधा समभरत्तदेत्तदोमिति " इति ॥ २७ ॥ २८ ॥

उमार्धविग्रहो देवो रुद्रः सत्यादिलक्षणः ।
संसारतारकस्यास्य प्रणवस्यार्थ उच्यते ॥ २९ ॥

उमार्धेति । द्विविधं हि शिवस्य स्वरूपं निष्कलं सकलं च । तत्र यन्निष्कलं सत्यादिलक्षणं स प्रणवस्य मुख्योऽर्थ इत्यर्थः ॥ २९ ॥

विष्ण्वादयोऽपि देवाश्च रुद्रस्यांस्यान्वयेन तु ।
कथंचित्प्रणवस्यार्था भविष्यन्ति न मुख्यतः ॥ ३० ॥
यतिभिर्ज्ञानसिद्ध्यर्थमविमुक्तं महत्तरम् ।
स्थानं संसेवनीयं स्याच्चिन्तनीयं तथैव च ॥ ३१ ॥
अविमुक्ते महादेवः साक्षाद्विश्वेश्वरः प्रभुः ।
उपास्यमानः सुप्रीतो ज्ञानं साक्षात्प्रयच्छति॥३२॥
अविमुक्ते महादेवमनुपास्य विमुक्तये ।
नरः किंचिद्विषं भुक्त्वा क्षुन्निवृत्तिं करिष्यति ॥ ३३ ॥

कथंचित्प्रणवस्येति । विष्ण्वादिमूर्तयः सकला अपि निष्कलरूपानुगतत्वेनानुसंधीयमाना निष्कलपरस्य प्रणवस्य लक्षणया भवन्त्यर्थाः ॥ ३० ॥ ३१॥ ॥ ३२ ॥ ३३ ॥

तस्मान्मुमुक्षुभिर्भक्त्या ज्ञानार्थमविमुक्तकम् ।
अधिभूते तथाऽध्यात्मे सेवनीयं तथैव च ॥ ३४ ॥
चिन्तनीयो महादेवस्तत्रोपास्यो न संशयः ।
गृहस्थैश्च वनस्थैश्च तथा वै ब्रह्मचारिभिः ॥ ३५ ॥

---

१ ङ. मिलिताः । २ ङ. °भवत्त° । ३ ग. °वरू° । ४ ग. °स्यान्यन्व° ५ ख. तथैव ब्र° ।

शतरुद्रियसंज्ञस्तु मन्त्रो जप्यो महत्तरः ।
रुद्रजापी विमुच्येत महापातकपञ्जरात् ॥ ॥ ३६ ॥
सम्यग्ज्ञानं च लभते तेन मुच्येत बन्धनात् ।
अनेन सदृशं जप्यं नास्ति सत्यं श्रुतौ स्मृतौ ॥ ३७ ॥
एषा पञ्चाक्षरी विद्या शतरुद्रीयमध्यगा ।
पञ्चाक्षरे महादेवः सर्वदा सुप्रतिष्ठितः ॥ ३८ ॥

अधिभूते प्रतिमात्राह्मणादौ । अध्यात्मे स्वस्वरूपे च ॥ ३४ ॥ ३५ ॥ ॥ ३६ ॥ ३७ ॥ ३८ ॥

महादेवस्य सांनिध्याद्व्यष्टिभूताश्च देवताः ।
तत्र प्रतिष्ठिता एव वृक्षे शाखा यथा स्थिताः ॥ ३९ ॥

व्यष्टिभूता इति । निरस्तसमस्तोपाधिकः परमात्मा सर्वसाधारण्यात्समष्टिः। तस्यैवोपाधिपरिकल्पितभागा व्यष्टयः । समष्टिव्यष्टिरूपे निदर्शनमुक्तम् । वृक्ष इति ॥ ३९ ॥

वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा ॥ ४० ॥
शिवे रुद्रजपात्प्रीते प्रीता एवान्यदेवताः ।
अतो रुद्रजपादेव भुक्तिमुक्ती प्रसिध्यतः ॥ ४१ ॥

समष्टिसेवया व्यष्टिफललाभे निदर्शनमाह— वृक्षस्य मूलेति ॥ ४० ॥४१॥

माया माहेश्वरी शक्तिः सत्त्वादिगुणभेदतः।
जीवमाक्रम्य संसारे भ्रामयत्यनिशं द्विजाः ॥ ४२ ॥

माया माहेश्वरीति । यदत्र वक्तव्यं तत्प्रथमखण्डे द्वितीयाध्याये " मन्मायाशक्तिसंकल्पम्" इत्यत्रोक्तम् । सत्त्वादिगुणभेदतो गुणवैचित्र्येण रजस्तमोमलिनसत्त्वप्राधान्येनेत्यर्थः । आक्रम्येति । मायाक्रान्तो हि जीव इत्युक्तम् ॥४२॥

सत्त्वात्सुखं च ज्ञानं च वैराग्यं शौक्ल्यमेव च ॥ ४३ ॥
दुःखप्रवृत्तिः कामश्च लौहित्यं रजसो भवेत् ।
मोहो भ्रान्तिस्तथाऽऽलस्यं कार्ष्ण्यं च तमसो भवेत् ॥४४॥

१ ग. सर्वाधारत्वात्स° । २ ग. °रूपेण । नि° । च. °रूपेति द्र° ।

एवमुत्तमरूपाश्च पदार्थाः सत्त्वसंभवाः ।
तथा मध्यमरूपाश्च पदार्था राजसाः स्मृताः ॥
विहीनास्तामसा एव पदार्थाः संग्रहेण तु ॥ ४५ ॥

सत्त्वादिगुणत्रयं कार्यद्वारा व्यवच्छिनत्ति—सत्त्वात्सुखं चेति ॥ ४३ ॥ ४४ ॥ ४५ ॥

अतो मायामयः साक्षात्संसारः सर्वदेहिनाम् ।
स शिवज्ञानमात्रेण सद्य एव निवर्तते ॥ ४६ ॥

अतो मायामय इति । यतो मायागुणैः सत्त्वरजस्तमोभिरनुगंतोऽत इत्यर्थः ॥ ४६ ॥

ज्ञानयज्ञेन विप्राणामास्तिकानाममानिनाम् ।
जायते परमं ज्ञानं नान्यथा मुनिपुंगवाः ॥ ४७ ॥

ज्ञानयज्ञेनेति । ज्ञानयज्ञेन परं ब्रह्म साक्षाज्जायते । अन्यथा तु शब्दत एव बुध्यत इत्यर्थः ॥ ४७ ॥

यज्ञश्च द्विविधः प्रोक्तः स्थूलसूक्ष्मविभेदतः ।
कर्मयज्ञः समाख्यातः स्थूलः सर्वार्थवित्तमैः ॥
ज्ञानयज्ञो भवेत्सूक्ष्मः साक्षात्संसारबाधकः ॥ ४८ ॥
कर्मयज्ञाभिधः स्थूलस्त्रिप्रकारो व्यवस्थितः ।
कायिको वाचिकश्चैव मानसश्चेति सुव्रताः ॥ ४९ ॥
नित्यनैमित्तिकाद्यस्तु कायिकः परिकीर्तितः ।
मन्त्राणां जपरूपस्तु वाचिको वेदवित्तमाः ॥ ५० ॥
देवताध्यानरूपस्तु मानसः परिकीर्तितः ।
कायिकादधिकः प्रोक्तो वाचिको मतिमत्तमैः ॥ ५१ ॥
मानसो वाचिकाच्छ्रेष्ठो मानसो बहुधा स्मृतः ।
ध्येयभेदेन सोऽप्येवमुत्तमाधमभेदतः ॥ ५२ ॥
द्विविधस्तत्र देवस्य शिवस्य ध्यानमुत्तमम् ।
विष्ण्वादीनां तु देवानां ध्यानं चाधममिष्यते ॥ ५३ ॥

१ क. ग. घ. °गतमत । २ घ. °ज्ञानं सा° । ३ ख °क्ष्मप्रभे° ।

अतो मोक्षार्थिभिः प्राज्ञैः शिव एकः शिवंकरः ।
ध्येयः सर्वं परित्यज्य शिवादन्यं तु दैवतम् ॥ ५४ ॥

परमवेदार्थसङ्क्षेन कथितस्य ज्ञानयज्ञस्योत्कर्षसूचनाय यज्ञान्तराणि विभागेनानुक्रामति—यज्ञश्च द्विविध इति । स्थूलफलत्वेन कर्मयज्ञस्य स्थौल्यम् । सूक्ष्मविषयत्वेन ज्ञानयज्ञस्य सौक्ष्म्यम् ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ॥ ५३ ॥ ५४ ॥

अस्मिन्नर्थे श्रुतिः साध्वी समाम्ना वेदवित्तमाः ॥ ५५ ॥
अपक्वचित्तैर्मोक्षार्थं देवा विष्ण्वादयोऽपि च ।
ध्येयाः पक्वैः शिवो ध्येयः साक्षात्संसारमोचकः ॥ ५६ ॥

अस्मिन्नर्थे श्रुतिरिति । समाम्ना पर्यवसिता

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति" ॥

इति श्रुतिः शिवज्ञानमेव वदन्ती ध्यानमन्तरेण ज्ञानासंभवात्, ज्ञानस्य ध्यानद्वारस्य मुक्तिसाधनत्वे पर्यवसितेत्यर्थः ॥ ५५ ॥ ५६ ॥

रुद्रं विश्वाधिकं विष्णुं ब्रह्माणं चान्यमेव वा ।
समं संचिन्तयन्साक्षात्संसारे परिवर्तते ॥ ५७ ॥
महापापवतां पुंसां पूर्वजन्मसु सुव्रताः[1] ।
विष्णुः सर्वाधिको भाति न साक्षात्परमेश्वरः ॥ ५८ ॥
विष्णुः सर्वाधिको भाति नारकी स न संशयः ।
विष्णुः सर्वाधिको नान्य इति चिन्तयतां नृणाम् ॥ ५९ ॥
नास्ति संसारविच्छित्तिः कल्पकोटिशतैरपि ।
तेषां नैव च मोक्षाशा कल्पकोटिशतैरपि ॥ ६० ॥
ब्रह्मादिदेवतानां च विश्वाधिक्यं वदन्ति ये ।
अधोमुखोर्ध्वपादास्ते यास्यन्ति नरकार्णवम् ॥ ६१ ॥
विष्णोर्वा ब्रह्मणो वाऽपि तथैवान्यस्य कस्यचित् ।
साम्यं वदन्ति ये तेषां न संसाराद्विमोक्षणम्[2] ॥ ६२ ॥

---

१ ग. एव शि° । २ ग. °ताः ॥ शिवः स° । ३ ङ. °मोचनम् ॥ ६२ ॥

रुद्रमिति । " विश्वाधिको रुद्रो महर्षिः " इति श्रुतिः । अनया श्रुत्या रुद्रस्य सर्वेभ्योऽप्याधिक्यस्योद्घोष्यमाणस्यापि कैश्चिदज्ञाने कारणमाह— महापापेति । सर्वाधिको न भातीत्यन्वयः ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ॥ ६१ ॥ ६२ ॥

विष्णुप्रजापतीन्द्रादिदेवतासु मुनीश्वराः ।
विहीनासु शिवं पश्यन्मुच्यते भवबन्धनात् ॥ ६३ ॥
शिवरुद्रमहादेवब्रह्मेशानादिनामतः ।
विष्णवादिदेवताः पश्यन्क्रमान्मुच्येत बन्धनात् ॥ ६४ ॥
शिवं सर्वोत्तमं विप्रा हरिविष्णवादिनामतः ।
चिन्तयन्घोरसंसारे पतत्येव न संशयः ॥ ६५ ॥
यथाऽमात्यादिबुद्धिस्तु राज्ञि बाधाय देहिनाम् ।
तथा विष्णवादिबुद्धिस्तु शिवे बाधाय देहिनाम् ॥ ६६ ॥
अतः शिवः सदा ध्येयः प्राधान्येन मनीषिभिः ।
ज्ञानयज्ञात्परो यज्ञो नास्ति नास्ति श्रुतौ स्मृतौ ॥ ६७ ॥
ज्ञानयज्ञैकनिष्ठस्य न किंचिदपि दुर्लभम् ।
महापापवतां नृणां ज्ञानयज्ञो न रोचते ६८ ॥
प्रत्युत ज्ञानयज्ञस्तु प्रद्वेष्यो भासते स्वतः ।
विशुद्धं ज्ञानमुत्पन्नं यस्य तस्य महात्मनः ॥ ६९ ॥
शिवरुद्रमहादेवब्रह्मेशानादिनामसु ।
रुद्रमूर्तिषु सर्वासु शान्तिदान्त्यादिसाधने ॥ ७० ॥
तिर्यक्त्रिपुण्ड्रे रुद्राक्षे तथा भस्मावगुण्ठने ।
शिवलिङ्गस्य पूजायां शिवस्थानेषु सुव्रताः ॥ ७१ ॥
प्रियबुद्धिः प्रजायेत स्वभावादेव सर्वदा ।
यस्य विज्ञानिनस्तेषु प्रद्वेषो वाऽपि जायते ।
उपेक्षा वा न स ज्ञानी पशुर्विज्ञानवञ्चकः ॥ ७२ ॥

---

१ क. ख. घ. निहीनासु । २ घ. °धनैः ॥ ७० ॥ ३ क. ख. ग. घ. °वस्य लिङ्गपू° । ४ क. प्रद्वेषश्चापि ।

उत्कृष्टेऽपकृष्टबुद्धिरनर्थाय । अपकृष्टे पुनरुत्कर्षबुद्धिः श्रेयसे च ब्रह्मदृष्टिरुत्कर्षादित्यतो विष्ण्वादिषु शिवबुद्धिर्युक्तेत्याह—विष्णुप्रजापतीति ॥ ६३ ॥ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥

सर्वत्र नास्ति विद्वेषः साध्यसाधनपूर्वके ॥
साक्षाद्विज्ञानिनो विप्रा उपेक्षाबुद्धिरेव हि ॥ ७३ ॥

लौकिकक्रियाकलापवत्पूजाप्रपञ्चोऽपि चित्तैकाग्र्यविरोधेन ज्ञानप्रतिबन्धक इति तत्प्रद्वेषिणः कथं विज्ञानवञ्चकतेत्यत आह—सर्वत्र नास्तीति । लौकिकेऽपि हि क्रियाकलापे, उपयोगमपश्यतो ज्ञानिन उपेक्षैव न त्वभियोगेनानुष्ठानमित्येतावन्न तु प्रद्वेषः । न हि शिवः सर्वं जगदिति पश्यन्कचिदपि कथं प्रद्विष्यात् । अतो द्विषाणो विज्ञानवञ्चक एवेत्यर्थः ॥ ७३ ॥

तथाऽप्युक्तेषु सर्वेषु शैवेषु द्विजपुंगवाः ।
प्रियबुद्धिः स्वतो भाति बाधिताकाररूपतः ॥ ७४ ॥

तर्हि शिवपूजास्तुत्यादावपि विदुष उपेक्षैव । नन्वुपेक्षेत्याह—तथाऽपीति । उक्तेषु भस्मावगुण्ठनरुद्राक्षधारणशिवपूजातन्मन्त्रजपादिषु तत्प्रसादबलादेव लब्धविज्ञानस्याकृतघ्नस्य तत्र कथं प्रियबुद्धिर्न जायत इत्यर्थः । न हि शिवाद्वैतविज्ञानाविरोधः स्याद्द्वैतस्फुरणादिति चेत्तत्राऽऽह—बाधिताकारेति । रज्जुरियं नायं सर्प इति रज्जुतत्त्वं साक्षात्कुर्वन्तं सर्पभ्रमनिवृत्तावपि संस्कारबलादग्धपटन्यायेन बाधितसर्पावभानानुवृत्तिर्यथा तत्त्वावबोधं न प्रतिबध्नाति, एवं प्राक्तनसंस्कारबलादनुवर्तमानस्यापि शिवपूजादेः शिवसाक्षात्कारं प्रति न प्रतिकूलतेत्यर्थः ॥ ७४ ॥

बाधिताकारतो वाऽपि यस्य बुद्धिः स्वतो न हि ।
एष्वसौ नैव विज्ञानी भ्रान्त एव न संशयः ॥ ७५ ॥

शिवपूजादौ यस्य बाधिताकारानुवृत्तिस्तस्य विद्यां प्रति न केवलं न प्रातिकूल्यं प्रत्युताऽऽनुकूल्यमित्याह—बाधिताकारतो वाऽपीति । एषु शिवपूजादिषु ॥ ७५ ॥

कर्मावलम्बनेनैव केचिज्जीवन्ति मानवाः ।
ज्ञानावलम्बनेनैव जीवन्त्यन्ये विमोहिताः ॥ ७६ ॥

---

१ घ. °पूर्वकैः ॥ २ ग. प्रद्वेषात् ।

अनेककोटिभिः कल्पैर्ज्ञानयज्ञस्य वैभवम् ।
मया मद्गुरुणाऽन्यैर्वा न शक्यं परिभाषितुम् ॥ ७७ ॥
तथाऽपि मुनयः श्रद्धामात्रमासाद्य केवलम् ।
प्रशंसन्ति महाभाग्याज्ज्ञानयज्ञस्य वैभवम् ॥ ७८ ॥
अशक्ता अपि विज्ञातुं ज्ञानयज्ञस्य वैभवम् ।
श्रद्धया स्वाधिकारेण वदन्ति ज्ञानवैभवम् ॥ ७९ ॥

केचिदिति । अविदितज्ञानमार्गा जीवन्ति जन्मपरंपरासु न तु कदाचिन्मुच्यन्ते । श्रूयते हि—

" अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः ।
यत्कर्मिणो न प्रवेदयन्ति रागात्तेनाऽऽतुराः क्षीणलोकाश्च्यवन्ते " इति ।

ज्ञानावलम्बनेनेति । ज्ञानपरिपाकात्प्रागपरिपक्वमपि ज्ञानमेव पर्याप्तमिति मोहेन कर्म त्यक्तवन्त इत्यर्थः । श्रूयते हि—" ततो भूय इव ते तमो य उ विद्यायाꣳरताः " इति । तेषां हि काम्यकर्मत्यागान्न स्वर्गादिभोगः । नित्याद्यकरणनिमित्तप्रत्यवायप्रतिबन्धाद्विद्यापरिपाकानुदयाद्भोगमोक्षमार्गद्वयभ्रष्टास्ते भवन्तीत्यर्थः ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥

पुनः कणादकपिलप्रभृतीनामपि स्वतः ।
दोषो न विद्यते ज्ञाने विरोधेऽपि परस्परम् ॥ ८० ॥

अशक्तानपि श्रद्धया स्वाधिकारेण ज्ञानवैभवं वदतः पुरुषानुदाहरति—पुनः कणादेति । वस्तुनि विकल्पानुपपत्त्या परस्परविरोधिनोरुभयोः प्रामाण्यासंभवादन्यथाप्रमाऽवश्यंभाविन्यपि तद्वादिनां श्रद्धापूर्वमभिधानादेव न दोष इत्यर्थः ॥ ८० ॥

तैस्तैर्निरूपितं ज्ञानं वस्तुतो नैव दर्शनम् ।
उपचारेण विज्ञानं श्रद्धापूततया द्विजाः ॥ ८१ ॥

तर्हि किं तदपि तत्त्वदर्शनं नेत्याह—तैस्तैरिति । विज्ञानमात्रं तु भवति न पुनरपवर्गोपयोगि ज्ञानमित्यर्थः । " मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः " इत्यमरः ॥ ८१ ॥

---

१ क. ख. ग. °ग व° ।

व्यासः साक्षाच्छिवज्ञानी शिवस्यैव प्रसादतः ॥ ८२ ॥
तत्प्रसादादहं साक्षाच्छिवज्ञानी न संशयः ।
मया तत्संग्रहेणैव प्रोक्तं युष्माकमादरात् ॥ ८३ ॥
मत्प्रसादेन विज्ञानयज्ञवैभवमास्तिकाः ।
ज्ञातवन्तः कृतार्थाश्च यूयं सत्यमिदं वचः ॥ ८४ ॥
इतः पूर्वं मयाऽन्येषां नायमर्थोऽभिभाषितः ।
व्यासो मम गुरुः पूर्वं रहस्यं मेऽभ्यभाषत ॥ ८५ ॥

कस्तर्हि ज्ञानवान्कथं वा तदीयज्ञानस्य कणादादिवन्न विज्ञानमात्रता तत्राऽऽह—व्यास इति ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

सारात्सारतरः साक्षादयमर्थः प्रभाषितः ।
गोपनीयस्त्वयं नित्यं भवद्भिः परमास्तिकैः ॥ ८६ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे परापरवेदार्थविभागो नाम
द्वितीयोऽध्यायः ॥ २ ॥

अतत्त्वभूतः श्रद्धामात्रेणोक्तोऽपि न सारः । अयं तु तत्त्वभूतोऽपि सार इत्यर्थः ॥ ८६ ॥

इति श्रीसूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे परापरवेदार्थविभागो नाम द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

—:+*+:—

सूत उवाच—

अथातः संप्रवक्ष्यामि कर्मयज्ञस्य वैभवम् ।
कर्मयज्ञस्त्रिधा प्रोक्तो मुनिभिः सूक्ष्मदर्शिभिः ॥ १ ॥

उद्देशानन्तरं तत्क्रमेण यतः कर्मयज्ञो जिज्ञासितः, अतस्तद्वैभवं वक्तुं प्रतिजानीते—अथात इति ॥ १ ॥

---

१ ङ प्रकाशितः ।

एकः काम्योऽपरो नित्यस्तथा नैमित्तिकोऽपरः ।
प्राधान्येन फलं शुद्धिरार्थिकी काम्यकर्मणः ॥ २ ॥
प्राधान्येन फलं शुद्धिर्नित्यस्य फलमार्थिकम् ।
केवलं प्रत्यवायस्य निवृत्तिरितरस्य तु ॥ ३ ॥

काम्यकर्मनिमित्तफलप्राप्तिः प्रधानम् । अर्थाच्चित्तशुद्धिरपि भवति । यदाहुः—"विरञ्चिराहादिदेहेषु न ह्यैन्द्रं भुज्यते पदम्" इति । नित्यस्य तु सत्त्वशुद्धिरेव प्राधान्येन फलम् । नैमित्तिकस्य प्रायश्चित्तादेरुपात्तदुरितक्षयः फलमित्यर्थः ॥ २ ॥ ३ ॥

काम्यरूपेषु यज्ञेषु यतन्ते श्रद्धया सह ।
मन्दभाग्या नरा विप्रा नित्यनैमित्तिकात्मके ॥
महाभाग्याः प्रवर्तन्ते तेषां मुक्तिरयत्नतः ॥ ४ ॥

परम्परयाऽप्यपवर्गानुपयोगिषु प्रत्युत तत्प्रतिबन्धकेषु काम्ययज्ञेषु ये प्रवृत्तास्ते मन्दभाग्या इत्याह- काम्यरूपेष्विति । ये तु नित्यनैमित्तिकेषु परम्परयाऽपवर्गोपयोगित्वमभिसंधाय प्रवर्तन्ते ते क्रमेण मुच्यन्त इत्याह—नित्यनैमित्तिकेति ॥ ४ ॥

विध्युक्तमिति बुद्ध्या ये वर्तन्ते श्रद्धया सह ।
एषु यज्ञेषु सर्वेषु तेषां मन्दफलं भवेत् ॥ ५ ॥

ये तु तेष्वेवाभिसंधिमात्ररहिता विध्युक्तमित्येव प्रवर्तन्ते ते मन्दफलभागिन इत्याह—विध्युक्तमिति ॥ ५ ॥

शिवाराधनबुद्ध्या ये यतन्ते श्रद्धया सह ।
एषु यज्ञेषु ते शीघ्रं विमुक्तिफलमाप्नुयुः ॥ ६ ॥

ये तु तान्ये(ने)वेश्वराराधनबुद्ध्या कुर्वन्ति तेऽत्यन्तनिष्कामतया बुद्धिशुद्ध्यतिशयवन्तस्त्वरया मुच्यन्त इत्याह—शिवाराधनेति ॥ ६ ॥

अकर्ताऽहमभोक्ताऽहमसङ्गोऽहमहं शिवः ।
इति विज्ञाय मानेन स्वात्मानं तर्कतोऽपि च ॥ ७ ॥

---

१ ख. °म्यकर्मणः फ° । ग. °म्यकर्मणो निमित्तफ° । घ. °म्यकर्मणि फ° । २ ङ. °त्मकेः । भ° । ३ क. ख. ङ. येषु । ४ क. ख. ङ. येषु । ५ च. वा ।

कर्मयज्ञेषु ये नित्यं यतन्ते श्रद्धयाऽन्विताः ।
ते महादेवविज्ञानमपरोक्षमवाप्नुयुः ॥ ८ ॥
यज्ञरूपं महाविष्णुं यज्ञे पश्यन्ति ये द्विजाः ।
ते तु विज्ञानमासाद्य कैवल्यं ज्ञानमाप्नुयुः ॥ ९ ॥
प्राधान्येन महादेवो यज्ञैरिज्यो न चापरः ।
इति ज्ञात्वा यजन्ते ये तेऽपि विज्ञानमाप्नुयुः ॥ १० ॥

अकर्त्रादिरूपमौपनिषदमात्मतत्त्वं मानेन तदनुग्राहकतर्केण च विज्ञाय कर्मयज्ञं कुर्वतः शिवसाक्षात्कारः फलमित्याह—अकर्ताऽहमिति ॥ ७ ॥ ८ ॥ ॥ ९ ॥ १० ॥

विष्णुं ब्रह्माणमिन्द्रं वा देवतान्तरमेव वा ॥ ११ ॥
प्रधानबुद्ध्या ये यज्ञैर्यजन्ते मोहतोऽपि वा ।
ते यान्ति नरकं घोरं यावदाभूतसंप्लवम् ॥ १२ ॥

अथवा यज्ञात्मको विष्णुरित्यभिसंधाने विज्ञानं भवति । प्राधान्येन शिव एव यष्टव्यस्तदङ्गत्वेन ब्रह्मविष्ण्वादयः । शिवादन्यस्य तु प्राधान्येन यष्टव्यत्वाभिसंधाने नरक एवेत्याह—विष्णुमित्यादि । मोहतोऽपि वेति । मोहतः प्रमादादिना । प्रमादात्तुच्छं कृत्वा झटिति तत्त्यागे न दोष इत्यर्थः ॥ ११ ॥ ॥ १२ ॥

नामतश्चार्थतो यस्तु महादेवो महेश्वरः ।
स एव साम्बः सर्वज्ञ इज्यः सर्वमहामखैः ॥ १३ ॥

इत्थंभावे कारणमाह—नामत इति ॥ १३ ॥

यानि लोकेऽनिषिद्धानि कर्माण्यविहितानि च ।
तानि शंभोर्महापूजेत्येतज्ज्ञानं महामखः ॥ १४ ॥

यानि लोकेऽनिषिद्धानीति । अनिषिद्धान्यविहितानि च निमेषकण्डूयनादीन्यपि शिवाराधनबुद्ध्या कृतानि फलन्तीत्यर्थः ॥ १४ ॥

यानि कर्माणि सर्वाणि निषिद्धानि श्रुतौ स्मृतौ ।
तानि चाऽऽराधनं शंभोरिति ज्ञानं महामखः ॥ १५ ॥

---

१ क. ख. ग. ङ. च. °त्तु कृ°। २ क. ग. झडिति । ३ ख. °र्माणि वि°। ४ च. °नि नि°।

किंच निषिद्धान्यप्येवमाह—यानि कर्माणीति ॥ १५ ॥

ईश्वरार्थधिया पापान्यपि कर्माणि कुर्वताम् ।
भवन्ति पुण्यान्यत्यन्तं सत्यमेव न संशयः ॥ १६ ॥

तत्र कारणमाह—ईश्वरार्थेति ॥ १६ ॥

आर्द्रकाष्ठं महानग्निः शुष्कं कृत्वा दहेद्यथा ।
तथेश्वरधिया पापं शुद्धविज्ञानदं भवेत् ॥ १७ ॥

तत्रोदाहरणमाह—आर्द्रकाष्ठमिति ॥ १७ ॥

विध्युक्तकर्मनिष्ठानामनिष्टस्य करणं तु यत् ।
सोऽपि साक्षान्महायज्ञः सम्यग्ज्ञानस्य कारणम् ॥ १८ ॥
विध्युक्तकर्मनिष्ठानामनिष्टकरणं तु यत् ।
तन्महापातकं प्रोक्तं संसारस्य प्रवर्तकम् ॥ १९ ॥

यत्पुनर्वैधं कर्म तत्र विधु दक्तव्यमित्याह—विध्युक्तेति । विध्युक्तकर्मनिष्ठानां यदनिष्टं तत्करणकर्तृणां संसारापादनमित्यर्थः ॥ १८ ॥ १९ ॥

दुराचारिषु सर्वेषु विना दोषस्य दर्शनम् ।
उपेक्षाबुद्धिरुत्पन्ना सा तस्यायं महामखः ॥ २० ॥

दुराचारिष्वपि दोषदर्शनमकृत्वोपेक्षैव कार्या । उक्तं हि पतञ्जलिना "मैत्रीकरणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" इति । तदाह—दुराचारिष्विति । यस्यैं यादृश्युपेक्षाबुद्धिः सा तस्य महामख इत्यर्थः ॥ २० ॥

बुद्धार्हतादिमार्गस्थे देवताप्रतिमासु च ।
देवताबुद्धिमात्रं यत्सोऽपि यज्ञः प्रकीर्तितः ॥ २१ ॥

बुद्धार्हतादिमार्गस्थे पुरुषे तदीयदेवताप्रतिमास्वप्यादरमकृत्वा देवताबुद्धिमात्रं समबुद्धित्वादविरुद्धं "शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" इति न्यायेनेत्याह—बुद्धेति ॥ २१ ॥

वैदिकं तान्त्रिकं हित्वा मार्गं स्वप्रज्ञया द्विजाः ।
यत्र यो देवताबुद्धिं करोति श्रद्धया सह ॥ २२ ॥

---

१ च. 'र्थधि' । २ ङ. 'र्थमिति । ३ ज. 'कर्मानुश' । ४ क. ग. ङ 'ज्ञा यत्' 'ज्ञां' । ५ च. ग यस्यां' । ६ ग. घ. 'स्य ईदृ' ।

सोऽपि यज्ञ इति प्रोक्तो मया वेदार्थवित्तमाः ।
श्रद्धया सहितं सर्वं श्रेयसे भूयसे भवेत् ॥ २३ ॥

वेदेष्वागमेषु वाऽऽज्ञप्तमपि यत्किंचिदाराधनं यज्ञः किं तत्तन्त्रोक्तमित्याह—वैदिकं तान्त्रिकमिति ॥ २२ ॥ २३ ॥

स्वबुद्ध्या वेदशास्त्रोक्ते तन्त्रोक्तेऽपि द्विजोत्तमाः ।
आस्तिक्यं देवताबुद्धिरपि लाभाय देहिनाम् ॥ २४ ॥

स्वबुद्ध्यधीने प्रतिमादौ शास्त्रोक्ते च श्रद्धया विहिते श्रेयसे भवति ॥२४॥

फलेषु तारतम्यं तु दृश्यते सूक्ष्मदर्शने ॥ २५ ॥
कायिकः कर्मयज्ञस्तु कथितः संग्रहेण तु ।
भवन्तोऽपि महायज्ञं कायिकं कुरुत द्विजाः ॥ २६ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे कर्मयज्ञवैभवनिरूपणं नाम तृतीयोऽध्यायः ॥ ३ ॥

तावन्मात्रमपि पर्याप्तं चेत्किमिति प्रागुक्तनियमविशेषादेरित्यत आह- फलेष्विति ॥ २५ ॥ २६ ॥

इति श्रीसूतसंहिताटीकायां तात्पर्यदीपिकाख्यायां चतुर्थे यज्ञवैभवखण्डे कर्मयज्ञवैभवनिरूपणं नाम तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

श्रीसूत उवाच—

अथाहं वाचिकं यज्ञं वक्ष्यामि श्रद्धया सह ।
परात्परतरात्तस्माच्छिवाच्चैतन्यलक्षणात् ॥ १ ॥
स्वशक्तिसहितादेव द्विजा ज्योतिर्मयः परः ।
शब्दः सूक्ष्मः स्वभावेन प्रादुरासीदखण्डितः ॥ २ ॥

उद्देशक्रमानुसारेण कायिकयज्ञानन्तरं वाचिकयज्ञं वक्तुं प्रतिजानीते—अथाहमिति । तत्र प्रथमतो वागुत्पत्तिमाह—परात्परेति । यदस्मिन्नध्याये

१ क. ग. ङ. च. °श्रमं° । २ ग. °ते मन्त्रो° । ३ ग. तत्र ता° । ४ घ. °हितो हें° । ५ च. °तिर्महेश्वरः ।

वक्तव्यं तत्सर्वं प्रथमस्य शिवमाहात्म्यखण्डस्य पञ्चमे शक्तिपूजाध्याये * "मातृका च त्रिधा प्रोक्ता" इत्यस्य श्लोकस्य व्याख्याने प्रपञ्चितं तदेवेह तत्र तत्र प्रत्यभिज्ञाप्यते । अधिकश्चांशो विधरिष्यते । विमर्शरूपतमोविषयभावनिरन्तराश्चिदंशः परो बिन्दुः स एवेश्वरः । तस्मात्परतरो मायातीतो निष्कलरतरमानिष्कलात्परतराद्धोदीरितरूपः स्वमायाशक्तिविशिष्टचैतन्यज्योतीरूपो बिन्दुरूपाभिधेयः पर ईश्वरो जात इत्यर्थः । तदुक्तमागमे—

" अथोत्पत्तिं प्रवक्ष्यामि जातानां सर्वसंहतौ ।
एक एव शिवस्त्वासीत् परमानन्दलक्षणः ॥
जगदुत्पत्तिहेत्वर्थं निष्कलात्परमाच्छिवात् ।
समुद्भूतः परस्तस्मात् " इति ।

तस्मात्परबिन्दुशब्दाभिधेयादचिदंशो बीजं चिदचिन्मिश्रांशो नादश्चिदंशोऽपरो बिन्दुरिति त्रिधा विभागसमये सूक्ष्मः शब्दो जात इत्याह—शब्दः सूक्ष्म इति । अखण्डित इति मूलकारणस्य विभज्यमानस्य बिन्दोः सर्वगतत्वात्तदात्मकतया सर्वत्रानुस्यूत इत्यर्थः । तथा सर्वगतस्यापि वैखरीरूपशब्दवाक्ये श्रोत्राग्राह्यत्वमेव सूक्ष्मत्वम् । इन्द्रियागोचरत्वे कथं तद्वभास इत्यत आह—स्वभावेन प्रादुरासीदिति । स्वप्रकाशबिन्दुकार्यतया तदात्मकत्वेन स्वयमपि स्वप्रकाशत्वस्वभावेन प्रादुर्भावः । एष एव शब्दः स्वप्रकाशत्वात्सर्वगतत्वाज्जगत्कारणतादात्म्याच्च शब्दब्रह्मेत्युच्यते ॥ १ ॥ २ ॥

स शब्दः पुनराधारे प्राणिनामास्तिकोत्तमाः ।
पिण्डीभूततयाऽऽयाति तप्तजाम्बूनदप्रभः ॥ ३ ॥

तस्यैव शब्दब्रह्मणः परावाग्रूपलक्षणदेशाविशेषमाह—स शब्द इति । तस्य सर्वगतस्यापि प्राणिनामर्थविवक्षाहेतुकप्रयत्नजानितपवनसंबन्धनिबन्धना मूलाधारलक्षणप्रदेशविशेषे याऽभिव्यक्तिः सा पिण्डीभावस्तयैवाभिव्यक्तस्वप्रकाशस्यापि तस्य यो वैशद्यातिशयोऽस्वप्रकाशरूपतासाम्याज्जडप्रकाशेन प्रसिद्धेन तप्तजाम्बूनदरूपेणोपमीयते—तप्तेति । तत्र पिण्डी-

* ङ पुस्तके 'मातृका त्रिविधा प्रोक्ता' इति विद्यते । शिवमाहात्म्यखण्डस्य पञ्चमाध्याये त्विदमेव वाक्यं मूले " मातृका च त्रिधा स्थूला सूक्ष्मा सूक्ष्मतराऽपि च " इति वर्तते । अतोऽयं वर्णविशेषश्चिन्त्यः ।

१ क. ख. ग. घ. च. ज्योतिरूपो। २ ङ. °शक्त्वस्व°। ३ ङ. °शक्त्वा°। ४ ख. °णदृशा°। ५ क. °पणमा°। ६ क. ग. घ. ङ. च. °ति। पिण्डीभूततयेति। त°। ७ ङ. °विषया°। ८ ङ. °स्तस्यैवा°। ९ क. ख. ग. घ. ङ. च. °स्य वै°। १० क. ग. ङ. °शयालयो°। ११ च. पिण्डभा°।

भावदशोपहितो मूलाधारस्थस्वप्रकाशो निस्पन्दः शब्दः परा वागित्युच्यते । स वा मूलाधारादानाभि विमर्शरूपेण मनसाऽभिव्यक्तो वैशद्यातिशयदशापन्नसामान्यस्पन्दनरूपः पश्यन्ती वागित्युच्यते । एते परापश्यन्त्यौ स्वप्रकाशत्वमनोविषयत्वाभ्यां निस्पन्दत्वसामान्यस्पन्दत्वाभ्यां वा पृथक्त्वेन क्वचिन्निर्दिश्येते । इह तु विशेषस्पन्दविरहसाम्येनैकीकृत्य पिण्डीभावजाम्बूनदप्रभौभावाभ्यां विशिष्टैकस्वरूपतया निर्दिश्येते इति मन्तव्यम् । अनेनैवाभिप्रायेण "मातृका च त्रिधा स्थूला" इत्यत्र परापश्यन्त्यौ सूक्ष्मेतररूपत्वेनैकीकृत्य त्रैविध्यं वर्णितमिति ॥ ३ ॥

स पुनर्ब्रह्मनाड्या तु प्रविश्य हृदयाम्बुजम् ।
विभक्तः सूक्ष्मरूपेण भाति वह्निप्रभः स्वतः ॥ ४ ॥

तस्यैवेदानीं नाभेर्हृदयं प्राप्तस्य निश्चयात्मिकया बुद्ध्या विषयीकृतस्य विशेषस्पन्दरूपस्य मध्यमावाग्रूपतामह--स पुनर्ब्रह्मेति । ब्रह्मनाड्या सुषुम्नया विभक्त इति तत्तदर्थविशेषविषयशब्दरूपविशेषोल्लेखिन्या बुद्ध्या निश्चित्य विकल्प्यते विशेषस्पन्दरूप इत्यर्थः । अनेन मध्यमायाः परापश्यन्तीभ्यां विशेषो वर्णितः । वैखरीतो विशेषमाह--सूक्ष्मरूपेणेति । परश्रोत्रग्रहणायोग्यत्वं सूक्ष्मत्वम् । स्वत इति स्वगोचरया निश्चयात्मिकया बुद्ध्येत्यर्थः । आत्मीयवाचकात्स्वशब्दाद्वन्तात्तृतीयार्थे सार्वविभक्तिकस्तसिः । "तसिलादिष्वाकृत्वसुचः" इति ध्रुवद्भावः । वह्निप्रभ इति । पश्यन्तीवाग्रूपादपि वैशद्यातिशयो मध्यमाया वाच उच्यते । वह्निप्रभा हि बाह्यतमोपहरणसमर्था । तदसमर्थं जाम्बूनदप्रभत्वमिति विशेषः ॥ ४ ॥

ब्रह्मरन्ध्रं पुनः साक्षाच्छिवस्य स्थानमुत्तमम् ।
पिण्डीभूततया प्राप्य प्रकाशानन्दलक्षणे ॥ ५ ॥
तत्र संनिहिते शंभौ विश्रान्तिं लभते स्वतः ।
आधारे परशक्तेस्तु स्थाने शब्दः प्रकाशितः ॥ ६ ॥
परमेकाक्षरं साक्षाद्भवत्यत्यन्तशोभनम् ।
आज्ञासंज्ञान्महःस्थानादूर्ध्वं यत्स्थानमुत्तमम् ॥ ७ ॥

वैखरीं वक्तुमारभते--ब्रह्मरन्ध्रमिति । प्रविश्येत्यनुषङ्गः । पुनरिति तु-

---

१ ब. षट्शो° । २ घ. °रस्थप्र° । घ. °रस्तु स्व° । ३ ब ज्ञयं दर्शयन्सामा° । ४ घ. °भाच्च° । ५ ख. °तारूप° । ६ म. च. °प्रभाः स्व° । ७ ख. °ति शो° । ८ ङ. स्थानच्छ° ।

शब्दार्थे । मध्यमात्स्थानाद्धृदयाद्वैखरीस्थानस्य ब्रह्मरन्ध्रस्य भेदमाह—शिवस्येति । शिवस्य साक्षात्स्थानमापरोक्ष्यस्थानम् । शिवो हि परमानन्दरूपे जगदुपादानतया सर्वगतोऽपि ब्रह्मरन्ध्र उपास्यमानोऽचिरादपरोक्षो भवति हृदयभ्रूमध्यादिषूपासनास्थानान्तरेषु संभवत्स्वपि ब्रह्मरन्ध्रे चिरादानन्दाभिव्यक्त्यतिशयादुत्तममित्युक्तम् । तथात्वे चाभ्यासवतामनुभवः श्रुतिस्मृती च प्रमाणम् । श्रूयते हि— " सैषा विदृतिर्नाम द्वारतदेतन्नन्दनम् " इति । स्मर्यते—

" मूर्ध्न्याधायाऽऽत्मनः प्राणमास्थितो योगधारणाम् ।
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः " इति ॥ ५ ॥ ६ ॥ ७ ॥

तत्रस्थोऽहं द्विजाः शब्दः सूक्ष्मैकाक्षरतामियात् ।
तृतीये परमाधारे पूरके पुण्यभाजने ॥
एकाकारत्वमापन्ने स्वभावेनाक्षरद्वयम् ॥ ८ ॥

प्रविष्टस्य कृत्यमाह—तत्रस्थ इति । द्विविधं ह्यक्षराणां स्वरूपं स्थूलं सूक्ष्मं च । स्थूलं परश्रोत्रग्रहणयोग्यं वैखरीरूपतामापन्नमकारादिक्षकारान्तवर्णतत्समभिव्याहारपदवाक्यमन्त्राद्यात्मकमनेकम् । सूक्ष्मं तु मध्यमारूपपरित्यागेन वैखरीरूपप्राप्त्यामुख्यलक्षणमेकं नादात्मकं प्रणवरूपम् । प्रणवो हि कण्ठोष्ठाद्यभिव्यङ्ग्यो बाह्यः स्थूलो नादात्मकश्च । सकलब्दोपादानभूतो मूर्धन्यभिव्यज्यमान आन्तरः सूक्ष्ममक्षरम् । तस्य चाक्षररूपप्राप्त्याभिमुख्यस्य नादात्मकता शब्द इत्यनेनोक्ता । उक्तं हि हि साम्बेन—" ओमित्यन्तर्नदति नियतं यः प्रतिप्राणशब्दो वाणी यस्मात्प्रभवति परा शब्दतन्मात्रगर्भा " इति । तस्य मूर्धनि प्राणेनाभिव्यज्यमानस्य सकलवर्णोपादानत्वं शबरस्वामिभिरुक्तम्— " नाभेरुत्थितः प्राण उरसि विस्तीर्णः कण्ठे परिवृतो मूर्धानमाहत्य परावृत्तो विविधाञ्शब्दान्व्यनक्ति " इति । अत्र च प्राणस्य नादाभिव्यञ्जकत्वम् । तदभिव्यक्तस्य तु नादस्यैव परापश्यन्तीमध्यमारूपस्य वर्णोपादानता । अत एव प्राणः शब्दान्व्यनक्तीत्युक्तं न पुनः प्ररिथत इति । उक्तो नादः प्रसूत इत्युक्तं साम्बेनैव—

---

१ ङ. °भावे त्वक्ष° । २ क. ग. च. ङ. च. °भिहा° । ३ घ. °प्राप्त्यपि° । ४ च. °मुख्य° । ५ ग. अन्यत्र । ६ ग. °ध्वादीन्य° । ७ च. प्रसूत ।

5984

" या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
वर्णानन्तः प्रकटकरणैः प्राणसङ्गात्प्रसूते ॥
तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये " इति ॥

पश्यन्तीमध्यमयोर्वैखरीकारणे नादात्मके प्रणवेऽनुगतिमाह—तृतीय इति । पश्यन्तीमध्यमास्थाननाभिहृदयापेक्षयोक्ताक्षरस्थानस्य ब्रह्मरन्ध्रस्य तृतीयत्वम् । भ्रूमध्याद्यपेक्षया वर्णितादुत्कर्षापरमाधारत्वम् । वैखरीकारणभावस्य तत्र परिपूर्णत्वात्पूरकत्वम् । सकलपुण्यफलपरमानन्दाभिव्यक्तिस्थानत्वेन च पुण्यभाजनत्वम् । अक्षरद्वयस्य तत्रैकाकारता नाम पश्यन्तीमध्यमयोरनुगतिरेव । स्वभावेन तदात्मकतया । अथवा नादात्मकस्य प्रणवस्य प्रभावोऽयमुपवर्ण्यते । इत्थं नामायं प्रणवो महाप्रभावः । यदिहैवोत्तरत्र वर्णयिष्यमाणमहिम्नोऽजपामन्त्रस्यावयवभूतं हमिति स इति चाक्षरद्वयमत्रैकाकारतामापन्नम् । तत्र हेतुः स्वभावेनेति । स्वस्मादुक्ताक्षरद्वयाद्भावेन स्वभावेनोत्पाद्येत्यर्थः । तथा हि—लीलया परिगृहीतार्धनारीश्वरावतारस्य परशिवस्य पुंभागोऽहमित्युच्यते । प्रकृतिभागः स इति । सा च प्रकृतिः पुंसा तादात्म्यमात्मनो यदाऽनुसंधत्ते तदाऽजातः सोऽहमिति परमात्ममन्त्रो जातः । तत्र च सकारहकारयोर्लोपे संधौ च कृते प्रणवो जात इति वर्णितं प्रपञ्चसारे—

" हकारः पुमानत्रोक्तः स इति प्रकृतिर्मता ।
अजपेयं मता शक्तिस्तथा दक्षिणवामतः ॥
बिन्दुर्दक्षिणभागस्थो वामभागो विसर्गकः ।
तेन दक्षिणवामाख्यौ भागौ स्त्रीपुंससंज्ञितौ ॥
बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिर्मता ।
पुंस्प्रकृत्यात्मका ह्येतत्तदात्मकमिदं जगत् ॥
पुंरूपं सा विदित्वा स्वं सोऽहंभागमुपागता ।
स एष परमात्माख्यो मनुरस्य महामनोः ॥
सकारं च हकारं च लोपयित्वा प्रयोजयेत् ।
संधिं च पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत् ॥ इति ॥ ८ ॥

---

१ ग. ङ. च. °कार° । २ क.-ख. ग.-च. °यात्यभावस्व°-। ङ. °यामावेनो°-। ३ ङ. °त्पाद्यत इत्य° । ४ च. °श्वरस्य । ५ क. ग. °दाऽक्षपा° । घ. °दाक्षरद्व्यात्सोऽह° । ङ. °दाक्षरस्यात्साक्षरपा° । ६ ग. ङ. एव । ७ घ. °पाख्यां त° ।

अयमाद्यः परो मन्त्रः सुप्रसिद्धः स्वभावतः ।
मननत्राणरूपत्वान्मन्त्र इत्यभिशब्दितः ॥ ९ ॥

इत उत्पत्त्या मातृकायास्तदुत्पत्त्या चान्येषां मन्त्राणां तदनुसंधानार्थमस्य तावदाद्यमन्त्रतामाह— अयमाद्य इति । सर्वकारणत्वात्परः । तालवादिव्यञ्जकस्थानानपेक्षत्वात्स्वभावतः सुप्रसिद्धः । अत्र मन्त्रपदं व्युत्पादयति— मननेति । तत्त्वस्य प्रबोधनेनैव संसारभयात्परित्राणे च शूरत्वान्मुख्यत्वात् । उक्तं हि— " मननात्तत्त्वपदस्य त्रायते महतो भयात् " इति मन्त्रत्वमुच्यत इति ॥ ९ ॥

मातृका परमा देवी मन्त्रमाता महेश्वरी ।
अस्मादाद्यान्महामन्त्रादाविर्भूता स्वभावतः ॥ १० ॥

यदर्थमस्य मन्त्रत्वमुक्तमिदानीं ततो मातृकाया उत्पत्तिमाह— मातृकेति । मातृकातो हि सर्वे मन्त्रा उद्भियन्त इति सा मन्त्रमाता । सा कथमस्मान्नोत्पद्येत तर्ह्येष महामन्त्रो न स्यादित्यर्थः ॥ १० ॥

अधोमुखी भवेदेका एका ऊर्ध्वमुखी भवेत् ।
तस्माच्छ्रीमातृका शुद्धा चाऽऽद्यमन्त्रात्मिकी भवेत् ॥ ११ ॥

ननूदाहृतशवरस्वामिग्रन्थे प्राणाभिव्यक्तैरेव नादैरेव वैखरीरूपवर्णोत्पादकतोक्ता । साम्बस्तोत्रे च— प्राणसङ्गात्प्रसूत इति । वैखरीरूपशब्दोत्पत्तिसमये च श्वासप्रश्वासात्मकस्य प्राणस्योपरमे व्यञ्जकप्राणाभावादनभिव्यक्तो नादः कथं वैखरीमुत्पादयेदित्यत आह— अधोमुखीति । त्रिविधं हि प्राणस्य स्वरूपम् । एकमधोमुखी भवेत्पूरकरूपमपानवृत्त्यात्मकम् । एकमूर्ध्वमुखी भवेद्रेचकरूपं प्राणात्मकम् । अनयोः प्राणापानयोः संधिः कुम्भकरूपं व्यानवृत्त्यात्मकं तृतीयम् । तत्र प्रथमद्वितीययोरभावेऽपि तृतीयेन व्यानवृत्त्यात्मकेन प्राणेनाभिव्यक्तो नादो वैखरीं वाचं जनयति । तदुक्तं छान्दोग्ये— "यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः । अथ यः प्राणापानयोः संधिः स व्यानः सा वाक् । तस्मादप्राणन्नपानन्वाचमभिव्याहरति " इति । अक्षरार्थस्तु— एकं रूपमधोमुखी भवेत् । एकमूर्ध्वमुखी भवेत् । यत्तु नाधोमुखं नोर्ध्वमुखं व्यानात्मकं प्राणस्य रूपं तद्वैखरीं जनयतो नादस्याभिव्यञ्जकमिति हृदयम् । न मुख्यत्वमुभयोः । तदभिव्यक्तनादात्मकप्रणवस्य मूलमन्त्रस्या-

१ ङ. °भिर्लक्षितः । २ क. ङ. मन्त्रतानु° । ३ च. °त्तस्य प° । ४ ग. °यत इति मन्त्रमुच्यते त इति । च. °यते भयत इति मन्त्रमु° । ५ घ. °न्त्र उच्य° । ६ ख. ग. °स्माद्रु-द्र° । ७ ग. चाऽऽद्या म° । ८ च. °भिन्ना° ।

तिरहस्यत्वेन गुरुप्रसादैकलभ्यत्वाभिप्रायेणाऽऽद्येति। तथा चाग्रे विवरिष्यति। मन्त्रात्मिकीति च्व्यन्तम्। "अस्य च्वौ" इतीकारः। शुद्धा चेति। उक्त-प्रणवकारणतया तदात्मकत्वेन ज्ञातैव सती मातृका सर्वात्मना ज्ञातत्वेन परि-शुद्धा नान्यथेत्यर्थः॥ ११॥

आद्योऽयं परमो मन्त्रः सुप्रसिद्धोऽपि सुव्रताः।
गुरूपदेशतो ज्ञेयो नान्यथा शास्त्रकोटिभिः॥ १२॥
सर्वेषामादिभूतस्य शिवस्य परमात्मनः।
स्वप्रकाशस्वरूपस्य वाचकोऽयं परो मनुः॥ १३॥
नास्त्यतः परमो मन्त्रो न समश्चास्य सुव्रताः।
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते॥ १४॥

उक्तेनातिरहस्यत्वेन वैभवमेवास्य मन्त्रस्य ज्ञेयमित्याह—आद्य इति। न केवलं रहस्य एव किंतु सुप्रसिद्धोऽपि "ओमिति ब्रह्म, ओमितीदꣳ सर्वं सर्वे वेदाः प्रणवादिका ओमिति प्रतिपद्यन्ते" इति। "एतद्वै यजुस्त्रयीं विद्याम्। वाक्संतृण्णा, ओंकार एवेदं सर्वम्" इत्यादिषु सर्वासु शाखास्वसकृद्व्यवहारात्सुप्रसिद्धः। तर्हीत्थं प्रसिद्धस्य कथं रहस्यत्वमिति चेत्। यथोदीरितशब्दब्रह्मदशाभूतपरापश्यन्तीमध्यमारूपतयाऽवतीर्य व्याना-भिव्यङ्ग्यतया सकलवर्णपदवाक्यात्मकशब्दोपादानभावेनाविद्वद्भिरि(र)तिदुर-धिगमत्वादिति ब्रूमः। श्रूयते हि—

"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति"॥

इति॥ १२॥ १३॥ १४॥

त्रिचतुर्वत्सरं शिष्यं परीक्ष्य सततं पुनः।
ईश्वरादेशतो देयो मन्त्रोऽयं मन्त्रिसत्तमैः॥ १५॥
अपरीक्ष्य प्रदानेन शीघ्रं मृत्युमवाप्नुयात्।
अर्जितः पुरुषार्थोऽपि वृथा भवति तस्य तु॥ १६॥
अस्य मन्त्रस्य वैशिष्ट्यं मया वक्तुं न शक्यते।
मुनिभिश्च तथा देवैः सर्वज्ञेन शिवेन च॥ १७॥

---

१ ग. समः स्याच्च सु°। २ ग. उक्तो ना°। ३ ग. मन्त्रस्य।

प्रसिद्धस्याप्यस्य मन्त्रस्य यदुक्तरीत्याऽतिरहस्यत्वं तदिदानीमाविष्करोति । त्रिचतुर्वर्त्सरमित्यादिशिवेन चेत्यन्तेन ॥ १५ ॥ १६ ॥ १७ ॥

मन्त्राणां मातृभूता च मातृका परमेश्वरी ॥ १८ ॥
बुद्धिस्था मध्यमा भूत्वा विभक्ता बहुधा भवेत् ।
सा पुनः क्रमभेदेन महामन्त्रात्मना तथा ॥ १९ ॥
मन्त्रात्मना च वेदादिशब्दाकारेण च स्वतः ।
सत्येतरेण शब्देनाप्याविर्भवति सुव्रताः २० ॥

परापश्यन्तीदशयोरैक्यरूप्येण स्थितायां मातृकायां बुद्धौ मध्यमादशायां बहुधा विभागप्राप्तिमाह--बुद्धिस्थेति । क्रमभेदेनेति । प्रथमतो नादात्मकप्रणवरूपेण पश्चाद्ध्यानरूपप्राणाभिव्यक्त्या कण्ठतालवादिस्थानविशेषेषु वर्णपदवाक्याद्यात्मनाऽनुक्रमभेदः । महामन्त्रात्मना नादरूपप्रणवात्मना मन्त्रात्मना, ऋग्यजुःसामादिरूपेण च ऋगादिकं च मुख्यो मन्त्रः " अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजूंषि " इति श्रुतेः । स्वतः स्वेनैव रूपेण शब्दो हि वर्णपदवाक्यात्मकः । वस्त्ववस्तुविषयाश्रिता तद्वितरथा भवत्युक्तरूपा वागेव तेनापि ॥ १८ ॥ १९ ॥ २० ॥

यथा परतरः शंभुर्द्विधा शक्तिशिवात्मना ।
तथैव मातृका देवी द्विधाभूता भवेत्स्वयम् ॥ २१ ॥
एकाकारेण शक्तेस्तु वाचकश्चेतरेण तु ।
शिवस्य वाचकः साक्षाद्विद्येयं पदगामिनी ॥ २२ ॥

नन्वकाराद्यात्मिकाया मातृकाया एकरूपाया एव कथं श्रीकण्ठादिशिवमूर्तिप्रतिपादकत्वं पूर्णोदयादिशिवशक्तिमूर्तिप्रतिपादकत्वं च तत्राऽऽह--यथा परतर इति । उक्तात्परादपि परो निष्कलो यः स परतरः । स यथा स्वप्रतिष्ठेन रूपेण निष्कलः शिवः । कार्याभिमुखेन तु शक्यप्रतियोगिनिरूप्येण शक्तिरिति द्विरूपो जातः । एवमियमक्षरात्मिका मातृकाऽपि स्वकारणतया स्वानुगताशिवप्राधान्येन शिवमूर्तीनां तथाविधशक्तिप्राधान्येन च शक्तिमूर्तीनामपि प्रतिपादिका किं न स्यादित्यर्थः ॥ २१ ॥ २२ ॥

---

१ घ. 'द्विपश्च मुख्या मन्त्राः " अ° ।

अपदं पदमापन्नं पदं चाप्यपदं भवेत् ।
पदापदविभागं च यः पश्यति स पश्यति ॥ २३ ॥

ननु सा मातृका वाङ्मनसातीतं शिवशक्त्यात्मकं परमशिवस्वरूपं कथं प्रतिपादयेदित्यत आह—अपदं पदमापन्नमिति । पद्यते प्राप्यत इति पदमिन्द्रियगोचरं वस्तु । अपदमविषयं वाङ्मनसातीतं सच्चिदानन्दाखण्डैकरसं प्रागुदीरितं परशिवस्वरूपम् " अपदस्य पदैषिणः, अपि तर्हि पद्यते " इति श्रुतेः । तदेव स्वशक्तिमहिम्ना प्रागुक्तरीत्या पराविन्दुनादादिक्रमेण परा पश्यन्ती मध्यमा वैखरीत्येवमात्मकं पदं जातम् । पद्यते प्राप्यतेऽनेन परं तत्त्वमिति पदमन्त्रात्मिका मातृकाविद्या परापश्यन्त्यात्मिका सा मातृका परशिवस्वरूपं विदुषः पुरुषस्यापदं भवेत् । अपदस्यापदनीयस्य वाङ्मनसागोचरस्य प्रागुक्तपरशिवस्वरूपस्य दात्री प्रतिपादयित्री भवतीत्यर्थः । अविषयमपि तत्स्वरूपमविद्योपाधिं विषयीकृत्य प्रकाशयन्ती मातृकाविद्या स्वविषयावरणभूतामविद्यां समूलमुन्मूलयन्ती यथोदीरितपरशिवस्वरूपं विदुषः स्वात्मतया प्रापयतीत्यर्थः । यद्वा, अपदं पदमिति, नादात्मकं शब्दब्रह्म परा पश्यन्ती मध्यमा वैखरीत्येवंरूपं सत्पदं जातम् । अस्ति हि परापश्यन्त्याद्यवस्थस्यापि पदाभिधेयता । श्रूयते हि—"चत्वारि वाक्परिमिता पदानि " इति । तत्पदं सम्यग्ज्ञातं सन्मूलभूतं शब्दब्रह्म स्वकारणत्वेनावगमयत्तत्प्राप्तिहेतुर्भवतीत्यर्थः । इत्थमुक्तं पदापदविभागं यो जानाति स एव परशिवस्वरूपं साक्षात्करोति ॥ २३ ॥

पदस्थस्य जिता मन्त्रा भवेयुः पण्डितोत्तमाः ।
पदाभ्यासपराणां तु न किंचिदपि दुर्लभम् ॥ २४ ॥

उक्तलक्षणे मातृकात्मके पदे तात्पर्येण परिशीलयन्यो वर्तते तस्यैव तत्प्रभेदा मन्त्राः सिध्यन्तीत्याह—पदस्थस्येति ॥ २४ ॥

अंश एकः पदस्यायमुपकाराय देहिनाम् ।
भवेत्षोडशधा पूर्वं पञ्चधा च द्विधा पुनः ॥ २५ ॥
पदस्यांशोऽपरः पूर्वो द्वात्रिंशद्भेदमाप्नुयात् ।
त्रयस्त्रिंशत्पुनर्भेदं तथैव द्विविधं भवेत् ॥ २६ ॥
एवं लोकोपकाराय पदं बहुविधं भवेत् ॥ २७ ॥

---

१ क. °भागे च यः । ङ. च. °भागेन यः । २ च. °मन्त्रमातृकाविद्यां । ३ क. ग. च. पूर्वं ।

परा पश्यन्ती मध्यमा वैखरीत्येवंचतुरवस्थस्य पदस्य यस्तुरीयोंऽशो वैखर्यात्मकः स एव शरीरिणां प्रेषणाध्येषणादिव्यवहारहेतुरित्याह—अंश एक इति । परश्रोत्रग्राह्यात्मकं वैखर्यात्मकमेव पदांशं मनुष्यादयोऽभिवदन्तीत्यर्थः । " गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति " इति श्रुतेः । स च वैखर्यात्मकः शब्दः स्वत एवैकरूपोऽपि कण्ठताल्वाद्यभिव्यक्तिस्थानभेदात्स्वरव्यञ्जनादिभेदेन नानात्वं भजत इत्याह—भवेत्षोडशधेत्यादिना बहुविधं भवेदित्यन्तेन । अकारादिविसर्गान्तषोडशस्वरात्मना प्रथमं षोडशधा भवति । कचटतपादिपञ्चवर्गात्मना पञ्चधा भवति । पुनरन्तःस्थोष्मभेदेन द्वेधा । षोडशस्वरात्मको यः पूर्वोंऽशः स एव सानुनासिकनिरनुनासिकभेदेन द्विगुणितः सन्द्वात्रिंशद्भेदवान्भवति । पुनश्च काद्या पञ्चविंशतिर्यादयो हकारान्ता अष्टाविति । एवं च त्रयस्त्रिंशद्भेदवान्भवति । एवं स्वरव्यञ्जनभेदेनोक्तं वर्णजातं द्विविधं भवेदित्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥

एकैकाकारतश्चैके कार्यसिद्धिर्भवेत्स्वतः ।
वैदिकान्केचनाऽऽकारानुपजीवन्ति सिद्धये ॥ २८ ॥
तान्त्रिकांश्च तथाऽऽकारानुपजीवन्ति केचन ।
लौकिकानपि चाऽऽकारानुपजीवन्ति केचन ॥ २९ ॥

इत्थं स्वरव्यञ्जनात्मना ये पदस्याऽऽकारास्तै प्रत्येकं मन्त्रास्तेष्वेकैकस्य जपात्साधकस्याभिलषितसिद्धिर्भवतीत्याह—एकैकाकारतश्चेति । अधिकारिभेदेन तानेवाऽऽकारभेदान्विभज्य विनियुङ्क्ते । वैदिकानित्यादिना । वेदार्थाभिज्ञाः कैचिद्विद्वांसः, ऋग्यजुःसामात्मकानाकारान्स्वानुष्ठानसिद्धय उपजीवन्ति । आगमाभिज्ञास्त्वन्ये हुंफडादिलक्षणानागमैकसमधिगम्यान्स्वानुष्ठानसिद्धये व्यवहरन्ति ॥ २८ ॥ २९ ॥

यथा सर्वे महादेवमुपजीवन्ति सर्वदा ।
यथा वा शक्तिमीशस्य यथा वा भूतपञ्चकम् ॥
तथा सर्वे पदाकारानुपजीवन्ति सर्वदा ॥ ३० ॥

न केवलं यथोदीरितैः कैश्चिदेव पदाकारा उपजीव्या अपि तु सर्वप्राणिभिरपीत्याह—यथा सर्व इति । शिवशक्त्यात्मकं परशिवस्वरूपमुत्पत्तिस्थितिलयाधिष्ठानत्वेन यथोपजीव्यते कार्यप्रपञ्चेन यथा वा पृथिव्यादिभूतपञ्चकं

देहाद्युपादानतयाऽवश्यमाश्रियते । एवमेव देवतिर्यङ्मनुष्याद्यः पदाकारान्स्व-स्वभाषानुरूपेण सर्वदोपजीवन्तीत्यर्थः ॥ ३० ॥

मातृका परमा देवी स्वपदाकारभेदिता ।
वैखरीरूपतामेति करणैर्विशदा स्वयम् ॥ ३१ ॥

नन्वेते पदाकारा वैखर्यात्मका एव परश्रोत्रेण गृह्यन्ते वैखर्यात्मकत्वं तु कुतो मातृकाया इत्यत आह—मातृका परमेति । परापश्यन्त्याद्यात्मनोद्गता नान्यावर्णात्मिका मातृका तालवादिस्थानेषु करणविशेषैरभिव्यज्यमाना विस्पष्टरूपा सती वैखर्यात्मकतां प्रतिपद्यत इत्यर्थः ॥ ३१ ॥

स्थूला सूक्ष्मा सुसूक्ष्मा च त्रिविधा मातृकेश्वरी ।
सा देवी शक्तिसंभिन्ना शिवस्यामिततेजसः ॥ ३२ ॥

वैखरीव्यतिरेकेण परापश्यन्त्याद्यात्मिका मातृका नैवास्तीति न भ्रमितव्यमिति प्रागुक्तं मातृकात्रैविध्यं स्मारयति—स्थूलेति । एतच्छक्तिपूजाविधौ "मातृका च त्रिधा स्थूला" इत्यत्र सम्यक्प्रपञ्चितम् । एवं त्रिविधाऽपि मातृका शक्त्यवस्थस्य शिवस्य प्रतिपादिकेत्याह—सा देवीति । शक्त्यप्रतियोगिकं पराशिवस्वरूपमेव शक्तिरिति प्राक्प्रतिपादितं तत्संभिन्ना प्रतिपाद्यप्रतिपादकभावेन तत्स्वरूपाविष्टेत्यर्थः ॥ ३२ ॥

वाचामगोचराकारो मातृकायास्तथा परः ॥ ३३ ॥
ब्रह्मविष्ण्वादिदेवानामचिन्त्यः सूक्ष्मतोविधिः ।
चिन्मयः परचिद्रूपः शिवासंभिन्न एव हि ॥ ३४ ॥

परापश्यन्त्याद्यवस्थातः प्राक्, बिन्दुनादाद्यात्मकं यन्मातृकायाः सूक्ष्मं रूपं तत्स्वप्रतिष्ठस्य[3] पराशिवस्वरूपस्य प्रतिपादकं सत्तदात्मकमेव भवतीत्याह—वाचामगोचरेति । वाङ्मनसयोरगोचरं ब्रह्मविष्ण्वादिभिरप्यचिन्तनीयं बिन्दुनादात्मकं यत्सूक्ष्मतरं रूपं मातृकायास्तत्स्वप्रकाशे पराशिवस्वरूपचैतन्येऽध्यस्तत्वाच्चिन्मयं चिद्व्याप्तं परमार्थतस्तत्स्वरूपानतिरेकाच्चिद्रूप एवंभूतः सूक्ष्मो मातृकाकारः शिवासंभिन्नः स्वप्रतिष्ठस्य निष्कलपराशिवस्वरूपस्य प्रत्यायक इत्यर्थः ॥ ३३ ॥ ३४ ॥

---

१ ग. °तिपाद्य° । २ क. ख. ग. तोविधिः । ३ ङ. तिष्ठितस्य । ४ क. ख. ग. °वाषात्म° । ५ क. ख. मार्थतत्स्व° । घ. °मार्थस्तत्स्व° ।

बुद्ध्वा मन्त्रजपं कुर्यादेवं मन्त्रस्य वै वशम् ।
आचार्यमुखतः प्राप्ता सिध्यत्येवाचिरेण तु ॥
आचार्यरहितो मन्त्रः पुंसोऽनर्थस्य कारणम् ॥ ३५ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे वाचिकयज्ञविवरणं नाम
चतुर्थोऽध्यायः ॥ ४ ॥

इत्थमुक्तमाचार्यमुखाद्यो वेद तस्यैव मन्त्रः पुरुषार्थसाधको नान्यस्येति ध्रुव-मुपसंहरति—बुद्ध्वेति ॥ ३५ ॥

इति श्रीसूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे वाचिकयज्ञ-
विवरणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ।

सूत उवाच—

प्रणवं संप्रवक्ष्यामि समासेन न विस्तरात् ।
परापरविभागेन प्रणवस्तु द्विधा मतः ॥ १ ॥

इत्थं सकलमन्त्रमूलभूतपञ्चाशद्वर्णात्मिकां प्रणवावयवेभ्यश्चाकारोकारमकार-बिन्दुनादेभ्यः पञ्चभ्यः पञ्चाशत्कलारूपेणोत्थितां मातृकामभिधायाथ तत्कार-णभूतं परापरब्रह्मात्मकं प्रणवं वक्तुमारभते—प्रणवमिति । " एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः " इति श्रुतौ यदुक्तं द्वैविध्यं तदभिप्रेत्याऽऽह—परापरविभागेनेति ॥ १ ॥

परः परतरं ब्रह्म प्रज्ञानन्दादिलक्षणम् ।
प्रकर्षेण नवं यस्मात्परं ब्रह्म स्वभावतः ॥ २ ॥

तत्र कोऽसौ परः प्रणव इति तमाह—परः परतरमिति । सत्यज्ञानानन्दैक-रसं मायातत्कार्यासंस्पृष्टं यत्परशिवस्वरूपं स परः प्रणवः । कुतस्तस्य प्रणव-शब्दाभिधेयतेत्याशङ्क्य निर्वक्ति—प्रकर्षेणेति । यस्मात्तत्परशिवस्वरूपं कार-

१ क. ग. ङ. प्राप्तः । ग प्रातः ।

णान्तरमनपेक्ष्य प्रकर्षेण नवमशेषविक्रियाविरहेण कूटस्थनित्यं सत्परमानन्दप्रकाशनात्सर्वदाऽभिनवमतस्तथाविधस्वरूपस्य प्रणवशब्दाभिधेयतेत्यर्थः ॥ २ ॥

अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्मलः ।
प्रकर्षेण नवत्वस्य हेतुत्वात्प्रणवः स्मृतः ॥
परमप्रणवप्राप्तिहेतुत्वात्प्रणवोऽथ वा ॥ ३ ॥

अपरप्रणवमाह—अपर इति । अस्यापि नामधेयानि ब्रूते—प्रकर्षेणेति । अनेन मन्त्रेण यथोक्तपरशिवस्वरूपं स्वात्मतया विदुषः पुंसोऽभिनवत्वप्राप्तिहेतुस्तत्प्रकर्षेण नवो भवत्यनेनेति व्युत्पत्त्या तत्प्रणवः । यद्वा यः प्रागुक्तः परमः प्रणवस्तद्वाचकत्वेन तत्प्राप्त्युपायत्वाच्छब्दात्मकस्यास्य प्रणवाभिधेयता ॥ ३ ॥

पुरा प्रजापतिः साक्षाच्छ्रद्धया परया सह ॥ ४ ॥
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ।
जितेन्द्रियो जितक्रोधो जटावल्कलसंयुतः ॥ ५ ॥
सदा पञ्चाग्निमध्यस्थः साम्बध्यानपरायणः ।
ततापं परमं घोरं तपः संवत्सरत्रयम् ॥ ६ ॥
स पुनः शंकरस्यास्य प्रसादादम्बिकापतेः ।
पृथिवीमन्तरिक्षं च दिवं चासृजदास्तिकाः ॥ ७ ॥
स तानभ्यतपल्लोकांस्तेभ्यो वेदविदां वराः ।
त्रीणि ज्योतींष्यजायन्त पृथिव्या एव तत्र तु ॥ ८ ॥
अजायताग्निर्वायुश्च ब्राह्मणाश्चान्तरिक्षतः ।
दिवो दिवाकरः साक्षाज्जगच्चक्षुरजायत ॥ ९ ॥
तानि चाभ्यतपज्ज्योतींष्यजस्तेभ्यो महाद्विजाः ।
त्रयो वेदा अजायन्त वेदानां प्रथमोऽनलात् ॥ १० ॥
यजुर्वेदस्तथा वायोरादित्यात्सामसंज्ञितः ।
वेदानभ्यतपत्तांश्च ब्रह्मा तेभ्यो महाद्विजाः ॥ ११ ॥

---

१ ग. °न्तरीक्ष° ।

त्रीणि शुक्लान्यजायन्त तत्र ब्रह्मविदां वराः ।
ऋग्वेदादेव भूस्तद्वद्यजुर्वेदाद्भुवस्तथा ॥ १२ ॥
सामवेदात्सुवस्तानि शुक्लान्यभ्यतपत्प्रभुः ।
तथा तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा द्विजोत्तमाः ॥ १३ ॥
अजायन्त क्रमेणैव कोटिसूर्यसमप्रभाः ।
अकारश्च तथोकारो मकारश्चेति सुव्रताः ॥ १४ ॥

अथास्य सकलवेदसारात्मकत्वमाविष्कर्तुमैतरेयके— "प्रजापतिरकामयत प्रजायेयं भूयान्स्याम्" इत्यत्र पृथिव्यादीनामुत्तरोत्तरसारात्मना या सृष्टिरुक्ता तामत्र सुखावबोधाय श्लोकैः संगृह्णाति—पुरा प्रजापतिरित्यादिना सुव्रता इत्यन्तेन । पृथिव्यन्तरिक्षद्युलोकानामग्न्यादयः सारात्मकाः । तेषामृग्वेदादयः । तेषां च व्याहृतयः । ताभ्यश्चाकारोकारमकाराः सर्वसारत्वेन लौकिकप्रकाशाः प्रजापतिना निःसारिता इत्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

तानेकधा समभरदज ओमित्यतिप्रभुः ।
तस्मिन्नेव शिवः साम्बः सर्ववस्त्ववभासकः ।
प्रतिबिम्बितवांस्तेन प्रणवस्तस्य वाचकः ॥ १५ ॥

किमेतावता प्रणवस्य सर्वसारतेत्याह—तानेकधेति । प्रजापतिस्तानेवाकारादीनेकत्वेन संयोजितवान् । तस्मात् "आद्गुणः" इति गुणे कृते, ओमिति मन्त्ररूपं निष्पद्यते । अथास्य मन्त्रस्य मन्त्रान्तराद्वैशिष्ट्यमाह—तस्मिन्नेवेति । यदुक्तरीत्या पृथिव्यादिसर्वसारत्वेन निर्मलः प्रणवस्तस्मिन्नेव मन्त्रे, आदर्शे मुखमिव स्वप्रकाशचिद्रूपः परशिवः प्रतिबिम्बतया भासते । अतस्तस्य स प्रणवो वाचको जातः । तथा च पारमर्ष सूत्रम् "तस्य वाचकः प्रणवः" इति ॥ १५ ॥

तप्तलोहादिवच्छंभोरभेदात्प्रणवोऽपि सः ।
सर्वावभासको नित्यमभवत्पण्डितोत्तमाः ॥ १६ ॥

तप्तायःपिण्डवत्प्रतिबिम्बितस्वप्रकाशपरशिवचैतन्येन सहैकीभावादतस्तत्प्रणवोऽपि सर्ववस्त्ववभासको जात इत्याह—तप्तलोहादिवदिति ॥ १६ ॥

---

१ ङ. °भवद्° ।

ज्ञातार्थे ज्ञातमित्येवं वक्तव्ये सति तद्विना।
ओमिति प्राह लोकोऽयं तेन ज्ञातस्य वाचकः ॥ १७ ॥
अज्ञातार्थे तथाऽज्ञातमिति प्राप्ते तु वाचके ।
ओमिति प्राह लोकोऽयं तेनाज्ञातस्य वाचकः ॥ १८ ॥
संदिग्धार्थे तु संदिग्धमिति प्राप्ते तु वाचके ।
ओमिति प्राह लोकोऽयं तेन संदिग्धवाचकः ॥ १९ ॥
आकाशादिपदार्थानां ये शब्दा वाचका भुवि ।
विना तानखिलाञ्शब्दाँल्लोक ओमिति भाषते ॥ २० ॥
अतः प्रयोगबाहुल्याद्घटकुड्यादिशब्दवत् ।
आकाशादिपदार्थानां वाचकः प्रणवः स्मृतः ॥ २१ ॥
सर्वावभासकत्वेन ब्रह्मणा सदृशः स्मृतः ॥ २२ ॥

इदमेव सर्वावभासकत्वमुपपादयति—ज्ञातार्थ इत्यादिना ब्रह्मणा सदृशः स्मृत इत्यन्तेन । ज्ञाताज्ञातसंदिग्धेष्वर्थेष्वाकाशादिषु च पृष्टः सर्वो जनः किमिदं भवता ज्ञातमित्यादिप्रश्नस्य ज्ञातमित्यादिप्रतिवचनपरिहारेण यस्मादोमित्येव प्रतिब्रूते तस्माज्ज्ञाताज्ञातादिपदवदयमपि तत्तदर्थस्य पर्यायतया वाचकः । यथा घटकुड्यादिशब्दानां पृथुबुध्नोदराकारलक्षणोऽर्थः प्रातिस्विको वाच्य एवमस्याप्युक्तरीत्या सर्वेष्वर्थेषु प्रयोगस्य रूढत्वात्सर्वावभासकत्वम् । अत एव च्छन्दोगाः प्रणवस्यानुज्ञाक्षरत्वमामनन्ति " तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाह " इति ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ॥ २१ ॥ २२ ॥

सर्वावभासकं मन्त्रमिमं जपति यो द्विजः ।
सर्वमन्त्रजपस्योक्तं फलं स लभतेऽचिरात् ॥
अतः सर्वं परित्यज्य सदा मन्त्रमिमं जपेत् ॥ २३ ॥

इत्थं प्रणवस्य सर्वावभासकत्वमुपपाद्य तद्धेतुकं प्रणवजपातिशयं दर्शयति—सर्वावभासकं मन्त्रमिति । एतद्व्यतिरिक्तसकलमन्त्रजपाद्यत्फलं तत्प्रणवजपेनैवाऽऽप्नोतीत्यर्थः । प्रणवस्य सर्वमन्त्रात्मकत्वात्सर्ववेदसारत्वाच्च । श्रूयते हि— " यः प्रणवमधीते स सर्वमधीते " इति । " ओमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येति " इति च ॥ २३ ॥

१ घ. °तद्रूपाति° ।

ऋषिर्ब्रह्माऽस्य मन्त्रस्य गायत्रं छन्द उच्यते ।
परमात्माभिधः शंभुर्देवता परिकीर्तिता ॥ २४ ॥
अकारो बिन्दुसंयुक्तः शक्तिरस्य द्विजोत्तमाः ॥ २५ ॥
उकारश्च मकारश्च द्वयं बीजं प्रकीर्तितम् ।
मोक्षार्थे विनियोगोऽस्य प्रोक्तो वेदान्तवेदिभिः ॥ २६ ॥

ऋष्यादिज्ञानपुरःसर एव मन्त्रो जपार्ह इत्यभिप्रेत्य तदाह—ऋषिर्ब्रह्मेत्यादि। अस्य मन्त्रस्य सर्वावभासकत्वात्स्वेतरसकलमन्त्रैफलसाधनत्वमुक्तम् । न केवलं तावदेव मोक्ष एवास्यासाधारणं फलमित्याह—मोक्षार्थ इति ॥ २४ ॥ ॥ २५ ॥ २६ ॥

अग्निश्च वायुः सूर्यश्च वर्णानां मुनयः क्रमात् ।
गायत्री च तथा त्रिष्टुब्बृहती च यथाक्रमम् ॥ २७ ॥
छन्दांसि ब्रह्मविच्छ्रेष्ठा वर्णानां च यथाक्रमम् ।
ब्रह्मा विष्णुश्च रुद्रश्च वर्णानां देवताः क्रमात् ॥ २८ ॥
रक्तं शुक्लं च कृष्णं च क्रमाद्वर्णा उदाहृताः ।
जाग्रत्स्वप्नसुषुप्तिश्चावस्थाः प्रोक्ता यथाक्रमम् ॥ २९ ॥
भूम्यन्तरिक्षस्वर्गाश्च स्थानानि क्रमशो विदुः ।
उदात्तप्रमुखा विप्राः स्वराः प्रोक्ता मनीषिभिः ।
ऋग्यजुःसामसंज्ञाश्च वेदाः प्रोक्ता यथाक्रमम् ॥ ३० ॥
अग्नयो गार्हपत्याग्निर्दक्षिणाग्निस्तथैव च ।
प्रोक्तश्चाऽऽहवनीयाग्निर्वर्णानां क्रमशो द्विजाः ॥ ३१ ॥
प्रातर्मध्यंदिनं सायं काला उक्ता यथाक्रम् ।
रजः सत्त्वं तमश्चैव गुणा उक्ता यथाक्रमम् ॥ ३२ ॥
सृष्टिः स्थितिश्च संहारः क्रियाः प्रोक्ता यथाक्रमम् ।
उत्पत्तौ च स्थितौ नाशे विनियोगा उदाहृताः ॥ ३३ ॥

अथैतस्यावयवानामकारोकारमकाराणां जपकाले स्मर्तव्यानृष्याद्यानाह—

१ ग. गायत्री । २ ग. °न्वसा° ।

अग्निश्चेत्यादिना विनियोगा उदाहृता इत्यन्तेन ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ॥ ३१ ॥ ३२ ॥ ३३ ॥

अङ्गुष्ठादिकनिष्ठान्तमङ्गुलीनां च संधिषु ।
क्रमाद्वर्णत्रयन्यासः कर्तव्यः सिद्धिमिच्छता ॥ ३४ ॥

अङ्गुष्ठादीति । अकारादीन्यक्षराण्यङ्गुष्ठाद्यङ्गुलीनां त्रिषु संधिष्वङ्गुष्ठादिकनिष्ठान्तं प्रत्येकं न्यस्तव्यानीत्यर्थः ॥ ३४ ॥

अङ्गुलीषु च सर्वासु प्रणवन्यास ईरितः ॥ ३५ ॥
भूरग्न्यात्मन इत्यादिमन्त्राश्च क्रमशो द्विजाः ।
विन्यस्तव्याश्च सिद्ध्यर्थमङ्गुलीषु द्विजन्मना ॥ ३६ ॥

एवं वर्णन्यासं कृत्वा तास्वेवाङ्गुलीषु तत्समुदायात्मकः प्रणवोऽपि न्यस्तव्य इत्याह—अङ्गुलीष्विति । भूरग्न्यात्मन इत्यादयोऽङ्गमन्त्रास्तेऽङ्गुष्ठाद्यङ्गुलीषु न्यस्तव्या इत्यर्थः ॥ ३५ ॥ ३६ ॥

क्रमाद्वर्णत्रयन्यासो नाभौ हृदि च मूर्धनि ।
कर्तव्यः सर्वयत्नेन प्रणवेन तथैव च ॥ ३७ ॥

पुनरकारादिवर्णत्रयं विभज्य नाभिहृन्मूर्धसु प्रत्येकं न्यैस्तव्यं ततस्तेष्वेव स्थानेषु तत्समुदायस्य प्रणवस्य न्यासः कर्तव्य इत्याह—क्रमाद्वर्णेति ॥ ३७ ॥

हृदयादिप्रदेशेषु क्रमेणैव द्विजोत्तमाः ।
भूरग्न्यात्मन इत्यादिमन्त्राणां न्यास ईरितः[1] ॥ ३८ ॥
एवं न्यस्य विधानेन ध्यात्वा साम्बं त्रियम्बकम्[2] ।
जपेन्मन्त्रवरं भक्त्या लक्षाणां दशकं द्विजाः ॥ ३९ ॥
ततः सिध्यति मन्त्रोऽयं सत्यमेव न संशयः ।
षट्कर्माणि प्रसिध्यन्ति तथैवाष्ट विभूतयः ॥ ४० ॥

---

१ क. न्यासः । २ ङ. सदाशिवम् ।

अपवर्गः स्वतःसिद्धः पापैः सर्वैः प्रमुच्यते ।
सर्वविद्यालयो भूत्वा यथेष्टं फलमाप्नुयात् ॥ ४१ ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
प्रणवविचारो नाम पञ्चमोऽध्यायः ॥ ५ ॥

ततो हृदयादिदेशेषु भूरग्न्यात्मन इत्यङ्गमन्त्रान्न्यसेदित्याह—हृदयादीति । शेषं स्पष्टम् ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

इति श्रीसूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे प्रणवविचारो
नाम पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

सूत उवाच—

सावित्रीमथ वक्ष्यामि व्याहृत्या शिरसा सह ।
भूरादिव्याहृतीनां तु मुनयः परिकीर्तिताः ॥ १ ॥
अत्रिर्भृगुश्च कुत्सश्च वसिष्ठो गौतमस्तथा[1] ।
कश्यपश्चाङ्गिराश्चेति क्रमेण मुनिपुंगवाः ॥ २ ॥
व्याहृतीनां क्रमेणैव च्छन्दांसि कथितानि तु ।
देवीगायत्रमाद्यं स्यादुष्णिहा तदनन्तरम् ॥ ३ ॥
अनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुप्[2] च जगती तथा ।
अग्निर्वायुस्तथार्कश्च वागीशो वरुणस्तथा ॥ ४ ॥
इन्द्रश्च विश्वेदेवाश्च क्रमेणैव तु देवताः ।
व्याहृतीनां तु सर्वत्र विनियोगः प्रकीर्तितः ॥ ५ ॥

इत्थं त्रयीसारं प्रणवमभिधाय प्रकृत्यादिचतुर्विंशतितत्त्वात्मिकां द्विजातीनां भुक्तिमुक्तिकरीं त्रयीमातरं सावित्रीं प्रस्तौति—सावित्रीमथेति । व्याहृतयो भूराद्याः सप्त । ओमापो ज्योतिरिति शिरः । अथैतासां व्याहृतीनामृष्याद्यानाह—भूरादिव्याहृतीनामित्यादि क्रमेणैव तु देवता इत्यन्तेन । वागीशो बृहस्पतिः ।

---

१ ख. ग. °था । काश्य° । २ घ. च. °ङ्क्तित्रिष्टु° ।

" यद्यविज्ञातां सर्वव्याप्यद्वा भुर्भुवः सुवरिति सर्वा अनुसृत्याऽऽहवनीय एव जुहवीथ " इत्यैतरेयकश्रुतेः " सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह " इत्यादिस्मरणाच्च यज्ञकर्मणि सर्वत्र प्राणायामादौ चाऽऽसां विनियोगः स्पष्ट इत्याह—व्याहृतीनां त्विति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

विश्वामित्रो मुनिश्छन्दो गायत्रं देवता रविः ।
सावित्र्या वेदविच्छ्रेष्ठाः शिव एवाधिदेवता ॥ ६ ॥

अथ गायत्र्या ऋष्याद्यानाह—विश्वामित्र इति । जन्मान्तरकृतोपासनामहिम्ना यः सूर्यपदं प्राप्तस्तन्मण्डलाभिमानी जीवात्मना वर्तमानस्तत्रत्यां विभूतिमनुभुङ्क्ते स सूर्योऽस्या देवता । अन्तर्यामिरूपेण तस्यान्तर्वर्तमानस्तत्प्रेरको यः परशिवः सोऽस्य मन्त्रस्याधिदेवतेत्यर्थः ॥ ६ ॥

त्रिपदा सा तु सावित्री षड्भिर्वर्णैश्चतुष्पदा ।
जपे सा त्रिपदा ज्ञेया पूजायां सा चतुष्पदा ॥ ७ ॥

अस्याः पादकल्पनामाह—त्रिपदेति । सावित्री सवितृदेवताका " तत्सवितुर्वरेण्यम् " एषा ऋगित्यादिरूपेणेति स्मरणात् । ण्यमित्येतस्याक्षरस्य णियमिति विभागे सति चतुर्विंशत्यक्षरा । अष्टभिरक्षरैः पादत्रयात्मिका षड्भिः पादचतुष्टयात्मिका " सैषा चतुष्पदा षाड्विधा गायत्री " इति श्रुतेः ॥ ७ ॥

ओमापो ज्योतिरित्येतद्गायत्र्याः शिर उत्तमम् ।
ऋषिर्ब्रह्माऽस्य मन्त्रस्य च्छन्दोऽनुष्टुप्प्रकीर्तितः ॥ ८ ॥
देवता परमात्मैव प्रोक्तो वेदार्थवेदिभिः ।
यथेष्टसाधने चास्य विनियोग उदाहृतः ॥ ९ ॥

शिरसा सहेति पूर्वं यदुक्तं तस्य शिरसः स्वरूपमाह—ओमाप इति । अस्यर्ष्याद्यानाह—ऋषिर्ब्रह्मेति । वेदार्थाभिज्ञैरस्य मन्त्रस्यार्थे न्यायतोऽवधार्य तदात्मकः परमात्मैव देवतेति निर्णीतं " या तेनोच्यते सा देवता " इति न्यायात् । सोऽर्थ आचार्यैरित्थं निरूपितः—

" आपो ज्योती रस इति सोमाग्न्योस्तेज उच्यते ।
तदात्मकं जगत्सर्वं रसस्तेजोऽद्वयात्मकम् ॥

---

१ ङ. 'यपि ज्ञा° । २ क. °ता भू° । ३ ङ. °पकाद्या । ४ ख. °नुष्टुत्या° । ५ क. ख. ङ. च. °जुहावी° । ६ घ. उच्यते । ७ ङ. °त्मैष प्रो°

अमृतं तदनाशित्वाद्बृहत्वाद्ब्रह्म उच्यते ।
यदानन्दात्मकं ब्रह्म सत्यज्ञानादिलक्षणम् ॥
तद्भूर्भुवः स्वरित्युक्तं सोऽहमित्योमुदाहृतम् ।
एतत्तु वेदसारस्य शिरस्त्वाच्छिर उच्यते ॥ ८ ॥ ९ ॥

सावित्री त्रिपदा ज्ञेया षट्कुक्षिः पञ्चशीर्षका ।
अग्निवर्णमुखा शुक्ला पुण्डरीकदलेक्षणा ॥ १० ॥

अथास्याः सावित्र्या जपकाले ध्यातव्यां विराडात्मिकां मूर्तिमाह—सावित्री त्रिपदेति । त्रयः पादा अस्याः सा तथा । एवं षट्कुक्षिः पञ्चशीर्षकेत्यत्रापि बहुव्रीहिः ॥ १० ॥

ऋग्यजुःसामरूपाश्च पादा अस्याः प्रकीर्तिताः ।
पूर्वा दिक्प्रथमा कुक्षिर्द्वितीया दक्षिणा मता ॥ ११ ॥
पश्चिमा दिक्तृतीया च चतुर्थी चोत्तरा मता ।
ऊर्ध्वा दिक्पञ्चमी कुक्षिः षष्ठ्यधो दिक्प्रकीर्तिता ॥ १२ ॥

के पुनस्ते पादा इत्याह—ऋग्यजुरिति । त्रयो वेदाः सावित्रीमूर्तेः पादत्रयात्मना वर्तन्त इत्यर्थः । उक्तं हि सावित्रीहृदये—"ऋग्वेदोऽस्याः प्रथमः पादो भवति यजुर्वेदो द्वितीयः सामवेदस्तृतीयः" इति । कुक्षिषट्कमप्येवं विभज्य दर्शयति—पूर्वा दिगित्यादिना ॥ ११ ॥ १२ ॥

अष्टादश पुराणानि नाभिरस्या मुनीश्वराः ।
जगच्छरीरं सावित्र्या आकाशमुदरान्तरम् ॥ १३ ॥
स्तनौ छन्दांसि हृदयं धर्मशास्त्रमकल्मषम् ।
बाहवो न्यायशास्त्रं तु कर्णौ सांख्यद्वयं तथा ॥ १४ ॥
शिक्षाद्यङ्गानि शीर्षाणि वक्त्रमग्निर्महाद्युतिः ।
मीमांसा लक्षणं तस्याश्चेष्टा चाऽऽथर्वणी श्रुतिः ॥ १५ ॥
ब्रह्मा मूर्धा शिखा रुद्रो विष्णुरात्मा प्रकीर्तितः ।
तस्याः सूक्ष्मशरीरं च शास्त्रं वेदान्तसंज्ञितम् ॥ १६ ॥

किं बहुना नामरूपात्मकं सर्वमपि जगद्विराडात्मिकायास्तन्मूर्तेरवयवत्वेन परिकल्पयति—अष्टादशेत्यादिना वेदान्तसंज्ञितमित्यन्तेन । जगत्पृथिव्यादिः

भूतभौतिकात्मकं तस्याः स्थूलशरीरम् । छन्दांसि गायत्र्यादीनि सप्त । धर्मशास्त्रं मन्वादिप्रणीतम् । सांख्यद्वयं निरीश्वरं सेश्वरं च । शिक्षादीनि पञ्चाङ्गान्यस्याः शिरांसि । उक्तं हि सावित्रीहृदये--"व्याकरणमस्याः प्रथमं शिरो भवति शिक्षा द्वितीयं कल्पस्तृतीयं निरुक्तं चतुर्थं ज्योतिषामयनं पञ्चमम्" इति । लक्ष्यतेऽनेनेति लक्षणं व्यावर्तकोऽसाधारणो धर्मः "अथातो धर्मजिज्ञासा" इत्यादिकं मीमांसाशास्त्रमस्यास्तल्लक्षणम् । अथर्वणा दृष्टा श्रुतिर्वेदोऽस्याश्चेष्टात्मकः । उक्तं हि—" लक्षणं मीमांसा । अथर्ववेदो विचेष्टितम् " इति । पञ्चस्वपि शिरःसु ब्रह्मैव शिरःकपालात्मनाऽवस्थितः । रुद्रः केशात्मना । हृन्मध्येऽवस्थितो जीवात्मा विष्णुरेव । " अथातो ब्रह्मजिज्ञासा " इत्यादिकं वेदान्तशास्त्रमस्याः सूक्ष्मशरीरम् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

अन्तर्यामी शिवः साक्षात्साम्बश्चन्द्रार्धशेखरः ।
स्वशरीरे तु सावित्रीं विन्यसेदक्षरक्रमात् ॥ १७ ॥

एतावदीदृशं सर्वं नामरूपात्मकं भोक्तृभोग्यरूपं जगदस्या मूर्तित्वेन परिकल्पितं दृग्रूपः परशिव एवैवंविधायाः सावित्रीमूर्तेरन्तर्यामित्वेन प्रेरक इत्याह—अन्तर्यामीति। उक्तप्रकारेण ऋष्यादिन्यासपुरःसरं सावित्रीमूर्तिं ध्यात्वा मन्त्रवर्णान्स्वशरीरे वक्ष्यमाणस्थानेषु न्यसेदित्याह—स्वशरीरे त्विति ॥ १७ ॥

पादाङ्गुष्ठे तु गुल्फे तु जङ्घे जानुप्रदेशके ।
ऊरुदेशे च गुह्ये च वृषणे च तथैव च ॥ १८ ॥
कटिप्रदेशे नाभौ च जठरे स्तनयोर्हृदि ।
कण्ठे च वदने तालौ नासिकायां च चक्षुषोः ॥ १९ ॥
भ्रुवोर्मध्ये ललाटे च पूर्ववक्त्रे तथैव च ॥
दक्षिणे पश्चिमे चैव तथैव ब्राह्मणोत्तमाः ॥
उत्तरे च तथा मूर्ध्नि न्यासः सम्यक्प्रकीर्तितः ॥ २० ॥

तान्येव चतुर्विंशतिस्थानानि दर्शयति--पादाङ्गुष्ठे त्वित्यादिना ॥ १८ ॥ ॥ १९ ॥ २० ॥

प्रथमश्चम्पकाकारो द्वितीयः श्याम एव हि ।
तृतीयः पिङ्गलः प्रोक्तश्चतुर्थो मुनिसत्तमाः ॥ २१ ॥
इन्द्रनीलसमप्रख्यः पञ्चमः पावकप्रभः ।
षष्ठो वह्निप्रभस्तद्वत्सप्तमश्चाग्निवर्णकः ॥ २२ ॥

विद्युद्वर्णनिभः साक्षादष्टमः परिभाषितः ।
नवमस्तारकावर्णो दशमः कृष्णवर्णकः ॥ २३ ॥
तत्परो रक्तगौराभः श्यामस्तत्परमः स्मृतः ।
शुक्लवर्णः पीतवर्णो रक्तवर्णः परः स्मृतः ॥ २४ ॥
शुक्लवर्णः परो वर्णः पद्मरागप्रभः परः ॥ २५ ॥
तत्परः शशिसंकाशः पाण्डुरः परमो मतः ।
तत्परो रत्नगौराभ इन्द्रनीलसमोऽथ वा ॥ २६ ॥
गोरक्तसदृशश्चान्यस्तत्परः सूर्यसंनिभः ।
नीलोत्पलदलप्रख्यो वर्णस्तत्परमस्तथा ॥ २७ ॥
शङ्खकुन्देन्दुवर्णाभः साक्षाद्वर्णः परः स्मृतः ।
तत्परो दीपसंकाशः क्रमाद्वर्णाः प्रकीर्तिताः २८ ॥

अथैषामक्षराणां जपविधौ ध्यातव्यान्वर्णानाह— प्रथमश्चम्पकाकार इत्यादिना क्रमाद्वर्णाः प्रकीर्तिता इत्यन्तेन ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ॥ २६ ॥ २७ ॥ २८ ॥

केचिद्वर्णास्तु सावित्र्या महापातकनाशनाः ।
उपपातकपापानां वर्णाः केचन बाधकाः ।
केचन क्षुद्रपापानां नाशकाः स्युर्न संशयः ॥ २९ ॥

एवंविधस्य वर्णज्ञानस्य प्रयोजनमाह—केचिद्वर्णास्त्विति । महापातकोपपातकानुपातकरूपाणि त्रिविधानि पातकानि तान्यक्षरवर्णज्ञानान्नश्यन्तीत्यर्थः ॥ २९ ॥

नान्नतोयसमं दानं न चाहिंसापरं तपः ।
न सावित्रीसमं जप्यं न व्याहृतिसमं हुतम् ॥ ३० ॥

कथमस्य गायत्रीजपस्य महापातकादिसर्वपापप्रणाशहेतुतेत्याशङ्क्याऽऽह— नान्नतोयेति ॥ ३० ॥

यो नोऽस्माकं धियश्चित्तान्यन्तर्यामिस्वरूपतः ।

दीप्तस्य सर्वजन्तूनां प्रत्यक्षस्य स्वभावतः ।
सवितुः स्वात्मभूतं तु वरेण्यं सर्वजन्तुभिः ॥ ३२ ॥
भजनीयं द्विजा भर्गस्तेजश्चैतन्यलक्षणम् ।
तच्छब्दवाच्यं सर्वज्ञं जगत्सर्गादिकारणम् ॥ ३३ ॥
स्वमायाशक्तिसंभिन्नं शिवरुद्रादिसंज्ञितम् ।
नीलग्रीवं विरूपाक्षं साम्बमूर्त्युपलक्षितम् ॥ ३४ ॥
आदित्यदेवतायास्तु प्रेरकं परमेश्वरम् ॥ ३५ ॥
आदित्येनापरिज्ञातं वयं धीमह्युपास्महे ।
सावित्र्याः कथितो ह्यर्थः संग्रहेण मयाऽऽदरात् ॥ ३६ ॥

यतो जपविधौ जप्यमन्त्रार्थभूतदेवतामतिपत्त्यर्थमवश्यं मन्त्रार्थो ज्ञातव्योऽतस्तत्प्रतिपत्तये सावित्र्यामन्त्रं संगृह्य व्याचष्टे—यो नोऽस्माकमित्यादिना मयाऽऽदरादित्यन्तेन । तृतीयपादे यच्छब्दश्रवणात्प्रतिपत्तिसौकर्यार्थं तं पादं विवृणोति । अन्तर्यामितया स्थितो यो देवः स नोऽस्माकं धियो बुद्धीर्धर्मज्ञानादिषु प्रचोदयात्प्रेरयेत् । " चुद प्रेरणे " इत्येतस्माल्लेट्याडागमः । तस्य देवस्य द्योतमानस्य स्वयंप्रकाशचिद्रूपस्य सर्वप्राणिहृदम्बुजमध्यवर्त्यन्तःकरणादिसाक्षित्वेन वर्तमानस्य सवितुः प्रेरकस्य शिवस्वरूपभूतं तत्सृष्टिस्थितिसंहारकारणतयः प्रसिद्धं वरेण्यं सर्वप्राणिसेव्यं भर्गो भर्जनात्पापस्य भर्जकं सत्यज्ञानादिलक्षणं स्वमायाशक्तिवशेन शिवरुद्रादिसंज्ञामापन्नं सूर्यमण्डलमध्ये तत्प्रेरकत्वेनावस्थितं वाङ्मनसातीतमद्वितीयं यत्परं ब्रह्म तद्वयं धीमहि ध्यायेम । तदेवाहमस्मीति जानीयामित्यर्थः । " ध्यै चिन्तायाम् " इत्यस्माल्लिङि च्छान्दसं रूपम् । तदुक्तमाचार्यैः—" ध्यै चिन्तायां स्मृतो धातुर्निष्पन्नं धीमहीत्यतः " इति ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

एवमर्थं गुरोर्लब्ध्वा दत्त्वा तस्मै च दक्षिणाम् ।
चतुर्विंशतिकं लक्षं जपेदव्यग्रतः सुधीः ॥ ३७ ॥

एतादृशमर्थं गुरुमुखाज्ज्ञातवत एव पुरश्चरणादिक्रियास्वधिकार इत्याह—एवमिति ॥ ३७ ॥

१ क. ख. ग. घ. ङ. च. °तस्यैव ।

महापातकयुक्तोऽपि सिद्धमन्त्रो भवेद्द्विजः ।
आज्येन जुहुयान्मन्त्री सहस्राणां चतुष्टयम् ॥ ३८ ॥

उक्तार्थज्ञानमहिम्ना महापातकादिलक्षणमपि पापं नश्यतीत्याह—महापातकेति ॥ ३८ ॥

विनियोगानथानेन मन्त्रेणैव प्रसाधयेत् ।
स्नात्वा प्रातर्जपेन्नित्यं सहस्रं श्रद्धया सह ॥ ३९ ॥
अपेक्षितार्थं सकलं लभते नात्र संशयः ।
हुत्वा तु खादिरं सम्यग्घृताक्तं हव्यवाहने ॥ ४० ॥
राहुग्रस्ते रवौ विप्रा लभते धनमुत्तमम् ।
राहुसूर्यसमावाये तर्पयेद्भास्करं जलैः ॥ ४१ ॥
सर्वकामसमृद्धिः स्यान्नात्र कार्या विचारणा ।
करीषचूर्णतो हुत्वा सर्पिषा सह मानवः ॥ ४२ ॥
गवां गोष्ठे सहस्रं तु बहुक्षीरां लभेत गाम् ।
शाल्यास्तण्डुलहोमेन कन्यासिद्धिर्भविष्यति ॥ ४३ ॥
शालीबीजस्य होमेन प्रजामिष्टामवाप्नुयात् ।
सावित्र्या जलमादाय जप्त्वा चाष्टसहस्रकम् ॥ ४४ ॥
अभिषेकं द्विजः कुर्याद्दुःस्वप्नादिनिवृत्तये ।
क्षीराहारो जपेल्लक्षमपमृत्युविनाशने ॥ ४५ ॥
घृताहारो जपेद्विद्यां लभते नात्र संशयः ।
नाभिमात्रे जले स्थित्वा जपेल्लक्षं समाहितः ॥ ४६ ॥
अकण्टकं महाराज्यं लभते नात्र संशयः ।
पलाशपुष्पहोमेन महतीं श्रियमश्नुते ॥ ४७ ॥
वेतसैर्जुहुयादग्नौ वृष्टिं शीघ्रमवाप्नुयात् ।
मधुहोमेन विप्रेन्द्रा राजानं वशमाप्नुयात् ॥ ४८ ॥

१ घ. शालिबी°

पायसं मधुना हुत्वा स्त्रीवश्यं लभतेऽचिरात् ।
केवलं घृतहोमेन सर्वान्कामानवाप्नुयात् ॥ ४९ ॥
अन्नस्य होमतश्चान्नं प्राप्नुयादचिरेण तु ।
पञ्चगव्याशनो लक्षं जप्त्वा जातिस्मरो भवेत् ॥ ५० ॥
जानुमात्रे जले स्थित्वा जपेत्प्रत्यर्थिदिङ्मुखः ।
युद्धे विजयमाप्नोति सहस्रं क्रोधसंयुतः ॥ ५१ ॥

ऐहिकामुष्मिकेषु सर्वेषु फलेष्वस्य मन्त्रस्य विनियोगानाह—विनियोगानथा-नेनेत्यादिना जपेच्छत्रुर्विनश्यतीत्यन्तेन ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥४३॥ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

अर्कस्य समिधो हुत्वा तीक्ष्णतैलेन सादरम् ।
सप्ताहान्मारयेच्छत्रुमृते विप्रं न संशयः ॥ ५२ ॥

ऋते विप्रम् । ब्राह्मणं शत्रुमृत इत्यर्थः ॥ ५२ ॥

शत्रोः प्रतिकृतिं भूमावालिख्याऽऽख्यां च तद्धृदि ।
समाक्रम्य[2] तु पादेन जपेच्छत्रुर्विनश्यति ॥ ५३ ॥

तद्धृदीति । तस्याः प्रतिकृतेर्हृदय आख्यां शत्रोर्नामाक्षराणि लिखेदित्यर्थः ॥ ५३ ॥

सावित्री प्रतिलोमा स्यादभिचारेषु कर्मसु ।
मारणे वर्णशः शत्रोर्ब्रह्मास्त्रं[3] प्रतिलोमतः ॥ ५४ ॥

अथ मारणविधानस्य मन्त्रास्त्रकल्पमाह—सावित्री प्रतिलोमेति । मन्त्रवर्णानां प्रातिलोम्येन पाठोऽस्त्रम् । तदुक्तमाचार्यैः—प्रतिलोमपाठो वर्णानामस्त्रमाहुर्मनीषिणः " इति । वर्णशः प्रातिलोम्येन पठितोऽयं मन्त्रो ब्रह्मास्त्रं तदभिचारकर्मसु प्रयोक्तव्यमित्यर्थः ॥ ५४ ॥

गुरुप्रसादतो ज्ञेयमनर्थकरमन्यथा ।
शान्तये जुहुयादग्नौ घृतेन पयसाऽपि वा ॥
पञ्चगव्येन वा हुत्वा तिलैर्वा शान्तिमाप्नुयात् ॥ ५५ ॥

१ क. ख. घ. शत्रुं हित्वेत्य° । २ क. घ. ङ. च. तमाक्रम्य । ३ क. त्रोर्महास्त्रं । ४ घ. च. °त्यर्थः ।

एतच्च गुरूपदेशव्यतिरेकेण प्रयोक्तुरनर्थावहमित्याह—गुरुप्रसादत इति । अस्य चास्त्रप्रयोगस्योपसंहारविधिमाह—शान्तय इति ॥ ५५ ॥

आम्रपर्णस्य होमेन सर्वज्वरविनाशनम् ।
उदुम्बरभवाश्वत्थैर्गोगजाश्वामयक्षयः ॥ ५६ ॥
पयसाऽऽज्येन वा हुत्वा शान्तिः सर्वचतुष्पदाम् ।
शान्तये सर्वदोषाणां जानुमात्रे जले जपेत् ॥ ५७ ॥
अभिमन्त्र्य सितं भस्म न्यसेद्भूतादिशान्तये ॥ ५८ ॥
बहुनोक्तेन किं विप्रा जपेनास्याश्च होमतः ।
अभीष्टं सर्वमाप्नोति नात्र संदेहकारणम् ॥ ५९ ॥

द्रव्यविशेषहोमाज्ज्वरस्योपशममाह—आम्रेति । स्पष्टमन्यत् ॥ ५६॥५७ ॥ ॥ ५८ ॥ ५९ ॥

ज्ञानेच्छां तत्प्रसादेन लभते च द्विजोत्तमाः ।
सावित्रीजपयज्ञेन ज्ञानयज्ञमवाप्नुयात् ॥ ६० ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे गायत्रीविवरणं नाम
षष्ठोऽध्यायः ॥ ६ ॥

ज्ञानेच्छामिति । " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " इति श्रुतेर्वेदानुवचनादिभिः परतत्त्वस्वरूपगोचरा विविदिषोत्पादनीया तां सावित्र्याः प्रसादादेव लभते । संततजपेन निर्मलचित्तः सन्परशिवस्वरूपगोचरं साक्षात्कारज्ञानमपि प्राप्नुयादित्यर्थः ॥ ६० ॥

इति श्रीसूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे गायत्री-
विवरणं नाम षष्ठोऽध्यायः ॥ ६ ॥

---

१ क तमेवं ।

अथ सप्तमोऽध्यायः ।

सूत उवाच—

आत्ममन्त्रं प्रवक्ष्यामि समासेन न विस्तरात् ।
ऋषिर्ब्रह्माऽस्य गायत्रं छन्द आत्मैव देवता ॥
शान्तान्तं शक्तिरस्योक्ता तदन्तं बीजमुच्यते ॥ १ ॥

इत्थं सावित्र्युपासनेनोत्पन्नविविदिषस्य परशिवस्वरूपगोचरविद्योत्पत्तिसाधनमन्त्रमाह—आत्ममन्त्रमिति । जाग्रदाद्यवस्थासाक्षिणो जीवात्मनः परमात्मरूपताप्रतिपादकत्वादात्ममन्त्र इत्यजपाऽभिधीयते । एतदुपरिष्टात्स्वयमेव प्रतिपादयिष्यति । अस्य मन्त्रस्य ऋष्याद्यानाह—ऋषिर्ब्रह्मेत्यादिनोच्यत इत्यन्तेन । शान्तान्तमिति । शकारस्यान्तः षकारस्तस्यान्तः सकारः स इति शक्तिरित्यर्थः । तदन्तमितितच्छब्देन सकारः परामृश्यते । तस्यान्तो हकारः । हमित्यस्य मन्त्रस्य बीजमित्यर्थः ॥ १ ॥

विद्या शक्तिर्भवेद्बीजं शिव एव न चान्यथा ।
तेनायं परमो मन्त्रः शिवशक्त्यात्मकः स्मृतः ॥ २ ॥

एवं बीजशक्त्यात्मना विभक्तस्य मन्त्रस्य शिवशक्तिवाचकत्वेन तदात्मकतां प्रतिपादयितुमर्थात्मिके बीजशक्ती आह—विद्या शक्तिरिति । या परशिवस्वरूपसंविद्रूपिणी सैव शक्तिस्तत्प्रतिपाद्यं निष्कलं परशिवस्वरूपं बीजमर्थस्वरूपमेतदुभयं शब्दात्मकेन शक्तिबीजरूपभागद्वयेन प्रतिपाद्यते । तथा हि—सत्यज्ञानादिलक्षणं निरस्तसमस्तोपाधिकं स्वप्रतिष्ठं सर्वप्रत्ययगभूतं चैतन्यं हि परशिवस्वरूपं तत्प्रत्ययगर्भवाचिनाऽहंशब्देन प्रतिपादयितुं शक्यते । तदेव शिवस्वरूपं स्वमायावशाच्छक्यप्रतियोगित्वेन निरूप्यमाणं तत्परागभूतं शक्तिः । साऽपि परागर्थवाचिना स इति पदेन प्रतिपाद्यत इत्युक्तं बीजशक्त्योः शिवशक्तिस्वरूपप्रतिपादकत्वम् । तस्मादयं बीजशक्तिसमुदायरूपो मन्त्रः शिवशक्त्यात्मक इत्यर्थः । तदुक्तमाचार्यैः—

"हँकारः पुरुषः प्रोक्तः स इति प्रकृतिर्मता ।
पुंस्प्रकृत्यात्मको हंसस्तदात्मकमिदं जगत् " इति ॥ २ ॥

---

१ ङ. त्वदन्तं । २ ङ. च. °धनं म° । ३ ङ. या तु पर° । ४ ग. घ. ङ. °कल्प° । ५ ख. च. °र्थरूप° । ६ ग. °त्यभूतं चै° । ७ क. ङ. च. अहंकारः पुमान्प्रोक्तः ।

एतद्बुद्ध्वा जपेन्मन्त्रं बीजशक्त्यात्मना बुधः ।
ध्यायेत्साम्बं महादेवं संसारामयभेषजम् ॥ ३ ॥

इत्थं मन्त्रस्यार्थमभिधाय जपसमयेऽस्य ध्यानं विधत्ते—एतद्बुद्ध्वेति । उक्तलक्षणं शिवशक्त्यात्मकं निष्कलपरशिवस्वरूपं स्वीकृतलीलाविग्रहमर्धनारीश्वरं ध्येयमित्यर्थः । तदुक्तमाचार्यैः—

"अरुणकनकवर्णं पद्मसंस्थं च गौरी-
हरनियमितचिह्नं सौम्यतानूनपातम् ।
भवतु भवदभीष्टप्राप्तये पाशटङ्क-
भयवरदविचित्रं रूपमर्धाम्बिकेशम्" इति ॥ ३ ॥

यस्तु द्वादशसाहस्रमिमं जपति नित्यशः ।
तस्य सर्वाणि पापानि विनश्यन्ति न संशयः ॥ ४ ॥

उक्तध्यानविशिष्टजपस्य फलमाह—यस्त्विति ॥ ४ ॥

अथवा प्राणसंचारः सकारः परिकीर्तितः ।
हकारोऽपानसंचारो देहे देहभृतां[1] सदा ॥ ५ ॥

इत्थं वक्ष्यमाणप्रकारमनुसंधातुमशक्तस्य मन्दप्रज्ञस्य तालवोष्ठपुटादिव्यापारनिर्वर्त्यं जपविधिमभिधाय ततोऽपि संस्कृतचित्तस्य मध्यमाधिकारिणस्तालवोष्ठपुटव्यापारनैरपेक्ष्येण जपविधिं वक्तुं पूर्वोक्तयोर्बीजशक्त्यात्मनोर्मन्त्रभागयोरनुसंधाने प्रकारान्तरमाह—अथवेति । मुख्यप्राणस्य पराङ्मुखवृत्तिरपानस्तथा सति स इत्येतत्पदं परागर्थवाचकम् । तस्य प्राणवृत्तेश्च पराक्त्वसंबन्धात्प्राणवृत्त्यात्मक एव स इति मन्त्रभागः । हंशब्दस्य च प्रत्यगर्थत्वादपानवृत्तेश्च प्रत्यङ्मुखत्वात्प्रत्यक्त्वसाम्येनापानवृत्त्यात्मक एव हमिति मन्त्रभागः । एवमेतौ मन्त्रभागौ प्राणापानवृत्त्यात्मना स्वदेहे सर्वदाऽनुवर्तेते इत्यनुसंधेयामित्यर्थः ॥ ५ ॥

एवं यस्तु विजानाति मन्त्रमाचार्यपूर्वकम् ।
सोऽजपन्नपि हंसाख्यं जपत्येव न संशयः ॥ ६ ॥

अस्त्वेवं मन्त्रभागयोः प्राणापानात्मकता तदनुसंधानस्य कोऽतिशय इत्यत आह—एवं यस्त्विति । एवमुक्तप्रकारेण प्राणापानात्मना वर्तमानं मन्त्रमाचार्यमुखाद्यो वेद स साधकोऽजपन्नपि तालवोष्ठपुटव्यापारनिर्वर्त्यं जपमकुर्व-

१ क. ख. घ. च देहवतां । २ ग. °संदधा° । ३ क. मन्त्रविभागः ।

त्रापि प्राणापानवृत्त्यात्मनो मन्त्रस्यानुवृत्तेर्जपत्येव सर्वदा। अत एवेयं विद्याऽजपेत्याख्यायते ॥ ६ ॥

ईदृशीमजपां विद्यामास्तिक्याद्गुरुभक्तितः ॥ ७ ॥
यो विजानाति पापानि बुद्धिपूर्वकृतानि च ।
तस्य नश्यन्ति सर्वाणि नात्र कार्या विचारणा ॥ ८ ॥

भक्तिश्रद्धापुरःसरमुक्तमर्थमतिनैशित्येनानुसंधानस्य वाचिकजपादतिशयितं फलमाह—ईदृशीमजपामित्यादिना विचारणेत्यन्तेन। अत्र बुद्धिपूर्वकृतानीति विशेषितत्वाद्यथोदीरितद्वादशसहस्रजपविधावज्ञानकृतस्य पापमात्रस्य क्षयः। अत्र तु ज्ञानकृतस्यापीति विशेषः ॥ ७ ॥ ८ ॥

अथवा जीवमन्त्रोऽयं जीवात्मप्रतिपादकः ।
अहंशब्दस्य रूढत्वाल्लोके जीवात्मवस्तुनि ।
शक्तिमन्त्रः सकाराख्यः परमेश्वरवाचकः ॥ ९ ॥

इत्थमधिकारिणां मन्त्रानुसंधाने विशेषमभिधायाथ ततोऽप्युत्कृष्टस्य श्रवणमननादिसंस्कृतचित्तस्योत्तमाधिकारिणो हंसमन्त्रानुसंधाने विशेषं वक्तुमारभतेअथवा जीवेति। मन्त्रस्य पूर्वभागोऽहंशब्दो जाग्रदाद्यवस्थासाक्षिणो जीवात्मनोऽभिधायकः। यतस्तत्राहं सुख्यहं दुःखीत्यहंशब्दो रूढ्या लोके प्रयुज्यते। वेदे च "सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽयमहमित्येवाग्र उक्त्वाऽन्यन्नाम प्रब्रूते" इति। तस्मान्मन्त्रस्य पूर्वभागो जीवात्मप्रतिपादक इत्यर्थः। पूर्वं शक्तिप्रतिपादकतया व्याख्यातो यः स इति मन्त्रभागः सोऽपि सर्वशक्तिजगदुत्पत्तिस्थितिलयकारणं यत्पारमेश्वरं तत्त्वं तद्वाचक इत्यर्थः ॥ ९ ॥

प्रकृतार्थे प्रसिद्धत्वात्प्रसिद्धः परमेश्वरः ॥ १० ॥
महदाद्यणुपर्यन्तं जगत्सर्वं चराचरम्
जायते वर्तते चैव लीयते परमेश्वरे ॥ ११ ॥

कुत इत्यत आह—प्रकृतार्थ इति। प्रसिद्धप्रक्रान्तानुभूतास्तच्छब्दार्थाः। परमेश्वरश्च प्रसिद्धत्वादत्र प्रकृतोऽर्थः। सा पुनः प्रसिद्धिर्विंयदादिपरमाण्वन्तस्य चराचरात्मकस्य जगतः सृष्टिस्थितिलयाधिकरणतयाऽधिगन्तव्या। तदधिकरणत्वं चैवमाम्नायते—"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।

१ क. अतश्चेयं। २ ग. नैश्चित्ये°। ३ घ. °वा बीजम°। ४ घ. °वा बीजेति। ५ क. ग. घ. ङ. सुखी दुः°। ६ घ. °द्धप्रकृतानु°।

यत्प्रयन्त्यभिसंविशन्ति " इति । " आत्मन आकाशः संभूतः " इत्यादि च । तस्मात्कार्यप्रपञ्चस्य कारणतया प्रसिद्धः परमेश्वरस्तच्छब्देन स इति मन्त्रभागेणाभिधीयत इत्यर्थः ॥ १० ॥ ११ ॥

संसारित्वेन भातोऽहं स एव परमेश्वरः ।
सोऽहमेव न संदेहः स्वानुभूतिप्रमाणतः ॥ १२ ॥
हंसयोः शबलं हित्वा पदयोः सद्वितीययोः ।
पूर्णोऽहमेवं जानीयाद्बोधमात्रस्वभावतः ॥ १३ ॥

इत्थं पदार्थावभिधाय वाक्यार्थमाह—संसारित्वेनेति । गृहीतसंगतिकैः पदैरभिहितानां पदार्थानां पश्चादाकाङ्क्षासंनिधियोग्यतावशाद्यः संसर्गः स एव वाक्यार्थ इत्यभिहितान्वयवादिनो योग्येतरपदार्थान्वितस्वार्थाभिधायकानि पदानीत्यन्विताभिधानवादिनो विशिष्टो वाक्यार्थः । तदुभयमत्र न संभवति । ईश्वरस्वरूपव्यतिरिक्तस्य वस्त्वन्तरस्याभावात् । तस्माद्भ्रान्त्या भेदेन प्रतिपन्नस्य जीवस्य परमार्थतो यत्परशिवतादात्म्यं स एव वाक्यार्थः । ननु तमःप्रकाशवद्विरुद्धस्वभावयोरनयोः कथं तादात्म्यं घटते । तथा हि—अहंशब्दस्य मलिनसत्त्वप्रधानमायाकार्यान्तःकरणावच्छिन्नं कर्तृत्वभोक्तृत्वादिविशिष्टं किंचिज्ज्ञं प्रत्यक्चैतन्यं वाच्योऽर्थः । स इत्यस्य च विशुद्धसत्त्वप्रधानमायोपाधिकं कर्तृत्वभोक्तृत्वादिसकलसंसारव्यवहारातीतं सर्वज्ञं जगज्जन्मादिकारणं " सदेव सोम्येदमग्र आसीत् " इत्यादिश्रुत्या परोक्षेण निर्दिष्टं चैतन्यं वाच्योऽर्थः । ईदृग्विधयोः कथमेकत्वसंभव इति । सत्यम् । अत एव लक्षणा प्रवर्तते । सा च वाच्यार्थद्वयविरुद्धांशपरित्यागेनाविरुद्धांशस्वीकाररूपभागत्यागलक्षणा । तथा हि—ब्रह्मणस्तावत्सच्चिदानन्दैकरसात्मकत्वं श्रुत्या प्रतिपादितम् । जीवस्य च जाग्रदाद्यवस्थासु व्यावर्तमानास्वैक्यरूपेणानुवृत्तेः सद्रूपत्वं तत्साक्षित्वेन चिद्रूपत्वं परप्रेमास्पदत्वेनाऽऽनन्दरूपत्वं च स्वानुभवसिद्धम् । एवं च किंचिज्ज्ञत्वसर्वज्ञत्वप्रत्यक्त्वपरोक्षत्वादिविरुद्धांशमुभयत्र परित्यज्याविरुद्धयोः सच्चिदानन्दादिलक्षणयोर्जीवेश्वरस्वरूपयोः पररपरतादात्म्यं भागत्यागलक्षणया हंसमन्त्रः प्रतिपादयति । उक्तं हि—

" मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे ।
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते " ॥

एतत्सर्वमभिप्रेत्योक्तम् " संसारित्वेन भातोऽहं स एव परमेश्वरः " इति ।

१ घ. °रव्य° । २ क. ख. ग. घ. च. °त्वप° ।

अहं स एवेति शब्दशक्त्या जीवस्याखण्डब्रह्मतादात्म्ये प्रतिपादिते, अर्थाद्य-ब्रह्मणः शोधिताहमर्थतादात्म्यं तद्व्यक्तिहारेण[2] निर्दिशति—सोऽहमेवेति । एत-देव तादात्म्यलक्षण[3] एव वाक्यार्थोऽत्रेत्यस्य ज्ञापकम् । तथाचोक्तम्—

" संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ।
अखण्डैकरसत्वेन[5] वाक्यार्थो विदुषां मतः " ॥ इति ।

इत्थं जीवेश्वरयोः परस्परतादात्म्येनाखण्डैकरसत्वे सिद्धे जीवस्याब्रह्मत्व-सद्वितीयत्वादिभ्रमोऽपसरति । ईश्वरस्य च परोक्षत्वानात्मत्वादि निवर्तते । तदप्युक्तम्—

" प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः ।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥
तदर्थस्य च पारोक्ष्यम् " इति ।

उक्तलक्षणे च हंसमन्त्रार्थे प्रमाणाभावादसंगतिमाशङ्क्य तत्र विद्वदनुभवं प्रमाणयति—स्वानुभूतिरिति ॥ १२ ॥ १३ ॥

श्रुतिरप्येवमेवाऽऽह परमार्थप्रकाशिनी ।
सत्यसंपूर्णविज्ञानसुखरूपो महेश्वरः ॥ १४ ॥

सोऽप्यनुभवो विधुरपरिभावितकामिनीसाक्षात्कारवदर्थव्यवस्थापको नेत्या-शङ्क्य श्रुतिं संवादयति—श्रुतिरपीति। साऽप्युक्तार्थविरुद्धमेव द्वा सुपर्णेत्यादौ प्रतिपादयतीति विशिनष्टि—परमार्थेति । तत्र हि पारमार्थिकं जीवब्रह्मता-दात्म्यं समाने वृक्ष इत्युत्तरमन्त्रेण प्रतिपादयितुमविद्याकल्पितजीवेश्वरभेदप्रति-पादनाद्द्वा सुपर्णेत्यादिकमपारमार्थिकप्रकाशकम् । अतः " तत्त्वमसि " " अहं ब्रह्मास्मि " इत्यादिकैव श्रुतिः परमार्थप्रकाशिनी । साऽप्युक्तमर्थं प्रतिपादयती-त्यर्थः । उक्तं जीवेश्वरतादात्म्यमुपपादयितुमीश्वरस्य निरुपाधिकं रूपमाह—सत्यसंपूर्णेति । ननु "अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययम्" इत्या-दिश्रवणाच्च परशिवस्वरूपं स्थूलत्वादिसकलधर्मरहितं सत्यत्वादिप्रवृत्तिनिमि-त्तकैः सत्यादिशब्दैः कथं प्रतिपादयितुं शक्यत इति । उच्यते । चन्द्रस्यैक-त्वेऽपि वीचीतरङ्गाद्युपाधिबहुत्वेन बहुषु चन्द्रेषु कल्पितेष्वयं चन्द्रोऽयं चन्द्र इत्यनुवृत्तिप्रत्ययबलाच्चन्द्रत्वं सामान्यं यथा कल्प्यते, एवं सद्रूपस्य परशि-

१ घ. ॰र्थद्व॰ । २ ङ. ॰तिरेकेण । ३ घ. ॰दात्मि॰ल॰ । ४ ङ. ॰क्यार्थो वाक्यवृत्ता॰ वत्रे॰ । ५ घ. ॰त्वेन वाक्यार्थे ति॰ ।

वस्यैकत्वेऽपि स्वमायावशेन स्वस्मिन्परिकल्पितासु महदादिव्यक्तिषु सन्घटः सन्पट इत्याद्यनुवृत्तव्यवहारबलात्सत्यत्वज्ञानत्वानन्दत्वादीनि परापरसामान्यानि परिकल्प्यन्ते । अत एवोक्तमाचार्यैः—आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः " इति । एवं च सत्यादिशब्दाः परापरसामान्यवाचिनस्तदाश्रयमखण्डं परशिवस्वरूपं लक्षणया प्रतिपादयन्ति । अत एवोक्तं लौकिकान्येव सत्यादीन्यखण्डं लक्षयन्ति । संपूर्णशब्देन देशकालवस्तुकृतत्रिविधपरिच्छेदराहित्यरूपमानन्त्यमभिधीयते । अनेन च सामान्यव्यक्तिभेदोऽपि वस्तुकृतो निषिद्धो भवति । न च सत्यादिपदेष्वेकेनैव परशिवस्वरूपे लक्षिते तदतिरिक्तस्य प्रमेयस्याभावात्पदान्तरानर्थक्यमिति शङ्कनीयम् । असत्यत्वजडत्वदुःखरूपत्वादयो यावन्तो भ्रान्त्या परशिवस्वरूपेऽध्यस्तास्तद्व्यावृत्तिपरत्वात्सत्याद्यनेकपदोपादानस्य । तदुक्तम्—

" मिथ्यात्वादि यदध्यस्तं ब्रह्मण्येतस्य बाधनम् ।
नानापदैर्विना नेति ब्रह्म तैरुपलक्ष्यते " ॥ इति ॥

श्रुतिरपि सत्यज्ञानादिरूपतां परशिवस्य दर्शयति—" सत्यं ज्ञानमनन्तं ब्रह्म " विज्ञानमानन्दं ब्रह्म " इति ॥ १४ ॥

अहं चाव्यभिचारित्वात्सत्स्वभावो न संशयः ।
अहमव्यभिचार्येव साक्षित्वाद्व्यभिचारिणाम् ॥ १५ ॥

इत्थं परशिवस्य नैजं रूपमभिधाय जीवस्यापि तादृग्रूपत्वं प्रतिपादयितुं तावत्सद्रूपतामाह—अहं चेति । जाग्रदादिषु व्यावर्तमानेष्वहमर्थस्य चैतन्यस्यैकरूपतयाऽनुवृत्तेरव्यभिचारित्वात्सद्रूपतेत्यर्थः । असिद्धो हेतुरित्यत आह—अहमव्यभिचार्येवेति । व्यभिचारिणां व्यावर्तमानानां जाग्रदादिसाक्ष्याणां साक्षित्वात्स्वरूपानुप्रवेशेन साक्षादीक्षितृत्वादहमर्थस्याव्यभिचारिता । यथैकस्यैव दीपस्य घटपटादिषु बहुषु परस्परव्यभिचारिषु प्रकाश्येषु प्रकाशकस्य तस्य भेदाभावादव्यभिचारित्वं तद्वदित्यर्थः । एतदव्यभिचारित्वं तापनीयोपनिषद्येवमाम्नातम्—" तं वा एतमात्मानं जाग्रत्यस्वप्नमसुषुप्तं स्वप्नेऽजाग्रतमसुषुप्तं सुषुप्तेऽजाग्रतमस्वप्नम् । तुरीयेऽजाग्रतमस्वप्नमसुषुप्तमव्यभिचारिणम् " इति ॥१५॥

ज्ञातमज्ञातमप्यर्थं सदाऽहं वेद केवलः ।
सोऽर्थो मां न विजानाति ततोऽविच्छिन्नचेतनः ॥ १६ ॥

---

१ घ. °नुभावो । २ ग. °साम्यसामा° । ३ घ. °कादेव । ४ च. °पतायां° । ५ क. घ. °षुप्तेऽजाग्रतमस्वप्नं सु° । ६ च. ततोऽहं छिन्न° ।

इत्थमव्यभिचारित्वेनाहमर्थस्य सद्रूपत्वं निर्धार्य चिद्रूपतामुपपादयति—ज्ञातमिति । ज्ञायतेऽनेनेति ज्ञातमन्तःकरणवृत्तिः, तया चक्षुरादिसंप्रयोगवशाद्ग्राह्यो घटादिविषयो यदा व्याप्यते तदा साक्षिचैतन्यं ज्ञानविषयीकृतं विषयं ज्ञातत्वेन प्रकाशयति तस्मिन्नेव समयेऽतिरिक्तं सर्वमज्ञानक्रोडीकृतमज्ञातत्वेनैव प्रकाशयति । तदुक्तमाचार्यैः—" सर्वं वस्तु ज्ञाततया वाऽज्ञाततया साक्षिचैतन्यस्य विषयः " इति । तदिदमुच्यते—" ज्ञातमज्ञातमप्यर्थं सदाऽहं वेदेति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते " इति श्रुतेर्ज्ञानस्य सनातनत्वम् । ननु वेदेति तिङा प्रमाश्रयः कर्ताऽभिधीयते । स.च द्रव्यरूपः । ज्ञानं तस्य गुणः । अतः कुतोऽहमर्थस्य ज्ञानात्मकतेत्यत आह—केवल इति । अग्नो दहतीत्यत्र यथाऽग्नेरेव दग्धृत्वमेवमत्रापि प्राप्ताप्राप्तविवेकेन ज्ञानस्यैव प्रकाशकत्वम् । घटज्ञानं पटज्ञानमिति भेदप्रतीतिस्तु तत्तदन्तःकरणवृत्त्युपाधिकृता । अतस्तद्विषयविशिष्टान्तःकरणतद्वृत्तिसाक्षित्वेनावस्थित आत्मा केवलं चिद्रूप एव । एतदेवोपपादयति—सोऽर्थ इति । यदि ज्ञानात्मको द्रव्यरूप आत्मा ज्ञाताज्ञातत्वाभ्यां विषयं प्रकाशयेत्तर्हि घटादिलक्षणपरागर्थोऽपि स्वप्रतियोगिभूतं प्रत्यगर्थं जानीयान्न च जानाति । तस्मादहमर्थः केवलं चिदात्मक एव ॥ १६ ॥

चितोऽन्यशेषताभावाच्चितोऽचिच्छेषता न हि ।
शरावादिपदार्थानां चेतनत्वप्रसक्तितः ॥ १७ ॥

ननु चिदाधारो द्रव्यरूपः कुत इत्यत आह—चित इति । अव्यभिचारिसाक्षिचैतन्यस्य व्यभिचारिसाक्ष्यशेषतानुपपत्तेरित्यर्थः । तथा हि—द्रव्यरूपस्याऽऽत्मनः शेषश्चिदिति वदन्वादी प्रष्टव्यः किमसावात्माऽचिदात्मकोऽथवा चिद्रूप आहोस्विच्चेतन इति त्रेधा विकल्प्याऽऽद्यं प्रत्याह—चितोऽचिच्छेषतेति । न हि प्रतिज्ञामात्रेण वस्तुसिद्धिरित्यत आह—शरावादीति । यदीयं चिज्जडस्याऽऽत्मनः शेषः स्याज्जडत्वाविशेषाच्छरावादीनामपि चिच्छेषत्वेन चेतनत्वप्रसङ्गः । तस्माज्जडस्याऽऽत्मनश्चिच्छेष इति तावन्न युक्तम् ॥ १७ ॥

चिच्छेषत्वं च नास्त्येव चितश्चिन्न हि भियते ।
भियते चेदचिच्चित्स्याच्चितोऽचित्त्वं विरुध्यते ॥ १८ ॥

नापि द्वितीय इत्याह—चिच्छेषत्वं चेति । अस्मिन्पक्षे चिद्रूपस्याऽऽत्मनश्चिच्छेष इत्युक्तं स्यात् । तच्च न युक्तम् । शेषशेषिभावो हि भेदसंव्यपेक्षः ।

---

१ क. ग. °मज्ञातापि । २ ग. घ. ङ. च. °वलश्चिद्रू° । ३ च. °चिद्रात्म° । ४ ग. °सत्यापि° ।

यतोऽत्र चितः सकाशाच्चिदन्तरस्य भेदो नास्ति । औपाधिकभेदव्यतिरेकेण प्रकाशात्मतयैकत्वावगमात् । ननु चितश्चिदन्तरस्य पारमार्थिको भेदो दृश्यत एवेत्यत आह—भिद्यते चेदिति । यद्युपाधिसंपर्कव्यतिरेकेण चित्स्वत एव भिन्ना स्याद्घटादिवच्चितो भिन्नत्वेन तस्या अचित्त्वमापतेत् । इष्टापत्तिशङ्कां वारयति—चितोऽचित्त्वं विरुध्यत इति ॥ १८ ॥

तथा चिच्चेतनस्यापि न शेषत्वमवाप्नुयात् ।
शेषत्वे सति तत्सिद्धिस्तत्सिद्धौ शेषता चितः ॥ १९ ॥

नापि तृतीयोऽन्योन्याश्रयप्रसक्तेरित्याह—तथा चिच्चेतनस्यापीति । यस्य चिच्छेषः स चेतनः । यश्चेतनस्तस्य चिच्छेष इत्यन्योन्याधीननिरूपणत्वेनैकतरस्याप्यसिद्धिरित्यर्थः । इत्थं चितोऽन्यशेषत्वानिरूपणात्स्वप्राधान्येन केवलं चिदेवाहमर्थः ॥ १९ ॥

अतोऽन्यशेषता लोके चितो भ्रान्त्या प्रतीयते ।
सुखस्वभाव एवाहं सदा प्रेमास्पदत्वतः ॥ २० ॥

ननु ज्ञातो घटः, अहं जानामीत्यादौ चितोऽन्यशेषत्वप्रतीतिः कथमित्याशङ्क्य भ्रान्तिरेवेत्याह—अतोऽन्यशेषतेति । इत्थं जीवस्य चिद्रूपत्वमुपपाद्याऽऽनन्दरूपत्वमाह—सुखस्वभाव इति । सदा भूतभविष्यद्वर्तमानलक्षणकालत्रयेऽपि परप्रेमास्पदत्वान्निरतिशयानन्दात्मक एवाहमर्थः । उक्तं हि—"परप्रेमास्पदतया मा न भूवमहं सदा । भूयासमिति यो द्रष्टा सोऽहमित्यवधारय" इति । परप्रेमास्पदत्वं चैवमाम्नायते " न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति " इत्यादिना "न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति" इत्यन्तेन । तथा हि लोके यो यच्छेषत्वेन प्रियः स ततोऽपि प्रियतमो दृश्यते । यथा पुत्रस्य भार्यादयः पुत्रशेषतया पितुः प्रियास्तेभ्योऽपि पुत्रः पितुः प्रियतमो भवति । एवमेव पतिजायापुत्रादयो यस्याऽऽत्मनः शेषतया प्रियाः स आत्मा सर्वस्मादपि प्रियतम इति गम्यते । तथा चोक्तम्—

पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः ।
द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय " ॥ इति ।

तस्मान्निरतिशयप्रेमास्पदत्वादहमर्थस्य परमानन्दरूपत्वं सिद्धमित्यर्थः ॥२०॥

---

१ क. 'पयेत । इ' । २ क. ग. घ, च. °रेवं चेत्या°, ३ च. °पतामा°। ४ ङ. 'रयेदिति।

असुखस्य न हि प्रेमास्पदत्वं परिदृश्यते ।
नाहमन्यस्य शेषो हि शेषी सर्वस्य सर्वदा ॥ २१ ॥

हेतुरस्तु साध्यं मा भूत्किं विपक्षे बाधकमित्याशङ्क्य हेतूच्छित्तिप्रसङ्ग एव बाधक इत्याह—असुखस्य न हीति । ननु सुखानात्मकस्य सुखसाधनस्य दुःखाभावस्य च प्रेमास्पदत्वं दृश्यते कथमनेनाऽऽनन्दरूपतासिद्धिरित्यत आह—नाहमन्यस्येति । सुखसाधनदुःखाभावौ हि सुखशेषतया प्रियौ, अहमर्थस्त्वनन्यशेषत्वेन स्वप्रधानतया प्रेमास्पदत्वात्परानन्दरूपः किं न स्यादित्यर्थः ॥२१॥

पूर्णोऽहं सर्वसाक्षित्वात्सर्वदा परमार्थतः ।
अपूर्णो युगपत्सर्वं न विजानाति कश्चन ॥ २२ ॥

पूर्णत्वमप्यैश्वररूपमहमर्थे योजयति—पूर्णोऽहमिति । सर्वदा भूतभविष्यद्वर्तमानेषु कालेषु सर्वासु जाग्रदाद्यवस्थासु सर्वदेशे वर्तमानस्य घटपटादिपदार्थस्य परमार्थतो बाह्याभ्यन्तरभेदराहित्येन स्वाविद्यापरिकल्पिततया साक्षादीक्षितृत्वादहमर्थः पूर्णः । देशकालवस्तुकृतावच्छेदरहित इत्यर्थः । उक्तप्रकारं साक्षित्वं परिच्छिन्नस्य न संभवतीत्याह—अपूर्ण इति । युगपत्समसमयमेव सर्ववस्तु ज्ञातत्वेनाज्ञातत्वेन च यस्मात्साक्षिचैतन्यं गोचरयति तस्मात्सर्वगतम् । अतथाविधं चेद्युगपत्सर्वं ज्ञातुं न शक्नुयादित्यर्थः ॥ २२ ॥

संसारवर्जितः साक्षात्सर्वदा परमेश्वरः ।
अहं संसारसाक्षित्वात्तथा संसारवर्जितः ॥ २३ ॥

एवं पूर्वोक्तं पारमेश्वरं सत्यज्ञानादिलक्षणं रूपमहमर्थे योजयित्वा संसार्यसंसारित्वलक्षणो यो भेदभ्रमस्तमपि व्युदस्यति—संसारवर्जित इति । विशुद्धसत्त्वप्रधानमायोपाधिकत्वादप्रतिहतज्ञानवैराग्यादिसंपन्नो जगत्कर्ता परमेश्वरः संसारवर्जितः । स्वमायाविजृम्भितस्य संसारस्य मिथ्यात्वावगतेः । "असङ्गो न हि सज्जते" इत्यादिश्रुतेश्च । ननु विशुद्धसत्त्वप्रधानमायोपाधिकत्वाद्युक्तं परमेश्वरस्य संसारवर्जितत्वं मलिनसत्त्वप्रधानमायाक्रान्तस्य जीवस्य कथं तद्राहित्यमित्यत आह—अहं संसारेति । यः साक्षी स साक्ष्याद्भिन्नो दृष्टः । यथा घटात्साक्ष्याद्घटसाक्षी । तथा संसारोऽपीतरवस्तुवत्साक्षिभास्यत्वात्साक्ष्यं तस्मात्संसारात्साक्षी विविक्त एवेत्यहमर्थोऽपि संसारवर्जित एव । यथा लोके विवदमानयोरेव जयपराजयौ । साक्षिणस्तु तटस्थतैव केवलम् । यस्तु कूट-

१ क. घ. °भावो हि । २ क. घ प्रियो । ३ ग. °न.प्र° । ४ ग. °त्मान° । ५ क. ग. घ. च. सर्वस्य । ६ घ. °क्षितत्वाद्देश° ।

साक्षी तयोर्मध्ये पुरुषविशेषं स्वात्मतया पश्यन् करोति स तदीयजयपराजयभागपि भवति । एवमेवान्तःकरणं स्वात्मतयाऽभिमन्यमानस्यैव चैतन्यस्य तदीयसंसारः, न तु तदनुपहितस्याविक्रियस्य साक्षिचैतन्यस्येत्यर्थः ॥ २३ ॥

एवं वाक्यानुसारिण्या युक्त्याऽऽचार्यपुरःसरम् ।
अहं स सोऽहमेवेति विजानीयाद्विचक्षणः ॥ २४ ॥

इत्थं मन्त्रपदार्थयोर्जीवेश्वरयोः सारूप्यमुपपाद्य प्रागुक्तमेकत्वविज्ञानमुपसंहरति—एवमिति । वाक्यं प्रमाणत्वेन प्रागुदाहृतं तत्त्वमस्यादिकं हंसमन्त्रप्रतिपाद्यस्यार्थस्यान्यथात्वनिराकरणं युक्तेरनुसरणं नाम । उक्तं हि—

" प्रत्यक्षादेः प्रमाणस्य तर्कोऽनुग्राहको भवेत् ।
पक्षे विपक्षजिज्ञासाविच्छेदस्तदनुग्रहः ॥ " इति ।

एवं युक्तिपुरःसरमाचार्यमुखाद्ब्रह्मात्मैकत्वलक्षणं हंसमन्त्रार्थं जानीयादित्यर्थः ॥ २४ ॥

य एवमात्ममन्त्रेण जीवात्मपरमात्मनोः ।
पारमार्थिकमेकत्वं सुदृढं परिपश्यति ।
स एव ब्रह्मविन्मुख्यो नेतरोऽज्ञानमोहितः ॥ २५ ॥

इत्थं श्रवणमननाभ्यामर्थं निश्चित्य कृतनिदिध्यासनः सुदृढमसंभावनाविपरीतभावनाविरहितं यथा भवति तथा जीवपरमात्मनोर्वास्तवमेकत्वमनेन मन्त्रेण यः साक्षात्करोति स एव ब्रह्मविदां श्रेष्ठः । यस्त्वितरस्तद्विलक्षणोऽहमन्यः सोऽन्य इति जानाति नासौ ब्रह्मविदपि त्वज्ञानमोहितः । उक्तं हि भगवता—

" अज्ञानेनाऽऽवृतं ज्ञानं तेन मुह्यन्ति जन्तवः " इति ।

श्रुतिश्च—" अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः " इति ॥ २५ ॥

एवंभूतं परिज्ञानं यस्य जातं यदा भुवि ।
तदैव तस्य संसारविनाशो नास्ति संशयः ॥ २६ ॥

अथैतस्य साक्षात्कारज्ञानस्य फलमाह—एवमिति । ब्रह्मात्मैकत्वगोचरः साक्षात्कारो यदा जायते तदनन्तरक्षण एव सर्वानर्थमूलाविद्याया निवृत्तेस्तत्कार्यभूतः संसारोऽपि विदुषो निवर्तते । न तु स्वर्गादिफलवद्देशान्तरे कालो-

१ ग. स्वात्मात्मतया । २ घ. सुदृढं पश्यति द्विजाः । ३ घ. ङ. च. 'भूत°' ।

न्तरे वा प्राप्तव्या मुक्तिः । यस्मात्प्रत्यगात्मनः स्वाभाविकं ब्रह्मात्मत्वं तदविद्यातिरोधानवशादप्राप्तमिव स्वरूपसाक्षात्कारपर्यन्तमासीत् । तत्साक्षात्कारे च ब्रह्माकारमनोवृत्त्यवच्छिन्नचैतन्येन तस्यामविद्यायां समूलं निवर्तितायामावरणापगमेन स्वाभाविकं ब्रह्मात्मत्वं तस्मिन्नेव क्षणे तत्रैव देशे विदुषा प्राप्यते । श्रूयते हि—

" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे " ॥ इति ।

" न तस्य प्राणा उत्क्रामन्त्यत्रैव समव लीयन्ते " इति च ॥ २६ ॥

हंसविद्यामविज्ञाय मुक्तौ यत्नं करोति यः ।
स नभोभक्षणेनैव क्षुन्निवृत्तिं करिष्यति ॥ २७ ॥

ईदृशीमजपां विद्यां जानत एव मुक्तावधिकारो नान्यस्येति दर्शयति—हंसविद्यामिति ॥ २७ ॥

हंसविद्या परा चैषा परमन्त्रप्रभेदिनी ।
सर्वैश्वर्यप्रदा सर्वदेवतातृप्तिकारिणी ॥ २८ ॥
अस्याश्च जपमात्रेण दीर्घायुष्यमवाप्नुयात् ।
आरोग्यं विजयं विद्यामवाप्नोति न संशयः ॥ २९ ॥
बहुनोक्तेन किं विद्या हंसाख्या सर्वकामदा ।
हंस हंसेति यो ब्रूयात्सर्वदा शिव एव सः ॥ ३० ॥

इत्थं मुमुक्षून्प्रत्यात्ममन्त्रस्य मुक्तिसाधनत्वमभिधाय, ऐहिकफलसाधनत्वमपि दर्शयति—हंसविद्या परेत्यादिना सर्वकामदेत्यन्तेन । परमन्त्रप्रभेदिनी । आभिचारार्थं परैः शत्रुभिः प्रयुक्ता ये मारणमन्त्रास्तानपि सम्यग्भिनत्त्येषा हंसविद्या । प्राणापानात्मकत्वादस्य मन्त्रस्याऽऽयुर्वृद्धिहेतुत्वम् । हंस हंसेति । यस्तूक्तमर्थमनुसंधातुमशक्तः सर्वदा हंस हंसेति यो ब्रूयात्सोऽपि कालक्रमेण शिव एव भवेदित्यर्थः ॥ २८ ॥ २९ ॥ ३० ॥

शिवेन विष्णुना चैव ब्रह्मणा सर्वदैवतैः ।
आदृता हंसविद्येयमचिरादेव सिद्धिदा ॥ ३१ ॥

---

१ क. यस्तदुक्त°।

अथास्य मन्त्रस्य शीघ्रफलसाधनत्वमाह—शिवेनेति । इत्थं नामैषा हंसविद्या महाप्रभावा ब्रह्मविष्ण्वादयः सर्वे देवा अप्येनामाद्रियन्ते । अतोऽयं मन्त्रः प्रेप्सितं फलं शीघ्रं प्रयच्छतीत्यर्थः ॥ ३१ ॥

रेचकं पूरकं मुक्त्वा कुम्भके सुस्थितः सुधीः ।
नाभिकन्दे सभौ कृत्वा प्राणापानौ समाहितः ॥ ३२ ॥
मस्तकस्थामृतस्वादं पीत्वा ध्यानेन सादरम् ।
दीपाकारं महादेवं ज्वलन्तं नाभिमध्यमे ॥ ३३ ॥
अभिषिच्यामृतेनैव हंस हंसेति यो जपेत् ।
जरामरणरोगादि न तस्य भुवि विद्यते ॥ ३४ ॥

अथ नित्यसाधनयोगं दर्शयति—रेचकमित्यादि । नाभिकन्द इति । नाभिमूले वर्तमानः कन्दो नाभिकन्दः । नाभिचक्रमिति यावत् । तस्य वामदक्षिणभागयोर्द्वे नाड्याविडापिङ्गलाख्ये । तयोर्मध्ये नाभिकन्दस्य मध्यादुत्थिता ब्रह्मरन्ध्रपर्यन्तं प्रसृताऽधोवक्त्रा नाडी सुषुम्ना नाम । ततोऽधस्तान्मूलाधारादुत्थितः पवनः सुषुम्नावक्त्रस्य पिहितत्वात्पार्श्वनाडीभ्यामेव प्राणात्मना निर्गच्छति । तदाहुराचार्याः—

" उभयात्मिक्यधोवृत्ता नाडी दीर्घा भवेदृजुः ।
अवाङ्मुखी सा तस्याश्च भवेत्पक्षद्वये द्वयम् ॥
तत्र या प्रथमा नाडी सा सुषुम्नेति कथ्यते ।
या वामेडेति सा प्रोक्ता दक्षिणा पिङ्गला मता ॥
देहेऽपि मूलाधारेऽस्मिन्समुद्यति समीरणः ।
नाडीभ्यामस्तमभ्येति घ्राणतो द्विषडङ्गुले ॥" इति ।

एवं च रेचकपूरककुम्भकेषु प्राणायामेषु पिङ्गलेडासुषुम्नाख्या एतास्तिस्रो नाड्यः क्रमेण विनियुक्ताः । उक्तं हि—

"रेचयेन्मारुतं दक्षया दक्षिणं पूरयेद्वामया मध्यनाड्या पुनः ।
धारयेदीरितं रेचकादित्रयं स्यात्कलौदन्तविद्याख्यमात्रात्मकम् ॥" इति ।

तथा रेचकपूरकाख्यं प्राणायामद्वयं मुक्त्वा पवनाभ्यासपाटवेन सुषुम्नामुखस्याऽऽवरणमुद्घाट्य मूलाधारादुत्थितं पवनं तस्यां प्रवेश्य कुम्भकप्राणायामे सुदृढमवस्थित इडापिङ्गलाभ्यां मूर्धोऽधो मुखभेदेन संचरन्तौ प्राणापानौ

* कलाः षोडश १६ द्वात्रिंशदन्ताः ३२ तथा विद्या रदद्वयी ६४ इति ज्ञेयम् ।

१ ङ. °ला हंसविद्याख्यमन्त्रात्म° ।

नाभिकन्दे समौ कृत्वा प्रवेशनिर्गमादिवैषम्यं यथा न भवति तथा तत्रैव निरोध्य समाहित एकाग्रचित्तः सुधीर्ध्येयगोचरशोभनज्ञानः सन्सुषुम्नया ब्रह्मरन्ध्रपर्यन्तं प्रसृतपवनप्रेरणेन द्रवीभूतद्वादशान्तस्थितचन्द्रमण्डलात्स्रुतं सुषुम्नान्तर्गतममृतप्रवाहमेवंगुणविशिष्टध्यानेन स्वयं सादरं पीत्वाऽमृतमयदेहः सन्नाभिमध्यमे नाभिकन्दस्य मध्यादुत्थिते हृत्पद्मे स्थितं ज्वलन्तं प्रकाशयन्तं दीपाकारं दीपवत्स्वयंप्रकाशम् । अथ वा नाभिचक्रमध्यदेशवर्तिनो जाठराग्नेः शिखा हृदयकमलस्याग्रतो यत्सुषिरं तन्मध्ये दीपशिखावदवतिष्ठते तदवच्छिन्नत्वात्परशिवोऽपि दीपाकारः । श्रूयते हि—

"तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ॥
सोऽग्रभुग्विभजंस्तिष्ठन्नाहारमजरः कविः ।
(* तिर्यगूर्ध्वमधःशायी·····मयस्तस्य संतता) ॥
संतापयति स्वं देहमापादतलमस्तकम् ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता ॥
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ॥
तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थितः" ॥ इति ।

एवंभूतं हंसमन्त्रप्रतिपाद्यं परशिवमुक्तरीत्या हृदम्बुजमध्येऽमृतेनाऽऽप्लाव्य यो हंसमन्त्रं जपेत्तस्याजरामरत्वं भवति । आचार्यैरप्ययं योग उक्तः—

"हंसाण्डाकारमेनं स्रुतपरमसुधं मूर्धचन्द्राद्गलन्तं
नीत्वा सौषुम्नमार्गं निशितमतिरथ व्याप्तदेहोपघातम् ।
स्मृत्वा संजप्य मन्त्रं पलितविषशिरोरुग्ज्वरोन्मादभूता-
पस्मारादींश्च मन्त्री हरति दुरितदौर्भाग्यदारिद्र्यदोषान्" ॥

इति ॥ ३२ ॥ ३३ ॥ ३४ ॥

एवं दिने दिने कुर्यादणिमादिविभूतये ॥
ईश्वरत्वमवाप्नोति सदाऽभ्यासपरः पुमान् ॥ ३५ ॥

उक्तप्रकारेणेमं योगं प्रतिदिनं युञ्जानस्याणिमादिविभूतयोऽपि न दूर इत्याह—एवमिति । सर्वदाऽभ्यस्यत ईश्वरत्वप्राप्तिमाह—ईश्वरेति ॥ ३५ ॥

* धनुश्चिह्नान्तर्गतं 'ग' पुस्तकेऽधिकम् ।

१ ख. संस्थितं । २ ङ. 'रोन्मादभूतादिबाधाप° । ३ ग. घ. °रेण मन्त्रयो° । ४ ख. ब. च. दूरत ।

बहवोऽनेन मार्गेण प्राप्ता नित्यत्वमास्तिकाः ।
हंसविद्यामृते लोके नास्ति नित्यत्वसाधनम् ॥ ३६ ॥

किं बहुनाऽनेनैव योगेन नित्यत्वं प्राप्यत इतोऽन्यन्नित्यत्वसाधनं नास्तीत्याह—बहवोऽनेनेति ॥ ३६ ॥

यो ददाति महाविद्यां हंसाख्यां पारमेश्वरीम् ।
तस्य दास्यं सदा कुर्याच्छ्रद्धया परया सह ॥ ३७ ॥

गुरुशुश्रूषाजनितादृष्टसहकृतैवैषा हंसविद्या फलप्रदेत्यभिप्रेत्याऽऽह—यो ददातीति ॥ ३७ ॥

शुभं वाऽशुभमन्यद्वा यदुक्तं गुरुणा भुवि ।
तत्कुर्यादविचारेण शिष्यः संतोषसंयुतः ॥ ३८ ॥

गुरुवाक्यमपि सर्वदा न लङ्घनीयमित्याह—शुभमिति ॥ ३८ ॥

हंसविद्यामिमां लब्ध्वा गुरोः शुश्रूषया नरः ।
आत्मानमात्मना साक्षाद्ब्रह्म बुद्ध्वा सुनिश्चलः ॥ ३९ ॥

एवं गुरुशुश्रूषापरोऽनयैव विद्यया ब्रह्मभूयं प्राप्नोतीत्याह—हंसविद्यामिति । आत्मानमन्तःकरणाद्युपाधिविविक्तं प्रत्यक्चैतन्यमात्मना ब्रह्मात्मैकत्वविषयेणान्तःकरणेन ॥ ३९ ॥

देहजात्यादिसंबन्धान्वर्णाश्रमसमन्वितान् ॥ ४० ॥
वेदाञ्शास्त्राणि चान्यानि पादपांसुमिव त्यजेत् ।
न गुरुं संत्यजेन्नित्यं जानन्नस्य कृतं नरः ॥ ४१ ॥

इत्थमनया विद्यया प्रत्यगात्मनो ब्रह्मत्वं साक्षात्कृतवतो जगत्यन्यदुपादेयं नास्तीत्याह—देहजात्यादीति । वर्णा ब्राह्मणजात्यादयः । जात्यादीति जातिग्रहणेन तत्तद्देशोपाधिकावान्तरजातिर्विवक्षिता । शास्त्राणि चान्यानीति । अन्यशास्त्राणीत्यर्थः । इत्थं सर्वपरित्यागस्योक्तत्वात्तन्मध्यपतितत्वेन गुरोस्तदुपदिष्टस्य च ज्ञानस्य त्यागप्रसक्तौ तन्निवारयति—न गुरुमिति ॥ ४० ॥ ४१ ॥

---

१ घ. ङ. परमेश्वरीं । २ क. ग. च. °भतं प्रा° । ३ ङ. ब्राह्मणादयः । ४ ङ. °ध्यपाति° ।

गुरुभक्तिं सदा कुर्याच्छ्रेयसे भूयसे नरः ।
गुरुरेव शिवस्तस्य नान्य इत्यब्रवीच्छ्रुतिः ॥ ४२ ॥

मुक्तिसाधनेषु गुरुभक्तिरत्यन्तमन्तरङ्गमित्याह—गुरुभक्तिमिति । भूयसे श्रेयसे बहुतराय श्रेयसे । निःश्रेयसायेति यावत् ॥ ४२ ॥

श्रुत्या यदुक्तं परमार्थमेत-
न्नसंशयोऽन्यच्च ततः समस्तम् ।
श्रुत्याऽविरोधे च भवेत्प्रमाणं
नो चेदनर्थाय न च प्रमाणम् ॥ ४३ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे हंसविद्याविवरणं नाम सप्तमोऽध्यायः ॥ ७ ॥

अत्र निश्रेयसस्वरूपे बहवो विप्रतिपद्यन्ते[1] । प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति नैयायिकाः । द्रव्यगुणादिषट्पदार्थानां साधर्म्यवैधर्म्यज्ञानं निःश्रेयस इति वैशेषिकाः । प्रकृतिपुरुषविवेकख्यातेः संसारविलय इति सांख्याः । एवमन्येऽपि स्वमतानुसारेणान्यथैव प्रतिपद्यन्ते, तत्कुतो ब्रह्मात्मैकत्वलक्षणो मोक्ष इत्याशङ्क्याऽऽह—श्रुत्येति । श्रुत्या वेदान्तवाक्येन यद्ब्रह्मात्मैकत्वमुपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गसङ्गावात्तात्पर्येण[2] प्रतिपादितं तत्परमार्थमेव । तस्यान्यथाभावो न शङ्कनीयः । नाप्यस्मिन्नर्थे संशयः । यत एवं ततः सर्वशास्त्रं श्रुत्या सहाविरुद्धं चेत्प्रमाणं नो चेत्तच्छास्त्रमप्रमाणमत एवानर्थहेतुश्च भवतीत्यर्थः ॥ ४३ ॥

इति श्रीमाधवाचार्येण विरचितायां सूतसंहिताटीकायां तात्पर्यदीपिकाख्यायां चतुर्थे यज्ञवैभवखण्डे हंसविद्याविवरणं नाम सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

सूत उवाच—

षडक्षरं प्रवक्ष्यामि समासेन सुशोभनम् ।
येन संसारविच्छित्तिर्ब्रह्मेन्द्रादिविभूतयः ॥ १ ॥

१ ग. घ. ङ. च. °न्ते । प्रमेयप्रमाणादि° । २ क. °दुब्रह्मैक° । ३ ध. °भावतात्प° ।

इत्थं शिवशक्त्यात्मकं मुक्तिसाधनमात्ममन्त्रमभिधाय तथाविधं षडक्षरमन्त्रं वक्तुमारभते–षडक्षरमिति। न केवलमेतन्मुक्तिसाधनं ब्रह्मत्वादिपदमप्येतेनैव प्राप्यत इत्याह—येनेति ॥ १ ॥

ऋषिर्ब्रह्माऽस्य मन्त्रस्य गायत्रं छन्द उच्यते।
देवताऽस्य शिवः साक्षात्सत्यज्ञानसुखाद्वयः ॥ २ ॥

अथ ऋष्याद्यानाह—ऋषिर्ब्रह्मेति ॥ २ ॥

शक्तिर्माहेश्वरी सा च भुवनेशाक्षरं भवेत्।
बीजं मायाविशिष्टस्तु शिवः पूर्वोक्तलक्षणः ॥ ३ ॥
सोऽपि तच्छब्द एव स्यान्न्यासः पञ्चाक्षरैः क्रमात्।
अङ्गुष्ठादिकनिष्ठान्तं विन्यसेदक्षरं[1] क्रमात् ॥ ४ ॥
मस्तके च ललाटे च हृदि नाभौ पदद्वये।
पुनः पञ्चाक्षरेणैव पञ्चाङ्गं विन्यसेत्क्रमात् ॥ ५ ॥

शक्तिर्माहेश्वरीति। अस्य मन्त्रस्यार्थरूपा शक्तिरात्ममन्त्रवत्संविद्रूपिण्याद्या शक्तिरेव। सा च प्रतिपाद्यप्रतिपादकयोरभेदात्स्ववाचकशिवशब्दात्मकः सच्छब्दात्मकबीजं भवेदित्यर्थः। इत्थं बीजशक्ती संस्मृत्याङ्गुष्ठाद्यङ्गुलीषु देहावयवेषु प्रणवसहितानि पञ्चाक्षराणि न्यसेदित्याह–न्यासः पञ्चाक्षरैरित्यादिना। पुनरेभिरेवाक्षरैर्नेत्रवर्जितानि पञ्चाङ्गानि हृदयादिषु न्यसेदित्याह—पुनः पञ्चेति। ॥ ३ ॥ ४ ॥ ५ ॥

प्रणवं प्रथमं विद्याद्द्वितीयं तु नकारकम्।
मकारं तत्परं विद्याच्छिकारं तु ततः परम् ॥ ६ ॥
वकारं पञ्चमं विद्याद्यकारं षष्ठमेव च।
इत्थं षडक्षरं विद्याज्जाबालोपनिषद्गतम् ॥ ७ ॥

अथ स्वरूपपरिज्ञानार्थमक्षराण्यनुक्रामति—प्रणवमिति। न केवलमेतत्षडक्षरं मन्त्रमात्रमपि त्वौपनिषदमात्मतत्त्वं प्रतिपादयितुमौपनिषत्स्वेवाऽऽम्नातम्। अतोऽस्य मन्त्रस्य प्रभावो निरवधिरित्याभिप्रेत्याऽऽह—जाबालोपनिषद्गतमिति। तत्र हि जाबालोपनिषद्येवमाम्नायते—"अथ हैनं ब्रह्मचारिण ऊचुः किंजप्येनामृतत्वं ब्रूहीति। स होवाच याज्ञवल्क्यः शतरुद्रियेणेत्येतानि ह वा अमृतनामधेयान्येतैर्ह वा अमृतो भवति" इति। शतरुद्रियनाम्नां जप-

१ क. ख. च. °क्षरक°। घ. °क्षरैः क°। २ क. ख. °शक्तिं सं°।

स्यामृतत्वसाधनत्वमाम्नातम् । तेषु च नामसु नमः शिवाय च शिवतराय चेत्याम्नायते । (* वस्तुतस्तु बृहज्जाबालोपनिषदि प्रणवसहित एव षडक्षरो मन्त्रः पठित इति तत्त्वम्)॥ ६ ॥ ७ ॥

मन्त्रः साङ्गः समाख्यातो मन्त्रार्थः कथ्यतेऽधुना ।
सत्यज्ञानपरानन्दस्वरूपस्य शिवस्य तु ॥ ८ ॥

इत्थं मन्त्रस्वरूपमभिधाय तदर्थं वक्तुं प्रस्तौति—मन्त्रः साङ्ग इति । तत्र मन्त्रावयवस्य शिवपदस्यार्थमाह—सत्यज्ञानेति ॥ ८ ॥

असंपृक्त्या शिवस्यायं शिवशब्दस्तु वाचकः ।
नमःशब्दो नमस्कारवाचकः परिकीर्तितः ॥ ९ ॥

ननु यथोदीरितं सत्यज्ञानादिलक्षणं परशिवस्वरूपं वाङ्मनसागोचरं "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह" इति श्रुतेस्तत्कथं शिवपदेनाभिधीयत इति तत्राऽऽह—असंपृक्त्येति । असंपृक्त्याऽसंपर्केण तादृक्स्वरूपमस्पृष्ट्वैव शिवपदं लक्षणया प्रतिपादयतीत्यर्थः । अथ नमःपदार्थमाह—नमःशब्द इति ॥९॥

प्रह्वतालक्षणः प्रोक्तो नमस्कारः पुरातनैः ।
प्रह्वता नाम जीवस्य शिवात्सत्यादिलक्षणात् ॥ १० ॥
भेदेन भासमानस्य मायया न स्वरूपतः ।
संबन्ध एव तेनैव सोऽपि तादात्म्यलक्षणः ॥ ११ ॥

नमस्कारस्वरूपमाह—प्रह्वतेति । "णम प्रह्वत्वे शब्दे च" इत्यस्मादसुनि नमःशब्दस्य निष्पत्तेरित्यर्थः । अस्य च प्रह्वीभावस्य पर्यवसानभूमिमाह—प्रह्वता नामेति । न्यग्भावेन नमस्कर्तव्यप्रत्यासत्तिः प्रह्वत्वम् । तच्च मायया परशिवस्वरूपाद्भेदेन परिकल्पितस्य जीवस्य पुनस्तत्स्वरूपेण तादात्म्यलक्षणे संबन्धे विश्राम्यतीत्यर्थः ॥ १० ॥ ११ ॥

नित्यसिद्धः शिवः साक्षात्स्वरूपः सर्वदेहिनाम् ।
तस्माद्बुभुत्सोर्जीवस्य नोपादेयं हितं सदा ॥ १२ ॥
न हेयमहितं तद्वद्वस्तुतो न प्रतीतितः ।
एवं विद्यान्नकारार्थं मकारार्थ उदीर्यते ॥ १३ ॥

* धनञ्जयविङ्गतं क घ. ङ. च पुस्तकेषु नास्ति ।

१ ख. °तं यद्द°।

इत्थं पदद्वयस्यार्थमभिधाय वाक्यार्थमाह—नित्यसिद्ध इति । उक्तविधं परशिवस्वरूपमुद्दिश्याहं जीवः ब्रह्मो भवामि । तत्स्वरूपेणैकीभूय तदात्मनाऽखण्डैकरसो भवामीत्यर्थः । तस्मात्सर्वेषां जीवानां नित्योदितं परशिवचैतन्यमेव साक्षात्स्वरूपम् । एतमेव वाक्यार्थमनुसंधानसौकर्याय प्रणवोऽभिधत्ते । जीवेश्वरतादात्म्यप्रतिपादकस्य सोऽहमिति परमात्ममन्त्रस्य सकारहकारयोर्लोपेन प्रणवोत्पत्त्यभिधानात् । तदुक्तमाचार्यैः—

"सकारं च हकारं च लोपयित्वा प्रयोजयेत् ।
संधिं वै पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत्" इति ।

एवंरूपस्यार्थस्योक्तप्रायत्वात्पुनरत्र नोक्तः । उक्तमर्थं हेतूकृत्य प्रकारान्तरेण मन्त्रं व्याख्यास्यन्नमःपदावयवस्य नकारस्यार्थमाह—तस्मादिति । यस्मात्परमार्थतो जीवः शिवस्वरूपानतिरिक्तस्तस्मात्स्वरूपजिज्ञासोर्जीवस्य सर्वदा वस्तुतः परमार्थत उपादेयं हितमपि नास्ति । हातव्यमहितमपि नास्ति । परशिवस्वरूपातिरिक्तस्य सर्वस्य मिथ्यात्वाद्धेयोपादेयविभागो नास्तीति । यत एव तत्प्रतीतितो न भवति । प्रातीतिकस्याविद्यमानत्वात् । तस्मात्परमार्थोपाधौ हेयोपादेयौ सर्वदा न स्त इत्यर्थः । एतावता दृश्यप्रपञ्चनिषेधो नकारार्थ इत्युक्तो भवति । उपसंहरति—एवं विद्यादिति ॥ १२ ॥ १३ ॥

मकारो ममशब्दार्थो लुप्तस्त्वेको मकारकः ।
व्यावहारिकदृष्ट्याऽयं नमस्कारः प्रकीर्त्यते ॥ १४ ॥
तस्माच्चतुर्थीशब्दस्तु प्रोच्यते न हि वस्तुतः ।
ओंकारशब्दः सर्वार्थवाचकः परिकीर्तितः ॥ १५ ॥

मकारार्थमाह—मकार इति । एकस्य मकारस्य च्छान्दसो लोपः । अतो ममेति शब्दस्य योऽर्थः स एव मकारस्याप्यर्थः । ननु नमःशब्दो नमस्कारप्रतिपादकमव्ययं तद्योगात् "नमःस्वस्तिस्वाहा" इति शिवशब्दाच्चतुर्थी तत्कथमुक्तोऽर्थः संगच्छ इति तत्राऽऽह—व्यावहारिकेति । न हि वस्तुत इति । न खलु परमार्थतो नमःशब्दस्य नमस्कारोऽर्थः । अपि तर्ह्यस्मदुक्त एवेत्यर्थः । ज्ञाताज्ञातादिसर्ववस्त्ववभासकत्वस्य प्रागेवोपपादितत्वात्प्रणवेनात्र दृश्यप्रपञ्चलक्षणः सर्वोऽर्थः प्रतिपाद्यत इत्याह—ओंकारशब्द इति ॥ १४ ॥ १५ ॥

---

१ ङ. एवमेव ।

प्रयोगादेव सर्वत्र सर्वार्थः शिव एव हि ।
तस्माच्छिवस्य पूर्णस्य प्रणवो वाचकः स्मृतः ॥ १६ ॥

कुत इत्यत आह—प्रयोगादिति । उक्तमेतज्ज्ञातार्थे ज्ञातमित्यादिना । इत्थं पदार्थानुक्त्वा वाक्यार्थमाह—सर्वार्थः शिव एव हीति । प्रणवप्रतिपादितो यः सर्वोऽर्थोऽसौ शिव एव हि यस्मादेवं तस्मान्मम हेयमुपादेयं वा किमपि नास्तीत्यर्थः । अयमभिप्रायः—यद्यदनुविद्धं भासते तत्तत्र परिकल्पितम् । यथा सर्पधारादयो रज्ज्वा इदमंशे तथैव सदनुविद्धं सर्वं दृश्यं भासते । तस्मात्सद्रूपे ब्रह्मणि परिकल्पितस्य च भोक्तृभोग्यात्मकस्याऽऽरोप्यस्य प्रपञ्चस्याधिष्ठानयाथात्म्यज्ञानेन विलये सति स्वप्रतिष्ठमद्वितीयं परशिवस्वरूपमेवावातिष्ठत इति । श्रुतिश्च " आत्मैवेदं सर्वम् " " इदं सर्वं यदयमात्मा " इत्यादिका परशिवस्य सार्वात्म्यमाह । यस्मादसौ सर्वार्थात्मकस्तस्मादेव सर्ववस्त्ववभासकः प्रणवः परिपूर्णस्य वाचको जात इत्याह—तस्मादिति ॥ १६ ॥

वाच्यवाचकभावश्च लक्ष्यलक्षणताऽपि च ।
अन्योन्यताऽपि नास्त्येव परमार्थनिरूपणे ॥ १७ ॥
अभावादेव सर्वस्य शिवादन्यस्य सर्वदा ।
अस्ति नास्ति मृषा भाति न भातीत्यादि मायया ॥ १८ ॥
कल्पितं चित्सुखानन्तपरमात्मशिवात्मनि ।
मायातत्कार्यमप्यस्माच्छिवात्सत्यादिलक्षणात् ।
प्रत्यक्षसिद्धान्नास्त्येव परमार्थनिरूपणे ॥ १९ ॥

ननु तत्स्वरूपस्य च वाङ्मनसातीतत्वात्प्रणवस्य कथं तद्वाचकत्वं लक्षकत्वं च तस्य वा कथं वाच्यत्वलक्ष्यत्वादयो धर्मा इति तत्राऽऽह—वाच्येति । वाच्यवाचकत्वादयो व्यवहारदृष्ट्यैव परमार्थतो न सन्तीत्यर्थः॥१७॥१८॥१९॥

अथ किं बहुनोक्तेन शिवादन्यन्न विद्यते ॥ २० ॥
शिवस्वरूपमेवाऽऽहुरिदं सर्वं विचक्षणाः ।
सर्वस्वरूपमज्ञानाद्दृश्यते न तु वस्तुतः ॥ २१ ॥

किं बहुना शिवस्वरूपातिरेकेण किमपि नास्तीत्याह । अथेति । श्रूयते

१ क. ख. °स्य तस्य वा° । २ ख. °हुर्जगदेतद्वि च° ।

हि—"नेह नानाऽस्ति किंचन" इति । ननु प्रतीयमानमिदं जगत्कथमपलपितुं शक्यत इत्यत आह— शिवस्वरूपमेवेति । इत्थमद्वितीये परशिवस्वरूपे यस्य जगत आरोपादन्यत्राभाव उक्तस्तत्रापि शिवादन्यन्न विद्यत इत्यपादितत्वात्सर्वस्य जगतो मिथ्यात्वमुक्तं भवति । तदुक्तम्—

"नान्यत्र कारणात्कार्यं न चेत्तत्र कं तद्भवेत्" इति । एवं चाविद्यावशादेव दृश्यप्रपञ्चस्यानुभवो न परमार्थत इति ॥ २० ॥ २१ ॥

एष एव हि मन्त्रार्थः सत्यं सत्यं न चान्यथा ।
वेदाः सर्वे पुराणानि स्मृतयो भारतं तथा ॥ २२ ॥
अन्यान्यपि च शास्त्राणि तथा तर्काश्च सर्वशः ।
शैवागमाश्च विविधा आगमा वैष्णवा अपि ॥ २३ ॥
अन्यागमाश्च विदुषामनुभूतिस्तथैव च ।
अस्मिन्नर्थे स्वसंवेद्ये पर्यवस्यन्ति नान्यथा ॥ २४ ॥

षडक्षरवाक्यार्थमुपसंहरन्नुक्तस्यार्थस्यान्यथात्वशङ्कां निवारयति—एष एवेति । श्रुतिस्मृतिपुराणादयोऽप्यस्मिन्नर्थे पर्यवस्यन्ति । इतोऽन्यथात्वं न शङ्कनीयमित्याह—वेदा इत्यादिना । अत्र हि प्रपञ्चस्य मिथ्यात्वं जीवपरमात्मनोरैक्यं तस्य चाऽऽत्मनः सच्चिदानन्दरूपत्वमद्वितीयं चेत्येतावन्मन्त्रार्थत्वेन प्रतिपादितमेतस्मिन्नर्थे तावद्वेदान्तानां तदनुसारिणां स्मृतीतिहासपुराणानां चैदंपर्यमविवादम् । अन्येषामपि तैर्थिकानामीदृग्विधव्यवहारमकुर्वतां प्रायेणैतदभिमतमेव । तथा हि—तत्र सांख्यपातञ्जलशैवास्तावदात्मनः सच्चिद्रूपत्वमङ्गी कुर्वते । यद्यपि व्यवहारदशायां प्रकृतिप्राकृतलक्षणप्रपञ्चस्य सत्यत्वमात्मनानानात्वं च व्यवहरन्ति तथाऽपि कैवल्यदशायां स्वरूपप्रकाशव्यतिरेकेण तस्य सर्वस्यानवभासं वर्णयन्ति । आत्मयाथात्म्यज्ञानलक्षणायाः प्रकृतिपुरुषविवेकख्यातेर्हि कैवल्यम् । तथाविधज्ञानोत्तरकालं प्रकृतिप्राकृतार्थात्मकं जगत्सर्वथा न भातं चेत्तदस्तित्वं कथं निश्चीयेत । ज्ञेयसिद्धेर्ज्ञानाधीनत्वात् । अत आत्मयाथात्म्यज्ञानेन निवर्तितमेव तत्तस्मात्प्रपञ्चस्याज्ञानस्य ज्ञाननिवर्त्यत्वेन मिथ्यात्वमवश्यमभ्युपगन्तव्यम् । ज्ञाननिवर्त्यानां शुक्तिरूप्यादीनां मिथ्यात्वदर्शनात् । किंच "कृतार्थं तं प्रति नष्टमप्यनष्टं तत्साधारणत्वात्" इति पातञ्जलं सूत्रम् ।

---

१ ङ. स्वसंवेद्यः पर्यवस्यति ना° । २ ग. चेदमर्थम° । छ. चेदं तात्पर्यम° । ३ ङ. त्मनो ना° । ४ ग. कित्वकृता° ।

अनेन च प्रकृतिप्राकृतिकात्मकं जगन्मुक्तापेक्षया नष्टं तदितरापेक्षया विद्यमानमेवेति पुरुषविशेषापेक्षया तस्याभावसद्भावौ प्रतिपाद्येते । तच्च तन्मिथ्यात्वेऽवकल्पते । पुरुषविशेषमपेक्ष्यैकस्यैव वस्तुनः सद्भावाभावयोः शुक्तिरूप्यादौ दर्शनात् । तत्र हि काचकामलादिदोषदूषितनेत्रः पुरुषः शुक्तौ रूप्यसद्भावं प्रतिपद्यते। तदितरस्तु शुक्तिस्वरूपमेव जानंस्तत्र रूप्याभावमवगच्छति। न हि पारमार्थिकं घटादि पुरुषविशेषं प्रति सद्भावासद्भावौ युगपत्प्राप्नोति । तस्मात्स्वरूपज्ञानपर्यन्तमनुवर्तमानस्य तत ऊर्ध्वमप्रतिभासमानस्य प्रपञ्चस्य वेदान्तिनामिव सांख्यादीनामप्याविशेषान्मिथ्यात्वं सिद्धम् । अथापि कस्मान्न व्यवहरन्तीति चेत् । श्रोतुर्बुद्धिसमाधानार्थमिति ब्रूमः। स खलु प्रथमत एव सर्वं मिथ्येत्युक्ते कथमेतद्घटत इति व्याकुलितमनस्को भवेत् । तन्मा भूदिति सत्यत्वव्यवहार एव केवलम् । आत्मनानात्वस्य जीवेश्वरभेदस्य च मुक्तावनवभासत्वेनैव प्रपञ्चवन्मिथ्यात्वं यदि व्यवहारदशायामेक एवाऽऽत्मेत्यभिधीयते तदा तत्तदुपाधिपरिकल्पनेन जीवेश्वरव्यवस्था सुखदुःखादिव्यवस्था च प्रयाससमर्थनीया स्यादित्यभिप्रायेणैव तन्नानात्ववर्णनम् । मुक्तौ तु वेदान्तिनामिव सांख्यादीनामपि केवलात्मस्वरूपप्रतिभास एव संमत इति परमार्थतोऽद्वितीयत्वमात्मनः सिद्धम् । व्यवहारमात्र औपाधिकं स्वाभाविकमिति केवलं विवादः । आनन्दरूपत्वं च पातञ्जलसूत्रभाष्यकारोदाहृतत्वाज्जैगीषव्योपाख्यानादवगम्यते । जैगीषव्यो हि परमयोगीश्वरो योगमहिम्नाऽणिमाद्यष्टैश्वर्यं प्राप्य बहून्ब्रह्मसर्गान्संसृत्य तत्र सर्वत्रोपरतो दिव्यज्ञानेन साक्षात्कृते स्वात्मतत्त्वे कृतप्रणिधानः परमर्षियोगैश्वर्यप्राप्तास्त्वणिमादिषु किं सुखमनुभूतं त्वयेति पृष्टे न किंचिदिति प्रत्युक्तवान् । अणिमाद्या विभूतिः केवलसुखात्मिका कथमेवं वदसीति पृष्टः सन्नवोचत् । सत्यम् । सांसारिकसुखापेक्षयाऽणिमाद्यैश्वर्यमधिकसुखावहम् । कैवल्यापेक्षया तु दुःखात्मकमेवेति । एवं चात्यन्तानुकूलवेद्यत्वमात्मन उक्तं भवति । एतदेवाऽऽत्मन आनन्दरूपत्वं नाम तथाऽप्यानन्दरूप इति न व्यवहरन्ति । सुखेष्वेवाऽऽनन्दशब्दस्य व्युत्पत्तेः । इत्थं नैयायिकवैशेषिकादीनामपि मते ज्ञानान्मोक्षः, मुक्तस्य स्वव्यतिरिक्तानात्मलक्षणजगतोऽप्रतिपत्तिः समानैवेति तैरपि सांख्यादिवदात्माद्वितीयत्वं प्रपञ्चमिथ्यात्वं चावश्यमङ्गीकार्यम् । ब्रह्मेन्द्रादिपदादपि श्रेयस्त्वेन मुक्तेः प्रार्थ्यमानत्वादत्यन्तानुकूलवेद्यत्वं च । ननु ते नवगुणानामत्यन्तोच्छेदो मोक्ष इति मुक्तौ ज्ञानस्या-

१ ङ. °ष्टात्वे क°। २ म. घ. °धीयते त°। ३ ङ. °न्दरूपस्य। ४ च. °तोऽप्रती-
त्यभावाज्ज्ञानाद्यभावात्स्मा° ५ म. तेन मु°। च. ते न च मु°।

प्यभावमिच्छन्ति । सत्यम् । आत्मस्वरूपचैतन्यस्यात्यन्तनिर्विकल्पकत्वात्तेषामनवभानाभिमानः । अत एव शून्यवादिनोऽनवभानमात्रमेव नास्तीति प्रतिपन्नाः शास्त्रज्ञदृष्ट्या प्रातर्गजाभावज्ञाने सत्येव यथा लौकिकजनस्यादर्शनाभिमानो ग्राहकविज्ञानस्य निर्विकल्पकत्वात् । एवमेवाऽऽत्मस्वरूपचैतन्यस्यात्यन्तनिर्विकल्पकत्वाल्लौकिकज्ञानाभावविषयमेव मुक्तौ ज्ञानराहित्यवर्णनम् । शून्यवादेऽप्ययमेवाभिप्रायो योज्यः । विज्ञानवादिनस्तु क्षणिकज्ञानप्रवाह आत्मेति वर्णयन्ति । तेषां मतेऽपि सांवृतस्य विषयोपप्लवस्य विद्यया विनिवृत्तौ विशुद्धज्ञानसंतानोदयो मुक्तिः । उक्तं हि—धीसंततिः स्फुरति निर्विषयोपरागेति । संतानो नाम नानाव्यक्तीनां नैरन्तर्येण वर्तनम् । तच्चानुभवदशायां सैवेयं दीपज्वालेतिवदेकत्वेनानुभूयमानत्वम् । तथाचानुभवत आत्मन ऐक्ये सिद्धे युक्त्या यत्तस्य क्षणभङ्गसमर्थनं तद्बाह्यार्थक्षणिकत्वसाधनाय यत्सत्तत्क्षणिकमिति व्याप्तेरनैकान्तिकत्वपरिहारेण समर्थनार्थम् । न च प्रयोजनवशाद्वस्तुनोऽन्यथात्वं शास्त्रकर्ता कथं प्रतिपादयेदिति शङ्कनीयम् । यतो भाट्टाः स्वप्रकाशविज्ञानाकार एव घटादिर्न तु बाह्य इति बाह्यार्थास्तित्वमपलपतो बौद्धान्निराकर्तुं स्वानुभवसिद्धं ज्ञानस्य स्वप्रकाशत्वं परित्यज्य नित्यानुमेयतामाहुः । तथासति ह्ययं घट इत्यादिज्ञानेषु ज्ञानव्यक्तेरप्रत्यक्षत्वेन प्रतीयमानो घटाद्याकारो बाह्यार्थस्तस्यैवेति तेषामभिप्रायः । एवं विज्ञानवादिनोऽपि योऽहमद्राक्षं स एवेदानीं स्पृशामीति पूर्वोत्तरक्षणयोरेकत्वप्रतिसंधानेनाऽऽत्मनः स्थायित्वे स्वानुभवसिद्धे यत्क्षणभङ्गसमर्थनं तदुक्तप्रयोजनायैवेति । अस्मदुक्तार्थतात्पर्ये नैव व्याहन्यते । मीमांसकानां शास्त्रं तु भिन्नविषयत्वाद्यथोदीरितमात्मस्वरूपं न विरुणद्धि । तथा हि—वेदाप्रामाण्यवादिनो बौद्धान्निराकृत्य तत्प्रामाण्यं समर्थयमाना भाट्टाः प्राभाकराश्च वेदोक्तं निर्वर्त्य स्वर्गादौ तत्फलमुपभोक्तुं देहातिरिक्तः कश्चिदात्मा कर्ता भोक्ताऽस्तीति तन्नास्तित्ववादिनश्चार्वाकादीन्निराचक्रुः । कर्तृत्वभोक्तृत्वविशिष्टात्मस्वरूपप्रतिपादनरैव स्वशास्त्रप्रतिपाद्ययागदानाद्योपयिकत्वात्तावन्मात्रस्वरूपमात्मनस्तैः प्रतिपादितम् । न त्वौपनिषदं कर्तृत्वभोक्तृत्वादिसर्वविक्रियारहितं रूपम् । तदवगमस्य स्वशास्त्रे प्रयोजनाभावात् । प्रत्युताकर्त्रात्मज्ञाने सति कर्मस्वधिकारभङ्गप्रसङ्गाच्च । तदुक्तं भगवद्भिर्भाष्यकारैः—" अनुपयोगादधिकारविरोधाच्च " इति । ननु कर्मा-

---

१ घ. °नास्तामि° । २ घ. °स्य विनि° । ३ ख. घ. मुक्तिः । ४ क. ख. घ. च. वर्तमानम् । ५ क. ख. च. °यं ज्ञा° । ६ क. ख. घ. °षयाध्य° ।

त्मस्वरूपप्रतिपादनं तदतिरिक्तस्वरूपास्तित्वनिषेधपरं कस्मान्न भवति । तदस्तित्वाङ्गीकारादिति ब्रूमः । तत्र तावद्भट्टाचार्याः—

" इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेन " ॥ इति ।

गुरुमतानुसारिणा भवनाथेनाप्युक्तमर्थवादाधिकरणे—अथवा न वेदान्तानां चोदनैकवाक्यता । अथातो ब्रह्मजिज्ञासेति शास्त्रान्तरस्थितेरिति । तस्मान्मीमांसकानामप्युपनिषदेकसमधिगम्यमद्वितीयब्रह्मात्मैकत्वमभिमतमेवेति तच्छास्त्रमप्यस्मदुक्तेऽर्थे पर्यवस्यति । एवं शास्त्रान्तरमागमान्तरं चास्मिन्नेवार्थे योजनीयम् । किंच । सर्वेषामपि वादिनामात्मानात्मविवेकबोधो मुक्तिसाधनत्वेनाभिमतः । स च बोधः सत्येव चित्तैकाग्र्य इति तत्सर्वथाऽभ्युपेयम् । तस्मिंश्च सति यथाभूतं प्रत्यगात्मस्वरूपं स्वप्रकाशत्वेनावश्यमाविर्भवतीति न तत्र यत्नीयमित्याह—अस्मिन्नर्थे स्वसंवेद्य इति । श्रुतेः प्रबलतरप्रमाणत्वात्तत्प्रतिपाद्यस्यार्थस्यान्यथात्वं न संभावनीयमित्याह—नान्यथेति ॥ २२ ॥ २३ ॥ २४ ॥

बाध्यबाधकतां यान्ति व्यवहारे परस्परम् ।
समुद्र इव कल्लोला इति वेदार्थसंग्रहः ॥ २५ ॥

ननु प्रमाणप्रमेयादिषोडशपदार्था इति नैयायिकाः । द्रव्यगुणादयः सप्त पदार्था इति वैशेषिकाः । अव्यक्तमहदहंकृतिप्रभृतीनि चतुर्विंशतितत्त्वानीति सांख्याः । शिवशक्तिसदाशिवेश्वरविद्यातत्त्वप्रभृतीनि षट्त्रिंशत्तत्त्वानीति शैवाः । एवं बहुधा विप्रतिपन्नानां कथमेकस्मिन्नेवार्थे पर्यवसानमित्याशङ्क्याऽऽह—बाध्यबाधकतामिति । एकस्यैव द्रश्यप्रपञ्चस्य प्रमाणप्रमेयादिबहुविधकल्पनया व्यवहार एव वादिनां परस्परं विप्रतिपत्तिः । जगत्कारणभूते परमेश्वरस्वरूपे सा नास्तीतीममर्थं प्रत्याययितुं समुद्र इव कल्लोला इतिदृष्टान्तोपादानम् । यथा " आत्मन आकाशः संभूतः " इति तैत्तिरीयके वियत्प्रमुखा सृष्टिरुक्ता । छान्दोग्ये तु " तत्तेजोऽसृजत " इति तेजआदिका । " स प्राणमसृजत प्राणाच्छ्रद्धाम् " इति कस्मिंश्चित्सृष्टौ प्राणप्राथम्यम् । एवं सृष्टव्याविषयायां विप्रतिपत्तौ सत्यामपि स्रष्टुः परमेश्वरस्यैकरूपत्वान्नास्मिन्विप्रतिपत्तिर्नास्ति । उक्तं हि—"कारणत्वेन चाऽऽकाशादिषु यथाव्यपदिष्टोक्तेः" इत्यत्र "सर्वकर्मविवादेऽपि नासौ स्रष्टरि विद्यते" इति । एवमत्रापि दृश्यप्रपञ्चव्यवहारविषये यद्यपि वैम-

१ क. वैपरीत्यमस्ति ।

त्यमस्ति तथाऽपि तत्कारणभूते यथोदीरितस्वरूपे पराशिवे विवादो नास्तीति युक्तं तत्र सर्वेषां शास्त्राणां शैवाद्यागमानां च पर्यवसानमित्यर्थः ॥ २५ ॥

मन्त्रार्थः कथितः कृत्स्नः पौरश्चर्याऽधुनोच्यते ।
आचार्यमुखतो मन्त्रं ज्ञात्वा सार्थं समाहितः ॥ २६ ॥
यथाशक्ति धनं तस्मै प्रदत्त्वा तदनुज्ञया ।
स्नानं त्रिषवणं कृत्वा भस्मना शाकभोजनः ॥ २७ ॥
फलमूलाशनो वाऽपि हविष्याशी यथाबलम् ।
पर्वताग्रे नदीतीरे सागरान्ते शिवालये ॥ २८ ॥
वने वा निर्भये शुद्धे प्राङ्मुखोदङ्मुखोऽपि वा ।
समाहितमना भूत्वा सुखमासनमास्थितः ॥ २९ ॥
प्राणायामत्रयं कृत्वा मुनिं च्छन्दस्तथैव च ।
देवतां च तथा शक्तिं बीजं स्मृत्वा मनोरपि ॥ ३० ॥
करन्यासं पुनः कृत्वा तथाऽङ्गन्यासमेव च ।
पञ्चाङ्गमपि विन्यस्य गुरुं स्मृत्वाऽभिवन्द्य च ॥ ३१ ॥

मन्त्रार्थः कथित इत्यादि स्पष्टम् ॥२६॥२७॥२८॥२९॥३०॥३१॥

हृत्पुण्डरीकमध्ये तु सोमसूर्याग्निमण्डले ।
विद्युल्लेखेव कल्याणं ज्वलन्तं वह्निरूपिणम् ॥ ३२ ॥
शिवं ध्यात्वा जपेन्मन्त्रं लक्षाणां षट् समाहितः ।
तर्पयेल्लक्षमेकं तु जुहुयात्तु सहस्रकम् ॥ ३३ ॥
आज्येन पयसा वाऽपि पलाशकुसुमेन वा ।
ततः सिध्यति मन्त्रोऽस्य भुक्तिमुक्तिफलप्रदः ॥ ३४ ॥
अथवा साम्बमीशानं श्रीसदाशिवमेव च ।
नृत्यमानं तथा देवं ध्यात्वा मन्त्रं तु साधयेत् ॥ ३५ ॥

हृत्पुण्डरीकेति । हृदम्बुजमध्ये पीठं परिकल्प्य तन्मध्ये सूर्यसोमाग्निमण्डलानि यथाक्रमं द्वादशषोडशदशकलात्मकान्युत्तरोत्तरमान्तरत्वेन संचि-

१ ङ. च. यथाशक्ति बी° । २ क. च. °शक° ।

न्तनीयानीत्यर्थः । अत्र तु सोमसूर्याग्निमण्डल इति पाठक्रमो न विवक्षितः । अस्मदुक्तक्रमस्यैवाऽऽगमैः प्रतिपादनात् । यदाहुरागमिकाः—

"दलाग्रं व्यापकं पूर्वं पूजयेत्सूर्यमण्डलम् ।
किञ्जल्कव्यापकं दक्षे पूजयेत्सोममण्डलम् ।
प्रतीच्यां कर्णिकाव्याप्तं पूजयेदग्निमण्डलम्" ॥ इति ।

प्रपञ्चसारेऽप्युक्तम्—

" मध्येऽनन्तं पद्ममस्मिंश्च सूर्यं सोमं वह्निं तारवर्णैर्विभक्तैः " इति ॥
॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

अथवा प्राकृतं भावं स्वीयमुत्सृज्य सर्वदा ।
शिवोऽहमिति संचिन्त्य साधयेदिदमुत्तमम् ॥ ३६ ॥
मन्त्रस्य साधनं प्रोक्तं विनियोगः प्रकीर्त्यते ।
नित्यं द्वादशसाहस्रं जपेद्भक्त्या समाहितः ॥ ३७ ॥
सम्यग्ज्ञानपूर्वं लब्ध्वा संसाराब्धिं तरिष्यति ।
लक्षपञ्चाशतं जप्त्वा कारणेश्वरमाप्नुयात् ॥ ३८ ॥
लक्षाणां तु शतं जप्त्वा साक्षाद्रुद्रत्वमाप्नुयात् ।
अशीतिलक्षं जप्त्वा तु नरो विष्णुत्वमाप्नुयात् ॥ ३९ ॥
षष्टिलक्षजपेनैव लभते ब्रह्मणः पदम् ।
चत्वारिंशतिभिर्लक्षैर्विराडात्मानमाप्नुयात् ॥ ४० ॥
विंशल्लक्षजपेनैव दीर्घमायुरवाप्नुयात् ।
षट्कर्माणि प्रसिध्यन्ति दशलक्षजपेन तु ।
विनियोगः समाख्यातः पूजा देवस्य कीर्त्यते ॥ ४१ ॥

अथवा प्राकृतमिति । प्रकृतिरव्यक्तं तदुत्पन्नं प्राकृतमन्तःकरणादि तादात्म्यलक्षणं भावं परित्यज्यानवच्छिन्नस्य स्वप्रकाशचिदात्मनः शिवोऽहमित्यहंग्रहेण परशिवस्वरूपत्वं ध्यायन्मन्त्रं जपेदित्यर्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ॥ ३९ ॥ ४० ॥ ४१ ॥

---

१ च. ग्रथाऽऽह° । २ ङ. °लक्षं जपन्नेव ।

हृत्पद्मकर्णिकामध्ये मन्त्रेणानेन पूजयेत् ॥ ४२ ॥
अथवा मण्डले सौरे चन्द्रमण्डलकेऽथवा ।
अग्नौ वा प्रतिमायां वा शिवं नित्यं प्रपूजयेत् ॥ ४३ ॥
आसनं प्रथमं दद्यादावाहनमनन्तरम् ।
अर्घ्यं ततः परं दद्यात्पाद्यं चैव ततः परम् ॥ ४४ ॥
पुनराचमनं दद्यात्स्नापयेत्तु ततः परम् ।
वासो दद्यात्पुनर्यज्ञोपवीतं भूषणानि च ॥ ४५ ॥
गन्धं पुष्पं तथा धूपं दीपमोदनमेव च ।
माल्यमालेपनं दद्यान्नमस्कृत्य विसर्जयेत् ।
षडक्षरेण मन्त्रेण सर्वं कुर्याद्विचक्षणः ॥ ४६ ॥

उत्तमाधिकारिणो बाह्यपूजातो मानसपूजैव श्रेयसीत्यभिप्रेत्य पूर्वं तामाह । हृत्पद्मेति । तत्रासमर्थस्य मध्यमाधिकारिणः शिवपूजाविधावाधारभेदमाह—अथ वेति । तत्राप्यसंस्कृतचित्तस्याऽऽह—प्रतिमायां वेति ॥ ४२ ॥ ४३ ॥ ४४ ॥ ॥ ४५ ॥ ४६ ॥

हृत्पद्मकर्णिकामध्यात्कुर्यादावाहनं बुधः ॥ ४७ ॥
उद्वासनं च तत्रैव नरः कुर्यात्समाहितः ।
सर्वमुक्तं समासेन नराणां भुक्तिमुक्तये ॥ ४८ ॥
तस्मात्सर्वं परित्यज्य षडक्षरपरो भवेत् ।
षडक्षरेण सर्वाणि सिध्यन्त्येव न संशयः ॥ ४९ ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे षडक्षरविवरणं नामाष्टमोऽध्यायः ॥ ८ ॥

ननु सर्वगतस्येश्वरस्य कथमावाहनोद्वासने संभवत इत्यत आह—हृत्प-द्मेति। यद्यपि परमेश्वरं स्वरूपमाकाशवत्सर्वगतं तथाऽऽप्यन्यत्रानभिव्यक्तं हृद-म्बुजमध्ये विशेषतोऽभिव्यक्तिमद्भवति। उक्तं हि भगवता—"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया" इति । अत एवाभिव्यक्तयनुसंधानाननुसंधाने एवाऽऽवाहनोद्वासने इत्याहुरागमिकाः—

" आवाहनमभिव्यक्तिर्ध्यैक्त्यभावो विसर्जनम् " इति । शेषं सुगमम् ॥४७॥
॥ ४८ ॥ ४९ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे षडक्षरविवरणं नामाष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः ।

सूत उवाच-

ध्यानयज्ञमथेदानीं प्रवक्ष्यामि समासतः ।
शृणुत श्रद्धया यूयं भुक्तिमुक्तिफलप्रदम् ॥ १ ॥

इत्थं वाचिकयज्ञमभिधाय ततोऽप्युत्कृष्टं मानसक्रियानिर्वर्त्यमुपासनारूपं ध्यानयज्ञं वक्तुं प्रक्रमते—ध्यानयज्ञमिति ॥ १ ॥

परात्परतरं तत्त्वं ध्येयं मूर्त्यात्मनैव तु ।
न स्वरूपेण साक्षित्वादात्मत्वाद्विषयित्वतः ॥ २ ॥

ध्येयस्वरूपापरिज्ञाने ध्यानस्य निर्विषयत्वेनानिष्पत्तेस्तत्स्वरूपं निर्धारयति—परात्परेति । नामरूपात्मकप्रपञ्चस्याङ्कुरावस्थो विन्दुः पररततः परा तदुपादानभूता माया ततोऽपि परः परतरः स्वप्रतिष्ठोऽद्वितीयः परशिवः । एतच्च वाचिकयज्ञप्रस्तावे परात्परतरादस्मादित्युपपादितम् । ईदृग्विधं सच्चिदानन्दैकरसमद्वितीयं स्वप्रतिष्ठं मायातीतं यत्परशिवस्वरूपं तत्त्वं तत्स्वरूपेण ध्यातुमशक्यं ततः केनचिदुपाधिना विशेष्य तद्विशिष्टमेव ध्येयमित्यर्थः । ननु निरुपाधिकरूपस्य स्वरूपेण कस्मान्न ध्येयतेत्यत आह—साक्षित्वादित्यादिना । विजातीयमनोवृत्त्यव्यवहितध्येयाकारसजातीयमनोवृत्तिप्रवाहो ध्यानम् । तथा च पातञ्जलसूत्रम्—" तत्र प्रत्ययैकतानता ध्यानम् " इति । अतो ध्येयस्यान्तःकरणवृत्तिव्याप्यत्वमेष्टव्यं तच्चाज्ञानावृतस्य विशेषस्याऽऽवरणनिर्हरणार्थमिति निरावरणमद्वितीयं स्वप्रतिष्ठं स्वरूपमप्रकाशेनान्तःकरणतद्वृत्त्यादिसर्वस्त्ववभासकत्वात्साक्षिभूतमीदृग्विधं निरुपाधिकं परशिवस्वरूपं कथमन्तःकरणवृत्तिर्व्याप्नुयात्तद्व्याप्तौ वा सैव वृत्तिरुपाधिरिति तस्य सोपाधिकत्वं स्यात् । तस्मात्सर्वसाक्षित्वेनान्तःकरणवृत्त्यविषयत्वान्निरुपाधिकरूपस्य न ध्येयत्वम् ।

---

१ क. °करवरू° ।

किंच सर्वप्रत्यक्त्वादपि ध्यानाविषयत्वमाह—आत्मत्वादिति। यथोदीरितनिरुपाधिकपरशिवस्वरूपं सर्वप्राणिहृदयेऽन्तःकरणादिभ्यः सर्वेभ्यः प्रत्यग्भूतं "य आत्मा सर्वान्तरः"। "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" इति श्रुतेः। अन्तःकरणं च स्वभावतो बहिर्मुखं "पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्" इति श्रवणात्। अतः परागर्थैकविषयेणान्तःकरणेन सर्वप्रत्यग्भूतं निरुपाधिकं परशिवस्वरूपं कथं विषयी क्रियेत[1]। तस्मादात्मत्वादपि तत्स्वरूपं न ध्यानगम्यमित्यर्थः। किंच कर्मकर्तृभावविरोधादपि न ध्येयत्वमित्याह—विषयित्वत इति। विषयिणो ज्ञानस्य विषयत्वानुपपत्तेरित्यर्थः। ध्यानविषयो हि ध्येयं तच्चात्र ध्यातृस्वरूपभूतज्ञानानतिरिक्तम्[2]। तथाचैकस्यैव कर्मकर्तृभावलक्षणो विरोध आपद्येत। न चान्तःकरणाद्युपाधिविशिष्टस्य ध्यातृत्वं निरुपाधिकस्वरूपस्य ध्येयत्वमिति सांप्रतम्। विशेष्यांशे कर्मकर्तृभावविरोधस्य तादवस्थ्यात्[3] ॥ २ ॥

भेदाभावाच्च भेदस्य भ्रमत्वादेव वस्तुतः।
उमार्धविग्रहा शुक्ला चन्द्रार्धकृतशेखरा ॥ ३ ॥
नीलग्रीवा त्रिनेत्रा च प्रसन्नवदना शुभा।
वरदाभयहस्ता च विचित्रमुकुटोज्ज्वला ॥ ४ ॥
सर्वलक्षणसंपन्ना सर्वाभरणभूषिता।
स्वस्वरूपानुसंधानप्रमोदादेव केवलात् ॥ ५ ॥
महातांडवसंयुक्ता ब्रह्मविष्णुशिवादिभिः।
ध्येयाऽऽद्यन्तविनिर्मुक्ता या मूर्तिः श्रुतिदर्शिता ॥ ६ ॥
सैवासाधारणा मूर्तिः परात्परतरस्य तु।
ये सदा परमां मूर्तिं ध्यायन्ति हृदयाम्बुजे।
इमां ते परमां मुक्तिं भुक्तिं च प्राप्नुवन्ति हि ॥ ७ ॥

ननु ध्यातुर्जीवाद्ध्येय ईश्वरोऽन्य एव। तथा चोक्तदोषपरिहार इत्यत आह—भेदाभावाच्चादिति। "अयमात्मा ब्रह्म" "अहं ब्रह्मास्मि" इति वाक्यादैक्यप्रतिपत्तेरित्यर्थः। ननु प्रबलतरेण प्रत्यक्षेण भेदोऽनुभूयत एवेत्यत्र

---

१ च. क्रियते। २ घ. ध्यातुः स्वरूपभूतज्ञानाति°। ३ च. विशेषांशे।

आह—भेदस्येति । भेदावगाहिनो ज्ञानस्य सैवेयं ज्वालेतिज्ञानवद्भ्रमत्वमुपरितनेऽध्याये प्रतिपादयिष्यते । तस्मान्निरुपाधिकं परशिवस्वरूपं मूर्त्यात्मनैव ध्येयं न तु स्वरूपेणेति सिद्धम् । तां सर्वजनसाधारणामुत्कृष्टां परशिवमूर्तिं दर्शयति-उमार्धेत्यादिना । श्रुतिदर्शितेति । " उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् " इति । " सत्यं ज्ञानमनन्तं ब्रह्म" इति च श्रुतिः ॥ ३ ॥ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

ज्ञानाज्ञानमहामायालक्षणाविद्यया सह ।
अभेदेन स्थितं विप्राः परात्परतरं पदम् ॥ ८ ॥
स्वप्रधानतयोपास्यं तथैवास्वप्रधानतः ।
समप्रधानरूपेणाप्यादरेण मनीषिभिः ॥ ९ ॥

इत्थं करचरणादिविशिष्टमूर्त्यात्मनः परशिवरूपस्य ध्येयत्वमभिधाय मूर्तिव्यतिरिक्तैरुपाध्यन्तरैरपि विशिष्टं तद्ध्येयमित्याह—ज्ञानाज्ञानेति । ज्ञायतेऽनेनेति ज्ञानं मायायाः सत्त्वपरिणामरूपाऽन्तःकरणवृत्तिः । तथा तमःपरिणामरूपो जाड्याकारोऽज्ञानम् । स्वाश्रयाव्यामोहकरी दुर्घटकारिणी माया । सैव स्वाश्रयव्यामोहनसामर्थ्ययुक्ता चेदविद्या । एते चत्वारः परशिवस्वरूपस्योपाधयः । एतेष्वेकेन विशिष्टं परतत्त्वमुत्तममध्यमाधमाधिकारिभिः स्वप्रधानसमप्रधानास्वप्रधानरूपेण त्रिधोपास्यमित्याह—स्वप्रधानतयेत्यादिना ॥ ८ ॥ ॥ ९ ॥

स्वप्रधानतया तत्त्वमुपास्ते शुद्धमानसः ।
तथैवापक्वचित्तस्तु परतत्त्वं द्विजोत्तमाः ॥ १० ॥

स्वप्रधानतयेति । उपधेयपरशिवस्वरूपप्राधान्येनेत्यर्थः ॥ १० ॥

अस्वप्रधानरूपेण तथा मर्त्यस्तु मध्यमः ।
समप्रधानरूपेण तत्त्वं ध्यायन्ति (?) सादरम् ॥ ११ ॥

अस्वप्रधानरूपेणेति । उपधेयपरशिवस्वरूपमुपसर्जनीकृत्य ज्ञानाज्ञानाद्युपाधिप्राधान्येनेत्यर्थः ॥ ११ ॥

---

१ क. ख. ग. ङ. °माधि° ।

जाड्याकारस्तु यः शक्तेस्तेनाभिन्नं परं पदम् ।
स्वप्रधानादिरूपेण त्रिधोपास्यं विचक्षणैः ॥ १२ ॥
तथा शक्तेस्तु यो ज्ञानाकारस्तेनैकतां गतम् ।
परतत्त्वं त्रिधोपास्यं परिज्ञानवतां वराः ॥ १३ ॥
मायाकारैकतापन्नमपि तत्त्वं मनीषिभिः ॥ १४ ॥
उपास्यं त्रिविधं प्रोक्तं तथैवाविद्ययैव तु ।
अभेदेन स्थितं ब्रह्म त्रिधोपास्यं मनीषिभिः ॥ १५ ॥

तानेवोपाधीन्विभज्य दर्शयति—जाड्याकार इत्यादिना मनीषिभिरित्यन्तेन ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

अन्ये च शक्तेराकारा ये विद्यन्ते विचक्षणाः ।
तैरप्येकत्वमापन्नं तत्त्वं तद्वन्मनीषिभिः ॥ १६ ॥
उपास्यं त्रिविधं नित्यमतीव श्रद्धया सह ।
ईक्षणोपाधिसंपन्नं परतत्त्वमपि द्विजाः ।
स्वप्रधानादिरूपेण त्रिधोपास्यमतिप्रियात् ॥ १७ ॥

किंच ज्ञानाज्ञानादिव्यतिरिक्ता इच्छाक्रियाद्या ये शक्तेराकारविशेषास्तदुपाधिकमपि परशिवस्वरूपं यथोदीरितैरधिकारिभिर्यथाक्रमं स्वप्रधानादिरूपेण त्रिधोपास्यमित्याह—अन्ये चेति । एवं वक्ष्यमाणेष्वपि सोपाधिकरूपेषु मतिनैशित्यानुसारेणाधिकारित्रैविध्यात्स्वप्रधानादिरूपेणोपाधित्रैविध्यं सर्वत्रावगन्तव्यम् । "स ऐक्षत लोकान्नु सृजै" इति "तदैक्षत बहु स्यां प्रजायेय" इति श्रवणात्स्वप्रतिष्ठस्य परशिवस्य प्राणिकर्मवशात्सृष्टव्यपर्यालोचनात्मकमीक्षणं सिसृक्षापरपर्यायं तदुपाधिकमपि तत्त्वं ध्येयमित्याह—ईक्षणेति ॥ ॥ १६ ॥ १७ ॥

सत्त्वं रजस्तमश्चेति गुणा ये ब्रह्मशक्तिजाः ॥
तैरप्येकत्वमापन्नं परं ब्रह्म यथाक्रमम् ॥ १८ ॥

---

१ ग. °याया ये । २ ख. 'नैर्मल्यानु° ।

रुद्रः प्रजापतिर्विष्णुरिति भेदमुपैति च ॥ १९ ॥
ते जगन्नाशसर्गादेः कर्तारः कार्यरूपिणः ।
उपास्यास्त्रिविधा नित्यं तेऽपि स्वं स्वमुपाधिभिः ॥ २० ॥

सत्त्वरजस्तमोगुणात्मिका या परशिवस्वरूपाश्रिता माया तस्याः प्रलयदशायामत्यन्तमविकल्पकत्वात्तदीयगुणा अप्यविभागापन्ना एव भवन्ति । अत एव सांख्यैरुच्यते—"सत्त्वरजस्तमोगुणानां साम्यावस्था मूलप्रकृतिः" इति । परमेश्वरस्य सिसृक्षायां जातायां तत्परतन्त्रमायाया अपि विचिकीर्षा जायते । तदवयवभूताश्च सत्त्वाद्या गुणा अन्योन्यं प्रविभक्ताः सन्तः प्रकटी भवन्ति । तैस्त्रिभिरुपाधिभिर्विशिष्टं परशिवस्वरूपं ब्रह्मविष्ण्वादिसंज्ञां लभते । अतस्तदुपाधिकमपि पूर्ववत्त्रिधोपास्यमित्याह—सत्त्वमिति । किं बहुना ब्रह्मादिस्तम्बान्तं चराचरात्मकं जगत्सच्चिदानन्दे परशिवस्वरूपे परिकल्पितम् । तथा हि—यदनुविद्धं यद्दृश्यते तत्तत्र परिकल्पितं यथा सर्पधारादयो रज्ज्वा इदमंशे सच्चिदनुविद्धं चेदमनुभूयते । तस्मात्सच्चिदानन्दात्मके परशिवस्वरूपे परिकल्पितम् । आम्नायते च—"सद्धीदं सर्वं सत्सदिति । चिद्धीदं सर्वं काशते काशते च" इति ॥ १८ ॥ १९ ॥ २० ॥

तैर्गृहीतास्तथा विप्रा मूर्तयस्त्रिप्रकारतः ।
चित्तपाकानुगुण्येन चिन्तनीया मनीषिभिः ॥ २१ ॥

एवं चाधिष्ठानभूतसच्चिदादिलक्षणब्रह्मात्मनाऽविभागापन्नं ब्रह्मरुद्रादिचेतनाचेतनात्मकं सर्वं जगत्पूर्ववत्स्वप्रधानादिरूपेण त्रिधोपास्यमित्याह—तैर्गृहीता इत्यादिना वाक्यवेदिभिरित्यन्तेन ॥ २१ ॥

अग्न्यादित्यादिदेवा ये निहीना मध्यमाः पराः ।
ते च ब्रह्मात्मना नित्यमुपास्या एव सादरम् ॥ २२ ॥

अग्न्यादित्यादीति । मनुष्यादीनामिवाग्न्यादिदेवानामप्यधिकारतारतम्यार्धीनाधममध्यमोत्तमभावेन त्रैविध्यमवगन्तव्यम् ॥ २२ ॥

---

१ ब. °स्तम्बपर्यन्तं । २ क. °था रज्जुसर्पादि° । ख. °था सर्पसूत्रधारादि° । ३ क. ग. घ. च. °तश्चिदनु° । ४ ग. °श्चविष्णु° । ५ ब. विहीना । ६ ङ. ग. ङ. च. °म्याधीनमध्य° ।

शब्दस्पर्शादिसंज्ञा ये पदार्थाः पञ्च तेऽपि च ।
उपास्या ब्रह्मरूपेण महाप्राज्ञैर्मनीषिभिः ॥ २३ ॥
आकाशादीनि भूतानि यानि तानि मनीषिभिः ।
ब्रह्मरूपतया नित्यमुपास्यानि महात्मभिः ॥ २४ ॥

शब्दस्पर्शादीति । आकाशादिभूतपञ्चकस्य कारणभूताः पञ्च तन्मात्राः शब्दस्पर्शादिनोच्यन्ते ॥ २३ ॥ २४ ॥

भौतिका अण्डभेदाश्च ब्रह्मरूपेण सादरम् ।
चिन्तनीयाश्च विद्वद्भिर्वेदवेदान्तपारगाः ॥ २५ ॥
अण्डमध्ये स्थिता लोका एतेऽपि ब्रह्मवित्तमाः ।
ब्रह्मरूपतया नित्यमुपास्या एव सूरिभिः ॥ २६ ॥
लोकान्तर्वर्तिनो देशा एतेऽपि द्विजपुंगवाः ।
ब्रह्मरूपतया नित्यमुपास्या मुनिसत्तमैः ॥ २७ ॥
मेरुमन्दारपूर्वाश्च पर्वता विविधा द्विजाः ।
ब्रह्मरूपतया नित्यमुपास्या वेदवित्तमाः ॥ २८ ॥
नदीनदादयः सर्वे देवर्ष्यादिविनिर्मिताः ।
ब्रह्मरूपतया नित्यमुपास्याः पुरुषोत्तमैः ॥ २९ ॥
वापीकूपतडागाद्या अपि वेदपरायणाः ।
ब्रह्मरूपतया नित्यमुपास्याः पुरुषाधिकैः ॥ ३० ॥
वनानि यानि लोके तु विविधानि महत्तमाः ।
तानि ब्रह्मतया नित्यमुपास्यानि तपोधनैः ॥ ३१ ॥
समुद्राश्च सदा विप्राः समुद्रान्तर्गता अपि ।
संगमा अपि सद्ब्रह्म ध्यातव्या एव केवलम् ॥ ३२ ॥

---

१ म. ङ. च. °द्राङ्गपा° ।

दिशश्च विदिशश्चैव दिवारात्रं तथैव च ।
अनागतादयः काला उपास्या ब्रह्मरूपतः ॥ ३३ ॥
अण्डजं जारजं चैव स्वेदजं चोद्भिजं तथा ।
ब्रह्मरूपतया नित्यमुपास्या मोहवर्जितैः ॥ ३४ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा अपि च संकराः ।
ब्रह्मरूपतया नित्यमुपास्या एव सूरिभिः ॥ ३५ ॥
आश्रमा ब्रह्मचर्याद्यास्तदाचारा अपि द्विजाः ।
ब्रह्मरूपतया नित्यमुपास्याः परमास्तिकैः ॥ ३६ ॥
महापातकपूर्वाणि पापानि सुबहूनि च ।
ब्रह्मरूपतया नित्यमुपास्यानि महत्तमैः ॥ ३७ ॥
धर्मसंज्ञाश्च ये विप्रा उत्तमाधममध्यमाः ।
तेऽपि ब्रह्मतया नित्यमुपास्याः पण्डितोत्तमैः ॥ ३८ ॥
सुखं दुःखं तयोर्भोगः साधनं तस्य सुव्रताः ।
ब्रह्मरूपतया सर्वमुपास्यं सत्यवादिभिः ॥ ३९ ॥
कर्ता कारयिता कर्म करणं कार्यमेव च ।
ब्रह्मरूपतया सर्वमुपास्यं चेतनोत्तमैः ॥ ४० ॥

॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥
॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा ।
ब्रह्मरूपतया सर्वमुपास्यं मानमानिभिः ॥ ४१ ॥
विधयश्च निषेधाश्च विद्याविद्ये तथैव च ।
ब्रह्मरूपतया सर्वमुपास्यं वेदवेदिभिः ॥ ४२ ॥

---

१ ङ. °स्याः सुमहत्त° । २ घ. दत्राद्रिभिः ।

मानमानिभिरिति । मानं प्रमाणं मन्तुं निर्णेतुं शीलमेषां तैः । प्रमाणवेदिभिरित्यर्थः ॥ ४१ ॥ ४२ ॥

अवन्ध्याश्च तथा वन्ध्या वादाश्च विविधा अपि ।
ब्रह्मरूपतया सर्वमुपास्यं वाक्यवेदिभिः ॥ ४३ ॥

अवन्ध्याः सफलाः । वन्ध्या निरर्थकाः ॥ ४३ ॥

यद्यदस्तितया भाति यद्यन्नास्तितयाऽपि च ।
तत्तद्ब्रह्मतया नित्यमुपास्यं ब्रह्मवित्तमैः ॥ ४४ ॥

इत्थं भूतभौतिकात्मकं सर्वं जगद्ब्रह्मात्मनोपास्यमित्यभिधायानुक्तसंग्रहायाऽऽह—यद्यदस्तितयेति । अस्तिप्रत्ययविषयत्वेन नास्तिप्रत्ययविषयत्वेन च भासते तत्सर्वं ब्रह्मात्मत्वेन ध्येयमित्यर्थः । भावाभावानात्मकस्य कस्यचिदपि वस्तुनोऽसत्त्वादुक्तव्यतिरिक्तस्य सर्वस्य भावाभावात्मकस्य संग्रहः ॥ ४४ ॥

इत्थं सर्वत्र यः साक्षाद्ब्रह्मोपास्ते सनातनम् ।
स याति ध्यानयज्ञेन साक्षाद्विज्ञानमैश्वरम् ॥ ४५ ॥

ध्यानयज्ञस्य माहात्म्यं कल्पानां कोटिकोटिभिः ।
मया मत्तोऽधिकैरन्यैरपि वक्तुं न शक्यते ॥ ४६ ॥

ध्यानयज्ञं विना मुक्तौ यतन्ते मोहिता जनाः ।
पायसान्नं परित्यज्य भक्षयन्ति महाविषम् ॥ ४७ ॥

सर्वात्मकत्वेनोक्तं ब्रह्मोपासनमुपसंहरंस्तत्फलमाह—इत्थमित्यादिना । आरोपितस्य सर्वस्याधिष्ठानब्रह्मरूपताध्यानेन समाधिसादितैकाग्र्येण मनसा सर्वाधिष्ठानरूपं तत्परशिवस्वरूपं साक्षात्कुर्यादित्यर्थः ॥ ४५ ॥ ४६ ॥ ४७ ॥

ध्यानयज्ञं विना किंचित्कुर्वाणो मुक्तिसिद्धये ।
अक्ष्णाऽपि शब्दं गृह्णाति विना श्रोत्रेण केवलम् ॥ ४८ ॥

---

१ ग. घ. °वात्मक° । २ ग. °ह्मता° । ३ ङ. च. °माहितै° ।

अश्वमेधादयो यज्ञा अशेषा वेददर्शिताः ।
मुनीन्द्रा ध्यानयज्ञस्य कलां नार्हन्ति षोडशीम् ॥ ४९ ॥

ध्यानयज्ञपरो मर्त्यः शिव एव न चापरः ।
ध्यानयज्ञैकनिष्ठस्य न किंचिदपि दुर्लभम् । ५० ॥

ध्यानयज्ञपराणां तु प्रसादं कुरुते शिवः ।
शिवोऽपि साक्षात्सर्वज्ञः संसारविनिवर्तकः ॥ ५१ ॥

बहुनोक्तेन किं सर्वं समासेन मयोदितम् ।
कुरुध्वं वेदविन्मुख्या ध्यानयज्ञमशङ्किताः ॥ ५२ ॥

इति श्रीसूतसंहितायां चतुर्थे यज्ञवैभवखण्डे ध्यान-
यज्ञविवरणं नाम नवमोऽध्यायः ॥ ९ ॥

यथा शब्दाद्युपलब्धौ श्रोत्रादीन्द्रियमसाधारणं कारणमेवं ज्ञानयज्ञं प्रति ध्यानयज्ञोऽसाधारणकारणमित्याह—ध्यानयज्ञमिति । सुगममन्यत् ॥ ४८ ॥ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

इति श्रीसूतसंहिताटीकायां तात्पर्यदीपिकाख्यायां चतुर्थे यज्ञवैभव-
खण्डे ध्यानयज्ञविवरणं नाम नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

सूत उवाच—

अथेदानीं प्रवक्ष्यामि ज्ञानयज्ञस्य वैभवम् ।
ज्ञानयज्ञात्परो यज्ञो नास्ति विप्राः श्रुतौ स्मृतौ ॥ १ ॥

इत्थं कायिकवाचिकमानसैः कर्मभिः प्रक्षीणकल्मषस्य मुमुक्षोः परशिवस्वरूपावगमाय ज्ञानयज्ञं प्रस्तौति—अथेति । यज्ञान्तरादस्य वैलक्षण्यमाह—ज्ञानयज्ञादिति । श्रुतौ तावत् " ब्रह्म वेद ब्रह्मैव भवति " " ब्रह्मविदाप्नोति परम् " " तमेवं विदित्वाऽति मृत्युमेति " " तस्यैवाऽऽत्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन " इति ज्ञानस्यान्यनैरपेक्ष्येणैव साक्षादपवर्गसाधनत्वमाम्नातम् । स्मृतावपि—

" श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते " इति ॥

"क्षेत्रज्ञस्याऽऽत्मविज्ञानाद्विशुद्धिः परमा मता" इति मनुस्मृतौ ॥ १॥

ज्ञानं बहुविधं प्रोक्तं वेदार्थज्ञानपारगैः ॥ २ ॥
स्वरूपमेकं विज्ञानं शिवस्य परमात्मनः ।
तदेव मायातत्कार्यभेदेन बहुधा भवेत् ॥ ३ ॥

सृष्टेः प्राक्स्वप्रतिष्ठितमद्वितीयं परशिवस्वरूपभूतं स्वप्रकाशज्ञानं तदेव सृष्ट्युत्तरकालं मायातत्कार्योपाधिवशाज्जीवेश्वरादिभेदं भजत इत्याह—ज्ञानं बहुविधमित्यादिना ॥ २ ॥ ३ ॥

मायाकारेण संबद्धं जडशक्तेः शिवस्य तु ।
ज्ञानमीश्वरसंज्ञं च नियन्तृ जगतो भवेत् ॥ ४ ॥

तत्र जगन्नियन्तुरीश्वरस्य स्वरूपमाह—मायाकारेणेति । शक्यप्रतियोगिकं परशिवस्वरूपमेव संविद्रूपिणी परशक्तिरित्युक्तं ततो व्यावर्तयति—जडशक्तेरिति । वेदान्तिभिर्मायेति या गीयते सांख्यैरव्यक्तं प्रकृतिरिति साऽत्र परशिवस्य जडशक्तिः । सा च गुणसाम्यं विहाय रजस्तमसोरत्यन्ताभिभवेन विशुद्धसत्त्वप्रधानमायाकारेण यदा परिणमते तदा तदुपाधिकं चैतन्यं सर्वज्ञो जगत्कर्तेश्वरो भवेदित्यर्थः ॥ ४ ॥

शक्तेरविद्याकारेण संबद्धं जीवसंज्ञितम् ।
जीवसंज्ञं तु विज्ञानं द्विधा लोके व्यवस्थितम् ।
अर्थतो मुख्यमेकं तु ज्ञानमन्यत्प्रतीतितः ॥ ५ ॥

मलिनसत्त्वप्रधानमाया स्वाश्रयव्यामोहकत्वादविद्येत्युच्यते । तदुपाधिकं तज्ज्ञानं जीवसंज्ञां लभत इत्याह—शक्तेरविद्येति । तस्यैव जीवसंज्ञस्य द्वैविध्यमाह—जीवसंज्ञमिति । तत्रैकमर्थतो मुख्यमन्यत्प्रतीतितो मुख्यम् ॥ ५ ॥

अविद्याबद्धविज्ञानमर्थतो मुख्यमुच्यते ।
स्थूलसूक्ष्मशरीराभ्यामवच्छिन्नं प्रतीतितः ॥ ६ ॥

एतदुभयं दर्शयति—अविद्याबद्धेति । जीवस्योपाधिभूता मलिनसत्त्वप्रधाना या मायाऽविद्यापरपर्याया सा स्थूलसूक्ष्मशरीरद्वयकारणत्वेन जीवस्य कारणशरीरमित्युच्यते । तत्संबद्धं तदुपहितं स्वरूपचैतन्यं परमार्थतः स्वपरव्यवहारहेतुः प्रकाशचिदात्मकत्वादर्थतो मुख्यमविद्याकार्यभूतं यत्स्थूलसूक्ष्मात्मकं शरीरद्वयं तेनावच्छिन्नं तत्र शरीरद्वये कारणत्वेनानुगतमायावयवभूतं स्वप्रकाशचैतन्याध्यासेन तदात्मकेनैवंभूतं यदन्तःकरणं तद्वृत्त्युपादानभूतं सत्त्वं तदनुभवतश्चित्प्रकाशरूपत्वात्प्रतीतितो मुख्यं परमार्थतस्तु तस्य सत्त्वस्य जडत्वमेवाग्निनाऽयःपिण्डवत्स्वरूपचैतन्येनैकीभूतत्वात्तस्य ज्ञानत्वव्यपदेशः ॥ ६ ॥

स्वप्रचाराश्रयं चित्तं जीवरूपप्रकाशकम् ।
ज्ञातृत्वहेतुर्जीवस्य दुःखित्वादेश्च कारणम् ॥ ७ ॥

एवंविधसत्त्वपरिणामरूपान्तःकरणतद्वृत्तिसंबन्धादेवाविद्योपहितजीवचैतन्यस्य ज्ञातृत्वकर्तृत्वभोक्तृत्वादिसकलव्यवहारसंबन्ध इत्याह—स्वप्रचाराश्रयमिति । स्वशब्देन चित्तं परामृश्यते । स्वस्य प्रचारा विषयाकारवृत्तयस्तत्संघातात्मकमित्यर्थः । तथाविधान्तःकरणतादात्म्याध्यासेन तदीयकर्तृत्वभोक्तृत्वादेश्चैतन्येऽध्यासादस्य जीवप्रकाशकत्वम् । सकलः संसारोऽन्तःकरणस्यैव नाऽऽत्मनः पारमार्थिक इति श्रूयते " कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव " इति ॥ ७ ॥

प्रमाणभ्रान्तिसंदेहाद्याकारेण मुनीश्वराः ।
बहुरूपं भवेच्चित्तं कालकर्मविपाकतः ॥ ८ ॥

कथमन्तःकरणस्य कर्तृत्वभोक्तृत्वादिकारणत्वमित्याशङ्क्य तदुपपादयितुं प्रमाणादिवृत्त्यात्मना नानारूपतामाह—प्रमाणेति । कालकर्मविपाकत इति । कालो हि कर्मपरिपाकस्य हेतुः । कालवशात्सुखदुःखहेतुभूतानां पुण्यपापात्मनां प्राणिकर्मणां यः परिपाकः फलप्रदानोन्मुखत्वं तस्मादित्यर्थः॥८॥

तत्तदाकारसंभिन्नं विज्ञानं मुनिपुंगवाः ।
प्रमाणभ्रान्तिसंदेहज्ञानमित्युच्यतेऽनघाः ॥ ९ ॥

---

१ च. °नः पारं पा° ।

तत्तद्विषयाकारवैचित्र्यादेव प्रमाणादिभेदव्यपदेश इत्याह—तत्तदिति। विज्ञानमिति। स्वरूपचैतन्यतादात्म्याध्यासेनैकीभूतमन्तःकरणवृत्तिज्ञानमित्यर्थः ॥ ९ ॥

अदुष्टकरणोत्पन्नं विज्ञानं मुनिपुंगवाः।
प्रमाणज्ञानमित्युक्तं मुनिभिः सूक्ष्मदर्शिभिः ॥ १० ॥

तत्र प्रमाणस्य स्वरूपमाह—अदुष्टेति। काचकामलादिदोषदूषितं चक्षुरादिकरणं शुक्तिरूप्यादिविभ्रमस्यानवधारणरूपस्य[1] संशयस्य च जनकमिति ततो व्यावर्तयति—अदुष्टेति ॥ १० ॥

दुष्टकारणविज्ञानं भ्रान्तिज्ञानं प्रचक्षते।
कोटिद्वयावलम्बि स्यात्संदेहज्ञानमास्तिकाः ॥ ११ ॥
इत्थमेवेदमित्येवंरूपं यत्स्फुरणं बुधाः।
स एव निश्चयः प्रोक्तः सम्यग्दर्शनतत्परैः ॥ १२ ॥

भ्रान्तेर्लक्षणमाह—दुष्टेति। दुष्टकारणवशादतस्मिंस्तद्बुद्धिर्भ्रान्तिरित्यर्थः। संशयं लक्षयति—कोटिद्वयेति। स्थाणुर्वा पुरुषो वेति विरुद्धानेककोटिद्वयावलम्बि ज्ञानं संशय इत्यर्थः ॥ ११ ॥ १२ ॥

ज्ञानस्य तेन संबन्धः प्रामाण्यं कथितं मया।
प्रमाणज्ञानसामग्र्यः षण्मयाऽभिहिता बुधाः ॥ १३ ॥

ईदृक् स्फुरणं यस्मिन्बुद्धिवृत्तिविशेषे तस्यैव प्रामाण्यमित्याह—ज्ञानस्येति। एवं चायं घट इत्यादिवृत्तिज्ञानेषु स्वाकारसमर्पकघटादिविषयस्फुरणसद्भावात्तेषां प्रामाण्यम्। इदं रजतमित्यादिविभ्रमज्ञाने त्विदमाकारगोचरा मनोवृत्तिरेतद्वृत्त्यवच्छिन्नचैतन्यस्थमायापरिणामरूपा शुक्त्यधिष्ठानचैतन्यस्थमायाविवर्तरजतगोचरा परा वृत्तिरिति वृत्तिद्वयम्। तदुभयमपि शुक्त्यधिष्ठानभाक्त्वेन वृत्त्यवच्छिन्नत्वेन चोभयत्रानुगतमेकमेतच्चैतन्यमभिव्यनक्ति। तच्च वृत्तिद्वयाभिव्यक्तत्वादारोप्याधिष्ठानलक्षणं विषयद्वयं संसृष्टत्वेन स्फोरयति। तथा च विशिष्टस्फुरणस्येदमाकारविषयमनोवृत्तेश्च संबन्धाभावात्तत्राप्रामाण्यम्। इदमाकारमात्रस्फुरणस्य च संबन्धात्तस्मिन्नंशे प्रामाण्यम्। उक्तं हि—

---

१ ग. घ. °स्य च सं°; २ घ. ङ. °न्यस्य मा°।

"सर्व[1] वस्तुज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्ययः" इति। तच्च प्रमाणं षड्विधमित्याह—प्रमाणज्ञानेति ॥ १३ ॥

तत्रैकाऽभावविज्ञानसामग्री कथिता द्विजाः।
अन्या तु भावविज्ञानसामग्री परिकीर्तिता ॥ १४ ॥

भावाभावलक्षणविषयद्वैविध्येन तेषां प्रमाणानां द्वैविध्यमाह[3]—तत्रैकेति ॥ १४ ॥

यद्योग्यानुपलब्ध्यैव जन्यं विज्ञानमास्तिकाः।
तत्स्याद्भावविज्ञानं धार्मिका वेदवित्तमाः ॥ १५ ॥

तत्राभावग्राहकप्रमाणमाह—यद्योग्येति। अनुपलम्भमात्रस्याभावज्ञानजनकत्वमतिप्रसक्तमिति विशिनष्टि—योग्येति। प्रतियोगिव्यतिरिक्तप्रतियोगिग्रहणसामग्रीसत्त्वमनुपलब्धेर्योग्यत्वम्। तथाविधयाऽनुपलब्ध्या यत्प्रमेयाभावगोचरं ज्ञानं जन्यते तदभावग्राहकं प्रमाणमित्यर्थः। तदुक्तं—

"प्रमाणपञ्चकं यत्र वस्तुरूपेण जायते।
वस्तुसत्तावबोधार्थं तत्र भावः प्रमाणता" ॥ इति ॥ १५ ॥

इन्द्रियोत्पन्नविज्ञानं प्रत्यक्षं परिभाषितम्।
व्याप्तिजन्यपरिज्ञानमनुमानमितीष्यते ॥ १६ ॥

भावग्राहकाणां मध्ये प्रत्यक्षं लक्षयति—इन्द्रियोत्पन्नेति। उक्तं हि—इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति। अनुमानस्वरूपमाह—व्याप्तीति। नियतसंबन्धयोर्व्याप्यव्यापकयोर्धूमाग्न्योर्मध्ये व्याप्यदर्शनबलाद्व्यापकगोचरज्ञानं तदनुमानं व्याप्यदर्शनाद्व्यापके बुद्धिरनुमानमिति तत्त्वविदः ॥ १६ ॥

सादृश्यहेतुजं ज्ञानमुपमानमुदाहृतम्।
अर्थापत्तिरिति प्रोक्तं विप्रा अनुपपत्तिजम् ॥ १७ ॥

उपमानं लक्षयति—सादृश्येति। नगरे पूर्वमनुभूतगोपिण्डस्य वनमुपेयुषस्तत्र गवयं साक्षात्कुर्वतो नागरिकस्यानेन सदृशी मदीया गौरिति गवयानिष्टसादृश्यहेतुकमसंनिहितगोगतसादृश्यविषयं यज्ज्ञानं तदुपमानमित्यर्थः। अर्थापत्तिस्वरूपमाह—अर्थापत्तिरिति। अनुपपद्यमानार्थदर्शनादुपपादके बुद्धिर-

---

१ ख. ग. घ. च. °र्वं ज्ञा°। २ ङ. प्रामाण्यं। ३ ग. घ. ङ. द्वैराश्यमाह।

र्थापत्तिः । यथा जीवतो देवदत्तस्य गृहाभावो बहिःसत्तामन्तरेण नावकल्पत इति तत्सत्तामन्यत्र कल्पयति । बहिरतद्भावगोचरं ज्ञानमर्थापत्तिरित्यर्थः ॥ १७ ॥

तात्पर्योपेतशब्दोत्थज्ञानं शाब्दमुदाहृतम् ।
शब्दस्तु ब्रह्मविच्छ्रेष्ठास्त्रिविधः परिकीर्तितः ॥ १८ ॥
अक्षराणि तथा विप्राः पदानि च तथैव च ।
वाक्यानि चेति तत्रापि केषांचिद्द्विजपुंगवाः ॥ १९ ॥

अथाऽऽगमं लक्षयति--तात्पर्योपेतेति ।

" उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिश्चये "

इत्येवंभूततात्पर्यलिङ्गोपेताच्छब्दाद्यदभिधेयगोचरं ज्ञानं तच्छाब्दं प्रमाणमित्यर्थः । तस्याक्षरपदवाक्यभेदेन त्रैविध्यमाह--शब्दस्त्विति । केषांचिदाचार्याणां मते वर्णानामेवार्थवाचकत्वमित्याह--केषांचिदिति । यदाहुर्भाष्यकाराः--" वर्णा एव तु शब्द इति भगवानुपवर्षः " इति । एकार्थप्रतिपादकत्वोपाधिपरिगृहीतानां वर्णानामेवार्थवाचकत्वं ततोऽतिरिक्तः स्फोटापरपर्यायः शब्दो नास्तीत्येवकारार्थः ॥ १८ ॥ १९ ॥

अर्थानामक्षराण्येव वाचकानि तथैव च ।
अर्थानामपि केषांचित्पदान्येव द्विजोत्तमाः ॥ २० ॥

ततः स्फोटवादिमतमाह--अर्थानामिति । केषांचिन्मतेऽर्थानां पदान्येव वाचकानि बहुषु वर्णेषूच्चारितेष्विदमेकं पदमिति या बुद्धिर्जायते तद्विषयभूतो वर्णाभिव्यङ्ग्यः पदस्फोटः । तदुक्तं वाक्यपदीये--

" नादैराहितबीजायां मध्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दो व्यवस्थितः " ॥ इति ।

स एवार्थस्य वाचकः । वर्णास्तु केवलं तदभिव्यक्तिहेतवो नार्थाभिधायका इत्यवधारणार्थः ॥ २० ॥

वाचकानि च वाक्यानि तथैव ब्रह्मवित्तमाः ।
अर्थानामपि केषांचित्प्रमाणानि प्रदीपवत् ॥ २१ ॥

---

१ ग. घ. °स्तत्सद्भा° । २ घ. °पत्तिश्च लि° । ३ घ. °कारः ॥ १८ ॥

वाक्यस्फोटमाह—वाचकानीति । केषांचिन्मते वाक्यस्फोट एव शब्दः स एवार्थस्याभिधायकः । पदानि तु तद्व्यञ्जकत्वेन तत्स्वरूपे परिकल्पितानीत्यर्थः । तदुक्तं कैयटकारेण—" वाक्यमेव वाचकम् । वाक्यार्थ एव वाच्यः । पदानि तु वर्णवदनर्थकान्येव " इति । वाक्यपदीयेऽप्युक्तम्—

" द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधाऽपि वा ।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् " ॥ इति ॥ २१ ॥

भवन्त्येकाक्षराण्येव पदानि द्विजपुंगवाः ।
अक्षराणि च संभूय पदानि स्युस्तथैव च ॥ २२ ॥

एकाक्षरानेकाक्षरभेदेन पदानां द्वैविध्यमाह—भवन्त्येकेति ॥ २२ ॥

पदानां समुदायस्तु भवेद्वाक्यं द्विजोत्तमाः ।
प्रधानं गुणभूतं च द्विविधं वाक्यमीरितम् ॥ २३ ॥

अथ क्रियाकारकपदसमुदायात्मकं वाक्यमाह—पदानामिति । एकार्थावच्छेदकमाकाङ्क्षासंनिधियोग्यतावत्पदकदम्बकं वाक्यमित्यर्थः । तदुक्तं जैमिनिना—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति । तस्य प्रधानगुणभावेन द्वैविध्यमाह— प्रधानमिति ॥ २३ ॥

महावाक्यमिति प्रोक्तं प्रधानं मुनिपुंगवैः ।
गुणभूतं तु यद्वाक्यं तदवान्तरसंज्ञितम् ॥ २४ ॥

ते एव विभज्य दर्शयति—महावाक्यमिति । यत्फलवदर्थावबोधकत्वात्प्रधानमनन्यशेषं वाक्यं तन्महावाक्यम् । यत्तु तच्छेषभूतार्थप्रतिपादकत्वेन गुणभूतं तदवान्तरवाक्यमित्यर्थः ॥ २४ ॥

उभयं चैकवाक्यं स्यादर्थैकत्वविवक्षया ।
पदानि शक्त्या स्वार्थानां वाचकानि तथैव च ॥ २५ ॥
तात्पर्यादेव वाक्यानि स्वार्थानां बोधकानि च ।
तात्पर्यं तु द्विधा विप्राः प्रोक्तं वाक्यविशारदैः ॥ २६ ॥
महातात्पर्यमेकं स्यादवान्तरमथेतरत् ।
महातात्पर्यशेषं स्यादवान्तरसमाह्वयम् ॥ २७ ॥

---

१ ब. °टपक्षमा° ।

एवं पदैकवाक्यस्वरूपमभिधाय वाक्यैकवाक्यमपि लक्षयति—उभयमिति । प्रधानगुणभावेन वर्तमानं वाक्यद्वयमपि पुनरेकप्रयोजनपरिगृहीतत्वेनैकवाक्यतां प्रतिपद्यते । तथा हि—" दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत " इति प्रधानवाक्यम् । " समिधो यजति " इत्याद्यवान्तरवाक्यानि । तानि फलभावनापेक्षितकरणेतिकर्तव्यताप्रतिपादनेन दर्शपूर्णमासवाक्येन कैमर्थक्यवशात्संबध्यन्ते तदेतद्वाक्यैकवाक्यम् । तदुक्तं भट्टाचार्यैः—

" स्वार्थबोधे समाम्नानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते " इति ॥

पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्य तदर्थप्रतिपादनपुरःसरमभिहितान्वयवादिमतमाश्रित्य वाक्यार्थप्रतिपत्तिप्रकारमाह— पदानीति । पदानि तावज्जातिगुणादिप्रवृत्तिनिमित्तकेष्वर्थेषु गृहीतसंगतिकान्येवार्थं प्रतिपादयन्ति । तेषां तत्तदर्थप्रतिपादने यत्सामर्थ्यं सा पदशक्तिस्तया शक्त्या गामानयेत्यादिवाक्येषु गवानयनाद्यर्थानामभिधावृत्त्या प्रतिपादकानि गवादिपदानीत्यर्थः । तत्प्रतिपादकत्वं नाम संगतिग्रहणसमये सहचरितस्यार्थविशेषस्य स्मारकत्वम् । उक्तं हि—" पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते " इति । तादृक्पदसमुदायात्मकानि वाक्यानि संगतिग्रहणमन्तरेणैव तात्पर्यतः स्वार्थस्य विशिष्टरूपस्य प्रतिपादकानि । तथा हि—वाक्यं तावत्पदकदम्बकम् । तच्च गवानयनादिकर्तव्यतादिरूपस्य विशिष्टार्थस्य प्रत्यायनाय प्रयुज्यते । " विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्जने " इति न्यायात् । तस्मात्तत्समभिव्याहारान्यथानुपपत्त्या पदस्मारितानामर्थानां संसर्गरूपो विशिष्टो वाक्यार्थः पदाभिहितैः पदार्थैर्लक्ष्यते । तादृक्पदार्थप्रत्यायनात्पदानामप्येतस्मिन्विशिष्टे सामर्थ्यमस्ति तदिदं तात्पर्यमुच्यते । यदाहुर्भट्टपादाः—

" न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः ।
वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितिः " इति ।

तथाच विशिष्टस्य वाक्यार्थस्यैवावगमाय पदकदम्बके प्रयुक्ते तत्रत्यैः पदैरभिधावृत्त्या यत्स्वार्थप्रतिपादनं तदवान्तरव्यापार एव पर्यवसानवृत्त्या तात्पर्यापरपर्यायया तत्सर्वं पदकदम्बकमुक्तलक्षणवाक्यार्थस्यैव बोधकम् । तदुक्तं मीमांसावार्तिककारैः—

---

१ घ. °मभिल° । २ घ. °तकार° । ३ ङ. °न कमर्थव° । ४ घ. °क्यार्थप्रज्ञा° । ५ क. ग घ. °वाय° । ६ ग. °र ए° । ७ क. ख. °यतया ।

" साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् ।
वर्णास्तथाऽपि नैतस्मिन्पर्यवस्यन्ति निष्फले ॥
वाक्यार्थमितये तेषां प्रवृत्त्या नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् " इति ॥

तदिदमुच्यते " तात्पर्यादेव वाक्यानि स्वार्थानां बोधकानि च " इति । उक्तप्रकारेण पदकदम्बकस्य वाक्यार्थे प्रत्यभिधायकत्वाभावाद्बोधकत्वमेवेत्यर्थः । गुणप्रधानभावेन वाक्यस्य द्वैविध्यात्तदर्थावबोधोपायभूतं तात्पर्यमपि द्वेधा भिद्यत इत्याह—तात्पर्यं त्विति । प्रधानवाक्येषु महातात्पर्यमवान्तरवाक्येष्ववान्तरतात्पर्यमित्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥

तत्रैवं सति वाक्यानि कानिचित्पण्डितोत्तमाः ।
निषेधरूपाण्येव स्युस्तथा विप्रास्तु कानिचित् ॥ २८ ॥
विधिरूपाणि चान्यानि कानिचिद्द्विजपुंगवाः ।
सिद्धार्थबोधकान्येव तत्रैवं सति वाडवाः ॥ २९ ॥

इत्थं वाक्यं तदर्थप्रतिपादनप्रकारं च निरूप्य विधिनिषेधसिद्धार्थबोधकत्वेन तस्य वाक्यस्य त्रैविध्यमाह—तत्रैवमिति । " न कलञ्जं भक्षयेत् " इत्यादीनि निषेधरूपाणि वाक्यानि । " अग्निहोत्रं जुहुयात् " इत्यादीनि विधिरूपाणि । " सत्यं ज्ञानमनन्तं. ब्रह्म " " पुत्रस्ते जातः " इत्यादीनि सिद्धार्थबोधकानि । वाडवा इति । ब्राह्मणा इत्यर्थः । तथा चामरः—"आश्रमोऽस्त्री द्विजात्यग्रजन्मभूदेववाडवाः " इति ॥ २८ ॥ २९ ॥

कर्तव्यविषया एव निषेधा विधयोऽपि च ।
सिद्धार्थबोधकं वाक्यं लौकिकं वैदिकं तु वा ॥ ३० ॥
द्विप्रकारमिति प्रोक्तं मुनिभिः सूक्ष्मदर्शिभिः ।
प्राप्तप्राप्तिपरं चैकमपरं पण्डितोत्तमाः ।
निवृत्तस्य स्वतः साक्षाद्दोषस्यैव निवर्तकम् ॥ ३१ ॥

तत्र विधिनिषेधप्रतिपादकं वाक्यद्वयं क्रियाविषयमेव न तु वस्तुयाथात्म्यप्रतिपादनपरमित्याह—कर्तव्येति । सिद्धार्थबोधकमपि लौकिकवैदिकभेदेन द्विविधम् । तदपि पुनर्द्वेधा भवतीत्याह—सिद्धार्थबोधकमिति । हारे कण्ठदेशस्थे सत्यपि हारो नष्ट इति यस्तद्गवेषणाय प्रयतते तं प्रति कण्ठे हार इति

१ ख. 'क्यार्थाव॥मायैषां । २ क. ख. पाकज्वालेव ।

यद्वाक्यं तत्पूर्वं प्राप्तस्यैव हारस्य पुनः प्रापकत्वात्प्राप्तप्राप्तिपरं[1] पदवाक्यम् । बाल्यात्प्रभृति गृहान्निर्गतस्याऽऽत्मनो द्विजत्वमजानानस्य शूद्रोऽहमिति शूद्रत्वमभिमन्यमानस्य शूद्रस्त्वं न भवसीति यच्छूद्रत्वनिवारकं वाक्यं तन्निवृत्तस्यैव दोषस्य पुनर्निवर्तनान्निवृत्तनिवर्तकम् ॥ ३० ॥ ३१ ॥

प्रत्यक्षादिप्रमाणानि पञ्च च ब्राह्मणोत्तमाः ॥ ३२ ॥
कर्तव्यविषयं वाक्यमनात्मविषयाणि तु ।
परागर्थैकनिष्ठत्वात्प्रत्यक्त्वादात्मवस्तुनः ॥ ३३ ॥
अतः प्रत्यक्षपूर्वैस्तु प्रमाणैरखिलैरपि ।
प्रत्यग्भूतः शिवो ज्ञातुं न शक्यः सर्वजन्तुभिः ॥ ३४ ॥

इत्थं प्रत्यक्षादिप्रमाणानि सप्रपञ्चं निरूप्य सिद्धार्थबोधकोपनिषद्वाक्यैरेव वेद्यं यत्परशिवस्वरूपं तत्र तद्व्यतिरिक्तानां तेषां प्रामाण्यं नास्तीत्युपपादयति—प्रत्यक्षादीति । प्रत्यक्षादीनि हि प्रमाणानि परागर्थैकविषयाणि । तत्र प्रत्यक्षस्य तावत् "पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्" इति परार्थैकविषयत्वं श्रुतम् । अनुमानादीनामपि बाधितविषयत्वेन परागर्थविषयत्वम् । "नेह नानाऽस्ति किंचन" इति परागर्थस्यैव बोधात् । तस्मादात्मतया सर्वप्रत्यग्भूतः परशिवस्तैर्ज्ञातुं न शक्यत इत्यर्थः । "य आत्मा सर्वान्तरः" । "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" इति च श्रुतेः ॥३२॥ ॥ ३३ ॥ ३४ ॥

प्रत्यगात्मा शिवः साक्षान्न परागर्थ आस्तिकाः ।
पराचीनस्य सर्वस्य ह्यनात्मत्वप्रदर्शनात् ॥ ३५ ॥

तस्य परशिवस्वरूपस्य सर्वप्रत्यक्त्वमिति ब्रुवन्विपक्षेऽनात्मत्वप्रसङ्गे बाधक इत्याह—प्रत्यगात्मेति ॥ ३५ ॥

सिद्धार्थबोधकं वाक्यं लौकिकं किंचिदास्तिकाः ।
अनात्मविषयं तेन शिवो ज्ञातुं न शक्यते ॥ ३६ ॥

सिद्धार्थावबोधकानामपि मध्ये यत्पुत्रस्ते जात इत्यादिकं तदपि परशिवस्वरूपप्रत्यायकं प्रमाणं न भवतीत्याह—सिद्धार्थेति ॥ ३६ ॥

---

१ ख. °रं वा° । घ. २ व्यतिरेकाणां । ग. ङ. तद्व्यतिरेकेण । ३ च. बाधत्वात् ।

किंचित्सिद्धार्थकं वाक्यं लौकिकं श्रुतिपूर्वकम् ।
प्रत्यग्रूपे शिवे साक्षात्प्रमाणं भवति द्विजाः ।
वेदान्तानां महावाक्यं प्रत्यग्ब्रह्मैकतार्थगम् ॥ ३७ ॥

यत्तु ब्रह्मात्मैक्यबोधकं तत्त्वमस्यादिवेदान्तवाक्यं तदनुसारि स्मृतिपुराणादिवाक्यं च तेनैव प्रमाणेन यथोदीरितमद्वितीयं परशिवस्वरूपमवगम्यत इत्याह—किंचिदिति । सर्वप्रत्यग्भूते निष्प्रपञ्चे परशिवस्वरूप उपनिषद्वाक्यमेकाव्यवधानेन प्रमाणम् । स्मृतिपुराणादिवाक्यं तु मूलभूतश्रुतिसापेक्षत्वाद्व्यवधानेन प्रमाणम् । अतस्तत्र साक्षात्प्रामाण्यमुपनिषद्वाक्यस्यैवेत्यर्थः । श्रूयते हि—"तं त्वौपनिषदं पुरुषं पृच्छामि" । "नावेदविन्मनुते तं बृहन्तं सर्वानुभूमात्मानं संपरायें" इति । उपनिषत्स्वेवाधिगत औपनिषदः, अत एव परस्मिन्ब्रह्मण्युपनिषद्वाक्यस्यैव प्रामाण्यमिति भगवान्व्यासः सूत्रयामास—"शास्त्रयोनित्वात्" इति । अस्य सूत्रस्य द्वितीयवर्णके ब्रह्मणः शास्त्रप्रमाणकत्वमर्थतस्तदेतत्संगृह्योक्तम्—

"अस्त्यन्यमेयताऽप्यस्य किंवा वेदैकमेयता ।
यद्वस्तुसिद्धवस्तुत्वाद्ब्रह्मान्येनापि मीयते ॥
रूपलिङ्गादिराहित्यादस्यामान्तरयोग्यता ।
तं त्वौपनिषदेत्यादौ प्रोक्ता वेदैकमेयता" इति ।
"सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते ।
प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते" ।

इति यद्ब्रह्मणः सर्वप्रमाणवेद्यत्वं तत्प्रपञ्चरूपस्यैव न निष्प्रपञ्चस्येत्यविरोधः ॥ ३७ ॥

भूमानन्दशिवप्राप्तिसाधनं परिकीर्तितम् ।
तदेव भ्रान्तिसिद्धस्य संसारस्य निवर्तकम् ॥ ३८ ॥

प्राप्तप्राप्तिपरं निवृत्तनिवर्तकमिति यत्सिद्धार्थबोधकवाक्यस्य भेदद्वयं तदुभयरूपं वेदान्तवाक्यं भवतीत्याह—भूमानन्देति । निरतिशयानन्दपरशिवस्वरूपं मुमुक्षुणा पूर्वमात्मतया प्राप्तमेव पुनरविद्यावशात्तिरोहितमभूत् । प्राप्तस्यैव तस्य प्राप्तिः कण्ठगतचामीकरवद्ब्रह्मविदाप्तीति प्रतिपाद्यते । तस्मिन्परशिवस्वरूपे स्वभावतो निवृत्तस्य संसारस्य भ्रान्त्या प्रसक्तस्य तत्स्वरूपयाथात्म्यप्रतिपादनेन निवर्तकत्वात्तत्त्वमस्यादिवाक्यं निवृत्तनिवर्तकमित्यर्थः ॥ ३८ ॥

१ ख. °त्यान्नास्ति मा । २ ग. सांपराये । ३ ख. °त्वं तत्प्रप्र° । ग. ङ. त्वं तत्प्र° ।

आत्मा स्वभावतो बद्धो यदि स्याद्वदवित्तमाः ।
नैव मुच्येत संसाराज्जन्मान्तरशतैरपि ॥ ३९ ॥

भवेदेवं यद्यात्मनः संसारः कल्पितः स्यात्स तु तस्य स्वभावसिद्ध एवेत्यत आह—आत्मेति । वस्तुस्वभावसिद्धस्योपायशतेनाप्यपनेतुमशक्यत्वादनिर्मोक्षप्रसङ्ग इत्यर्थः ॥ ३९ ॥

यस्य यो वेदविच्छ्रेष्ठाः स्वतो धर्मो न चान्यथा ।
धर्मिणा सह तन्नाशो भवेत्येव न चान्यथा ॥ ४० ॥

ये त्वेवमात्मनः संसारः स्वाभाविक इत्याहुस्तेषां घटादिधर्मस्य रूपादेर्धर्मिणा घटादिना सहैव नाशो दृष्ट इति धर्मभूतसंसारनिवृत्तौ धर्मिभूत आत्माऽप्युच्छिद्येतेत्याह—यस्येति ॥ ४० ॥

आत्मनो नैव नाशोऽस्ति कदाचिदपि सुव्रताः ।
यतो घटादेर्नाशस्तु दृष्टो विप्रा अनात्मनः ॥ ४१ ॥

इष्टापत्तिरित्यत आह—आत्मन इति । न खलु स्वानुभवसिद्धस्याऽऽत्मस्वरूपस्य नाशः संभवति । " असद्ब्रह्मेति वेद चेत् " इत्यसत्त्वं निराकृत्य " अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुः " इति श्रुत्या तत्स्वरूपस्य सर्वदाऽस्तित्वप्रतिपादनादत एव "नित्यो नित्यानां चेतनश्चेतनानाम्" इति तस्य नित्यत्वव्यपदेशः । "स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्"। " अस्थूलमनण्वह्रस्वमशब्दमस्पर्शमरूपमव्ययम् " इत्यादिश्रुतिभिस्तस्य सर्वविक्रियारहितत्वं प्रतिपाद्यते । अतश्च तस्य नाशो न संभवति । यस्माद्विकारप्रपञ्चस्यैव घटपटादेर्नाशो दृश्यत इत्यर्थः । एवं ह्यात्मनो नाशस्यासंभावनीयत्वात्तद्धर्मतया प्रतिपन्नस्य संसारस्य पारमार्थिकत्वे विद्ययाऽपनेतुमशक्यत्वादनिर्मोक्षप्रसक्तेरात्मनः संसारो भ्रान्तिपरिकल्पित एवेत्यभ्युपगन्तव्यः ॥ ४१ ॥

आत्मभेदस्तथैवाऽऽत्मब्रह्मभेदश्च सुव्रताः ।
उपाधिनैव क्रियते न स्वतो मुनिपुंगवाः ॥ ४२ ॥

इत्थं परमशिवस्वरूपस्य प्रत्यगात्मनो बोधकं प्रमाणं परमार्थतः संसाररहित्यं चोपपाद्य तन्नानात्वव्यवहारो जीवेश्वरभेदश्च न पारमार्थिक इत्याह—आत्मभेद इति । उपाधिनैवेति । उपाधिरीश्वरस्य विशुद्धसत्त्वप्रधाना माया । जीवानां तु मलिनसत्त्वप्रधानाऽविद्या तत्कार्याण्यन्तःकरणानि । एवमुपाधिनानात्वादेकस्यैव परशिवचैतन्यस्य नानात्वभ्रम इत्यर्थः ॥ ४२ ॥

घटाद्युपाधिसंपर्कादाकाशस्य भिदा यथा ॥ ४३ ॥
एकमेवेति वेदान्तास्तात्पर्येण महेश्वरम् ।
आहुश्चिद्रूपतो[1] भेदश्चितो नास्त्येव सर्वथा ॥ ४४ ॥

एकस्यैवोपाधिवशान्नानात्वं दृष्टान्तेन द्रढयन्स्वाभाविकमेकत्वं निगमयति—घटादीति । यथैकस्यैवाऽऽकाशस्य घटगृहाद्युपाधिसंबन्धवशाद्घटाकाशो गृहाकाश इति नानात्वपरिकल्पनं तद्वदेव जीवेश्वरनानात्वमित्यर्थः । श्रूयते हि— " एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा " । "एक एव तु भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव[2] दृश्यते जलचन्द्रवत् " ॥ " सदेव सोम्येदमग्र आसीत् " " एकमेवाद्वितीयं ब्रह्म " " नेह नानाऽस्ति किंचन " इत्यादिश्रुतिभिः स्वगतसजातीयविजातीयरहितस्य चिदात्मनस्तात्पर्येणैकत्वप्रतिपादनादित्यर्थः । किंचाऽऽत्मनानात्वं वदन्वादी प्रष्टव्यः किमात्मनः स्वप्रकाशचिद्रूपेण नानात्वमुताहंप्रत्ययविषयान्तःकरणविशिष्टचैत्यरूपेणेति । नाऽऽद्य इत्याह—चिद्रूपतो भेद इति । देवदत्ताविप्रमातृविशेषेष्वहंप्रत्ययविषयतया चैत्येषु च व्यावर्तमानेषु निष्कृष्टचिन्मात्रस्यैकरूप्येण सर्वत्रानुवृत्तेर्न तद्भेदकल्पनावकाश इत्यर्थः ॥ ४३ ॥ ४४ ॥

चैत्यरूपेण[3] भेदस्तु चैत्यस्यैव चितो न हि ।
आत्मभूतः शिवः साक्षाच्चिन्मात्रज्योतिरेव हि ॥ ४५ ॥

अस्तु तर्हि प्रमातृलक्षणेन चैत्यरूपेण भेद इति द्वितीयः कल्प इत्यत आह—चैत्यरूपेणेति । प्रमातृरूपेषु चैत्येषु व्यावर्तमानेषु चित्सर्वत्रानुवृत्तेस्ततो भिन्ना । अनुवृत्तं व्यावृत्तादन्यदिति[4] जातिव्यक्त्यादौ दृष्टत्वादतश्चैत्यरूपेणोच्यमानो भेदश्चैत्यस्यैव न चितः । न हि घटपटयोर्भेदो नभसो नानात्वमावहतीत्यर्थः । तर्हि तथाविधचैतन्यरूप एवाऽऽत्मेत्याशङ्क्याऽऽह—आत्मभूत इति । चिन्मात्रज्योतिरिति । मात्रशब्देन सर्वप्रमातृषु चित्संवलितो नानाकारश्चैत्यांशोऽन्तःकरणपरिणामोऽहंकारो व्यावर्त्यते । अतस्तस्य नानात्वेऽप्यनुगतचिदेकशरीरस्याऽऽत्मनो भेदो नाऽऽशङ्कनीय इत्यर्थः ॥ ४५ ॥

घटादीनां तु चैत्यानामनात्मत्वस्य दर्शनात् ।
आत्मनोऽपि स्वतो भेदमाहुः केचिन्मुनीश्वराः ॥ ४६ ॥

---

१ च. °तो भद्भि° । २ ङ. बहुधा चैकधा चै° । ३ ख. ग. घ. चेत्यरू° । ४ घ. °ति व्य° ।

विमतोऽहंकारो नाऽऽत्मा चिद्भास्यत्वाद्घटादिवदित्यभिप्रेत्याऽऽह—घटादीनामिति । इत्थं स्वमते चिद्रूपस्याऽऽत्मन एकत्वमुपपाद्य परमतं दूषयितुमुपन्यस्यति—आत्मनोऽपीति । स्वत इति । स्वभावत एव नोपाधिवशादित्यर्थः । तथा च काणादं सूत्रम्—" नानात्मानो व्यवस्थातः " इति । सांख्याश्चाऽऽहुः—" जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव " इति । आत्मन एकत्वे चैत्रमैत्रादिगात्रेषु सुखदुःखव्यवस्थाया अनुपपत्तेर्जननमरणादिप्रतिनियमादेश्चानुपपन्नत्वात्प्रतिशरीरं नानैवाऽऽत्मान इति तेषामभिप्रायः ॥ ४६ ॥

तन्न संगतमेव स्यादात्मा भेदस्य साधकः ।
भेदसाक्षी शिवो ह्यात्मा कथं भिन्नो भवेद्द्विजाः ॥ ४७ ॥

आत्मन ऐक्येऽप्यौपाधिकभेदस्वीकारादप्येतत्सर्वमुपपद्यत इत्यभिप्रेत्य दूषयति—तादिति । आत्मनो भेदः स्वाभाविक इति यत्तन्न संगतमित्यर्थः । कुत इत्यत आह—आत्मेति । वियदादिभूतभौतिकप्रपञ्चस्तावदात्मनः सकाशान्निष्पद्यते " आत्मन आकाशः संभूतः " इत्यादिश्रुतेः । भेदोऽपि प्रपञ्चान्तःपातित्वात्तस्मादेवोत्पद्यत इति वक्तव्यम् । तस्मादुत्पत्त्युत्तरकालीनो भेदस्ततः पूर्वमवस्थितस्यानादेरात्मनः कथं धर्मः स्याद्यद्योगादात्मा भिद्येत । तस्माद्भेदसाधकत्वादात्मनो नानात्वं न युक्तमित्यर्थः । विमतो भेद आत्मनः स्वाभाविको धर्मो न भवति चिद्भास्यत्वाद्घटादिवदित्यभिप्रेत्याऽऽह—भेदसाक्षीति ॥ ४७ ॥

अत आत्मनि भेदस्तु भ्रान्तिसिद्धो न वस्तुतः ।
एकस्य नभसो भेदो यथा भ्रान्त्या प्रतीयते ॥ ४८ ॥

विपक्षे चित्स्वरूपवत्तस्य साक्षिभास्यत्वं हीयेतेत्यभिप्रेत्यौपाधिक एवाऽऽत्मगतो भेद इति स्वमतं सदृष्टान्तमुपसंहरति—अत इति ॥ ४८ ॥

अस्य यत्स्वत एव स्यात्तदन्यत्तस्य सुव्रताः ।
अन्योपाधिप्रयुक्तं स्यादिति लोके व्यवस्थितम् ।
अतः स्वतोऽद्वितीयस्य भेदो भ्रान्तः परात्मनः ॥ ४९ ॥

उक्तभेदस्यौपाधिकत्वं लौकिकन्यायप्रदर्शनेनोपपादयति—यस्येति । यस्य खलु स्फटिकादेर्यच्छौक्ल्यादिकं स्वाभाविकं रूपं तस्य तद्विरुद्धरक्तिमादिरूपं

१ घ. 'क्षित्वं भा° । च. °क्षिणा भा° ' २ व. च.°कं रू° ।

जपाकुसुमाद्युपाधिप्रयुक्तमेव । यस्मादेवं लौकिकी व्यवस्थाऽतः कारणादात्मनः स्वाभाविकाद्वितीयत्वविरोधी भेदोऽप्यन्योपाधिप्रयुक्त एवेत्यवश्यमभ्युपगन्तव्यम् । ननु रक्तस्फटिक इत्यत्र जपाकुसुमसंनिधानासंनिधानाभ्यां स्फटिकस्य रक्तिम्न औपाधिकत्वमवगन्तुं शक्यते न तथाऽऽत्मनो भेदस्येति तत्राऽऽह—भ्रान्त इति । अयमर्थः—आत्मचैतन्यस्याविद्यातत्कार्यान्तःकरणाद्युपाधिसंबन्धस्यानादिसिद्धत्वाद्युपाधिव्यतिरेको नास्तीति तद्भेदस्यौपाधिकत्वं न ज्ञायते । अतः पीतः शङ्ख इतिवदन्यदीयधर्मस्यान्यत्राऽऽरोपादात्मगतो भेदो भ्रान्तिसिद्ध एवेत्यर्थः * ॥ ४९ ॥

अङ्गीकृत्य घटादीनां भेदं वेदार्थपारगाः ॥ ५० ॥
निरस्तश्चाऽऽत्मभेदस्तु घटादीनां भिदाऽपि च ।
भ्रान्तिसिद्धा न सत्योक्ता तर्कतश्च प्रमाणतः ॥ ५१ ॥

नन्वात्मनो भेद औपाधिक इति वदतोपाधिभूतस्यानात्मनो भेदः पारमार्थिक इत्यभ्युपगतं स्यात्तथा चाऽऽत्मनोऽद्वितीयत्वं स्वाभाविकमित्येतत्कथं सिध्येदित्यत आह—अङ्गीकृत्येति । घटात्पटो भिन्न इति योऽयमनात्मगतो भेदावभासः सोऽपि भ्रान्त एव न पारमार्थिकः प्रमाणतर्काभ्यां निरूपयितुमशक्यत्वादित्यर्थः । प्रमाणतर्कौ चाग्रे दर्शयिष्येते ॥ ५० ॥ ५१ ॥

घटादीनां भिदा तावन्न भ्रान्तैव प्रतीतितः ।
प्रतीत्या सत्यरूपैव व्यवहारे मुनीश्वराः ॥ ५२ ॥

ननु घटपटादिगतो भेदो भ्रान्तिसिद्धश्चेत्तर्हि तत्र प्रवर्तमानस्य पुरुषस्य व्यवहारे विसंवादः स्यात् । न हि भ्रान्तिसिद्धे शुक्तिरजतादौ प्रवृत्तो व्यवहारे संवाद्यत इत्यत आह—घटादीनामिति । घटादीनां परस्परं यो भेदः नासौ शुक्तिरूप्यादिवद्व्यवहारदशायां भ्रान्तः सति प्रमातर्यबाधितानुभवासिद्धत्वात् । शुक्तिरूप्यादिकं तु सत्येव प्रमातरि बाध्यत इति युक्तस्तत्र विसंवाद इत्यर्थः । सत्त्वं हि त्रिविधम् । प्रातीतिकं शुक्तिरूप्यादौ । व्यावहारिकं सत्त्वं घटपटादौ । सर्वदा बाधवैधुर्यलक्षणं पारमार्थिकं सत्त्वं ब्रह्मणः । तत्र पारमार्थिकसत्त्वाभावाभिप्रायेणानात्मप्रपञ्चभेदस्य भ्रान्तिसिद्धत्वमुक्तम् । व्यवहारतस्तु सत्यरूप एवेत्याह—प्रतीत्येति ॥ ५२ ॥

* अर्थपदमार्थिकामिति चिन्त्यम् ।

१ घ. °दान्तपा° । २ घ. विसंवाद्यत । ३ ग. संवाद ।

स्वरूपत्वेन वा विप्रा धर्मत्वेनैव वा भिदा ।
अपि वर्षशतेनापि वस्तुतो न निरूप्यते ॥ ५३ ॥

स च व्यावहारिको भेदो वस्तुरूपत्वेन ततोऽतिरिक्तधर्मत्वेन च वादिभिरङ्गीकृत इत्याह—स्वरूपत्वेनेति । तत्र तावत्प्राभाकरा घटात्पटो भिन्न इत्यत्र घटप्रतियोगिघटितं पटस्वरूपमेव भेदो न तत्तोऽतिरिक्त इत्यङ्गीकुर्वते । ततश्च स्वरूपस्यैव भेदत्वे तद्ग्रहणवद्भेदग्रहणस्यापि प्रतियोग्यनपेक्षत्वप्रसङ्ग इति । निर्विकल्पके वस्तुस्वरूपात्मना दृष्टस्य भेदस्य सविकल्पकव्यवहारे प्रतियोगिसापेक्षतोपपत्तेरयमनयोर्भेद इति प्रतिपत्तेर्वस्तुस्वरूपातिरिक्तो धर्म एव भेद इति वैशेषिकादयः । ननु व्यवहारादिसंवादाभावाद्भेदः सत्य एव चेत्कृतमद्वितीयत्ववार्तयेत्यत आह—अपि वर्षेति । भेदस्य यत्सत्यत्वं ब्रह्मण इव न तत्पारमार्थिकम् । वस्तुतो निरूपयितुमशक्यत्वात् । तथा हि—स्वरूपभेदपक्षस्तावन्न युज्यते । निर्विकल्पकवत्सविकल्पकेऽपि प्रतियोग्यनपेक्षत्वप्रसङ्गात् । न हि वस्तुस्वरूपग्रहणं प्रतियोगिग्रहणमपेक्षते । किंच प्रतियोगिघटितभेदस्य स्वरूपत्वे भेदविशेषणतया प्रतियोगिनोऽपि स्वरूपेऽन्तर्भावात्प्रपञ्चादात्मा भिन्न इत्यादावात्माद्वैतमापतेत् । किंच । विदारणात्मको भेदो वस्तुनः स्वरूपं चेद्भेदैकार्थसमवायिन एकत्वस्य विनाशात्स्वरूपभेदवादिनः किमप्येकं वस्तु न सिध्येत् । तदुक्तं चित्सुखाचार्यैः—

" सापेक्षत्वात्सावधेश्च तत्त्वे द्वैतप्रसङ्गतः ।
एकाभावादसंदेहान्न रूपं वस्तुनो भिदा " इति ॥ ५३ ॥

अन्यतोऽन्यस्य भेदः स्यान्नैकस्यैव सदा खलु ।
अन्यत्वं वस्तुनो भेदे सिद्धे सिध्यति यौक्तिकम् ॥ ५४ ॥

नाऽपि धर्मभेदपक्षो युक्त इत्याह—अन्यत इति । घटात्पटो भिन्नोऽयमनयोर्भेद इत्यादिविशिष्टज्ञानेनैव हि धर्मिप्रतियोगिघटितो भेदो गृह्यते । नैतद्युक्तं विकल्पासहत्वात् । तत्किं भेदमेव गोचरयेदुत वस्त्वपि । यदि वस्त्वपि तदाऽपि भेदपूर्वकं तद्गोचरयेत्तत्पूर्वकं वा भेदमाहोस्विद्युगपदेवोभयम् । नाऽऽद्यः । धर्मिप्रतियोगिवस्तुप्रतिपत्तिमन्तरेण भेदमात्रस्य प्रत्येतुमशक्यत्वात् । अत एव भेदपूर्वको वस्तुग्रह इत्यपि परास्तः । प्रथमतो धर्मिप्रतियोगिलक्षणं वस्तु गृहीत्वा पश्चाद्भेदं गृह्णातीति तृतीयोऽपि न युक्तः । शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वाद्विरम्यव्यापाराभावात् । नापि चतुर्थः । भेदज्ञानस्य धर्मि-

१ क. धर्मपक्षो ।

प्रतियोगिज्ञानं हि कारणम् । तस्य च नियतपूर्वक्षणसत्त्वनियमेन यौगपद्यायोगात् । किंचास्मादिदं भिन्नमिति भेदगोचरं विशिष्टज्ञानं विशेषणभूतधर्मिप्रतियोगिपुरःसरमेवेष्टव्यम् । दण्डी देवदत्त इत्यादेः सर्वस्यापि विशिष्टज्ञानस्य विशेषणविशेष्यतत्संबन्धिज्ञानपूर्वकत्वनियमात् । तदुक्तम्—

"विशेषणं विशेष्यं च संबन्धं लौकिकीं स्थितिम् ।
गृहीत्वा संकलय्यैतत्तथा प्रत्येति नान्यथा" इति ॥

किंच विशेषणविशेष्यभावश्च भिन्नयोरेव । न ह्येकं वस्तु स्वयमेव विशेषणं विशेष्यं च भवति । तथा च येन भेदेन तौ विशेषणभूतौ धर्मिप्रतियोगिनौ भिन्नौ स किमयमेव भेदो भेदान्तरं वा । अयमेव चेदात्माश्रयः । भेदान्तरमपि भिन्नयोरेव धर्मिप्रतियोगिनोरिति तस्यापि भेदपुरःसरत्वम् । स चेत्प्रथम एव तदाऽन्योन्याश्रयता । अथ तृतीयस्त्वन्यो भेदस्तदा चक्रकापत्तिः । यदि भेदव्यक्तिपरंपरा स्वीक्रियते तदाऽनन्तमस्यापि भेदस्यैवमेवेति तदसिद्ध्या मूलभूतभेदपर्यन्तमसिद्धेरनवस्था मूलक्षयकरी स्यात् । तदुक्तं चित्सुखाचार्यैः—

"युगपद्ग्रहणायोगादनवस्थाप्रसङ्गतः ।
परस्पराश्रयत्वाच्च धर्मभेदेऽपि नाक्षधीः" इति ।

एतत्सर्वमभिप्रेत्याऽऽह—अन्यतोऽन्यस्येति । अक्षरार्थस्त्वन्यस्मात्खल्वन्यस्य भेदो घटात्पटो भिन्न इत्यादिना निरूप्यते । न ह्येकस्यैव भेदो निरूपयितुं शक्यते भेदग्रहणस्य प्रतियोगिग्रहणपूर्वकत्वनियमात् । अन्यत्वं च भेदे सिद्धे सिध्यति । भेदश्च धर्मिप्रतियोगिनोरन्यत्वे सिद्धे* पश्चाद्भेदः सिध्यतीत्यात्माश्रयान्योन्याश्रयचक्रकाद्यापत्तिरित्यर्थः ॥ ५४ ॥

एकमेवाद्वितीयं सदित्याह श्रुतिरादरात् ।
मायामात्रमिदं द्वैतमिति चाऽऽह परा श्रुतिः ॥ ५५ ॥

इत्थं तर्कतो भेदं निरस्य तर्कानुग्राह्यं भेदाभावबोधकं प्रमाणमप्याह—एकमेवेत्यादिना । " सदेव सोम्येदमग्र आसीत् " इति । " एकमेवाद्वितीयम् " इति च्छान्दोग्योपनिषत् । तत्रैकमिति स्वगतभेदो निवार्यते । एकमखण्डैकरसमित्यर्थः । एवकारेण सजातीयभेदनिरासः । अद्वितीयमिति विजातीयभेदोऽपि निरस्यते । परमार्थतः सद्रूपस्य परशिवस्वरूपस्याद्वितीयत्वे प्रमाण-

* अत्र पश्चाद्भेद इत्यनपेक्षितम् ।

१ क. ग. °र्वलक्ष° । २ ख. घ. °बन्धज्ञा° । ३ क. ग. घ. च. °था चैतेन । ४ ग. °काप° । ५ ग. घ. °तीये प्र° ।

मुपन्यस्यानात्मनो भेदप्रपञ्चस्य मिथ्यात्वेऽपि श्रुतिः प्रमाणमित्याह—माया-मात्रमिति । "मायामात्रमिदं द्वैतमद्वैतं परमार्थतः" इति माण्डूक्योपनिषदि श्लोकरूपं वाक्यम् । अयमर्थः—यदिदं परागूपं दृश्यं जगत्तत्सर्वं मायामात्रं केवलं मायामयमेव । स्वप्रतिष्ठे ब्रह्मणि मायया परिकल्पितत्वात्, अधिष्ठान-याथात्म्यज्ञानेन मायायां निवर्तितायां तत्कार्यस्यापि निवृत्तेः परमार्थतोऽद्वि-तीयं ब्रह्म परिशिष्यत इत्यर्थः*॥ ५५ ॥

एकत्वं पश्यतो मोहः कः शोक इति चाऽऽह हि ।
द्वितीयाद्वै भयं नाल्पे सुखमित्यपि चाऽऽह हि ॥ ५६ ॥

एवं मायया स्वस्मिन्परिकल्पितस्य प्रपञ्चस्य मिथ्यात्वं निश्चित्य प्रत्यगा-त्मनः सर्वात्मकपराशिवस्वरूपज्ञाने यत्फलं तत्रापि श्रुतिं प्रमाणयति—एकत्वं पश्यत इति । वाजसनेयकमन्त्रोपनिषद्येवमाम्नायते—" यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति । अधि-ष्ठानब्रह्मयाथात्म्यज्ञानेनाविद्यातत्कार्यभूतप्रपञ्चस्य विलयान्निरतिशयानन्दब्र-ह्मात्मैक्यं साक्षात्कुर्वतो विदुषः शोकमोहयोः प्रसक्तिरपि नास्तीत्यर्थः। जगन्मि-थ्यात्वानङ्गीकारेणाऽऽत्मनः सद्वितीयत्वस्वीकारे श्रुतिरेव बाधं प्रतिपादयती-त्याह—द्वितीयादिति । "द्वितीयाद्वै भयं भवति" इति वाजसनेयकम् । द्वैता-ङ्गीकारे ह्यन्यस्मादन्यस्य भीरवश्यं स्यात् । अतो द्वैतमेव भयावहमित्यर्थः । तैत्तिरीयके च ब्रह्मात्मसाक्षात्कारस्याभयसाधनत्वं भेददर्शनस्य भयसाधनत्वं चाऽऽम्नायते—"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति " इति । एवं द्वैताङ्गीकारे श्रुत्यैवानिष्टापत्तिं दर्शयित्वेष्टहानिरपि श्रुत्यैव प्रतिपादितेति तामुदाहरति—नाल्पे सुखमिति । छान्दोग्योपनिषदि सप्तमेऽध्याये सनत्कुमारेण नारदायोपदिष्टं वाक्यम्—"भूमा त्वेव विजिज्ञासितव्यो यो वै भूमा तत्सुखं नाल्पे सुखमस्ति" इति । यदपरिच्छिन्नं पराशिवस्वरूपमद्वितीयं तदेव सुखं निरतिशयत्वात् । सार्वभौम-प्रभृतिब्रह्मलोकान्ते परिच्छिन्ने यत्सुखमुत्तरोत्तरशतगुणितमवस्थितं तस्य सातिशयत्वात्क्षयिष्णुत्वाच्च सुखत्वमेव नास्ति । अतो नित्यनिरतिशयसुखा-त्मको भूमैव ज्ञेय इत्यर्थः ॥ ५६ ॥

* अत्रार्थ इत्यधिकं पूर्वमयमर्थ इत्यस्य सत्त्वादेवमेवैतादृशस्थलेऽग्रेऽप्यूह्यम् ।

१ ग. परागर्थं । च प्राग्रूपं । २ क. °शेने भे° ।

अतस्तर्कप्रमाणाभ्यां वस्त्वेकत्वं सुनिश्चितम् ।
विदुषामनुभूत्या च वस्त्वेकत्वं सुनिश्चितम् ॥ ५७ ॥

इत्थं श्रुतिभिरात्मनस्तात्पर्येणाद्वितीयत्वप्रतिपादनात्पूर्वोक्ततर्कबलात्तदर्थान्यथात्वशङ्कया अप्यनुदयाद्द्वितीयं परशिवस्वरूपमुपनिषदेकवेद्यमिति सिद्धमित्युपसंहरति—अत इति ॥ ५७ ॥

वस्त्वेकत्वं महावाक्यादेव जानन्ति ये जनाः ।
ते मुच्यन्ते हि संसाराद्यथा स्वप्नप्रबोधनात् ॥ ५८ ॥

वस्त्वेकत्वमिति । यथा स्वप्नप्रपञ्चो बोधमात्रान्निवर्तते न त्वन्यत्कर्मापेक्षते, एवमेव वेदान्तमहावाक्यजनिताद्ब्रह्मात्मैक्यसाक्षात्कारज्ञानादेवाविद्याश्रयप्रपञ्चोऽनायासेनैव निवर्तत इत्यर्थः ॥ ५८ ॥

भेददर्शनमास्थाय मुक्तिं वाञ्छन्ति ये नराः ।
ते महाघोरसंसारे पतन्त्येव न संशयः ॥ ५९ ॥

प्रमाणतर्काभ्यां निर्णीतमभेदं परित्यज्य भेदमेव स्वीकुर्वतो बाधमाह—भेदेति । " मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति " इतिश्रुतेरित्यर्थः ॥ ५९ ॥

सर्वभूतेषु चाऽऽत्मानं सर्वभूतानि चाऽऽत्मनि ।
संपश्यन्नात्मयाजी स्यात्स्वाराज्यमधिगच्छति ॥ ६० ॥

प्रतीतः सर्वात्मानुभव एव ज्ञानयज्ञो न ततोऽतिरिक्तः कश्चिदित्याह—सर्वभूतेष्विति । श्रूयते हि—" यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति । सर्वभूतेषु चाऽऽत्मानं ततो न विजुगुप्सते " इति ॥ ६० ॥

सर्वभूतानि संपश्यन्नात्मन्येव मुनीश्वराः ।
संसारसागरादस्मादुत्तीर्णाः स्यान्न संशयः ॥ ६१ ॥

अथान्वयव्यतिरेकाभ्यामुक्तविज्ञानस्यैव मुक्तिसाधनत्वं कर्मणस्तदसाधकत्वं चाऽऽह—सर्वभूतानीत्यादिना । अध्यायशेषः स्पष्टः ॥ ६१ ॥

बहवोऽद्वैतविज्ञानाद्विमुक्ता भवबन्धनात् ।
अद्वैतज्ञानयज्ञेन न तुल्यो विद्यते क्वचित् ॥ ६२ ॥
द्वैतविज्ञानमासाद्य मुक्तिं वाञ्छन्ति ये नराः ।
ते महामोहसंसारसर्पदष्टा न संशयः ॥ ६३ ॥

---

१ ख. 'तीचः सार्वात्म्यानु' । क. ग. च. ङ. च. छ. 'तीत्स ।

आत्मयाथात्म्यविज्ञानयज्ञं मुक्त्वा नराधमाः ।
क्रियारूपेषु यज्ञेषु यतन्ते माययाऽऽवृताः ॥ ६४ ॥
ये लङ्घयन्ति संसारसमुद्रं कर्मयज्ञतः ।
ते महातमसा सर्वं पश्यन्त्येव रविं विना ॥ ६५ ॥
ज्ञानयज्ञोऽनुपैत्येव ब्राह्मणो वाऽन्त्यजोऽपि वा ।
संसारसागरं तीर्त्वा मुक्तिपारं हि गच्छति ॥ ६६ ॥
अहो माहेश्वरज्ञानं यज्ञवैभवमास्तिकाः ।
अविज्ञाय नरा लोके यतन्ते सारवर्जिते ॥ ६७ ॥
अपि देवा न जानन्ति ज्ञानयज्ञस्य वैभवम् ।
किं पुनर्मानवा विप्राः शिवो जानाति सर्ववित् ॥ ६८ ॥
सर्वधर्मसमोपेताः शिवभक्तिपरायणाः ।
प्रसादादेव रुद्रस्य जानन्ति ज्ञानवैभवम् ॥ ६९ ॥
प्रसादहीनैः पापिष्ठैर्मनुष्यैर्ब्राह्मणोत्तमाः ।
ज्ञानयज्ञः परिज्ञातुं न शक्यः सर्वसाधनैः ॥ ७० ॥
ज्ञानयज्ञैकनिष्ठानां नावाप्यं विद्यते क्वचित् ।
न हेयं विद्यते सर्वं ब्रह्मरूपेण भाति हि ॥ ७१ ॥
न मया शक्यते वक्तुं ज्ञानयज्ञस्य वैभवम् ।
मुनिभिश्च तथा देवैस्तथाऽन्यैरपि जन्तुभिः ॥ ७२ ॥
श्रुत्या शिवेन वा विप्रा ज्ञानयज्ञस्य वैभवम् ।
कथंचिच्छक्यते वक्तुं सत्यमेव न संशयः ॥ ७३ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
ज्ञानयज्ञविवरणं नाम दशमोऽध्यायः ॥ १० ॥

॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥
॥ ७१ ॥ ७२ ॥ ७३ ॥

इति श्रीसूतसंहिताटीकायां तात्पर्यदीपिकाख्यायां चतुर्थे यज्ञवैभवखण्डे ज्ञानयज्ञविवरणं नाम दशमोऽध्यायः ॥ १० ॥

अथैकादशोऽध्यायः ।

सूत उवाच—

भूयोऽपि ज्ञानयज्ञं तु प्रवक्ष्यामि समासतः ।
महाप्रीत्या मुनिश्रेष्ठाः शृणुताऽऽनन्दसिद्धये ॥ १ ॥

इत्थं प्रत्यगात्मनः परशिवस्वरूपत्वज्ञानमेव मुक्तिसाधनं तत्र वेदान्तवाक्यमेव प्रमाणं न तु मानान्तरमित्येतावत्प्रतिपादितम् । संसारित्वासंसारित्वादिविरुद्धस्वभावयोः कथमेकत्वं संगच्छत इति तत्प्रतिपादयितुमध्याय आरभ्यते— भूयोऽपीति ॥ १ ॥

धर्माधर्मास्तितावुद्धिर्येषामस्ति मुनीश्वराः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २ ॥
धर्माधर्मफलास्तित्वज्ञानं येषां हृदि स्थितम् ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ३ ॥
श्रुतिस्मृत्यादिविश्वासो येषामस्ति सदा हृदि ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ४ ॥
परलोकास्तित्वबुद्धिर्येषामस्ति मुनीश्वराः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ५ ॥
यमतार्किकरास्तित्वज्ञानं येषां हृदि स्थितम् ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ६ ॥

---

१ ध. °त्मकप° ।

भूतप्रेतादिसद्भावज्ञानं येषां हृदि स्थितम् ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ७ ॥
यक्षरक्षादिसद्भावो येषां भाति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ८ ॥
मुनीनामस्तिताबुद्धिर्येषामस्ति मुनीश्वराः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ९ ॥
इन्द्रादिदेवतास्तित्वं येषां चित्ते प्रकाशते ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १० ॥

तत्र प्रथमं पुरुषार्थसाधनं ब्रह्मात्मविज्ञानमास्तिक्ययुक्तस्यैवेति दर्शयति—धर्माधर्मास्तितेत्यादिना । व्यवहारतः सिद्धप्रमाणभावाच्छास्त्रान्तराद्धर्मादीनामस्तित्वज्ञानं येषामस्ति तेषां यथोक्तपरतत्त्वज्ञानात्परम्परया तत्साधनभूतविज्ञानसंपत्तिरस्त्येवेत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

ब्रह्मा विशिष्टो देवानामिति जानन्ति ये जनाः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ११ ॥
ब्रह्मणो विष्णुमुत्कृष्टं ये जानन्ति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १२ ॥
विष्णोर्विशिष्टं रुद्रं ये विजानन्ति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १३ ॥
रुद्रादीश्वरमुत्कृष्टं ये जानन्ति सुनिश्चितम् ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १४ ॥
ईश्वरादधिको भाति येषां चित्ते सदाशिवः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १५ ॥

अथ ब्रह्मादीनामप्युत्तरोत्तरसूक्ष्मत्वेनोत्कर्षप्रतिपादनद्वारा परशिवस्वरूपस्य निरतिशयोत्कर्षप्रतिपादनव्याजेन तत्पदार्थं शोधयति—ब्रह्मा विशिष्ट इति । पृथिव्यादीनि पञ्च भूतान्युत्तरोत्तरं कारणत्वेनोत्कृष्टानि तेषामधिपा ब्रह्मविष्णु-

रुद्रेश्वरसदाशिवाः पञ्चब्रह्ममूर्तयस्तेऽप्युत्तरोत्तरमुत्कृष्टा इत्यर्थः । पृथिव्यादीनां ब्रह्मादयोऽधिपतय इत्यागमैरुक्तम्—

"पृथिव्यंबनिलाकाशांस्तेषामप्यधिपाञ्जयेत् ।
ब्रह्माणं च हरिं रुद्रमीश्वरं च सदाशिवम्" इति ।

स्वयमपि पञ्चब्रह्माध्याये दर्शयिष्यति सदाशिवेश्वर इत्यादिना ॥ ११ ॥ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

सदाशिवादपि श्रेष्ठं ब्रह्माणं ये जना विदुः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १६ ॥
ब्रह्मणः परमं साक्षाद्विष्णुं जानन्ति ये जनाः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १७ ॥
विष्णोस्तु परमं साक्षाद्रुद्रं जानन्ति ये जनाः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १८ ॥

सदाशिवादपि श्रेष्ठमिति । आकाशाधिपात्सदाशिवादपि रजःसत्त्वतमोगुणोपाधिका महाभूतसृष्टिस्थितिसंहृतिव्यापारा ब्रह्मविष्णुरुद्रा उत्तरोत्तरं श्रेयांसः इत्यर्थः । पूर्वोक्तास्तु ब्रह्माद्या भौतिकसृष्ट्यादिहेतव इत्येषां भेदेनोपादानम् । एतदेव मूर्त्यष्टकं वायवीयसंहितायां नामाष्टकेनोपदिष्टम्—

"शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः ।
संसारवैद्यः सर्वज्ञः परमात्मेत्युदाहृतः" इति ॥

॥ १६ ॥ १७ ॥ १८ ॥

ईक्षितारं परं रुद्राये विजानन्ति मानवाः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ १९ ॥
ईक्षितुर्यं विजानन्ति सर्वज्ञं नितरां परम् ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २० ॥
कारणं ब्रह्म सर्वेषां विशिष्टमिति ये विदुः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २१ ॥
कारणत्वोपलक्ष्यं ये सर्वोत्कृष्टं शिवं विदुः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥२२॥

---

१ क. °प्युत्कृष्टा उत्तरोत्तरमित्य° । २ ग. °व्यम्बनि° ।

ईक्षितारमिति । तमोगुणोपाधिकाद्रुद्रादपि ततः प्रागवस्थं "स ईक्षत लोकान्नु सृजै" इतीक्षणोपाधिविशिष्टं परशिवचैतन्यं श्रेष्ठमित्यर्थः । ईक्षणं हीषद्रजःसंस्पृष्टसत्त्वपरिणामरूपं द्रष्टव्यपर्यालोचनम् । ततः प्राग्लीनं (लिकं) विशुद्धसत्त्वप्रधानमायोपाधिकं परशिवचैतन्यमेव सर्वज्ञः । स हिरण्यविष्ण्वाद्यपेक्षया नितरां परो जगदाकारेण विवर्तिष्यमाणमायाधिष्ठानत्वेन कारणं यत्स्वप्रतिष्ठं परशिवस्वरूपं प्रागुक्तानां ब्रह्मादीनां सर्वेषामपि कारणत्वाच्छ्रेष्ठमित्यर्थः । तस्यापि कारणत्वोपाधिविशिष्टात्ततोऽपि कारणत्वोपेक्षितं सच्चिदानन्दैकरसं यत्परशिवस्वरूपं तत्सोपाधिकात्सर्वस्मादप्युत्कृष्टमित्यर्थः ॥ १९ ॥ ॥ २० ॥ २१ ॥ २२ ॥

अस्ति जीवो न नास्तीति ये जानन्ति प्रमतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः २३ ॥

इत्थं सर्वोत्कृष्टप्रतिपादनव्याजेन "अस्थूलमनण्वह्रस्वमदीर्घमरूपमव्ययम्" इत्यादिश्रुतिभिः सर्वधर्मराहित्येनावगमितं निरुपाधिकं ब्रह्म "तत्त्वमसि" इति महावाक्ये तत्पदेन लक्ष्यं तदुत्पादितम् । अथ तल्लक्ष्यमपि स्वरूपं दर्शयति—अस्ति जीव इत्यादिना । नास्ति जीव इतिवादी हि प्रपञ्चवदात्मनोऽपि शून्यत्वं मन्यते । तस्याप्यात्मनानात्वेनागतप्रतीतिर्भ्रान्तिसिद्धेति मतम् । तथाच निरधिष्ठानभ्रमस्य निरवधिकत्वासंभवात्तदधिष्ठानावधित्वेन किंचित्तत्त्वमेष्टव्यम् । जगत्प्रतीतिबाधयोरात्मत्वेनावधित्वेन च यद्वस्तु परिशिष्यते तदस्माभिरात्मेत्युच्यते । अतो बाधान्यथानुपपत्त्या शून्यवादिनाऽप्यात्मास्तित्वमङ्गीकार्यमित्यर्थः ॥ २३

देहादन्यतया जीवं ये जानन्ति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २४ ॥

अस्तु नाम यः कश्चिज्जीवात्मा स तु देहातिरिक्त एव । अचेतनानामपि भूतानां देहाकारेण मेलनवशाच्चैतन्याभिव्यक्तिरिति विप्रतिपन्ना लोकायतिकास्तान्निराकरोति—देहादन्यतयेति । अयमभिप्रायः—सुखित्वदुःखित्वादिजगद्वैचित्र्यस्य पुण्यपापमूलत्वात्कर्तुर्देहातिरिक्तस्य स्वर्गनरकादिसंचारिणोऽनङ्गीकारे तदसंभवाद्भौतिकादृश्याद्देहादृष्टुर्जीवस्य व्यतिरेकावश्यंभावाद्देहातिरिक्तः परलोकभाक्कश्चिदात्मा विद्यत इति पत्तव्यम् । श्रुतिश्च—

१ क. घ. च. ज. °णं हि विशुद्धस° । २ क. ग. अस्ति । ३ क. ख. घ. च. छ. ज. °यतास्ता° ।

" अस्तीत्येवोपलब्धव्यः " इति तस्यास्तित्वं प्रतिपादयति । किंच जननमरणादियुक्तो देहः कथं तद्रहित आत्मा स्यात्तद्राहित्यं चाऽऽत्मनः श्रूयते— " न जायते म्रियते वा कदाचित् " " अजो नित्यः शाश्वतोऽयं पुराणः " इति । अत एव भगवान्बादरायणोऽपि "—एक आत्मनः शरीरे भावात् " इत्येकवचनेन देहातिरिक्तात्मसद्भावं प्रतिपादयामास ॥ २४ ॥

प्राणेभ्यस्तयाऽऽत्मानं ये जानन्ति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २५ ॥

प्राणादिति । प्राणापानादिपञ्चवृत्त्यात्मकस्य प्राणस्य सुषुप्तौ सद्भावेऽपि विशेषोपलब्ध्यभावात्तदतिरिक्त एवोपलब्धव्य इत्यर्थः ॥ २५ ॥

इन्द्रियेभ्यः परं जीवं ये जानन्ति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २६ ॥
मनसस्तयाऽऽत्मानं ये जानन्ति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २७ ॥

इन्द्रियेभ्य इत्यादि । चक्षुरादीनां करणत्वात्तत्प्रेरकः कर्ताऽन्य एवेत्यर्थः । ॥ २६ ॥ २७ ॥

क्षणप्रध्वंसिनो विज्ञानादात्मानं ये परं विदुः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २८ ॥
बुद्ध्यहंकारचित्तेभ्यो जीवं ये विदुरास्तिकाः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ २९ ॥
चित्तादन्यतयाऽऽत्मानं ये जानन्ति प्रमाणतः ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ३० ॥

बुद्ध्यहंकारादीनामपि करणत्वादेव नाऽऽत्मत्वमित्याह—क्षणप्रध्वंसीत्यादिना । आत्मस्वरूपभूतज्ञानाद्व्यावर्तयितुं क्षणप्रध्वंसीति विशेषणम् । अत्र विज्ञायतेऽनेनेति करणव्युत्पत्त्या निश्चयरूपा मनोवृत्तिः क्षणप्रध्वंसिनी विज्ञानशब्दार्थः । आत्मविषयवृत्तिविविक्ता मनोवृत्तिरहंकारतन्मूलत्वात्संसारानर्थस्य

१ क. ग. ङ. च. छ. ज. विपश्चित् ॥

तस्य दुःखरूपत्वम्। संशयितमर्थं निश्चेतुं तल्लीना या मनोवृत्तिस्तच्चित्तम्। एतच्च संकल्पविकल्पात्मकस्य मनसोऽप्युपलक्षणम् ॥ २८ ॥ २९ ॥ ३० ॥

सर्वप्रत्ययिनो जीवं विभक्तं ये विदुर्बुधाः।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ३१ ॥

सर्वप्रत्ययिन इति। बुद्ध्यहंकाराद्याः कामसंकल्पाद्याश्च प्रत्यया वृत्तयो यस्मिन्नन्तःकरणे तत्सर्वप्रत्ययीत्यर्थः। अन्तःकरणचतुष्टयस्वरूपमुक्तं प्रपञ्चसारे—

"परेण धाम्ना समनुप्रबुद्धा मनस्तदा सा च महानुभावा।
यदा तु संकल्पविकल्पकृत्या यदा पुनर्निश्चिनुते तदा सा ॥
स्याद्बुद्धिसंज्ञा च यदा प्रवेत्ति ज्ञातारमात्मानमहंकृतिः स्यात्।
तदा यदा सा त्वभिलीयते तच्चित्तं च निर्धारितमर्थमेषा" इति ॥३१॥

जाग्रत्स्वप्नसुषुप्त्याख्यं वेद धामत्रयं तु यः।
स एवाऽऽत्मा न तद्दृश्यं दृश्यं तस्मिन्प्रकल्पितम् ॥ ३२ ॥

जाग्रदिति। एवं देहादिव्यतिरिक्तो यश्चिदात्मा जाग्रत्स्वप्नसुषुप्त्याख्यान्स्थानविशेषान्साक्षितया जानाति स एवाऽऽत्मा। तस्य च जाग्रदादिस्थानविशेषसाक्षित्वमेवाऽऽम्नायते—सोऽयमात्मा चतुष्पाज्जागरितस्थानो बहिः प्र(ष्प)ज्ञः स्वप्नस्थानोऽन्तःप्रज्ञः सुषुप्तिस्थान एकीभूत इति। तस्य प्रतिपादकोऽयं श्लोक आचार्यकृतः—

"त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते" इति ॥

ननु तस्याऽऽत्मनः सद्भावे प्रमाणमस्ति न वा न चेच्छशविषाणतुल्यता। अस्ति चेद्विषयत्वाद्घटादिवद्दृश्यत्वापत्तिरित्यत आह—न तद्दृश्यमिति। उपनिषद्वाक्यजनितमनोवृत्तिविषयत्वेन वृत्तिव्याप्यत्वे सत्यपि स्वयंप्रकाशस्य साक्षिचैतन्यस्य फलव्याप्यत्वाभावान्न घटादिवद्दृश्यत्वमित्यर्थः। जगत्तु तत्स्वरूपे मायया परिकल्पितत्वादधिष्ठानप्रकाशेनैव प्रकाशत इति फलव्याप्यत्वस्यापि सद्भावाद्दृशा व्याप्यं दृश्यमिति व्युत्पत्त्या दृश्यं भवेदित्यर्थः ॥ ३२ ॥

---

१ घ. °त्ययनो जी°। २ च. यस्य स्व°। ३ क. ग. च. तस्यायं प्र°। ४ ग. तस्यापि प्र°। ४ ख. चेत्तद्दि°। ५ च. °प्रकाश्यत।

त्रिधामसाक्षिणं सत्यज्ञानानन्दादिलक्षणम् ।
त्वमहंशब्दलक्ष्यार्थमसक्तं सर्वदोषतः ॥ ३३ ॥

त्रिधामसाक्षिणमिति । साक्षिचैतन्यस्यापि सत्यादिस्वरूपत्वमात्ममन्त्रार्थकथनप्रस्तावे "अहं चाव्यभिचारित्वात्तत्सद्भावान्न संशयः" इत्यादिना सम्यङ्निरूपितम् । ईदृग्विधं यच्चैतन्यं तदेव महावाक्येषु " तत्त्वमसि " " अहं ब्रह्मास्मि " इत्यादावन्तःकरणादिविशिष्टं चैतन्यवाचकैस्त्वहमादिपदैर्लक्ष्यं वाच्यस्यार्थस्य वाक्यार्थत्वानुपपत्तेः । उक्तं हि—

"वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः ।
तत्संबन्धवशात्प्राप्तादन्वयाल्लक्षणोच्यते" इति ॥

तच्च सर्वेष्वपि दोषेषु न सक्तम् । "असङ्गो न हि सज्जते" इति श्रुतेः ॥३३॥

ज्ञाताज्ञातद्वयादन्यं ज्ञाताज्ञातस्य भासकम् ।
प्रमाणभ्रान्तिवृत्तीनामगम्यं तत्प्रकाशकम् ॥ ३४ ॥

ज्ञाताज्ञातेति । ज्ञातमन्तःकरणवृत्त्या विषयीकृतम् । अज्ञातं भावरूपाज्ञानेन क्रोडीकृतम् । तदुभयस्माद्विलक्षणम् । परमार्थतो निरविद्यस्य निरुपाधिकस्य स्वप्रकाशस्य तदुभयविषयत्वासंभवात् । अत एवमाम्नायते तलवकारोपनिषदि—"अन्यदेव तद्विदितादथो अविदितादधि" इति । स्वप्रकाशचिदात्मकत्वादेव तस्य ज्ञाताज्ञातद्वयस्य भासकम् । उक्तं हि—"सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एव " इति । प्रमाणभ्रान्तीति । केनचिदुपहितस्यैवाऽऽत्मस्वरूपस्य प्रमाणविषयत्वान्निरुपाधिकस्य तदविषयत्वम् । "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा" इति श्रुतेः । प्रत्युत तत्प्रकाशकं तासां प्रमाणादिवृत्तीनां साक्षित्वेन भासकम् । तदुक्तम्—"अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः" इति ॥ ३४ ॥

स्वयंभातं निराधारं ये जानन्ति सुनिश्चितम् ।
तेऽपि विज्ञानसंपन्ना इति मे निश्चिता मतिः ॥ ३५ ॥

स्वयंभातमिति । "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतेः । स्वयंप्रकाशमानमित्यर्थः । निराधारमाधाररहितम् । "स भगवः कस्मि-

१ घ. सत्यं सत्यज्ञानादि° । २ क. °त्वात्तत्सद्भावो न सं° । ख. त्वात्तत्स भावो न सं° । ग. ङ. च. °त्वात्सद्भावो न सं° । ३ घ. ङ. °वस्वरूपा° । ४ ग. ङ. निरवद्यस्य । ५ क. स्वयं भान्तं । ६ च. °के नो° ।

न्प्रतिष्ठित इति स्वे महिम्नि प्रतिष्ठितः" इति श्रुतेः । एवं सम्यङ्निश्चितं देहान्तर्वर्तिनमात्मानं ये जानन्ति तेऽपीत्यादि पूर्ववत् ॥ ३५ ॥

उक्तलक्षणमात्मानमुक्तलक्षणमीश्वरम् ।
एकं पश्यन्ति ये विप्रास्तर्कतश्च प्रमाणतः ॥ ३६ ॥
तथा स्वानुभवेनैव गुरूक्त्या च प्रसादतः ।
त एव ज्ञानसंपन्नास्त्रिर्वः शपथयाम्यहम् ॥ ३७ ॥
अतिरहस्यमिदं कथितं मया
गुरुपरम्परया च समागतम् ।
श्रुतिभिरीरितमात्मविशुद्धये
न पठितव्यमसज्जनसंसदि ॥ ३८ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे ज्ञानयज्ञविरोधो नामैकादशोऽध्यायः ॥ ११ ॥

इत्थं शोधितौ तत्त्वंपदार्थौ दर्शयित्वा तयोरैक्यं वेदान्तमहावाक्यैः प्रमाणैस्तदनुकूलैस्तर्कैश्चावगन्तव्यमित्याह—उक्तलक्षणमिति । सुगममन्यत् ॥ ३६ ॥ ॥ ३७ ॥ ३८ ॥

इति श्रीसूतसंहिताटीकायां तात्पर्यदीपिकाख्यायां चतुर्थे यज्ञवैभवखण्ड एकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः ।

सूत उवाच—

भूयोऽपि ज्ञानयज्ञं तु प्रवक्ष्यामि समासतः ।
मुनयः परया भक्त्या शृणुतातीव शोभनम् ॥ १ ॥

पूर्वस्मिन्नध्याये दृश्यं तस्मिन्प्रकल्पितमिति दृश्यप्रपञ्चस्य यत्कल्पितत्वेन मिथ्यात्वं सूचितं तदिदानीमद्वितीये परमशिवस्वरूपे प्रपञ्चस्याध्यारोपापवादाभ्यां प्रतिपादयितुमुपक्रमते—भूयोऽपीति ॥ १ ॥

ब्रह्म सत्यपरानन्दप्रकाशानन्तलक्षणम् ।
अप्रच्युतात्मभावेन संस्थितं सर्वदैव तु ॥ २ ॥

अधिष्ठानभूतस्य ब्रह्मणस्तावन्निरुपाधिकं रूपमाह—ब्रह्मेति। "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" इति श्रुतेः। अखण्डैकरसस्य ब्रह्मणः सत्यादिपदान्यनृतजडदुःखान्तवस्त्वनिरासेन लक्षकाणीति प्राक्प्रतिपादितम्। अप्रच्युतात्मभावेनेति। अपरिप्लुतप्रत्यगात्मत्वेनेत्यर्थः। अनेन च ब्रह्मणोऽनात्मत्वनिरासः। सर्वदैव त्विति। न केवलं तत्त्वज्ञानादूर्ध्वमेव ब्रह्मण आत्मभावः किंतु ततः प्रागपीत्यर्थः॥ २॥

आत्मशक्तिसमायोगादनाद्यन्तादतर्कितात्।
अप्रतीतमिवाऽऽभाति स्वयंभातमपि द्विजाः॥ ३॥
सदप्यसदिव प्राज्ञः सदैकमपि भिन्नवत्।
तादृशाकारमापन्नः संसारीवावभासते॥ ४॥

ननु सितभास्वराकारेण सामान्यतो ज्ञातं नीलपृष्ठत्रिकोणत्वादिविशेषाकारेणाज्ञातं वस्तु रजताद्यारोप्यस्याधिष्ठानत्वेन दृष्टम्। ब्रह्म तु स्वप्रकाशत्वेन सर्वात्मना भातमिति कथं तस्याधिष्ठानत्वमित्यत आह—आत्मशक्तीति। आत्मनः शक्तिः स्वमिश्चैतन्यमात्र आश्रिता माया न तु सांख्याभिमतप्रकृतिवत्स्वतन्त्रेत्यर्थः। अनाद्यन्तादिति। तथाविधमायाया आत्मनश्चानादित्वात्तदुभयाश्रितसंबन्धोऽप्यनादिः। तत्त्वज्ञानव्यतिरेकेण मायाया अप्यन्तवत्त्वराहित्यात्तत्संबन्धोऽनन्तश्च। कथमीदृङ्माया तत्संबन्धश्च कथं स्वप्रकाशे परशिवस्वरूपे संभवतीति तत्राऽऽह—अतर्कितादिति। विचारासहादित्यर्थः। तथाविधमायासंबन्धवशात्स्वप्रकाशमपि तद्ब्रह्माभातमिव भवति। आवरणशक्त्याऽऽवृतत्वात्। अत एव सद्रूपमप्यविद्यमानमिव भवत्यद्वितीयमपि नानाविधोपाधिसंबन्धवशान्नानाकारवद्भवति। स्वतोऽसंसारित्वेऽपि तत्तदन्तःकरणतादात्म्याध्यासात्तादृक्त्वमापन्नं चिन्मात्रं संसारीव भवति। अत उक्तं हि वार्तिककारैः—

"अक्षमा भवतः केयं साधकत्वप्रकल्पने।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्" इति॥ ३॥ ४॥

ब्रह्मणोऽभिन्नरूपे तु चेतनाचेतनात्मकः।
विभागः कल्पितः शक्त्या न स्वतः पण्डितोत्तमाः॥ ५॥

एवं च स्वप्रकाशेऽपि तस्मिन्मायाशक्तिवशात्सर्वमपि संभावयितुं शक्यमिति तस्याधिष्ठानत्वसंभवं प्रतिपाद्य चेतनाचेतनात्मकं द्विविधं जगदारोपयितुं

तस्याधिष्ठानस्य मायावशाद्वैविध्यमाह—ब्रह्मण इति । अभिन्नेऽखण्ड एव ब्रह्मणो रूपे मायाशक्त्या सत्त्वगुणोपधानेन रजस्तमोगुणोपधानेन च चेतनाचेतनात्मकं भागद्वयं परिकल्पितं न स्वत इति । यत एतन्मायया एवातो न स्वाभाविक इत्यर्थः ॥ ५ ॥

ब्रह्मणश्चेतनाकारे कल्पिता चेतनादिदा ।
सर्वज्ञत्वादिका स्तम्बपर्यन्ता मायया एव तु ॥ ६ ॥
उत्कर्षश्चापकर्षश्च मायया तेषु कल्पितः ।
नियन्तृत्वनियम्यत्वाद्याकाराश्च प्रकल्पिताः ॥ ७ ॥
ब्रह्मणोऽचेतनाकारे महामायाबलेन तु ।
महदादिजगच्छून्यपर्यन्तं परिकल्पितम् ॥ ८ ॥
उत्कर्षश्चापकर्षश्च जगत्यपि मुनीश्वराः ।
कल्पितः सर्वोद्रिक्तं[1] व्यवहारे तु मायया ॥ ९ ॥

अथैतयोर्ब्रह्माकारयोः क्व क्व कस्य परिकल्पनमिति तदुभयं विभज्य दर्शयति—ब्रह्मणश्चेतनाकार इत्यादिना । सत्त्वगुणस्य प्रकाशात्मकत्वात्तदुपाधिक आकारश्चेतनाकारो रजस्तमसोस्तद्विपरीतत्वात्तदुपाधिक आकारोऽचेतनाकारः। तत्र चेतनाकारे विशुद्धसत्त्वप्रधानमायोपाधिकमीश्वरं सर्वज्ञमारभ्य स्तम्बपर्यन्तो भोक्तृप्रपञ्चो मायया परिकल्पितः । तत्र भोक्तृषु कर्मवशात्सुखित्वदुःखित्वादितारतम्यमीश्वरस्य च तेषां च नियन्तृत्वनियम्यत्वादयश्च धर्माः । एतत्सर्वं मायया एव प्रकल्पितमित्यर्थः । अचेतनाकारे तु वियदादिभूतभौतिकं जगदभावपर्यन्तं भोग्यरूपं परिकल्पितम् । उक्तं हि—

" तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनाम् ॥
परः कारणतामेति भावनाज्ञानकर्मभिः " इति ।

जगत्यपीति । यथा भोक्तृप्रपञ्चे तद्वज्जडप्रपञ्चेऽप्युत्कर्षापकर्षादिकं सर्वं व्यवहारविषये मायया परिकल्पितमित्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

वर्णाश्रमास्तथा[2] विप्रा वर्णसांकर्यमेव च ।
तद्धर्माश्च विभागेन मायया एव प्रकल्पिताः ॥ १० ॥

एवं प्रपञ्चान्तर्गतानां वर्णाश्रमादीनामपि मायया परिकल्पितत्वेन मिथ्यात्वं

---

१ क °तोरिक्तं । २ क. ग. वर्णास्तथाऽऽश्रमा विप्रा ।

साधयति—वर्णाश्रमास्तथेत्यादिना । तद्धर्मा इति वर्णधर्मा आश्रमधर्माश्चेत्यर्थः ॥ १० ॥

नियोज्यत्वं च कर्तृत्वं भोक्तृत्वं च तथैव च ।
वर्णाश्रमादिनिष्ठानां माययैव प्रकल्पितम् ॥ ११ ॥
विधयश्च निषेधाश्च श्रुतिस्मृत्यादिरूपिणः ।
मायया देवदेवस्य सत्यवत्परिकल्पिताः ॥ १२ ॥
धर्माधर्मौ तयोर्विप्राः फले तत्साधनान्यपि ।
कल्पितानि महामोहाद्ब्रह्मणो न स्वभावतः ॥ १३ ॥
रागद्वेषादयो दोषाः शान्तिदान्त्यादयो गुणाः ।
अपि माहेश्वरं ज्ञानं मायया प्रकल्पितम् ॥ १४ ॥

नियोज्यत्वं चेति । " दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत " इतिवाक्यश्रवणसमनन्तरमधिकारिणः पुरुषस्य मयेदं कर्तव्यमिति यन्नियोगबोद्धृत्वं तन्नियोज्यत्वम् । तदुक्तं शालिकानाथेन—

" नियोज्यः स च कार्य यः स्वकीयत्वेन बुध्यते " इति ।

गुरुमतेऽप्यपूर्वं लिङ्ङर्थः । तदेव कृत्युद्देश्यत्वे सति कृतिसाध्यत्वात्कार्यं स्वात्मनि पुरुषस्य नियोजनान्नियोग इति च व्यपदिश्यते ।

" कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते ।
कार्यत्वेन नियोज्यं यः स्वात्मनि प्रेरयन्नसौ ॥
नियोग इति मीमांसानिष्णातैरभिधीयते " ।

इति शालिकानाथेनोक्तत्वात् । कर्तृत्वं तु विषयाकारभावापन्नस्य यागादेः स्य निष्पादनद्वाराऽपूर्वनिर्वर्तकत्वम् । तज्जन्यफलभागित्वं भोक्तृत्वम् । पि माहेश्वरमिति । महेश्वरो विशुद्धसत्त्वप्रधानमायोपाधिकः सर्वज्ञस्तस्य यत्सर्वगोचरं निरतिशयं ज्ञानं तदपि मायया परिकल्पितं सत्त्वपरिणामित्वादित्यर्थः । अथवा महेश्वरो निरुपाधिकः परशिवस्तद्विषयं वेदान्तमहावाक्यजनितं यद्वृत्तिज्ञानं तदपि मायया परिकल्पितं तद्धि परिकल्पितमपि स्वविषयावरणाविद्यां निवर्तयत्स्वयमपि कतकरजोन्यायेन निवर्तते ॥ ११ ॥ १२ ॥ ॥ १३ ॥ १४ ॥

वैदिकास्तान्त्रिका मार्गा अपभ्रंशास्तथैव च ।
स्वतन्त्रस्यास्मिकाकर्तुर्मायया प्रकल्पिताः ॥ १५ ॥

अपभ्रंशाः कापालादयः ॥ १५ ॥

यद्यदस्तितया भाति यद्यन्नास्तितया तथा ।
तत्तत्सर्वं महादेवमायया परिकल्पितम् ॥ १६ ॥

यद्यदस्तीति । अवशिष्टं भावाभावात्मकं सर्वं जगदपि परशिवस्वरूपे माययैव परिकल्पितं न तु पारमार्थिकं सदित्यर्थः ॥ १६ ॥

चेतनाचेतनाकारौ ब्रह्मणो यौ प्रकल्पितौ ।
तौ शिवादन्यतो न स्तः सम्यगर्थनिरूपणे ॥ १७ ॥
सर्वज्ञत्वादिका भेदाः स्तम्बान्ता ये प्रकल्पिताः ।
ते शिवादन्यतो नित्यं न सन्त्येव निरूपणे ॥ १८ ॥

इत्थमद्वितीये परशिवस्वरूपे मायावशाच्चेतनाचेतनात्मकस्य प्रपञ्चस्य परिकल्पितत्वोक्तेः परशिवस्वरूपव्यतिरिक्ते कारणे तत्सत्ता निरस्ता । तत्रापि परिकल्पितत्वाभिधानाच्छुक्तिरूप्यादिवदपारमार्थिकत्वमप्युक्तम् । अथ त्ववाधितव्यवहारविषयत्वात्तस्य मायाकल्पितत्वमसिद्धमित्याशङ्क्याधिष्ठानपरशिवस्वरूपयाथात्म्यज्ञानोत्तरकालं बाधदर्शनसाम्येन शुक्तिरूप्यादिवत्तस्यापि मायापरिकल्पितत्वमारोपक्रमेणैव समर्थयते—चेतनाचेतनेत्यादिना । सम्यगर्थनिरूपण इति । परमार्थपर्यालोचनायाम् " एकमेवाद्वितीयम् " " मायामात्रमिदं द्वैतम् " " नेह नानाऽस्ति किंचन " इत्यादिश्रु[illegible] तदधिष्ठानपरशिवस्वरूपस्याद्वितीयत्वेऽवगते तत्र चेतनाचेतनविभागो मायापरि[illegible]स्य मृषात्वो न [illegible]कुतो जगत्पादन्यत्वेन युक्त इत्यर्थः । एवं सर्वज्ञत्वादिका [illegible] तत्पारशिवस्वरूपान्यतया पारमार्थिकसत्त्वायोगात्सर्वज्ञत्वादिकम[illegible]नात्मकं जगत्तत्स्वरूपे मायया परिकल्पितमेवेत्यर्थः ॥ १७ ॥ १८

उत्कर्षश्चापकर्षश्च यस्तेषु परिकल्पितः ।
सोऽपि नैवास्ति भेदेन शिवात्सम्यङ्निरूपणे ॥ १९ ॥
ब्रह्मणोऽचेतनाकारे कल्पितं यज्जगद्बुधाः ।
तच्च नैवास्ति भेदेन शिवात्सम्यङ्निरूपणे ॥ २० ॥
उत्कर्षश्चापकर्षश्च यो जगत्यपि कल्पितः ।
सोऽपि नैवास्ति भेदेन शिवात्सम्यङ्निरूपणे ॥ २१ ॥

१ ङ. प्रकीर्तिताः ।

वर्णाश्रमादयो भावा मायया ये प्रकल्पिताः ।
तेऽपि शंभोर्न भेदेन सन्ति सम्यङ्निरूपणे ॥ २२ ॥
नियोज्यत्वादयो भावा मायया ये प्रकल्पिताः ।
तेऽपि शंभोर्न भेदेन सन्ति सम्यङ्निरूपणे ॥ २३ ॥
विधयश्च निषेधाश्च मायया ये प्रकल्पिताः ।
तेऽपि शंभोर्न भेदेन सन्ति सम्यङ्निरूपणे ॥ २४ ॥
धर्माधर्मादिरूपेण मायया ये प्रकल्पिताः ।
तेऽपि शंभोर्न भेदेन सन्ति सम्यङ्निरूपणे ॥ २५ ॥
रागद्वेषादिरूपाश्च मायया ये प्रकल्पिताः ।
तेऽपि शंभोर्न भेदेन सन्ति सम्यङ्निरूपणे ॥ २६ ॥
वैदिकास्तान्त्रिका मार्गा अपभ्रंशाश्च ये द्विजाः ।
तेऽपि शंभोर्न भेदेन सन्ति सम्यङ्निरूपणे ॥ २७ ॥
यद्यदस्तितया यद्यन्नास्तितया वस्तु मुनीश्वराः ।
तत्तच्छंभोर्न भेदेन विद्यते सूक्ष्मदर्शने ॥ २८ ॥

स्कन्दपु० ॥ १९ ॥ २० ॥ २१ नार्द० २ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

अथ
मुनेऽनियंक्षेपमिमं शृणुष्व
जगत्समस्तं चिदचित्प्रभिन्नम् ।
स्वशक्तिकल्पं शिवमात्रमेव
न देवदेवात्पृथगस्ति किंचित् ॥ २९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे षड(सड)क्षरविवरणं नाम द्वादशोऽध्यायः ॥ १२ ॥

एवं पारमार्थिकसत्त्वस्यापवादेन प्रपञ्चस्य मायामयत्वसिद्धेर्मिथ्यात्वं सिद्धमतः परशिवस्वरूपादन्यन्नास्तीत्यद्वितीयत्वं सिद्धमित्युपसंहरति—अतश्चेति । स्वस्मिन्नाश्रिता माया स्वशक्तिः ॥ २९ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे
ज्ञानयज्ञविशेषो नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ।

सूत उवाच—

भूयोऽपि ज्ञानयज्ञं तु प्रवक्ष्यामि समासतः ।
गुह्याद्गुह्यतमं सूक्ष्मं शृणुत श्रद्धया द्विजाः ॥ १ ॥

एवं मायातत्कार्यरूपप्रपञ्चस्य ज्ञाननिवर्त्यत्वेन मिथ्यात्वं प्रसाध्य संविद्रूपायाः परशक्तेरपि परशिवादन्यत्वशङ्क्या प्रसक्तं मिथ्यात्वं निरूपयितुमुपक्रमते—भूयोऽपीति ॥ १ ॥

चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः ।
अनुप्रविष्टा या संविन्निर्विकल्पा स्वयंप्रभा ॥ २ ॥

मायैवास्य परा शक्तिरिति भ्रमं व्युदासितुं परस्याः शक्तेः स्वरूपं दर्शयति—चिन्मात्रेत्यादिना । भोक्तृभोग्यात्मकस्य प्रपञ्चस्य सनियन्तृकस्य सृष्टेः माक्प्रलीनावस्थायां विकल्पहेतूनामभावात्परशिवस्वरूपमत्यन्तं निर्विकल्पकं स्वप्रतिष्ठं[1] भवति तत्स्वरूपेऽध्यस्ता मायाऽपि विकल्परहितैवावातिष्ठते । सा च प्राणिकर्मपरिपाकवशादीषद्विकल्पिता सती शिवशक्तिविभागस्यापि तदानीमभावात्तदुभयसाधारणं चिन्मात्रमेवाऽऽश्रयतया स्वी करोति । चिन्मात्ररूपः परशिवोऽपि तत्संबन्धवशात्किंचित्स्वप्रतिष्ठतां[2] विहाय तदभिमुखो भवति । नन्वसङ्गोदासीनस्य परानन्दस्वरूपस्याविक्रियस्य परशिवस्य मायावष्टम्भेन कुतो जगत्सृष्ट्यादिहेतुत्वं प्राणिकर्मणां परिपाकवशादिति चेन्न । तस्य स्वतन्त्रस्य तत्पारतन्त्र्यायोगात् । स्वभोगार्थमित्यपि न युज्यते । तस्याऽऽप्तकामत्वात् । न च लीलार्थमित्यपि युक्तम् । तथात्वे गिरिनदीसमुद्रादिवैचित्र्यस्य सुखित्वादिवैचित्र्यस्य च प्रतिनियमायोगात् । नैष दोषः । प्रतिनियमस्य परिपक्वप्राणिकर्मतारतम्यहेतुत्वात् । न चैतावता परशिवस्य कर्मपारतन्त्र्यापत्तिः । स्वसंकल्पनिमित्तत्वात् । जगत्सृष्ट्यादिलीलोपक्रमावसरे निर्हेतुकार्योत्पत्तिरतिप्रसङ्ग[3]हेतुरिति पुण्यपापादीनां सुखदुःखादिहेतुत्वं तदुपभोगहेतुत्वेन प्रतिनियतप्रपञ्चनिर्माणं च संकल्प्य परशिवः स्वमायावशाल्लीलायां प्रवर्तते[4] । तस्य च स्वसंकल्पस्य सत्यत्वाविघाताय सर्वेष्वपि ब्रह्मकल्पेषु समानाकारा एव सृष्ट्यादिलीलाः करोति । अतो जगद्वैचित्र्यनिमित्तस्य पुण्यपापादेरपि स्वसंकल्पहेतुत्वाज्जग-

---

१ घ. °तिष्ठितं भ° । २ क. घ. ज. °तिष्ठितं वि° । ३ च. °सङ्गे हे° । ४ ख. ङ. प्रवर्तते ।

त्सर्गादिलीलायां प्रवृत्तस्य परशिवस्य न स्वातन्त्र्यभङ्गः । अत एव भगवान्बादरायणः परमेश्वरस्य सृष्ट्यादिप्रवृत्तौ राजादिवत्केवलं लीलैव कारणमिति सूत्रयामास—"लोकवत्तु लीलाकैवल्यम्" इति । तथा च शिवशक्त्युभयरूपसाधारणं चिन्मात्रमाश्रिता सा माया पुनर्द्विधा भवति । शक्यप्रतियोग्यनधीननिरूपणविषयत्वाकारेण तदधीननिरूपणविषयत्वाकारेण च । एवमुपाधिद्वैविध्यादुपधेयचिन्मात्रमपि द्विधा भिद्यते । तत्र शक्यप्रतियोग्यधीननिरूपणा माया सा शक्तिः सलिलपवनादिसमायोगपरवशादुच्छूनावस्थस्य बीजस्य यथाऽङ्कुरावस्था तथैव प्राणिकर्मपरिपाकवशादुपचितरूपाया मायाया जगत्कार्यहेतुभूताङ्कुरावस्था सेत्यर्थः । शक्यप्रतियोग्यनधीननिरूपणो यो मायाया आकारस्तदुपहितं चैतन्यं शिवः । जगदङ्कुररूपिण्या शक्त्या यदवच्छिन्नं चैतन्यं तस्य या संविद्रूपिणी सा परा शक्तिरित्युच्यते । अतश्चोपाधिपरिच्छेदादेवैकस्यैव चिन्मात्रस्य शिवशक्त्यात्मना विभागः । परमार्थतस्तु चिन्मात्रतयैकत्वमेवेत्यर्थः । तदुक्तमागमिकैः—

" चिदचिदनुग्रहहेतोरस्य सिसृक्षोर्य आद्य उन्मेषः ।
तच्छक्तित्वमभिहितमविभागापन्नमस्यैव " ॥ इति ।

तदिदमुच्यते—" चिन्मात्राश्रयमायायाः शक्त्याकारेऽनुप्रविष्टा " इति । शिवमाहात्म्यखण्डे तच्छक्तिपूजाविधौ विस्तरेण प्रपञ्चितम् । यतः परशिवस्वरूपमेव शक्यप्रतियोगिनिरूपणोपाध्यवच्छिन्नतया परा शक्तिस्तस्मात्साऽपि सच्चिदानन्दादिरूपैवेत्याह—निर्विकल्पेत्यादिना । विकल्पहेतुविशेषाणां निर्विशेषे वस्तुनि स्वभावतो विरहान्निर्विकल्पा । स्वयंप्रभाऽपराधीनप्रकाशा सच्चिदानन्दाखण्डैकरसेत्यर्थः ॥ २ ॥

सदाकारा परानन्दा संसारोच्छेदकारिणी ।
सा शिवा परमा देवी शिवाभिन्ना शिवंकरी ॥ ३ ॥

संसारोच्छेदकारिणीति । संसारस्योच्छेद उन्मूलनं तद्धेतुभूता । परमेश्वरः स्वशक्तिवशात्खलु मुमुक्षून्संसारान्मोचयति " शक्तो यया स शंभुर्भुक्तौ मुक्तौ च पशुगणस्यास्य " इत्युक्तत्वात् । यद्वा ब्रह्माकारमनोवृत्त्यवच्छिन्नैव संवित्संसारनिवर्तिकेत्यर्थः । एवंगुणविशिष्टा संवित्सैव शिवंकरी सर्वप्राणिनां सुखकारिणी । अत एव शिवा शिवशब्दाभिधेया । वक्ष्यमाणानां शक्तीनामुपादानभूतत्वात्परमा सर्वोत्कृष्टा । देवी शक्यप्रपञ्चस्येश्वरी । शिवाभिन्नेति । अस्याः शिवस्य च

१ घ. °तदुशाया ।

परमार्थतः पूर्वोक्तचिन्मात्ररूपत्वाद्भेदो नास्तीत्यर्थः । तथाच शिवशक्तयोर्भेदाव-भास एव मिथ्या न तु प्रपञ्चवत्स्वरूपमपीत्यर्थः ॥ ३ ॥

जगत्कारणमापन्नः शिवो यो मुनिसत्तमाः ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ ४ ॥

इत्थं सामान्यरूपिणीं परां शक्तिं निरूप्य सैव शक्यविशेषप्रतियोगिनिरू-पिता सती तत्तद्विशेषशक्त्यात्मिका भवतीत्याह—जगदित्यादिना । जगत्का-रणमिति भावपरो निर्देशः । यः शिवो जगत्कारणत्वमापन्नो जगदङ्कुररूपश-क्त्यवस्थाया ऊर्ध्वं जगदाकारविवर्तिष्यमाणमायाधिष्ठानत्वात्तस्यापि शिवस्य-या पूर्वोक्ता परा शक्तिरेव जगन्निर्माणशक्तिरूपा भवेत् । तया शक्त्या रहित शिवो निःशक्तित्वाज्जगन्निर्माणासमर्थ इत्यर्थः । एवमुत्तरत्र सर्वत्र योज्यम् ॥४॥

सर्वज्ञत्वं गतो यस्तु शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ ५ ॥
ईक्षितृत्वं गतो यस्तु शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ ६ ॥

शिवस्य जगत्कारणत्वावस्थायामुपाधिभूता माया ज्ञानक्रियाशक्तिसाम्य-वती सा यदि विशुद्धसत्त्वप्रधाना ज्ञानशक्त्याऽधिका स्यात्तदा तदुपाधिकः शिवः सर्वज्ञो भवति । यदा तु क्रियाशक्त्याऽधिका तदा तदुपाधिकः साक्षा-च्छिव एव सृष्टव्यपर्यालोचनात्मकस्येक्षणस्य कर्ता भवति । एतदुक्तं भवति—एक एव परशिवः साक्षादुपाधिवशात्पञ्चधा भवति । अनुद्भूतज्ञानक्रियाशक्तिका या माया तदुपहितः शिव इत्युच्यते । तस्याः शक्यप्रतियोग्यधीननिरूपणो य आकारस्तदुपाधिकः शिवः शक्तिः । यदा सा मायोद्भूतसमप्रधानज्ञानक्रिया-शक्तिका तदुपाधिकं परशिवस्वरूपं जगत्कारणम् । ज्ञानशक्त्याधिक्यात्सर्वज्ञः। क्रियाशक्त्याधिक्यादीक्षितेति । एवं च शिवस्यावस्थाभेदा आगमिकैः शुद्धत-त्त्वानीति व्यवहियन्ते । तदुक्तम्—

"शुद्धानि पञ्च तत्त्वान्याद्यं तेषां वदन्ति शिवतत्त्वम् ।
शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च" इति ॥

तेषां लक्षणमपि तैरेवोक्तम्—

"शिवतत्त्वमथो वक्ष्ये सर्वाद्यप्रभवं परम् ।
अप्रमेयमनिर्देश्यमनौपम्यमनामयम् ॥

सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्ययमीश्वरम् ।
शक्तितत्त्वं ततो जातं सिसृक्षोः परमात्मनः ॥
उन्मेषः प्रथमस्तस्मादभिन्नं शिवतत्त्वतः ।
सदाशिवं ततस्तत्त्वं क्रियाज्ञानसमांशकम् ॥
तत्त्वमीश्वरसंज्ञं स्यात्सर्वैश्वर्यसमावृतम् ।
क्रियाशक्त्या[1] परिक्षीणं[2] ज्ञानशक्त्याऽधिकावृतम् ॥
विद्यातत्त्वमतश्चेशात्सर्वज्ञं मन्त्रनायकम्[3] ।
क्रियाशक्त्यंशशबलं ज्ञानशक्त्यंशहीनकम्" ॥ इति ।

ईक्षितृत्वं परशिवस्याऽऽम्नातम् " तदैक्षत बहु स्यां प्रजायेय " इति ॥ ॥ ५ ॥ ६ ॥

यस्तु रुद्रत्वमापन्नः शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ ७ ॥
यस्तु विष्णुत्वमापन्नः शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ ८ ॥
यस्तु ब्रह्मत्वमापन्नः शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ ९ ॥

तदीक्षणोत्तरकालं विचिकीर्षोर्मायायाः सत्त्वरजस्तमोगुणा विभक्ता भवन्ति तदुपाधिकः शिवो ब्रह्मविष्णुरुद्रसंज्ञा लभते । तत्र रुद्रस्य बहिस्तमोयुक्तसत्त्वगुण उपाधिः । सत्त्वेनाऽऽवृतं तमो विष्णोः । ब्रह्मणस्तु केवलं रजः । तत्तदुपाध्याधिक्याद्रुद्रः परः । सत्त्वमात्ररहिताद्ब्रह्मणः सकाशाद्बहिःसत्त्वोपाधिको विष्णुः श्रेष्ठः । एवमीदृग्रूपमुपाध्याधिक्यत्वं स्वयमेवोपदिष्टं सूतगीतायां प्रतिपादयिष्यति "यस्य मायागतं सत्त्वम्" इत्यादिना ॥ ७ ॥ ८ ॥ ९ ॥

सदाशिवत्वं यः प्राप्तः शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १० ॥
ईश्वरत्वं गतो यस्तु शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ ११ ॥

---

१ क. ख. ज्ञानशक्त्या । २ क. ख. °णं क्रियाश° । ३ क. ख. °म् । ज्ञानश° ।

सदाशिवत्वमिति । गुणप्रविभागानन्तरं शब्दस्पर्शतन्मात्ररूपाणि सूक्ष्मभूतानि क्रमेणोत्पद्यन्ते । तत्र शब्दतन्मात्रोपाधिकः सदाशिवः । स्पर्शतन्मात्रोपाधिकः शिव ईश्वरः । रूपरसगन्धतन्मात्रोपाधिका रुद्रविष्णुब्रह्माणः । रुद्रविष्णुब्रह्मणामेव भौतिकसृष्टावुपाधय इत्यत्र पृथङ्नोक्तम् । एकरूपाणामप्युपाधिवैचित्र्याद्भेदो विद्यत एवेत्यभिप्रेत्यैकादशाध्याय उत्कर्षप्रतिपादनसमये ब्रह्मादयो द्विरुपात्ता इत्युक्तम् ॥ १० ॥ ११ ॥

हिरण्यगर्भत्वं यस्तु शिवः प्राप्त उपाधिना ॥
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १२ ॥
सूत्रात्मत्वं तथा यस्तु शिवः प्राप्त उपाधिना ॥
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १३ ॥

हिरण्यगर्भत्वमिति । वियदादिसूक्ष्मभूतगतैः पञ्चभिः सत्त्वांशैरारब्धं समष्ट्यन्तःकरणं हिरण्यगर्भस्योपाधिः । तत्रत्यै रजोंशैरारब्धः समष्टिरूपः प्राणः सूत्रात्मन उपाधिः ॥ १२ ॥ १३ ॥

विराड्रूपं गतो यस्तु शिवः साक्षादुपाधिना ॥
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १४ ॥

विराड्रूपमिति । पञ्चभूतेषु जातेषु तदारब्धो ब्रह्माण्डादिलक्षणः स्थूलप्रपञ्चो विराज उपाधिः ॥ १४ ॥

स्वराड्रूपं गतो यस्तु शिवः साक्षादुपाधिना ॥
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १५ ॥
सम्राड्रूपं गतो यस्तु शिवः साक्षादुपाधिना ॥
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १६ ॥

तदन्तर्गतलिङ्गशरीरसमष्टिः स्वराजः । कारणत्वेन शरीरद्वयानुगतमव्याकृतं सम्राज उपाधिः । एतच्च शिवमाहात्म्यखण्ड एकादशेऽध्याये विस्तरेण प्रतिपादितम् ॥ १५ ॥ १६ ॥

इन्द्रादिलोकपालानां रूपं यः प्राप्तवाञ्शिवः ॥
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १७ ॥

इन्द्रादिलोकपालानामित्याद्या उपाधयः स्पष्टाः ॥ १७ ॥

देवादीनां गतो यस्तु रूपं शंभुरुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १८ ॥
मनुष्यत्वं गतो यस्तु शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ १९ ॥

देवादीनामिति । आदिशब्दादसुरगन्धर्वादयः ॥ १८ ॥ १९ ॥

तिर्यगादिस्वरूपं यः शिवः प्राप्त उपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २० ॥
ओषधीनां स्वरूपं यः शिवः प्राप्त उपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २१ ॥
वनस्पतीनां रूपं यः शिवः प्राप्त उपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २२ ॥
भक्ष्यभोज्यादिरूपं यः शिवः प्राप्त उपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २३ ॥
नदीनदादिरूपं यः शिवः प्राप्त उपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २४ ॥
पर्वतादिस्वरूपं यः शिवः प्राप्त उपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २५ ॥
समुद्ररूपं यः प्राप्तः शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २६ ॥
विद्युद्रूपं गतो यस्तु शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २७ ॥
सर्वाकारं गतो यस्तु शिवः साक्षादुपाधिना ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ॥ २८ ॥

---

१ रू. ज. °धः साक्षादुपा° । २ क. ज. °वः साक्षादुपा° । ३ ज. °वः साक्षादुपा° । ४ ज. °वः साक्षादुपा° ।

तिर्यगादीति आदिशब्देन पक्षिसरीसृपादयः ॥ २० ॥ २१ ॥ २२ ॥ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

एषा सा साक्षिणी शक्तिः शंकरस्यापि शंकरी ।
शिवाभिन्ना तया हीनः शिवः साक्षान्निरर्थकः ॥ २९ ॥

इत्थमेकस्या एव परशक्तेर्नानाविधशक्त्यप्रतियोगिवैचित्र्यवशात्तद्विशेषशक्त्यात्मना नानात्वमभिधाय परमार्थतोऽद्वितीयसच्चिदानन्दादिलक्षणैवेत्युपसंहरति—एषा सेत्यादिना । एषा शक्तिर्जगत्कारणत्वाद्यात्मना शंकरस्य परशिवस्यापि तत्तन्निर्माणहेतुतया सुखकरी । यद्वा स्वीकृतलीलावतारस्य पार्वत्यात्मना सुखकरी । शिवशक्त्योरुभयोरपि परमार्थताश्चिन्मात्रैरूपत्वाच्छिवस्वरूपादनतिरिक्ता । चिन्मात्ररूपिण्या तया यदि शिवो हीनः स्यात्तदा चिन्मात्रातिरिक्तस्य सर्वस्य मिथ्यात्वात्तदतिरिक्तस्वरूपान्तराभावेन शिवो निःस्वरूपो भवेदित्यर्थः ॥ २९ ॥

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः ।
उमाशंकरयोरैक्यं यः पश्यति स पश्यति ॥ ३० ॥

अतः शिवशक्त्योश्चिन्मात्रैकशरीरत्वात्परस्परमविनाभावमाह—न शिवेनेति । एवं शिवशक्त्योश्चिन्मात्ररूपेणैकत्वं यः साक्षात्करोति स एव ज्ञानीत्यर्थः । ॥ ३० ॥

उमाशंकरयोर्भेदं ये पश्यन्ति नराधमाः ।
अधोमुखोर्ध्वपादास्ते यास्यन्ति नरकार्णवम् ॥ ३१ ॥

एतदेव व्यतिरेकमुखेण द्रढयति—उमाशंकरयोरिति ॥ ३१ ॥

यथा मातापितृभ्यां तु वर्धन्ते मानवा भुवि ।
तथैवाऽऽभ्यामिदं कृत्स्नं वर्धते नात्र संशयः ॥ ३२ ॥

तथैवाऽऽभ्यामिति । जगत्कारणत्वादिरूपेण सर्वत्रानुस्यूताभ्यां शिवशक्तिभ्यामित्यर्थः ॥ ३२ ॥

उपासते ये परमां सर्वलोकैकमातरम् ।
तेऽभीष्टं सकलं यान्ति विद्यां मुक्तिप्रदामपि । ३३ ॥

तेऽभीष्टमिति । शक्तिप्रसादादेवैहिकफलोपभोगेन प्रतिबन्धककर्मक्षये सति मुक्त्युपायभूतां ब्रह्मविद्यामपि तत्प्रसादतो लभन्त इत्यर्थः । तदुक्तमागमिकैः—

१ ङ. 'त्वा' ।

" भोगेन कर्मपाकं विधाय दीक्षां शिवः शक्त्या ।
मोचयति पशूनखिलान्करुणैकनिधिः सदा शंभुः " इति॥३३॥

पार्वती परमा देवी ब्रह्मविद्याप्रदायिनी ।
विशेषेणैव जन्तूनां नात्र संदेहकारणम् ॥ ३४ ॥

ब्रह्मविद्याप्रदायिनीति । वयं सर्वोत्कृष्टा इति कृताहंकाराणामग्न्यादिदेवानां गर्वमपनेतुमाविर्भूतस्य परब्रह्मणः स्वरूपं यया देव्योपदिष्टं तस्मादेषा ब्रह्मविद्याप्रदायिनी । श्रूयते हि तलवकारोपनिषदि—" ब्रह्म ह देवेभ्यो विजिग्ये " इत्युपक्रम्य " स तस्मिन्नेवाऽऽकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति " " ब्रह्मेति होवाच " इति ॥ ३४ ॥

लक्ष्मीवागादिरूपैषा शिवा खलु मुनीश्वराः ।
नर्तकीवानया सर्वमचिरादेव सिध्यति ॥ ३५ ॥

स्वरूपाविरोधेन लक्ष्मीवागादिनानारूपत्वस्वीकारस्योचितं निदर्शनमाह—नर्तकीवेति ॥ ३५ ॥

अस्या एव प्रसादेन ब्रह्मेन्द्रादिविभूतयः ।
अनया रहितं सर्वमसदेव न सद्भवेत् ॥ ३६ ॥
एतामेव समाराध्य श्रद्धया सह वैदिकाः ।
लभन्ते काङ्क्षितं सर्वं नान्यथा मुनिपुंगवाः ॥ ३७ ॥

अनया रहितमिति । परमार्थसद्रूपिण्याऽनया यदि सर्वं जगद्रहितं स्यात्तदा सर्वमसदेव भवेत्तुच्छवत्स्वतःसत्त्वाभावात् । श्रुतिश्च सद्वस्तुविरहेऽसत्त्वं प्रतिपादयति " असन्नेव स भवति " " असद्ब्रह्मेति वेद चेत् " इति। ॥ ३६ ॥ ३७ ॥

शैवा भागवतास्तेषामुपभेदावलम्बिनः ।
अस्या आराधनेनैव लभन्तेऽभीप्सितं फलम् ॥ ३८ ॥
दैगम्बरास्तथा बौद्धा अपभ्रंशावलम्बिनः ।
अस्या आराधनेनैव लभन्तेऽभीप्सितं फलम् ॥ ३९ ॥

उपभेदावलम्बिन इति । शैवोपभेदाः पाशुपतादयः । भागवतोपभेदाः पाञ्चरात्रवैखानसादयः ॥ ३८ ॥ ३९ ॥

यथा यथा शिवामेतां यो वा को वाऽऽदरेण तु ।
आराधयति सोऽभीष्टं लभते फलमास्तिकाः ॥ ४० ॥

करुणासागरामेतां यः पूजयति शांकरीम् ।
किं न सिध्यति तस्येष्टं तस्या एव प्रसादतः ॥ ४१ ॥

यथा यथेति । यद्यदुपाधिविशिष्टामेतां शक्तिं यः कोऽप्याराधयति तस्य तत्तदुपाधियोग्यं तत्तत्फलं सिध्यतीत्यर्थः । "तं यथा यथोपासते तदेव भवति" इति श्रुतेः । भगवताऽप्युक्तम्—"यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति" इत्यादिना "लभते च ततः कामान्" इत्यन्तेन ॥ ४० ॥ ॥ ४१ ॥

शिवामेतामुमामेनां जडशक्तिं तथैव च ।
जडकार्यं जगज्जीवं तेषां भेदं तथैव च ॥ ४२ ॥

एवं परशक्तेर्महिमानं प्रदर्श्य परिपूर्णपराशिवस्वरूपेणैव सर्वमनुसंधेयं मुमुक्षुणेति प्रतिपादयति—शिवामेतामित्यादिना । चिन्मात्राश्रयमायाशक्त्यनुप्रविष्टौ संविच्छिवा सैव लीलाविग्रहधारिण्युमा जडवर्गस्य सर्वस्योपादानभूता चिन्मात्राश्रया या माया सा जडशक्तिः ॥ ४२ ॥

अन्यच्चास्तितया भातं तथा नास्तीतिशब्दितम् ।
सर्वं पूर्णं शिवं पश्यन्स्वयं पूर्णः शिवो भवेत् ॥ ४३ ॥

सर्वमिति । प्रागुक्तं मायातत्कार्यरूपं चेतनाचेतनात्मकं यत्सर्वं जगत्परिपूर्णे पराशिवस्वरूपे शुक्तौ रजतमिवाध्यस्तं रजतस्येव तस्य सर्वस्याधिष्ठानव्यतिरेकेणासत्त्वात्तदधिष्ठानमात्रमवशिष्यते । तथा चायमर्थः—यदिदं सर्वं न तत्सर्वमपि त्वनवच्छिन्नः पराशिव एवेति वेदान्तमहावाक्यजनितज्ञानेन साक्षात्कुर्वंस्तदानीमेव स्वयमप्यनवच्छिन्नः शिवो भवति ज्ञानसमकालमेव मुक्तिरिति । पश्यन्निति वर्तमानापदेशार्थः । श्रुतावपि विद्योदयसमकालमेव परब्रह्मप्राप्तिराम्नाता "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति" इति ॥ ४३ ॥

पूर्णमेव स्वकं रूपमपूर्णं भाति मायया ।
पूर्णरूपतया मायां पश्यन्पूर्णो भवेत्स्वयम् ॥ ४४ ॥

एतदेवोपपादयति—पूर्णमेवेति । सच्चिदानन्दैकरसमाकाशवत्सर्वगतं पराशिवस्वरूपमेव सर्वेषां जीवानां नैजं रूपम् । तदेव घटाद्युपाधिवशादाकाशमिव सत्त्वप्रधानमायया शक्त्याऽवच्छिन्नं सदसर्वगतमिव दृश्यते । यदा तु मुमुक्षुः स्वात्मनो नैजं रूपं गुरूपदेशतो वेदान्तमहावाक्यलक्षणात्प्रमाणादवगच्छति

१ क. तनुं । २ क. °ष्टा शिवा ।

तदा भेदहेतुभूतां मायामप्यनवच्छिन्नात्मरूपतयैव साक्षात्कुर्वन्नच्छेदहेतोरभावान्मुमुक्षोः स्वकीयमपि रूपं परिपूर्णमेव भवेदित्यर्थः । श्रुतिरपि चराचरात्मकस्य सर्वस्य जगतः पूर्णावशेषत्वं दर्शयति—"पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति ॥ ४४ ॥

स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः ।
न सन्ति नास्ति माया च तद्विशुद्धात्मवेदनम् ॥४५॥

ननु सन्घटः सन्पट इत्यादिभेदेन प्रतिपन्नस्य भेदस्य जगतो मायायाश्च कथं परिपूर्णशिवात्मकत्वं येन स्वयमपि परिपूर्णः सञ्शिवो भवेदिति तत्राऽऽह—स्वपूर्णेति । तद्रूपस्य स्वात्मनः कारणतयाऽनुप्रवेशात्स्वकीयमेव सत्त्वमचेतने जगति जीवेश्वरादिभेदभिन्नेऽचेतनप्रपञ्चे मायायां चावभासते न ततोऽतिरिक्ता तेषां सत्ताऽस्तीत्यर्थः ॥ ४५ ॥

स्वपूर्णात्मशिवानन्दनिष्ठामासाद्य मानवः ।
तदैव लभते मुक्तिं स्वपूर्णात्मशिवात्मिकाम् ॥ ४६ ॥

निष्ठामिति । अन्यत्सर्वं परित्यज्य तत्स्वरूपानुसंधाने नितरामवस्थितिः ॥ ४६ ॥

स्वपूर्णात्मशिवानन्दप्रकाशबलतः पुमान् ।
स्वच्छन्दं वर्तते लोके को वा तस्य निवारकः ॥४७॥
सार्वभौमो यथा राजा स्वच्छन्दं वर्तते भुवि ।
स्वपूर्णात्मशिवज्ञानी स्वच्छन्दं वर्तते तथा ॥ ४८ ॥
प्रतीतमखिलं यस्य स्वात्मना भासते स्वयम् ।
संसारस्तस्य मुक्तिर्वा कथं सिध्यति योगिनः ॥४९॥
संसारो वा विमुक्तिर्वा यस्य भाति मुनीश्वराः ।
तस्यैव हि निषेधाश्च विधयश्च न योगिनः ॥ ५० ॥

एवमद्वितीयपरिपूर्णशिवात्मैक्यनिष्ठस्य जीवन्मुक्तस्य स्वात्मयाथात्म्यज्ञानेन भेदप्रपञ्चस्य विलीनत्वात्तदाश्रितो बद्धमुक्तादिव्यवहारो विधिनिषेधादिव्यवहारश्च नास्तीत्याह—स्वपूर्णात्मेत्यादिना । आनन्दप्रकाशबलत इति । निरतिशयानन्दस्वरूपाविर्भावरतेन बलेन ब्रह्मेन्द्रादिपदमपि न गणयतीत्यर्थः ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

स्पृश्यते मृत्तिका विप्रैश्चण्डालैरपि केवला ।
सैव कुम्भादिरूपेण नीचैर्न स्पृश्यते यथा ॥ ५१ ॥
तथा ब्रह्मात्मना सर्वमनिन्द्यमपि योगिनः ।
निन्द्यानिन्द्यतयाऽज्ञस्य भाति सर्वं स्वरूपतः ॥ ५२ ॥
वैदिको लौकिकश्चापि व्यवहारस्तु कल्पितः ।
भेदविज्ञानिनो मोहाद्भासते स न योगिनः ॥ ५३ ॥
आत्मविज्ञानिनो विप्रा लौकिको न हि वैदिकः ।
व्यवहारः स्वतः सर्वः स्वात्मना भाति केवलम् ॥ ५४ ॥
आत्मविज्ञानसंज्ञस्य महायज्ञस्य वैभवम् ।
कल्पकोटिशतेनापि मया वक्तुं न शक्यते ॥ ५५ ॥
भवन्तोऽपि महाभाग्यान्महादेवप्रसादतः ।
मत्तो लब्धपरिज्ञानाः कृतार्थाश्च न संशयः ॥ ५६ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञ-
वैभवखण्डे ज्ञानयज्ञविशेषो नाम त्रयो-
दशोऽध्यायः ॥ १३ ॥

भेददर्शनादेव विधिनिषेधादिव्यवहारो न तु जीवन्मुक्तस्येत्यत्र सदृष्टान्तमुपपादयति—स्पृश्यत इत्यादिना । यथा घटशरावाद्युपादानभूतायां मृत्तिकायां (*यथा) नीचस्पर्शादोषाभावो घटशरावादिरूपेण विभक्तस्य तत्कार्यवर्गस्य स्पर्शे च दोष एवं कारणब्रह्मात्मनैकरूपं सर्वं वस्तु तस्यानिन्द्यमपि, तत्त्वज्ञानरहितस्य भेददर्शिनो निन्द्यानिन्द्यात्मना भासत इत्यर्थः । निगदव्याख्यातमन्यत् ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे
ज्ञानयज्ञविशेषो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

* सर्वेषाम् [दृ]ष्टपुस्तकेषु यथाशब्दोऽयमर्थो नास्ति दृश्यते ।

१ च. सिद्धः । २ क. °तायां मृ° । ३ क. °काशं य° । ४ ङ. तत्कार्यभूतस्य ।

अथ चतुर्दशोऽध्यायः ।

सूत उवाच--

भूयोऽपि ज्ञानयज्ञं तु प्रवक्ष्यामि समासतः ।
इतः पूर्वं मया नोक्तमपि कस्यचिदास्तिकाः ॥ १ ॥

इत्थं शक्तेः परशिवस्वरूपानतिरिक्तत्वमुपपाद्य सद्योजातादिपञ्चब्रह्मरूपेण यो भेदावभासः सोऽपि न पारमार्थिक इति प्रतिपादयितुमुपक्रमते—भूयोऽपीति ॥ १ ॥

एक एव शिवः साक्षात्सत्यज्ञानादिलक्षणः ।
विकाररहितः शुद्धः स्वशक्त्या पञ्चधा स्थितः ॥ २ ॥

एक इति स्वगतस्वातिरिक्तभेदयोर्निरासः । सत्यज्ञानादीति । आदिशब्देनाऽऽनन्त्यं सुखरूपता च विवक्षिता । विकाररहित इति । उत्पत्तिपरिणामादिसर्वविक्रियारहितः कूटस्थनित्य इत्यर्थः । अत एव शुद्धो निर्मलः । य एवंलक्षणः साक्षात्परशिवः पर एवैकः सन्भागुदीरितस्वशक्त्याऽवस्थाभेदेनेशानाद्यात्मना पञ्चधाऽवस्थितः । तथा हि—सर्वशक्तिसामान्यरूपा या परा शक्तिः प्रागुदीरिता सृष्टिस्थितिसंहृतितिरोभावानुग्रहलक्षणैः शक्तिविशेषैर्निरूप्यमाणा स्वयमपि सर्जनादिविशेषशक्त्यात्मना पञ्चधा विभक्ता भवति । अतः सर्जनशक्त्युपाधिकं परशिवस्वरूपं चिन्मात्रमेव सद्योजातः । पालनशक्त्युपाधिकं वामदेवः । संहरणशक्त्युपाधिकमघोरः । तिरोभावशक्त्युपाधिकं तत्पुरुषः । अनुग्रहशक्त्युपाधिकं चिन्मात्रमीशानः । एवमेक एव परशिवः पञ्चभिरुपाधिभिः पञ्चधा विभज्य स्थित इत्यर्थः । तदुक्तमागमिकैः—

सोऽनादिमुक्त एको विज्ञेयः पञ्चधाऽक्षतनुः ।
पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहृतितिरोभावाः ॥
तद्वदनुग्रहकरणं प्रोक्तं सततोदितस्यास्य " ॥ इति ॥ २ ॥

ईशानश्चेति तत्पूर्वपुरुषश्चेति सुव्रताः ।
अघोरश्चेति विप्रेन्द्रा वामदेव इति द्विजाः ॥ ३ ॥

पञ्चधाऽवस्थितस्य परशिवस्य सृष्टिक्रमेण नामोद्देशः क्रियते—ईशानश्चेत्यादिना । सर्वभूतानामीशितृत्वादीशानः । तदुक्तमागमे—

"ईशे येन जगत्सर्वं गुणेनोपरिवर्तिना" इति ।

१ क. ख. ग. 'क्षमतमे' । २ ख. 'स्वरूपः' । ३ क. ख. 'त.च्छक्त्याऽ' ।

तत्पूर्वपुरुषश्चेति । तादिति पदं पूर्वं यस्य पुरुषपदस्य तत्तथा । तथा तस्य तस्य पूर्षु शरीरेषु वसतीति तत्पुरुषाभिधेय इत्यर्थः । तदुक्तम्—

" तस्य तस्य वपुर्यो पूस्तस्यामुषति देन सः " इति ।

घोरो न भवतीत्यघोरः । उक्तं च—

" तथाऽघोरः प्रशान्तोऽपि पापानिर्दाहकारकः " इति ।

यद्वा-अघौघं हरतीत्यघोरः । तदप्युक्तम्—

" अर्चयेद्भक्तिमुक्त्यर्थं दक्षेऽघौघहरे स्थितः " इति ।

धर्मार्थकामेभ्यः प्रशस्तत्वाद्वामः स चासौ देवश्च । तदप्युक्तम्—

" वामं त्रिवर्गवामत्वाद्रहस्यं च स्वभावतः " इति ॥ ३ ॥

सद्योजात इति प्राज्ञा न स्वरूपेण भेदिनः ॥
तत्रैवं सति शब्दस्तु साक्षादीशानसंज्ञितः ॥ ४ ॥
स्पर्शस्तत्पुरुषो रूपमघोरः परिकीर्तितः ॥
वामदेवो रसः प्रोक्तो गन्धः सद्य उदाहृतः ॥ ५ ॥

यस्मात्परमेश्वरादेवतिर्यङ्मनुष्याद्याः सद्य एव स्मरणमात्राज्जायन्ते स तथोक्तः । तदप्युक्तम्—

" सद्योऽणूनां मूर्तयः संभवन्ति यस्येच्छातस्तेन सद्योभिधानः" इति ।

न स्वरूपेणेति । तस्याविक्रियस्वभावत्वादित्यर्थः । यस्मादेवं परशिवो यः शक्तिवशात्पञ्चधा विभज्य स्थितस्तस्मात्कार्यभूते प्रपञ्चे शब्दतन्मात्रादीनि यानि पञ्चसंख्यया विभक्तानि तानि सर्वाणि पञ्चब्रह्मात्मकान्येवेत्याह—तत्रै-वमित्यादिना ॥ ४ ॥ ५ ॥

सदाशिवेश्वरौ रुद्रो विष्णुर्ब्रह्मा च सुव्रताः ॥
क्रमाच्छब्दादिभूतानां देवताश्च प्रकीर्तिताः ॥ ६ ॥

शब्दादिभूतानामिति । तन्मात्ररूपाणामुदाहृतानां वियदादिसूक्ष्मभूतानां सदाशिवादयः क्रमेण देवता इत्यर्थः ॥ ६ ॥

ताश्चेशानादयः प्रोक्ताः क्रमेणैव मुनीश्वराः ॥
सर्वाण्येतानि विप्रेन्द्राः शिव एव न संशयः ॥ ७ ॥

तेऽपीशानाद्यात्मका एवेत्याह—ताश्चेति । सर्वाण्येतानीति । सदाशिवाद्य-

---

१ क. °पः सोऽणो° । २ क. ग. घ. ङ. च. छ. ज. °श्वरो रु° ।

धिष्ठानशब्दतन्मात्राद्यात्मकानीशानादिपञ्चब्रह्माणि शिव एव तत्स्वरूपे माया-शक्तिवशात्परिकल्पितत्वान्न ततोऽतिरिक्तानीत्यर्थः ॥ ७ ॥

एतानि शिवरूपेण पश्यन्मुच्येत बन्धनात् ॥
आकाशाख्यं महाभूतमीशानः परिकीर्तितः ॥ ८ ॥
वायुस्तत्पुरुषो ज्ञेयो वह्निश्च घोर ईरितः ॥
अम्भो वामस्तथा भूमिः सद्योजातः प्रकीर्तितः ॥ ९ ॥

एवमेतानि शिवात्मना साक्षात्कुर्वन्सद्य एव संसारान्मुक्तो भवेदित्यर्थः । एवमुत्तरत्र सर्वत्र योज्यम् । महाभूतमिति । स्वेतरपृथिव्यादिभूतापेक्षयाऽऽकाशस्य विस्तृतत्वात्तन्महाभूतत्वम् । उक्तं हि—

" सूक्ष्मताव्यापिते ज्ञेये भूम्यादेरुत्तरोत्तरम् " इति ॥ ८ ॥ ९ ॥

अनन्तशिवसंज्ञश्च तथाऽनन्तेश्वराभिधः ॥
कालाग्निरुद्रो विप्रेन्द्रास्तथा नारायणाभिधः ॥ १० ॥
ब्रह्मा चतुर्मुखः साक्षादाकाशादेस्तु देवताः ॥
एतानि शिवरूपेण पश्यन्मुच्येत बन्धनात् ॥ ११ ॥

अनन्तशिवेति । अनन्तशिवोऽपरिच्छिन्नशिवः सदाशिव इत्यर्थः । अनन्तशिवादयश्च स्थूलभूतानामधिष्ठातृदेवताः । तदुक्तं सर्वज्ञानोत्तरे—

"ब्रह्मा विष्णुश्च रुद्रश्चानन्तेशश्च सदाशिवः ।
पृथिव्यादिषु तत्त्वेषु क्रमात्तत्त्वाधिपाः स्थिताः" इति ।

एतानीति । सर्वत्र पूर्ववद्योज्यम् ॥ १० ॥ ११ ॥

श्रोत्रमीशान एव स्यात्त्वक्च तत्पुरुषः स्मृतः ॥
चक्षुश्चाघोर एव स्याज्जिह्वा वामः समीरितः ॥ १२ ॥
घ्राणं सद्यः समाख्यातः क्रमात्खानां मुनीश्वराः ॥
दिग्वाय्वादित्यवरुणपृथिव्याख्यास्तु देवताः ॥
एतानि शिवरूपेण पश्यन्मुच्येत बन्धनात् ॥ १३ ॥

श्रोत्रमीशान इति । वियदादिभूतपञ्चकगतसत्त्वांशैरारब्धानि श्रोत्रादीनीन्द्रियाणि तेषामाधिपा दिगादयः । " दिशः श्रोत्रं भूत्वा कर्णौ प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् " इत्यादि । अत एव तत्त्वसारेऽप्युक्तम्—

" श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतम् । त्वगध्यात्मं स्प्रष्टव्यमधिभूतं वायुस्तत्राधिदैवतम् । चक्षुरध्यात्मं द्रष्टव्यमधिभूतं सूर्यस्तत्राधिदैवतम् । जिह्वाऽध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतम् । प्राणमध्यात्मं घ्रातव्यमधिभूतं पृथिवी तत्राधिदैवतम् " इति ॥ १२ ॥ १३ ॥

पाद ईशान एव स्यात्पाणिस्तत्पुरुषः स्मृतः ॥ १४ ॥
वागघोर इति प्रोक्ता ह्युपस्थो वाम ईरितः ।
पायुः सद्य इति प्रोक्तः साक्षाद्वेदान्तपारगैः ॥ १५ ॥
त्रिविक्रमस्तथा चेन्द्रो वह्निश्चैव प्रजापतिः ।
मित्रश्च मुनिशार्दूलाः क्रमात्खानां च देवताः ॥ १६ ॥
एतानि शिवरूपेण पश्यन्मुच्येत बन्धनात् ॥ १७ ॥

पाद ईशान इति । पादपाणिवागुपस्थपायुरूपाणि पञ्च कर्मेन्द्रियाण्याकाशादिभूतपञ्चकगतरजोंशैः क्रमेणाऽऽरब्धत्वादीशानाद्यात्मकानीत्यर्थः । त्रिविक्रमादयस्तेषामधिदेवताः " अग्निर्वाग्भूत्वा मुखं प्राविशत् " इत्यादिश्रुतेः । तत्त्वोपदेशसारेऽप्युक्तम्—"पादावध्यात्मं गन्तव्यमधिभूतं विष्णुस्तत्राधिदैवतम् । हस्तावध्यात्ममादातव्यमधिभूतमिन्द्रस्तत्राधिदैवतम् । वागध्यात्मं वक्तव्यमधिभूतमग्निस्तत्राधिदैवतम् । गुह्यमध्यात्ममानन्दयितव्यमधिभूतं प्रजापतिस्तत्राधिदैवतम् । पायुरध्यात्मं विसर्जयितव्यमधिभूतं मित्रस्तत्राधिदैवतम् " इति ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

मन ईशान एव स्यादबुद्धिस्तत्पुरुषः स्मृतः ।
अहंकारस्त्वघोरः स्याच्चित्तं वामः समीरितः ॥ १८ ॥
एषां च कारणं विप्रा अन्तःकरणसंज्ञितम् ।
सद्योजात इति प्रोक्तं सर्ववेदार्थपारगैः ॥ १९ ॥
मनसो देवता चन्द्रो बुद्धेर्वाचस्पतिस्तथा ।
अहंकारस्य कालाग्निरुद्रः कालहरोऽपि वा ॥
चित्तस्य देवता देवी शिवे(वा)ऽन्तःकरणस्य तु ॥ २० ॥
हिरण्यगर्भो भगवान्देवता मुनिपुंगवाः ।
एतानि शिवरूपेण पश्यन्मुच्येत बन्धनात् ॥ २१ ॥

प्राण ईशान एव स्यादपानः पुरुषः स्मृतः ।
व्यानोऽघोरस्तथोदानो वामदेवः समीरितः ॥ २२ ॥
समानः सद्य एव स्यात्सूत्रात्मा कारणोऽनिल ।
विशिष्टो विश्वसृष्टिश्च विश्वयोनिरजा जया ॥ २३ ॥
क्रमेण देवताः प्रोक्ताः प्राणादीनां मुनीश्वराः ।
एतानि शिवरूपेण पश्यन्मुच्येत बन्धनात् ॥ २४ ॥
पृथिव्यादिषु भूतेषु यो गुणः सत्त्वसंज्ञितः ।
स क्रमेण निवृत्त्यादिकलासंज्ञामुपैति च ॥ २५ ॥

मन ईशान इत्यादि । मनआद्याश्चतस्रोऽन्तःकरणवृत्तयो वृत्तिमदन्तःकरणं चेत्येतान्यपीशानाद्यात्मकानि । तेषां चन्द्रादयोऽधिदेवताः " चन्द्रमा मनो भूत्वा हृदयं प्राविशत् " इत्यादिश्रुतेः । तत्त्वोपदेशसारेऽप्युक्तम्—" मनोऽध्यात्मं मन्तव्यमधिभूतं चन्द्रस्तत्राधिदैवतम् । बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवतम् । अहंकारोऽध्यात्ममहंकर्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम् " इत्यादि ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

भूमौ निवृत्तिरित्रेन्द्राः प्रतिष्ठा पयसि स्थिता ।
विद्या वह्नौ तथा शान्तिर्वायौ व्योम्नि मुनीश्वराः ॥ २६ ॥
शान्त्यतीता कलाश्चैता व्युत्क्रमेण मुनीश्वराः ।
भवन्ति पञ्च ब्रह्माणि तथा भूतेषु पञ्चसु ॥ २७ ॥

भूमौ निवृत्तिरिति । कर्मभोगो निवर्त्यतेऽनयेति निवृत्तिः । अचेतनानि तत्त्वान्यतिलघूनि पुरुषतत्त्वे प्रकर्षेण स्थाप्यन्तेऽनयेति प्रतिष्ठा । मायातत्कार्याद्विविक्तमात्मानं यया वेत्ति सा विद्या । मलमायाकर्मलक्षणस्य पाशजालस्योपशमो यया सा शान्तिः । ईदृशीं शान्तिमप्यतिक्रम्याद्वितीयसच्चिदानन्दैकरसपरशिवस्वरूपबोधहेतुत्वाच्छान्त्यतीता । तथा चोक्तमागमिकैः—

" यथाऽऽदौ पार्थिवे तत्त्वे कर्मभोगो निवर्त्यते ।
निवृत्तिः सा कला ज्ञेया प्रतिष्ठा कथ्यतेऽधुना ॥
शिवरागानुरक्तात्मा स्थाप्यते पौरुषे यया ।
सा प्रतिष्ठा कला ज्ञेया ततो विद्या निगद्यते ॥

१ क. ख. ग. ङ. च. छ. ज. 'कप' ।

मायाकार्यविवेकेन वेत्ति विद्यापदं यया ।
सा कला परमा ज्ञेया विद्या ज्ञानक्रियात्मिका ॥
मलमायाविकारौघशान्तिः पुंसः पुनर्यया ।
सा कला शान्तिरित्युक्ता साधिकारास्पदं पदम् ॥
शान्त्यतीतकलाऽद्वैतनिर्वाणानन्दबोधदा" ॥ इति ।

व्युत्क्रमेणेति । शान्त्यतीतादिक्रमेणेशानाद्यात्मिका इत्यर्थः ॥२६॥ २७ ॥

स्थितो रजोगुणो विप्रा आकाशादिक्रमेण च ॥
स्पन्दश्चैव परिस्पन्दः प्रक्रमः परिशीलनः ॥ २८ ॥
अचार इति विद्वद्भिः कथिताः पञ्च च क्रियाः ॥
एतानि पञ्च ब्रह्माणि भवन्ति मुनिसत्तमाः ॥ २९ ॥

स्पन्दश्चैवेति । स्पन्दश्चलनमात्रमुत्तरोत्तरमुपचितास्तदवस्थाविशेषाः परिस्पन्दादयः ॥ २८ ॥ २९ ॥

तथा भूतेषु सर्वेषु संस्थितस्तु तमोगुणः ॥
छादकं बाधकं मुग्धं नोदकं भञ्जकं भवेत् ॥ ३० ॥
एतानि च तथा पञ्च ब्रह्माणि मुनिसत्तमाः ॥
एतानि शिवरूपेण पश्यन्मुच्येत बन्धनात् ॥ ३१ ॥

छादकमिति । दृष्टिप्रतिबन्धमात्रं छादकं तस्यैव क्रमेणोपचितावस्था बाधकादयः ॥ ३० ॥ ३१ ॥

अन्यानि यानि विप्रेन्द्राः पञ्चधा संस्थितानि च ॥
तानि च ब्राह्मणाः पञ्च ब्रह्माणि स्युर्न संशयः ॥ ३२ ॥
पञ्चब्रह्मतया भिन्नं जगत्सर्वं चराचरम् ॥
शिवरूपेण संपश्यन्मुच्यते भवबन्धनात् ॥ ३३ ॥

अन्यानि यानीति । प्राणगत्यादीनि । एवं पञ्चधाऽवस्थितस्य सर्वस्य जगतः पञ्चब्रह्मात्मकत्वादेकस्यैव पराशिवस्य स्वमायया पञ्चब्रह्मात्मनाऽवस्थानान्मायासहितं तत्सर्वं शिवस्वरूपानतिरेकेण साक्षात्कुर्वन्मुक्तो भवेदित्यर्थः ॥ ३२ ॥ ३३ ॥

मायैव शिवः साक्षात्पञ्चधा समवस्थितः ॥
सा शिवस्य सदा माया सर्वदुर्घटकारिणी ॥ ३४ ॥

नन्वविक्रियासङ्गोदासीनः परशिवः स कथं मायावशात्पञ्चब्रह्मात्मना जगदात्मकः स्यादिति तत्राऽऽह—सेति । सर्वदुर्घटकारिणीति । यत्सर्वप्रकारेण दुर्घटं तदूघटनमेवास्याः शीलमतो नोक्तदोष इत्यर्थः ॥ ३४ ॥

एवमात्मिकया ब्रह्म मायया कारणं भवेत् ॥
तत्सर्वं च तथाऽन्येषां नियन्तृ न निरूपणे ॥ ३५ ॥

एवमात्मिकयेति । " यतो वा इमानि भूतानि जायन्ते " इति परशिवस्वरूपस्य यज्जगत्कारणत्वं ' बहु स्यां प्रजायेय ' इति सर्वस्योपादानत्वेन यत्सर्वजगदात्मकत्वं विशुद्धसत्त्वप्रधानमायोपाधिवशाद्यज्जगन्नियन्तृत्वं तत्सर्वमघटितघटनसामर्थ्याया मायायाः संबन्धबलादेव । परमार्थनिरूपणे तु नैव किंचिदित्यर्थः ॥ ३५ ॥

वस्तुतः शंभुरानन्दः सत्यसंपूर्णचिद्घनः ॥
मायया मोहिता मर्त्यास्तं भेदेन विदुर्बुधाः ॥ ३६ ॥

कुतो नेत्यत आह—वस्तुत इति । शंभुरानन्दैकरस इत्यर्थः ॥ ३६ ॥

दासोऽहमिति संमोहस्ततः सोऽहमिति भ्रमः ॥
अहं स इति संमोहस्तथा त्रीणि परित्यजेत् ॥ ३७ ॥

दासोऽहमिति । भेदस्य मायामयत्वान्निवर्त्यतया तमपेक्षमाणः सोऽहमहं स इति जीवब्रह्मैक्यानुभवस्वरूपो यो मुमुक्षुव्यवहारः सोऽपि दासोऽहमितिवदज्ञानपरिकल्पित एव । तस्मात्सर्वं परित्यज्य केवलं स्वात्माऽनुसंधेय इत्यर्थः ॥ ३७ ॥

निर्भेदे निर्मले नित्ये निराधारे निरञ्जने ॥
दासः सोऽहमहं सोऽपीत्यात्मन्येतत्कथं भवेत् ॥ ३८ ॥

कुत इत्यत आह—निर्भेद इति । निर्गतो यस्माद्भेदः स निर्भेदः परशिवः। अतस्तस्मिन्भेदाश्रितव्यवहारो न युक्त इत्यर्थः । कुतो निर्भेद इत्यत आह—निर्मल इति । कुतश्चिद्धर्मिणो हि कश्चिद्धर्मो विद्यते । यथा घटात्पटो भिन्न इति । नैवं तस्मिन्भेदहेतुर्मालिन्यापादको धर्मोऽस्ति " अस्थूलमनण्वह्रस्वम् " इति सर्वधर्मनिषेधश्रुतेः । अतस्तस्मिन्हेतुरुक्त इत्यर्थः । भवेदेवं यद्यसौ निर्धर्मकः स्यात्तु न युज्यत इत्यत आह—नित्य इति । सधर्मकत्वं हि नित्यत्वे नोपपद्यते " उपपद्यमपक्षयधर्मो विकरोति हि धर्मिणम् " इति न्यायात् । उपचयापक्षयवतां घटपटादीनामनित्यत्वदर्शनात् । अत एव भग-

वान्बादरायण आकाशादीनामनित्यत्वं प्रतिपादयन्सूत्रयामास—"यावद्विकारं तु विभागो लोकवत्" इति । नित्यत्वं वा कथमित्यत्र आह—निराधार इति । यस्मात्परमेश्वरस्याऽऽधारान्तरं नास्ति "स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि" इति स्वमहिमप्रतिष्ठितत्वश्रुतेः । तस्मान्नित्यः । मृत्तन्त्वादिसमवायिकारणलक्षण आधारान्तरे सत्येतानीव घटपटादीनामनित्यत्वदर्शनात् । यथैतत्सर्वं प्रपञ्चजातं मायावशात्स्वी क्रियत एवं परमेश्वरेऽपि स्वी क्रियतामिति तत्राऽऽह—निरञ्जन इति । अञ्जनं मायातत्कार्यं यस्मात्परमार्थतस्तद्रहितः परशिवस्तस्मात्तस्मिन्कश्चिदपि व्यवहारो न युक्त इत्यर्थः । श्रूयते हि—
"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इति ॥ ३८ ॥

तस्मादज्ञानमायोत्थमिदं सर्वं जगद्बुधाः ।
तद्विवेकप्रदीपेन शिवं पश्यन्विमुच्यते ॥ ३९ ॥
विवेकालोकहस्तस्य ज्ञानमार्गेण गच्छतः ।
स्वात्ममुक्तिगृहप्राप्तिः सिध्यत्येवाचिरेण तु ॥ ४० ॥
संसारार्णवमग्नानां जन्तूनामविवेकिनाम् ।
अगतीनां गतिः साक्षाज्ज्ञानमेव हि केवलम् ॥ ४१ ॥

अज्ञानमायोत्थमिति । स्वरूपाज्ञानात्मिका वा माया तस्याः सकाशादुत्थितमित्यर्थः ॥ ३९ ॥ ४० ॥ ४१ ॥

स्वशक्तेः शत्रुभूतानां रागादीनां दुरात्मनाम् ।
छेदने वेदनं शस्त्रं केवलं खलु नेतरत् ॥ ४२ ॥
संसारदुःखतप्तानामात्मज्ञानामृताम्भसा ।
तापशान्तिर्न चान्येन सत्यमेव न संशयः ॥ ४३ ॥

स्वशक्तेरिति । स्वकीया चिच्छक्तिः स्वशक्तिः । हृन्मध्यवर्तिसाक्षिचैतन्यमिति यावत् । असङ्गोदासीने तस्मिन्संसारापादकत्वाद्दुरात्मानः शत्रवो रागादयस्तेषां छेदने वेदान्तवाक्यजनितं ज्ञानमेव केवलमायुधमित्यर्थः ॥ ४२ ॥ ॥ ४३ ॥

स्वतः सिद्धं स्वयं सर्वं जगत्स्वेन प्रकाशितम् ।
स्वस्वरूपतया बुद्ध्वा तदात्मा स्वयम् ॥ ४४ ॥

---

१ ख. °र्वं निर्गतं य° ।

स्वत इति । सर्वं जगत्स्वतः स्वात्मन एवोपादानकारणात् । निमित्तकारणमपि नान्यदित्याह—स्वयमिति । स्वात्मनेत्यर्थः । मायावशात्स्वयमेव स्वात्मनैव विभज्य सिद्धं निष्पन्नम् । परमेश्वरो हि सर्वस्य जगतो निमित्तमुपादानं च । "सोऽकामयत" इति स्रष्टव्यपर्यालोचनस्य श्रुतत्वात्कुलालवन्निमित्तकारणत्वम् । "बहु स्यां प्रजायेय" इति स्वात्मन एव बहुवचनस्य श्रुतेरुपादानत्वम् । " तदात्मानं स्वयमकुरुत " इति च श्रूयते । बादरायणोऽप्यभिन्ननिमित्तोपादानरूपत्वं ब्रह्मणः सूत्रयामास—"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति । तथा च स्वनिमित्तकं स्वोपादानकं जगत्प्रतीतिसमयेऽपि स्वरूपचैतन्येनैव प्रकाशितम् । एवं मायावशाच्चिन्मात्रस्वरूपे परमात्मनि प्रकल्प्यमानं जगत्स्वरूपतया बुद्ध्वा स्वस्याऽऽत्मनः स्वरूपमेव सर्वं जगन्न ततोऽतिरिक्तमस्ति मायामयत्वादित्यवगम्य स्वयमेव स्वात्मना तत्सर्वमप्युपसंहरति । अयमर्थः—स्वात्मनः स्वस्मात्स्वस्मिन्नेवाधिष्ठाने स्वाविद्यया सृष्टिसमये परिकल्पितं स्थितिसमयेऽपि स्वरूपप्रकाशेनैव प्रकाशितं सर्वं जगत्स्वस्वरूपतया स्वरूपयाथात्म्यज्ञानेन तदविद्यानिवृत्तावारोप्यस्य जगतोऽधिष्ठानावशेषोऽस्य स्वात्मना स्वयमेव ग्रसत इति व्यपदेशः ॥ ४४ ॥

यथा सुवर्णं रुचकं सृजति ग्रसते स्वयम् ।
तथा शंभुरिदं सर्वं सृजति ग्रसते स्वयम् ॥ ४५ ॥

तत्र दृष्टान्तः—यथा सुवर्णमिति । सुवर्णेनाऽऽरब्धस्य रुचककटकादेः पुनर्विलापने सति कारणभूतं सुवर्णमात्रमेव यथाऽवशिष्यते तद्वत्परमेश्वरोऽपि स्वस्माच्चेतनाचेतनात्मकमिदं सर्वं जगत्स्वयमेव सृजति स्वस्वरूपानतिरिक्तत्वेन विलापयति च ॥ ४५ ॥

यथोर्णनाभिः सृजति तन्तुं गृह्णाति च स्वयम् ।
तथा शंभुरिदं सर्वं सृष्ट्वा च ग्रसते स्वयम् ॥ ४६ ॥

कारणान्तरनिरपेक्षात्परमेश्वराज्जगदुत्पत्तौ निदर्शनमाह—यथोर्णनाभिरिति ॥ ४६ ॥

भूमिः सृजति गृह्णाति यथौषधिवनस्पतीन् ।
तथा शंभुरिदं सर्वं सृष्ट्वा च ग्रसते स्वयम् ॥ ४७ ॥

---

१ ख °रेणिस्य । २ ङ. सृष्ट्वा च ग्र° । ३ ङ. °र्विलोकने । ४ ख. °दं सृष्ट्वा ग्रसते स्वयं शिवः ॥ ४६ ॥

एकरूपात्परमात्मनो नानारूपकार्योत्पत्तौ दृष्टान्तः—भूमिः सृजतीति। श्रुतिश्च भवति—" यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति । यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्संभवतीह विश्वम् " इति ॥ ४७ ॥

स्वयमेव यथा स्वप्नं सृष्ट्वा गृह्णाति चेतनः ।
तथा शंभुरिदं सर्वं सृष्ट्वा च ग्रसते स्वयम् ॥ ४८ ॥

एवं सृष्टस्य जगतः स्वाविद्यामात्रमूलत्वेन मिथ्यात्वं प्रतिपादयति—स्वयमेव यथा स्वप्नमिति ॥ ४८ ॥

स्वस्वप्नः स्वप्रबोधेन स्वात्ममात्रं यथा भवेत् ।
तथैव स्वप्रपञ्चोऽपि स्वयं स्यात्स्वप्रबोधतः ॥ ४९ ॥

तत्र निदर्शनम्—स्वस्वप्न इति । निद्रादोषेण स्वस्मिन्परिकल्पितः स्वप्नप्रपञ्चः स्वस्वप्नः स्वप्रबोधेनाऽऽत्मनः प्रबोधेन निद्रानिवृत्तौ स्वात्ममात्रमेव भवति न ततोऽतिरेकेण दृश्यते । एवमेव स्वस्मिन्सच्चिदानन्दरूपेऽविद्याकल्पितप्रपञ्चोऽपि स्वात्मयाथात्म्यज्ञानेन स्वाविद्यानिवृत्तौ स्वात्मन्येव लीयते न ततोऽतिरिक्त इत्यर्थः ॥ ४९ ॥

स्वस्वरूपतया सर्वं वेद स्वानुभवेन यः ।
स धीरः स तु सर्वज्ञः स शिवः स तु दुर्लभः ॥ ५० ॥

* प्रत्यक्षभ्रमसिद्धः प्रपञ्चः प्रत्यक्षबाधकज्ञानान्निवर्तते न हीदं रजतमिति भ्रमोऽधिष्ठानशुक्तियाथात्म्यसाक्षात्कारमन्तरेण वाक्यशतेनाप्यपनेतुं शक्यत इत्यभिप्रेत्याऽऽह—स्वानुभवेनेति । स्वात्मयाथात्म्यसाक्षात्कारेणेत्यर्थः ॥ ५० ॥

लोकवासनया जन्तोः शास्त्रवासनयाऽपि च ।
देहवासनया ज्ञानं यथावन्नैव जायते ॥ ५१ ॥
जायते पूर्णविज्ञानं केषांचित्पुण्यगौरवात् ।
तथाऽपि प्रतिबद्धं स्यात्प्रसादेन विना कृतम् ॥ ५२ ॥
प्रसादादेव रुद्रस्य ज्ञानं वेदान्तवाक्यजम् ।
प्रतिबन्धविनिर्मुक्तं भवेत्तद्धि विमुक्तिदम् ॥ ५३ ॥

* कलगवपुस्तकेषु प्रत्यक्षेत्यादि निवर्तत इत्यन्तं नास्ति ।

१ ङ. च. स्वप्ने । २ ग. दर्शनम् ।

लोकवासनयेति । स्वर्गादिलोकविषया पुण्यपापप्रयुक्ता वासना लोकवासना । श्रुतशास्त्रेष्वभिनिवेशः शास्त्रवासना । देहपोषणार्थं स्त्र्यन्नपानादिवासनेति । स च प्रतिबन्धः परमेश्वरप्रसादराहित्ये कुतस्तस्मिंस्तु सति तत्त्वज्ञानेन निष्प्रत्यूहं मुक्तिः प्राप्यत इत्यर्थः । उक्तं हि—

" ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।
महाभयकृतत्राणा द्वित्राणामुपजायते " ॥

इति ॥ ५१ ॥ ५२ ॥ ५३ ॥

शिवशंकररुद्राख्यः साम्बः सत्यादिलक्षणः ।
परमात्मा हि विज्ञानप्रसादं कुरुते सदा ॥ ५४ ॥
ज्ञानप्रसादं कुरुते न विष्णुर्न पितामहः ।
न चेन्द्रो न च तिग्मांशुर्न चन्द्रो नान्यदेवताः ॥ ५५ ॥

विज्ञानप्रसादमिति । विज्ञायतेऽनेनेति विज्ञानमन्तःकरणं तस्य प्रसादो रागद्वेषादिकृतकालुष्यापनयेन नैर्मल्यापादनं तच्चाऽऽराधितः परमेश्वर एव करोति न विष्ण्वाद्याः सोपाधिका इत्यर्थः । श्रूयते हि—" ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः " इति ॥ ५४ ॥ ५५ ॥

विशुद्धमनसां नृणां विष्णुपूर्वाश्च देवताः ।
यथाधिकारं कुर्वन्ति प्रणाड्या सत्यमीरितम् ॥ ५६ ॥

ननु तर्हि विष्ण्वाद्युपासनं निरर्थकमेवेति तत्राऽऽह—विशुद्धमनसामिति । द्विविधा ह्यधिकारिणः । यज्ञदानादिभिः परमेश्वरार्पणबुद्ध्याऽनुष्ठितैः शुद्धान्तःकरणाः फलरागानुष्ठितैस्तैरेव कलुषीकृतचित्ताश्चेति । तत्र विशुद्धमनसां विष्ण्वादयः परमेश्वरप्रणाड्यैवोक्तं ज्ञानप्रसादं कुर्वन्ति न तु साक्षादित्यर्थः ॥ ५६ ॥

कलुषीकृतचित्तानां विष्णुब्रह्मपुरोगमाः ।
यथाधिकारं कुर्वन्ति प्रसादं मुक्तिसिद्धये ॥ ५७ ॥

कलुषीकृतचित्तानां तु मुक्त्यर्थं प्रसादं कुर्वन्ति । अतो न तदाराधनवैयर्थ्यमित्यर्थः ॥ ५७ ॥

अतो ज्ञानप्रसादार्थं शिवः साम्बः सनातनः ।
उपासितव्यो मन्तव्यः श्रोतव्यश्च मुमुक्षुभिः ॥ ५८ ॥

---

१ ग. मृत्यर्थं ।

शिवप्रसादेन हि भुक्तिरुत्तमा
शिवप्रसादेन हि मुक्तिरुत्तमा।
शिवप्रसादेन विना न भुक्तयः
शिवप्रसादेन विना न मुक्तयः ॥ ५९ ॥

यस्मादेवं तस्मान्मुमुक्षुभिः साक्षाज्ज्ञानप्रदः परमेश्वर एव सेव्य इत्याह—अत इति। उपासितव्य इति। सच्चिदानन्दादिरूपस्याद्वितीयस्य परशिवस्य स्वात्मैक्यज्ञानं हि परमपुरुषार्थसाधनं तच्च वेदान्तश्रवणादेव जायते। श्रवणं नाम वेदान्तमहावाक्यानां शब्दशक्तितात्पर्यावधारणं न्यायानुसंधानं च। ततः परमेश्वरः श्रोतव्यः। श्रुतस्यार्थस्यासंभावनाविपरीतभावनानिरासेन मिथ्यात्वव्यवस्थापकन्यायानुसंधानं मननम्। युक्तिभिरतथात्वेनावधृतस्य चित्तैकाग्र्येण साक्षात्करणार्थं विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहेण मनसा विषयीकरणमुपासनम्। एवं श्रवणोत्तरकालीनयोरपि मननोपासनयोरत्र प्रथमत उपादानमेतदुभयसहकृतादेव वेदान्तमहावाक्यश्रवणात्परशिवात्मैकत्वसाक्षात्कारो जायते न तु केवलश्रवणमात्रादितिज्ञापनार्थम्। अत एव—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यात्मदर्शनमुद्दिश्य श्रवणादिकं तत्साधनत्वेन श्रुतिरुपदिशति। तत्र श्रवणमेव फलोद्देशेनाऽऽग्नेयादिवत्प्रधानत्वेन विधीयते। प्रयाजादिवन्मननादिकं तदनन्तरम्। उक्तं ह्याचार्यैः—"मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां श्रवणं नामाङ्गि विधीयते" इति ॥ ५८ ॥ ५९ ॥

शिवप्रसादेन गुरुप्रसादतः
शिवप्रसादेन च शंभुशक्तितः।
विशुद्धविज्ञानदिवाकरः स्वयं
प्रदग्धपापस्य तमोविनाशकृत् ॥ ६० ॥
शिवः समस्तं परमार्थतस्तथा
शिवः समस्तं व्यवहारतोऽपि च।
इति प्रजातं यदि वेदनं नृणां
तरन्ति संसारमहोदधिं ते ॥ ६१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
ज्ञानयज्ञविशेषो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

शिवप्रसादेनेति । ईश्वरानुग्रहाद्धुर्वनुग्रहस्तस्माच्छ्रुत्यर्थावगतिस्ततश्च शंभु-भक्तिः । शं सुखमस्माद्भवतीति शंभुः परमानन्दरूपः परशिवः "एतस्यै-वाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । तद्भक्तिः सोऽहमस्मीति तत्तादात्म्यग्राहिणी ब्रह्माकारा मनोवृत्तिस्ततः सकाशादविद्या-निवृत्तिसमर्थं ज्ञानमाविर्भवतीत्यर्थः ॥ ६० ॥ ६१ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे
ज्ञानयज्ञविशेषो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः ।

सूत उवाच—

भूयोऽपि ज्ञानयज्ञं तु प्रवक्ष्यामि समासतः ।
शृणुत श्रेयसे विप्राः श्रद्धया परया सह ॥ १ ॥

[1]नन्वखण्डसच्चिदानन्दैकरसस्य मायावशात्सर्वात्मभावेन यद्द्वितीयत्वमुप-पादितं तदनुपपन्नम् । यत आत्मवद्घटपटादीनामपि सत्तासमावेशात्पारमार्थिकं सत्यत्वमस्तीति प्रत्यवतिष्ठमानान्निराकृत्याद्वितीयत्वमेव सिद्धान्तयितुमध्याय आरभ्यते—भूयोऽपीति ॥ १ ॥

घटकुड्यकुसूलादिपदार्थेषु मुनीश्वराः ।
सत्ता या भासते सैका सत्ताकारतयैव तु ।
सा विशेषेण रूपेण विभिन्नेति च केचन ॥ २ ॥

तत्रानिर्ज्ञातस्वरूपस्य परपक्षस्य निवारयितुमशक्यत्वात्तं दर्शयति—घटेति। सन्घटः सन्पटः सत्कुड्यमित्यनुवृत्तसत्शब्दव्यवहारास्पदत्वेन घटपटादिषु सर्वासु विशेषव्यक्तिष्वनुगतैकशरीरा काचित्सत्तारूपा जातिरङ्गीकार्या । यद्यपि सा सामान्याकारेणैका तथाऽपि घटपटादिविशेषाकारेण नानाकारा भवति । अत एव भाट्टा जातिव्यक्त्योस्तादात्म्यमेव संबन्धो न समवाय इति ब्रुवते ॥ २ ॥

---

१ क. ग. ङ. ननु सच्चिदानन्दैकखण्डर°।

तदसंगतमेवेति प्रवदन्ति मनीषिणः ॥ ३ ॥
विशेषरूपस्याभावाद्भेदाभावेन हेतुना ।
सति भेदे विशेषः स्यान्नाभेदे हि मुनीश्वराः ॥ ४ ॥

तदेतद्दूषयति—तदसंगतमित्यादिना । मनीषिण इति । तत्त्वविद इत्यर्थः । कुत इत्यत आह—विशेषेति । सत्ताया भेदहेतोर्घटपटादिलक्षणस्य विशेषरूपस्यैवाभावात् । ननु विशेषरूपो घटपटादिरनुभूयत एवेत्यत आह—भेदाभावेनेति । यस्मादशमेऽध्याये पारमार्थिको भेदः सर्वत्र प्रपञ्चे निरस्तोऽतः कारणाद्भेदैकार्थसमवायिनो विशेषरूपस्यासंभव इत्यर्थः । एतदेवोपपादयति—सतीति भेद इति । यदि क्वचिदपि घटपटादेः कुतश्चिद्भेदः स्याद्भेदव्याप्तविशेषत्वमपि तदैव तस्य स्यात् । न ह्येकं वस्तु स्वस्मादेव स्वयं विशिष्यते । अन्यस्मात्स्वत्वेन नास्य विशेषः । अतो भेदस्य निरस्तत्वाद्भेदेऽसति घटादिविशेषरूपत्वं परमार्थतो न घटत इत्यर्थः ॥ ३ ॥ ४ ॥

भेदाकारस्तु सत्तायाः विद्यते यदि वस्तुतः ।
भेदाकारस्तु सत्तायाः भिन्नश्चेच्छून्यतत्त्ववत् ॥
शून्यमेव भवेन्नैव भेदाकारो भवेद्द्विजाः ॥ ५ ॥

अथ सत्तायाः भेदरूपं विकल्पासहत्वेनापि दूषयितुमनुवदति—भेदाकार इत्यादिना । भिद्यत इति भेदो विशेषस्तथाविध आकारो यस्मिन्घटपटादौ स भेदाकारः । स किं सत्तायाः सकाशाद्भिन्नोऽभिन्नो वा नाऽऽद्य इत्याह—भेदेति । याऽनुस्यूता सत्ता तस्याः सकाशाद्यदि भेदाकारो घटपटादिर्भिन्नः स्यात्तदा शशविषाणवदसन्नेव भवेत् । सत्तानात्मकत्वाविशेषात् । स्यादेतद्भिन्नस्यापि घटपटादेर्विषयस्य सत्तासंबन्धात्सत्त्वं न तु तत्संबन्धः शशविषाणस्यास्तीति तत्राऽऽह—नैवेति । सत्तासंबन्धात्प्रागपि किमिदं घटादिकमसत्त्सद्वा । असच्चेदसत्त्वाविशेषाच्छशविषाणेऽपि सा संबध्नीयात् । द्वितीयेऽपि तस्य सत्ताविशिष्टत्वादेव वक्तव्यम् । तत्रापि किं सत्ता स्वात्मना विशिष्टे संबध्नीयात्सत्तान्तरेण वा । आद्ये स्वात्माश्रयत्वम् । द्वितीयेऽप्यतिप्रसङ्ग[2]वारणाय तत्सत्तान्तरमपि सत्ताविशिष्ट एवाऽऽधारे वर्तत इति वक्तव्यम् । सा चेद्विशेषणभूता सत्ता प्रथमैव तदाऽन्योन्याश्रयत्वम् । अन्यैव चेच्चक्रकापत्तिः । अथैतद्दोषपरिजिहीर्षया सत्तापरम्परा स्वी क्रियेत तदा मूलक्षयकार्यनवस्था स्यादि-

१ ख. घटपटा° । २ क. ख. ग. घ. ङपरिहाराय ।

त्येवमादिदोषग्रस्तत्वाद्भेदाकारः सत्तायाः सकाशाद्भिन्नः शशविषाणवन्नैव भवेदित्यर्थः ॥ ५ ॥

भेदाकारः स सत्ताया अभिन्नश्चेत्स सैव हि ॥ ६ ॥
भिन्नाभिन्नौ यदि स्यातां दोषद्वयसमागमः ।
तस्मात्सत्तातिरेकेण विशेषार्थो न विद्यते ॥ ७ ॥

न द्वितीय इत्याह—भेदाकार इति । यदि विशेषाकारो घटः सत्तायाः सकाशादभिन्नः स्यात्तदा तत्स्वरूपान्तर्भावात्सत्ताद्वैतमेव पर्यवस्येदित्यस्माकं समीहितसिद्धिरित्यर्थः । नन्वनयोर्भेदाभेदौ स्वी क्रियेते तत्र भेदसद्भावान्न विशेषाकारस्य सत्तान्तर्भावः । अभेदसद्भावान्न विशेषाकारस्य शशविषाणवदसत्त्वमिति भेदाभेदवादी प्रत्यवतिष्ठते तं प्रत्याह—भिन्नाभिन्नाविति । यदि सत्ताविशेषाकारौ भिन्नाभिन्नौ स्यातां तदा भेदपक्षोक्तशून्यत्वमभेदपक्षोक्तं सत्ताद्वैतं चोभयमपि तस्याऽऽपतेदित्यर्थः । तस्मादिति । यस्मादुक्तरीत्या भेदाकारो विचारासहस्तस्माद्घटपटादिरूपो विशेषार्थः सत्तातिरेकेण नैव विद्यते ॥ ६ ॥ ७ ॥

विशेषार्थप्रतीतिस्तु भ्रान्तिसिद्धा न संशयः ।
अत एका सदा सत्ता सैव ब्रह्म परात्परम् ॥
सत्ताया यदि भिन्नं चेद्ब्रह्मासत्स्यान्नृशृङ्गवत् ॥ ८ ॥

कथं तर्हि तस्य सत्त्वप्रतीतिरित्यत आह—विशेषार्थेति । अपरिच्छिन्ने सद्रूपे ब्रह्मणि मायया परिकल्पितत्वादधिष्ठानसत्त्वमेवाऽऽरोप्ये घटपटादिलक्षणे विशेषार्थेऽपि प्रतीयते सन्घटः सन्पटः सत्कुड्यमिति । यथा सर्पधारादिदोषारोपेष्वयं सर्प इयं धारेतीदमंशोऽवभासते तद्वच्छुतिरापि यदनुविद्धं यद्भासते तत्तत्र परिकल्पितमिति न्यायेन सदनुविद्धमिदं सर्वं सद्रूपे ब्रह्मणि परिकल्पितमिति दर्शयति " सद्धीदं सर्वं सत्सदिति चिद्धीदं सर्वं काशते काशते च " इति । अतो जगत्सत्यत्वप्रतीतिर्भ्रान्तिसिद्धैवेत्यर्थः । अत इति । यत एवं विशेषार्थः पारमार्थिको नास्त्यतः कारणात्सा सत्ता सर्वदैकैव भवति न तु विशेषाद्भिद्यत इत्यर्थः । ननु सत्ता नाम बह्वीषु सद्व्यक्तिष्वनुवृत्तसद्व्यवहारास्पदतयाऽवस्थितो जातिलक्षणो धर्मविशेषः । यदि धर्मिभूताः सद्व्यक्तयो न स्युः स कथं निराश्रयोऽवतिष्ठत इति तत्राऽऽह—सैव ब्रह्मेति । भवेदेवं यदि सत्ता जातिः स्यान्न तु सा जातिः । विशेषार्थाभावेन तस्या जातित्वा-

योगात् । निर्विशेषं न सामान्यमिति हि तत्त्वविदः । अतः सा सत्ता परात्परं ब्रह्मैव " सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् " इति श्रुतेस्तद्ब्रह्म सदेव । ननु सत्ता हि सतो धर्मः । यस्य गुणस्य हि भावद्रव्ये शब्दनिवेशस्तस्य भावस्त्वतलाविति स्मृतत्वादिति । नैष दोषः । सद्रूपं परं ब्रह्मैव सदेव स्वस्मिन्परिकल्पितासु बह्वीषु व्यक्तिष्वधिष्ठानतयाऽनुवृत्तत्वात्सत्तेत्युच्यते । यथैकस्यैव चन्द्रस्य जलतरङ्गोपाधिषु नानात्वे परिकल्पिते तत्र सर्वत्रानुव्यवहारबलेनानुवृत्तं चन्द्रस्वरूपमेव चन्द्रत्वं तद्वदित्यर्थः । यदा तु ब्रह्मस्वरूपसाक्षात्कारेण तदविद्यानिवृत्तौ तत्कार्यस्यापि दृश्यप्रपञ्चस्य निवृत्तिस्तदा तद्ब्रह्म सदित्युच्यते न सत्ता । अनुगन्तव्याभावेन स्वरूपस्यानुगमाभावात् । न च तद्ब्रह्मानुवृत्तम् । व्यावृत्त्यवधेरन्यस्याभावात् । तदुक्तं वार्तिककारैः—

" अव्यावृत्तानुगतं वस्तु ब्रह्मगिरोच्यते " इति ।

ननु धर्मवाचकः सत्ताशब्दः कथमेवमन्यथा क्रियते । " सदेव सोम्य " इत्यत्रापि सत्तायोगि सदिति धर्मिधर्मवाचक एव स्वीकर्तव्य इत्यत आह— सत्ताया इति । यदि सत्तायाः सकाशाद्धर्मिभूतं तद्ब्रह्म भिन्नं स्यात्तदा पूर्वोक्तभेदाकारन्यायेन तद्ब्रह्मापि नरविषाणवदसदेव भवेत्तस्मात्तत्सत्तात्मकमेव परं ब्रह्म न धर्मिधर्मभावो युक्त इत्यर्थः ॥ ८ ॥

तत्रैवं सति विप्रेन्द्रा ये पदार्था घटादयः ।
ते तु सत्तातिरेकेण न विद्यन्ते कथंचन ॥ ९ ॥

एवं विशेषार्थासत्त्वनिरूपणेन ब्रह्मणः सिद्धमद्वितीयत्वमुपसंहरति—तत्रैवमिति । यस्मात्सद्रूपे ब्रह्मणि घटपटादयोऽध्यस्तास्तस्मात्तद्व्यतिरेकेण ते न सन्तीत्यर्थः ॥ ९ ॥

ब्रह्मैवेदमिति प्राह श्रुतिरप्यतिनिर्मला ॥ १० ॥
विदुषामनुभूतिश्च तथैव हि न संशयः ।
अतः सर्वमिदं शंभुरिति वित्त विचक्षणाः ॥ ११ ॥

इत्थं प्रतिपादिते सर्वस्य जगतो ब्रह्मात्मकत्वे श्रुतिं संवादयति–ब्रह्मैवेदमिति । " ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्माद्ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् " इति । प्रागादिषु सर्वदिक्षु परामृषं यादिदं जगत्प्रसृतं भासते तत्सर्वं वरिष्ठं गुरुतमं विस्तीर्णतमं ब्रह्मैव । कारणभूतात्त-

---

१ ख. तत्तु । २ घ. °व सत्यं न क्रि° ।

स्मादतिरिक्तं किमपि नास्तीत्यर्थः । अत इति । यतः सद्रूपाद्ब्रह्मणोऽतिरिक्तं किमपि वस्तु नास्ति तत्स्वरूपे परिकल्पितत्वादतो यदिदं कार्यभूतं दृश्यं जगत्तत्सर्वं कारणभूतपरशिवस्वरूपतो न व्यतिरिच्यत इत्यर्थः ॥ १० ॥ ११ ॥

मृच्छरावादिरूपेण यथा भाति स्वभावतः ।
तथा सर्वतया भाति शिवः सर्वावभासकः ॥ १२ ॥
कटकादिविभेदेन यथा हेम प्रकाशते ।
तथा सर्वतया भाति शिवः सर्वावभासकः ॥ १३ ॥

एतदेव कार्यप्रपञ्चस्य कारणब्रह्मात्मकत्वं दृष्टान्तैरुपपादयति—मृच्छरावेत्यादिना । यथा मृद्घटशरावादिनानाकार्यात्मनाऽवभासते तथा परशिवोऽपि मायोपाधिवशात्सर्वजगदात्मना भासते । सर्वकारणब्रह्मविज्ञानात्सर्वविज्ञानं प्रतिज्ञाय तदुपपादनार्थं मृदादयो दृष्टान्तत्वेनोपात्ताः " यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इत्यादयः । बादरायणोऽपि कार्यस्य जगतः कारणब्रह्मानतिरिक्तत्वं सूत्रयामास—" तदनन्यत्वमारम्भणशब्दादिभ्यः " इति ॥ १२ ॥ १३ ॥

शुक्तिका रजताकारा यथा भाति स्वभावतः ।
तथा सर्वतया भाति शिवः सर्वावभासकः ॥ १४ ॥

ननु मृल्लोहादिषु शरावादिकार्यं नाऽऽरोप्यते किंतु तैरारभ्यते । तच्च कारणमृदादिद्रव्याद्द्रव्यान्तरं भवतीति तार्किका विप्रतिपद्यन्ते । तान्प्रति दृष्टान्तान्तरमाह— शुक्तिकेति । यथा शुक्तिका स्वाधिष्ठानचैतन्यस्य मायावशादारोप्यरजताकारेण भासते तथा परशिवोऽपि स्वाश्रितमायावशात्सर्वजगदात्मना भासत इत्यर्थः ॥ १४ ॥

स्वप्नदृक्स्वप्नरूपेण यथा भाति स्वभावतः ।
तथा सर्वतया भाति शिवः सर्वावभासकः ॥ १५ ॥

ननु शुक्तिरजतादावन्यस्मिन्नन्येनाऽऽरोप्यतेऽद्वितीये ब्रह्मणि तादृश आरोपः कथं संभवतीत्याशङ्क्य निदर्शनान्तरेणोपपादयति—स्वप्नदृगिति । यथा स्वप्नद्रष्टा तैजस आत्मोपाधिवशान्नानाविधस्वप्नपदार्थाकारो भवति तथाऽद्वितीय ईश्वरोऽपि स्वमायावशान्नानाकारजगदात्मको भवतीत्यर्थः । स्वप्नद्रष्टुः स्वप्नपदार्थात्मकत्वमाम्नायते "सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्योः रूपाणि" इति ॥ १५ ॥

अन्धकारः प्रकाशश्च यथाऽऽकाशे प्रकाशते ।
जडाजडमिदं सर्वं तथा भाति परात्मनि ॥ १६ ॥

ननु निरवयवेऽद्वितीये ब्रह्मणि चेतनाचेतनलक्षणं विरुद्धस्वभावं जगत्कथमारोपयितुं शक्यत इत्याशङ्क्य निदर्शनान्तरेणोपपादयति—अन्धकार इति । यथैकस्मिन्नेव निरवयव आकाश उपाधिवशात्परिकल्पितभेदे विरुद्धस्वभावावपि तमःप्रकाशौ युगपद्भासेते तद्वदुपाधिपरिकल्पिते परशिवस्वरूपे चेतनाचेतनविभागात्मकः प्रपञ्चोऽपि व्यवस्थितः सन्प्रकाशत इत्यर्थः ॥ १६ ॥

वीचीतरङ्गपूर्वास्तु यथा भान्ति महोदधौ ।
महदादिविशेषान्तं जगद्भाति तथाऽऽत्मनि ॥ १७ ॥

सर्वस्यापि कार्यप्रपञ्चस्य कारणमात्रावशेषे स्पष्टं निदर्शनान्तरमाह—वीचीति । महानूर्मिर्वीचिः स एव वायुवशाद्भेदैकणो यथैकस्मिन्नेव समुद्रे वीचीतरङ्गबुद्बुदाद्याकारविशेषाः प्रतीतिसमय एव भासन्ते पुनस्तत्रैव लीयन्त एवं परशिवस्वरूपेऽप्याकाशादिभूतभौतिकाद्यात्मका आकारविशेषाः स्वमायावशाद्भासन्ते तत्रैव लीयन्ते चेत्यर्थः ॥ १७ ॥

भूतानि शंभुर्भुवनानि शंभु-
र्वेनानि शंभुर्गिरयश्च शंभुः ।
स एव सर्वं न ततोऽरिक्तं
ततः स एकः परमार्थमेतत् ॥ १८ ॥
इज्यश्च यज्ञैरयमेव शंभु-
र्लभ्यश्च दानैरखिलैस्तथैव ।
जप्यश्च मन्त्रैरखिलैर्विशिष्टै-
र्मृग्यश्च देवैरमरेन्द्रपूर्वैः ॥ १९ ॥
तपोभिरुग्रैः सततं विशिष्टा
महेशमेनं परमप्रियेण ।
प्रपूजयन्त्येव मुनीन्द्रवृन्दा
नमन्ति नित्यं वचसा स्तुवन्ति ॥ २० ॥

१ घ. °स्मिन्नि°। २ ख. ग. °द्भग्नकरणो।

यस्मादेवं परशिवस्वरूपे चेतनाचेतनात्मकस्य प्रपञ्चस्य मायया परिकल्पितत्वात्तस्य सर्वस्याधिष्ठानपरशिवस्वरूपानतिरिक्तत्वं तस्मात्तस्य सर्वजगदात्मकत्वमुक्तमेव प्रपञ्चयति—भूतानि शंभुरित्यादिना । न ततोऽतिरिक्तामिति । आरोप्यस्याधिष्ठानादन्यत्वासंभवादित्यर्थः ॥ १८ ॥ १९ ॥ २० ॥

यतीन्द्रवृन्दा हृदि संनिविष्टं
गुरुप्रसादाच्च शिवप्रसादात् ।
अहंपदप्रत्ययसाक्षिभूतं
चिदात्मरूपं विदुरेनमेव ॥ २१ ॥
शिवमशेषमिदं परिपश्यतः
सकलजन्मजरामरणादयः ।
निखिललोकगतिश्च निरङ्कुशं
परमरूपतयैव विभाति हि ॥ २२ ॥
अमलबोधतया परमेश्वरं
सकलवेदवचोभिरयत्नतः ।
परमयोगबलेन च पश्यतः
कथमशेषजगत्प्रतिभा भवेत् ॥ २३ ॥

हृदि संनिविष्टमिति । " अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदि संनिविष्टः " इत्यादिश्रुतेरित्यर्थः । अहंपदप्रत्ययसाक्षिभूतमिति । अहमिति पदमहंपदं तस्माद्यः प्रत्यय आत्मगोचरान्तःकरणवृत्तिरहङ्कारारव्या तस्याः साक्षितयाऽवगतमित्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥

परमशिवमशेषं पश्यतामादिभूतं
हृदयकुहरमध्ये संचितं कर्मवृन्दम् ।
झटिति भवति दग्धं तूलवद्वह्नियुक्तं
न फलनिकरभोगप्रापणे तद्भवेच्च ॥ २४ ॥

कर्मभिः सकलैरपि लिप्यते
ब्रह्मवित्प्रवरश्च न सर्वथा ।
पद्मपत्रमिवाम्भिरहो पर-
ब्रह्मवित्प्रवरस्य तु वैभवम् ॥ २५ ॥
पुण्यपापतया यदि भासते
कर्मजातमनात्ममतिस्तदा ।
ब्रह्मरूपतयैव हि भाति चे-
द्ब्रह्मवेदनमेव तदुत्तमम् ॥ २६ ॥

परमशिवमिति । हृत्पुण्डरीकमध्ये सच्चिदानन्दरूपं परशिवं स्वात्मतया साक्षात्कुर्वतां सकलानर्थमूलभूताविद्याविनाशात्तत्कार्यभूतमनेकभवपरम्पराप्राप्तं संचितं पुण्यपापरूपं धर्माधर्मादि निवृत्तं सज्ज्ञानाग्निना दग्धं भवतीत्यर्थः । श्रूयते च—"तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवꣳ हास्य सर्वे पाप्मानः प्रदूयन्ते" इति । भगवताऽप्युक्तम्—

"यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा" इति ॥

बादरयणोऽपि परतत्त्वज्ञानात्संचितागामिकर्मणोर्विनाशाश्लेषौ सूत्रयामास "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इति । एष च दाहः प्रारब्धव्यतिरिक्तस्य कर्मणः । प्रारब्धं तु भोगेन निवृत्तं स्यात् । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये" इति श्रुतौ ज्ञानोत्तरकालमपि शरीरपातावधिपर्यन्तं विलम्बप्रतिपादनेन प्रारब्धकर्मणो भोगैकनिवर्त्यत्वप्रतिपादनात् । "अनारब्धकार्ये एव तु पूर्वे तदवधेः" इति तेनैव विशेषितत्वाच्च । अतः प्रारब्धकर्मणो भोगसमये यद्यत्पुण्यपापादिकं कर्मोपार्ज्यते तस्याश्लेषमाह—कर्मभिरिति । श्रूयते हि—"तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते" इति ॥ २४ ॥ २५ ॥ २६ ॥

---

१ क. ग. घ. ङ. च. ज. भोगादेव क्षयाद्य° ।

सर्पादिभावेन विभासमाना
रज्जुर्न सर्पादि सदैव रज्जुः ।
तद्वत्प्रपञ्चात्मतया विभाति
शिवो न विश्वं शिव एव तत्स्वयम् ॥ २७ ॥

सर्पेति । सर्पधाराद्यात्मना मायया भासमाना रज्जुः स्वयाथात्म्यज्ञानोत्तरकालं न सर्पाद्यात्मना भासते किंतु पूर्वमपीयं रज्जुरेव कदाचिदपि न सर्पादीत्येवं प्रतीयते यथैवं तद्वत्परशिवोऽप्यविद्यावशात्पूर्वं प्रपञ्चात्मतया भासमानोऽपि ज्ञानोत्तरकालं प्रागप्यसौ परशिव एव सत्यो न प्रपञ्च इति प्रतीयते । तथा च नाभूदस्ति भविष्यतीति दृश्यप्रपञ्चस्य कालत्रयेऽप्यसत्त्वसिद्धेः सिद्धं मिथ्यात्वमित्यर्थः ॥ २७ ॥

यथैव तोयात्मतया महीमिमां
नरो विजानन्नपि वेद मेदिनीम् ।
तथैव विश्वात्मतयाऽभिपश्य-
न्नपि प्रपश्यत्यमलप्रबोधम् ॥ २८ ॥

यथैवेति । 'अद्भ्यः पृथिवी' इति श्रुत्या पृथिव्या आपः कारणम् । यथा कार्यभूतां पृथिवीं कारणभूतादेकात्मना जानन्नपि तां पृथिवीं वेदैव तथा कारणभूतं परशिवं कार्यप्रपञ्चात्मतया जानन्नपि निरुपाधिकं तं पश्यत्येवेत्यर्थः ॥ २८ ॥

अतः प्रपञ्चानुभवः सदा न हि
स्वरूपबोधानुभवः सदा खलु ।
इतीव पश्यन्परिपूर्णवेदनो
न बद्धमुक्तो न च बद्ध एव तु ॥ २९ ॥

न बद्धमुक्त इति । एवं सर्वत्र प्रपञ्चे परिपूर्णं तत्त्वमेव साक्षात्कुर्वन्न बद्धमुक्तः । परशिवस्वरूपातिरिक्तस्य बन्धस्यैवाभावात् । अत एव न बद्धश्च भेददृष्टौ सत्यामेव हि बन्धमोक्षव्यवहार इत्यर्थः । तथाचोक्तम्—

" न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता " इति ॥ २९ ॥

स्वस्वरूपतया स्वयमेव स
प्रस्फुरत्यमलः परमेश्वरः ।
न प्रपञ्चविभासनमस्त्यतः
कस्यचिच्च न बन्धनमोचने ॥ ३० ॥

स्वस्वरूपतयेति । निरवद्यः स्वप्रकाशकः परशिवः प्रत्यगात्मनः स्वरूपत्वेन स्फुरति यदा तदानीमविद्यानिवृत्त्या तत्कार्यप्रपञ्चस्य बन्धहेतुकत्वाभावान्न बन्धमोचनमित्यर्थः ॥ ३० ॥

इयं हि वेदस्य परा हि निष्ठा
मुनीश्वराणामपि शंकरस्य तु ।
इतोऽन्यथा ये विदुरन्धकूपे
पतन्ति ते मोहफणीन्द्रदष्टाः ॥ ३१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे ज्ञानविशेषयोगो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

एवमुत्पन्नतत्त्वज्ञानस्य सच्चिदानन्दाखण्डैकरसब्रह्मस्वरूपेणावस्थानमेव मुक्तिः । सा च ज्ञानादेव लभ्या । तच्च ज्ञानं वेदान्तश्रवणादेवेत्येतावत्प्रतिपादितम् । तत्र विद्याफलस्य मुक्तिस्वरूपस्य स्वर्गादिफलवदतिशयित्वमाशङ्क्य निरस्यति—इयं हीति । यत्प्रत्यगात्मनोऽद्वितीयब्रह्मरूपेणावस्थानमेषैव वेदस्याभिमतोत्कृष्टाऽऽत्मनिष्ठा । "ब्रह्म वेद ब्रह्मैव भवति" "ब्रह्मविदाप्नोति परम्" "ब्रह्मैवेदममृतं पुरस्तात्" "इदं सर्वं यदयमात्मा" इत्यादिश्रुतेर्निर्विकारब्रह्मभवनरूपा मुक्तिरर्वाचीनानां मनुष्यादीनामुत्कृष्टानामृषीणां ततोऽप्युत्कृष्टस्येश्वरस्यापि समानैवेत्यर्थः । बादरायणोऽपि मुक्तेरेकरूपत्वं सूत्रयामास—"एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः" । [ब्र० सू० ३।४।५२] इति । तच्चाधिकरणमेवं संगृहीतम्—

"मुक्तिः सातिशया नो वा फलत्वाद्ब्रह्मलोकवत् ।
स्वर्गवच्च नृभेदेन मुक्तिः सातिशयैव हि ॥
ब्रह्मैव मुक्तिर्न ब्रह्म क्वचित्सातिशयं स्मृतम् ।
अत एकविधा मुक्तिर्वेधसो मनुजस्य च" इति ॥

---

१ छ. ज. 'न्धमोक्षयोश्चानवभान° । २ क. ङ. च. ज. °ष्टाऽऽत्म आत्म° । ३ क. ग. ङ. च. वा ।

एवं मुक्तिस्वरूपमनङ्गीकुर्वतो बाधमाह—इतोऽन्यथेति। श्रूयते हि—"अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः। जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः" इति ॥ ३१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकाख्यटीकायां चतुर्थे यज्ञवैभवखण्डे ज्ञानविशेषयोगो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

अथ षोडशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि ज्ञानोत्पत्तेस्तु कारणम् ।
विना येन शिवज्ञानं न जायेत कथंचन ॥ १ ॥
मुमुक्षुरतिसंतुष्टः सिध्यत्येव गतिर्मम ।
इति निश्चयबुद्धिस्तु प्रतिबन्धनिवृत्तये ॥
देवताः सकला नित्यं प्रार्थयेन्मतिमत्तमः ॥ २ ॥

एवं वेदान्तवाक्यजनितात्परशिवस्वरूपसाक्षात्कारज्ञानादेव मुक्तिर्न कारणान्तरादिति प्रतिपादितम् । तच्च ज्ञानं कथमुत्पद्यत इति तदुत्पत्तेः कारणं वक्तुमुपक्रमते—अथात इति । परशिवज्ञानस्य परमपुरुषार्थत्वात्तत्र च प्रतिबन्धकपापनिमित्तप्रत्यूहबाहुल्यात्तन्निवृत्त्यर्थं वक्ष्यमाणमित्रादिदेवताप्रार्थनं मुमुक्षुणा नित्यं कर्तव्यमित्यर्थः ॥ १ ॥ २ ॥

शं नो मित्रः शं वरुणः शं नो भवतु चार्यमा ॥ ३ ॥
शं न इन्द्रश्च वागीशः शं नो विष्णुरुरुक्रमः ॥
नमोऽस्तु ब्रह्मणे वायो नमोऽस्तु तव शोभनम् ॥ ४ ॥
त्वमेव साक्षाद्ब्रह्मासि त्वां वदिष्यामि शंकरम् ॥
ऋतं च सत्यं चाहं त्वां वदिष्यामि विशेषतः ॥ ५ ॥
तन्मामवतु कल्याणं तद्वक्तारं च शोभनम् ॥
मां भूयोऽवतु वक्तारमपि चावतु शोभनम् ॥ ६ ॥

उक्तविधप्रतिबन्धोपशमाय तैत्तिरीयोपनिषदि देवताप्रार्थनरूपमन्त्रात्मको योऽनुवाक आम्नातस्तदर्थप्रतिपत्तिसौकर्याय श्लोकेन निबध्नाति—शं नो मित्र

इत्यादिना । मित्रादयोऽस्माकं विद्याप्रतिबन्धापनयनेन शं सुखहेतवो भवन्तु । बृहस्पतिः " वागीशो बृहस्पतिः " इति श्रुतेः । उरुक्रम इति । उरु विस्तीर्णं क्रमत इत्युरुक्रमः । सर्वव्यापीत्यर्थः । मित्रादीनामन्तर्यामित्वेनावस्थितं ब्रह्म तस्मै नमोऽस्तु । वायुः क्रियाशक्त्युपाधिकः सूत्रात्मा " वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति " इति श्रुतेः । हे वायो यदपरोक्षं परं ब्रह्म तदेव त्वमसि। तस्यैव जगद्धारणसमर्थक्रियाशक्त्या च सर्वान्तरत्वात् । अतः साक्षात्परशिवस्वरूपं त्वामेव वदिष्यामि । मनसा यथार्थसंकल्पनमृतं तथाविधस्यार्थस्य वाचोच्चारणं सत्यमुभयात्मकं त्वामेव वदिष्यामि । तद्वायूपाधिकं परं ब्रह्म मामवतु रक्षतु । चकारादाचार्यं च तद्रक्षतु । मां भूय इत्यादिकमुक्तस्यैवार्थस्य दार्ढ्यार्थम् । श्रुतावपि " अवतु माम् । अवतु वक्तारम् " इत्यनेनैवाभिप्रायेण व्यतिहारेणाऽऽम्नातम् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

शान्तिः शान्तिः पुनः शान्तिर्दोषत्रयनिवृत्तये ।
कृत्वैवं प्रार्थनामात्मज्ञानार्थं पुनरास्तिकाः ॥ ७ ॥
जपेन्नित्यं गुरोर्लब्ध्वा मन्त्रं यश्छन्दसामिति ।
मे गोपायेतिपर्यन्तमत्यन्तश्रद्धया सह ॥ ८ ॥

दोषत्रयनिवृत्तय इति । आध्यात्मिकाधिदैविकाधिभौतिकदोषात्रितयनिवृत्त्यर्थं शान्तिशब्दस्य त्रिरुच्चारणं कर्तव्यमित्यर्थः । मे गोपायेतिपर्यन्तमिति । यश्छन्दसामित्यारभ्य मे गोपायेतिपर्यन्तं जपेदित्यर्थः ॥ ७ ॥ ८ ॥

संकोचो देहयात्रायां यदि ज्ञानार्थिनो भवेत् ।
उपक्षीणा भवेद्बुद्धिस्तत्र तस्य न संशयः ॥ ९ ॥
अतः संकोचहानाय विधार्थं तु दिने दिने ।
आज्येनाज्येन चोभाभ्यामावहन्नीति मन्त्रतः ॥ १० ॥
जुहुयाच्छ्रद्धया सार्धं ब्रह्मचारी गृही वनी ।
भिक्षुकस्तु जपेन्मन्त्रमनग्निः श्रद्धया सह ॥ ११ ॥

---

१ ग. व्यहा° । २ क. ख. ज. °त्यन्तं श्र° । ३ ख. °चार्थी तु ।

नित्यमाचार्यशुश्रूषां प्रकुर्याद्भक्तिपूर्वकम् ।
उत्थायोत्थाय षट् त्रीणि प्रणामं द्वादशाथ वा ॥ १२ ॥
कृत्वाऽऽचार्यं यथाशक्ति मुमुक्षुर्भुवि दण्डवत् ।
वेदान्तश्रवणं कुर्यान्मननं च समाहितः ॥ १३ ॥
नित्यं लिङ्गे महादेवं पूजयेद्भक्तिपूर्वकम् ।
शान्तो दान्तो भवेन्नित्यं विरक्तो भिक्षुको भवेत् ॥ १४ ॥
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ।
सहिष्णुश्च भवेन्नित्यं तथैकाग्रमना भवेत् ॥ १५ ॥

संकोच इति । ज्ञानार्थिनः शुश्रूषोर्यदि दारिद्र्यं स्यात्तदा देहयात्रायां तस्य बुद्धिस्तत्र परिक्षीणा स्यात् । अतस्तन्निवृत्त्यर्थमावहन्तीत्यनुवाकशेषेण प्रतिदिनमाज्येनान्नेन वा साग्निश्चेदशौ जुहुयादनग्निस्तु तान्मन्त्रान्प्रतिदिनं जपेदित्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

रुद्राक्षधारणं कुर्याद्रुद्रो रुद्राक्षधारणात् ।
प्रतिबन्धकबाहुल्याल्लज्जा नित्यं प्रजायते ॥ १६ ॥
आलप्य च क्षुते चैव तथाऽभक्ष्यस्य भक्षणे ।
अदृश्यदर्शनादौ च जपेत्प्राज्ञः षडक्षरम् ॥ १७ ॥
षडक्षराणि वर्तन्ते जिह्वाग्रे यस्य संततम् ।
संभाषणादिकं तेन कुर्यादेवाविचारतः ॥ १८ ॥
संभाषणादिकं नीचैर्न कुर्यान्मोहतोऽपि वा ।
यदि कुर्यात्प्रमादेन प्रायश्चित्ती भवेद्द्विजः ॥ १९ ॥
स्वजातिविहिताचारैरन्याचारैस्तथैव च ॥
विशिष्टा अपि नीचाः स्युर्न संभाष्या द्विजोत्तमैः ॥ २० ॥

रुद्रो रुद्राक्षधारणादिति । रुद्रस्याक्षिपरिणामी हि रुद्राक्षस्तस्यापि धारणात्स्वयमपि रुद्रो भवेदित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

---

१ ग. °जात्यवि° ।

अग्निहोत्रादिजं भस्म सितमादाय सादरम्।
अग्निरित्यादिभिर्मन्त्रैर्जाबालोक्तैश्च मन्त्रभिः[1] ॥ २१ ॥
अभिमन्त्र्य महादेवं भावयित्वा समाहितः।
भस्मना तेन सर्वाङ्गं समुद्धूल्य ततः परम् ॥ २२ ॥
तिर्यक्त्रिपुण्ड्रमुक्तेन[2] वर्त्मना मतिमत्तमः।
ललाटे च तथा स्कन्धे तथैवोरसि धारयेत् ॥ २३ ॥
चिरंतनानि स्थानानि शिवस्यामिततेजसः।
प्रतिमासं विशेषेण सेवनीयानि भक्तितः ॥ २४ ॥
शिवस्योत्सवसेवार्थं गच्छेच्छ्रद्धापुरःसरम्।
उत्सवं सेवमानस्य मुक्तिर्हस्तास्थिता भवेत् ॥ २५ ॥

अग्निरित्यादिभिरिति। तथाऽथर्वशिरसि श्रूयते—"अग्निरिति भस्म। वायुरिति भस्म। जलमिति भस्म। स्थलमिति भस्म। व्योमेति भस्म। सर्वं ह वा इदं भस्म। मन एतानि चक्षूंषि भस्मानि। अग्निरित्यादिना भस्म गृहीत्वा निमृज्याङ्गानि संस्पृशेत्" इति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

विशिष्टमन्नं भुञ्जीत चित्तशुद्ध्यर्थमात्मनः।
निर्माल्यं च निवेद्यं च विशेषेण विवर्जयेत् ॥ २६ ॥
रुद्रेण भुक्तं निर्माल्यं न तथा देवतान्तरैः।
निवेद्यं विष्णुना भुक्तमाहृतं चान्यदैवतैः[3] ॥ २७ ॥
गुरूच्छिष्टं पुरोडाशं भवत्येव न संशयः।
निर्माल्यं च निवेद्यं च भुक्त्वा चान्द्रायणं चरेत् ॥ २८ ॥
वर्णाश्रमादिहीनानां कुर्यात्सेवां न मानवः।
सह वासं न तैः कुर्यात्सह संभाषणं तथा ॥ २९ ॥
सह प्रमोदं संसृष्टिं सह पङ्क्तौ तु भोजनम्।
सहैव गमनं सख्यं सह संबन्धमेव च ॥ ३० ॥

---

१ घ. समाप्ततः। २ घ. °पुण्ड्रयुक्तं°। ३ ख. भुक्तमाहृतं। घ. भुक्तं ग्रह्यं तच्चान्य°।

देवानां च मनुष्याणां तथाऽन्येषां च लाञ्छनम् ।
न कुर्यान्मोहतो वाऽपि यदि कुर्यात्पतत्यधः ॥ २१ ॥
कस्यचिल्लाञ्छितो मर्त्यो न साक्षी सर्वथा भवेत् ।
श्रौतस्मार्तसदाचारे नाधिकारी च लाञ्छितः ॥ ३२ ॥
लाञ्छिताश्च न संभाष्या न स्पृश्याश्च तथैव च ।
न दर्शनीयास्तान्राजा देशाच्छीघ्रं प्रवासयेत् ॥ ३३ ॥

निर्माल्यं च निवेद्यं चेति । तदुक्तमागमे सर्वज्ञानोत्तरे—

"विसर्जितस्य देवस्य गन्धपुष्पानिवेदनम् ।
निर्माल्यं तद्विजानीयाद्वर्ज्यं वस्त्रविभूषणम् ॥
अर्पयित्वा तु तं भूयश्चण्डेशाय निवेदयेत्" इति ।

तथा कालोत्तरेऽप्युक्तम्—

"स्थिरे चले तथा रत्ने सिद्धलिङ्गे स्वयंभुवि ।
लोहे चित्रमये बाणे स्थितखण्डे नियामकः ॥
सिद्धान्ते नोत्तरे तन्त्रे न वामे न च दक्षिणे ।
चण्डद्रव्यं गुरुद्रव्यं देवद्रव्यं तथैव च ।
रौरवे ते तु पच्यन्ते मनसा ये तु भुञ्जते" इति ॥

एवमादिसिद्धान्तमतवचनपर्यालोचनया गन्धपुष्पादेर्नैवेद्यस्य चण्डद्रव्यत्वेन सर्वथा वर्ज्यत्वावगतेस्तं न भुञ्जीतेत्यर्थः । सिद्धान्तव्यतिरिक्तवामदक्षिणादितन्त्रान्तरमते तु यत्र चण्डाधिकारो नास्ति तत्र निर्माल्यस्वीकारेऽपि दोषो नास्तीति । तथा चोक्तम्—

"बाणलिङ्गे चरे लोहे सिद्धलिङ्गे स्वयंभुवि ।
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत् ॥
अद्वैतभावनायुक्ते स्थण्डिलेऽथ विधावपि" इति ।

तत्र शैवागमे तु सिद्धान्तस्यैव प्राबल्यात्तन्मतानुसारेण सर्वेष्वपि लिङ्गेषु सर्वथा वर्जनीयमित्यभिप्रेत्याऽऽह—विशेषेणेति ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

अकुर्वन्नपि विध्युक्तं निषिद्धं परिवर्जयेत् ॥
निषिद्धपरिहारेण विहिते लभते मतिम् ॥ ३४ ॥

---

१ ङ. °ग्रं निवा° । २ ख. स्थितं ख° । च. छ. स्थिते ख° ।

अकुर्वन्नपीति । फलरागाभावान्मुमुक्षुः "स्वर्गकामो यजेत" इत्यादिविधिवाक्योक्तं रागादिकमकुर्वन्नपि ब्राह्मणो न हन्तव्यो न कलञ्जं भक्षयेदित्यादिवाक्यैर्निषिद्धं सर्वथा परिवर्जयेदित्यर्थः । तद्वर्जनस्य फलरागप्रयुक्तत्वाभावात् । प्रत्युत निषिद्धाचरणे दोष एव रागतः प्रवृत्तिः । एवं निषिद्धपरिवर्जनेन प्रत्यवायानुदयाद्विरुद्धवासनानिरासाच्च फलप्रेप्सुनैव निर्वर्त्ये विहिते नित्यकर्मणि विषये बुद्धिं लभत इत्यर्थः । एवं विहितानुष्ठानान्निषिद्धपरिहरणाच्चान्तःकरणमालिन्यापादकं पापं नोत्पद्यत इत्यर्थः ॥ ३४ ॥

सत्याद्धर्माच्च कुशलाद्भस्मनोद्धूलनादपि ।
त्रिपुण्ड्रधारणाच्चापि स्वाध्यायाध्ययनादपि ॥ ३५ ॥

तैत्तिरीयके—"सत्यान्न प्रमदितव्यं धर्मान्न प्रमदितव्यम्" इत्यादिना यानि सत्यादीनि नित्यं मुमुक्षुभिः सेव्यानीत्याम्नातं तानि दर्शयति—सत्यादित्यादिना न प्रच्युतो भवेदित्यन्तेन । कुशलादिति । कुशलं योगक्षेमः ॥ ३५ ॥

दैवाच्च पित्र्यात्कार्याच्च मातापित्रादिपूजनात् ।
तथाऽन्येभ्यश्च कर्मभ्यः श्रौतेभ्यश्च तथैव च ॥ ३६ ॥
स्मार्तेभ्यश्च मुमुक्षुश्चेत्सदा न प्रच्युतो भवेत् ।
उक्तसाधनसंपन्नो ज्ञानाद्भस्माधिगच्छति ॥ ३७ ॥

मातापित्रादिपूजनादिति । आदिशब्देनाऽऽचार्यातिथिसंग्रहः । मातापितृपूजनानन्तरम् 'आचार्यदेवो भव । अतिथिदेवो भव' इति तत्पूजाया उक्तत्वात् ॥ ३६ ३७ ॥

शिवस्वरूपं परमं भासनाद्भस्म संमतम् ।
तदेव स्वीयमायोत्थप्रपञ्चे जलसूर्यवत् ॥ ३८ ॥
अनुप्रविष्टं तद्रूपं भस्मलेशमुदाहृतम् ।
तेन लेपेन देवेशः प्रतिबिम्बेन भस्मना ॥ ३९ ॥
स्वतन्त्रो बिम्बभूतस्तु सदैवोद्धूलितः शिवः ।
स एव पूजनीयस्तु ब्रह्मविष्णुसुरोत्तमैः ॥ ४० ॥

---

१ ध. दिक्कमाकु° २ ख. निषेध्ये हननाद्यावेव । ३ क. °लेपमु° । ४ क. ख. ग. घ. लेशेन ।

तत्प्रसादेन सर्वेषां देवत्वं न स्वभावतः ।
स्वभावादेव देवत्वं देवदेवस्य शूलिनः ॥ ४१ ॥
तं विदित्वा विमुच्यन्ते शान्ता दान्ता यतीश्वराः ।
गृहस्थाश्च तथैवान्ये सत्यधर्मपरायणाः ॥ ४२ ॥
भस्मसंछन्नसर्वाङ्गास्त्रिपुण्ड्राङ्कितमस्तकाः ।
रुद्राक्षमालाभरणाः श्रीमत्पञ्चाक्षरप्रियाः ॥ ४३ ॥
नित्यं लिङ्गार्चनपरा यज्ञाद्यैर्दग्धकल्मषाः ।
अतो ज्ञानार्थिभिर्ज्ञानसाधनानि मनीषिभिः ॥ ४४ ॥
संपाद्यानि महायासाज्ज्ञानान्मुच्येत बन्धनात् ।
ज्ञानं वेदान्तविज्ञानं ब्रह्मात्मैकत्वगोचरम् ॥ ४५ ॥

शिवस्वरूपमित्यादि । स्वप्रकाशचिदात्मतया भासमानं परशिवस्वरूपं मुख्यं भस्म । तज्जलसूर्यप्रतिबिम्बवत्प्रपञ्चेऽनुप्रविष्टं सत्प्रतिबिम्बात्मनोपेयार्थं भस्म संजातम् । प्रतिबिम्बस्य च बिम्बनिरूप्यत्वेन तत्संबन्धात् । यस्मात्सर्वदा बिम्बभूतः परशिवः प्रतिबिम्बरूपेण भस्मना लोपित एव वर्तत इत्यर्थः ॥३८॥ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

तस्माज्ज्ञातं विजानाति विमुक्तश्च विमुच्यते ।
निवर्तते निवृत्तश्च श्रुत्यर्थस्यैष संग्रहः ४६ ॥

तस्माज्ज्ञातमिति । स्वप्रकाशसाक्षिचैतन्यात्मना पूर्वमवगतमेवाऽऽत्मस्वरूपं वेदान्तवाक्यजनितेन विज्ञानेनोपाधिप्रतिहानद्वारा पुनर्विजानातीत्यर्थः । उक्तं हि —

"सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते ।
प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते" इति ॥

विमुक्तश्चेति । नित्यशुद्धबुद्धमुक्तस्वभावं हि परशिवस्वरूपं तदेव प्रागात्मनो नैजं रूपमतः स्वभावतो विमुक्त एव पश्चादप्यविद्यावशाद्बद्ध इव भासमानः स्वस्वरूपयाथात्म्यज्ञानेन पुनर्विमुच्यत इत्यर्थः । श्रुतिश्च "अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते" इति । स्वभावतो निवृत्तोऽपि संसार उपाधिवशाद्भासमानः पुनर्विद्योदयेनोपाधिप्रलयान्निवर्तत इत्यर्थः ॥ ४६ ॥

---

१ ङ. °स्माज्जातं । २ ख. घ. च. ज. °ज्ञानं वि° । ३ ङ °स्माज्जात° । ४ ख. च. °ज्ञानामि । ५ क. ग. ङ. अतो ।

अयमर्थो महादेवप्रसादरहितैर्नृभिः ।
जात्यन्धगजदृष्टयैव कोटिशः परिकल्प्यते ॥ ४७ ॥

जात्यन्धगजदृष्टयेति । यथा बहवो जात्यन्धाः संभूय गजस्य हस्तपादाद्यवयवविशेषान्स्पृशन्तस्तन्मात्र एव गजस्य साकल्यबुद्धिमासादयन्तः शूर्पस्तम्भाद्याकारतां कल्पयन्ति तथैवमुक्तविधमात्मस्वरूपमज्ञानमोहितास्तार्किकादयो बहुप्रकारं कल्पयन्तीत्यर्थः ॥ ४७ ॥

ब्राह्मणो वाऽन्त्यजो वाऽपि तथा गर्भस्थितोऽपि वा ।
महादेवप्रसादेन मुच्यते भवबन्धनात् ॥ ४८ ॥
महादेवे महानन्दे महाकारुणिकोत्तमे ।
प्रसन्ने सति कीटो वा पतङ्गो वा विमुच्यते ॥ ४९ ॥
गुरूपदिष्टो वेदार्थः संग्रहेण मयोदितः ।
मदुक्तार्थे तु विश्वासं कुरुध्वं यत्नतो द्विजाः ॥ ५० ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां ज्ञानोत्पत्तिकारण-
वर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥

गर्भास्थितो वेति । अत एवैतरेयके 'गर्भे नु सन्नन्वेषाम्' इतिमन्त्रवाक्यतात्पर्यप्रतिपादकं वाक्यमाम्नायते "गर्भ एवैतच्छयानो वामदेव एवमुवाच" इति ॥ ४८ ॥ ४९ ॥ ५० ॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकायां ज्ञानोत्पत्तिकारण-
विशेषवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि वैराग्यं दुःखनाशनम् ।
येन साक्षाच्छिवज्ञानं जायते मोक्षसाधनम् ॥ १ ॥

उक्तविधं परशिवस्वरूपविषयं वेदान्तजनितज्ञानं साधनचतुष्टयसंपन्नस्यैवेति तत्संपत्तिरादौ मुमुक्षुभिरेष्टव्या । तत्र ज्ञानयोगखण्डे दशमेऽध्याये पिण्डोत्प-

त्तिकथनेन देहधारणस्य दुःखात्मकत्वप्रतिपादनार्थं यद्वैराग्यं सूचितं तदिदानीं विस्तरेण प्रतिपादयितुमध्याय आरभ्यते—अथात इति ॥ १ ॥

प्रत्यग्ब्रह्मैकताज्ञानाद्द्वैतवस्तु समुद्गतम् ।
द्वैतवस्तुनि विप्रेन्द्राः पूर्ववासनया तथा ॥ २ ॥
आज्ञया देवदेवस्य कालपाकेन कर्मणाम् ।
शोभनाशोभनभ्रान्तिः कल्पिता परमार्थवत् ॥ ३ ॥
शोभनत्वेन संकल्पते विषये वासनाबलात् ।
इच्छा नित्यं प्रजायेत नराणां मूढचेतसाम् ॥ ४ ॥

ननु विगतो विषयगोचरो रागो यस्माद्विरागस्तस्य भावो वैराग्यं तस्य प्रतिपादनं विषयसद्भावासद्भावयोर्दुर्निरूपम् । विषयस्य पारमार्थिकत्वे हि वचनशतादपि कथं ततः पुरुषो विरज्यते । अपारमार्थिकत्वे तु विषयाभावादेवायत्नसंपन्नं वैराग्यमिति न प्रतिपादनार्हमित्याशङ्क्याऽऽह—प्रत्यगित्यादिना । जीवब्रह्मणोरेकत्वाच्छादकभावरूपाज्ञानान्मायाविद्यापरपर्यायाद्द्वैतवस्त्वात्मकं[2] जगत्समुत्पन्नम् । अविद्यापरिकल्पिते तस्मिन्द्वैतवस्तुनि जन्मान्तरशतेषु विषयोपभोगजनितया वासनया सुखदुःखफलहेतुभूतं पुण्यपापात्मकं परिपक्वं यत्कर्मेत्थमेवेति परमेश्वरस्याऽऽज्ञावशेन हेतुना किंचिद्धि शोभनं किंचिदशोभनमिति भ्रान्त्या परमार्थवत्कल्प्यत इत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥

शोभनत्वेन संकल्पः पदार्थो द्विविधः स्मृतः ।
एक ऐहिक आख्यात इतरः पारलौकिकः ॥ ५ ॥

एक इति । इह लोके विद्यमानोऽनुकूलवेदनीयः शब्दस्पर्शादिरैहिको विषयः । स एव स्वर्गादिलोकान्तरोपभोग्यः पारलौकिक इति ॥ ५ ॥

ऐहिकानिन्द्रियैरर्थान्भुङ्क्ते देही निरन्तरम् ।
पुनर्भुक्तेषु चार्थेषु तत्समानेषु मानवः ॥ ६ ॥
करोति वाञ्छामवशः कल्पनामतिमोहितः[3] ।
शोभनत्वेन यः क्लृप्तः पदार्थः पारलौकिकः ॥ ७ ॥

पुनर्भुक्तेष्विति । उक्तं हि—

---

१ घ. °कस्य प्र° । २ घ. °कं समु° । ३ ग. °मधिमो° ।

" न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते " इति ॥ ६ ॥ ७ ॥

तत्र बुद्धिं नृणां शास्त्रमुत्पादयति निश्चितम् ।
भ्रमात्तद्भोगवाञ्छा च जायते सर्वदेहिनाम् ॥ ८ ॥

ननु पारलौकिकस्य विषयस्येन्द्रियैरननुभूयमानत्वात्कथं तत्र रागसंभव इति तत्राऽऽह—तत्र बुद्धिमिति ॥ ८ ॥

दृष्टानुश्राविकद्वारा बुद्धिसंततिरात्मनः ।
कल्पिते विषये नित्यं जायते वेदवित्तमाः ॥ ९ ॥

दृष्टानुश्राविकेति । दृष्टं प्रत्यक्षेणानुभूतं सुखम् । आनुश्राविकं श्रुतिबलादवगतं सुखम् । उभयद्वारेहलोकपरलोकयोरविद्यापरिकल्पिते साधनजाते विषये च बुद्धेरुत्पत्तिर्जायत इत्यर्थः ॥ ९ ॥

तथा योऽशोभनत्वेन पदार्थः परिकल्पितः ।
इह लोके परत्रापि द्वेषस्तत्र हि जायते ॥ १० ॥

एवं वैराग्यप्रतिपादनोपयोगित्वेन पुरुषस्यैहिकामुष्मिकविषयेषु भ्रमाद्रागसंभवमुपपाद्याशोभनत्वेन परिकल्पिते वस्तुनि विभ्रमवशादेव द्वेषोऽप्युत्पद्यत इत्याह—तथा य इति ॥ १० ॥

रागद्वेषार्गलाबद्धा धर्माधर्मवशंगताः ।
देवतिर्यङ्मनुष्यादिनिरयं यान्ति मानवाः ॥ ११ ॥

रागद्वेषावेवार्गला तस्यां बद्धाः पुण्यपापात्मककर्मपारवश्यं गताः सर्वे जन्तवो देवतिर्यङ्मनुष्यादियोनिषु जन्मरूपं नरकमनुभवन्तीत्यर्थः ॥ ११ ॥

शुक्रं च शोणितं दृष्ट्वा स्पृष्ट्वा स्मृत्वा तु मानवः ।
उद्गारं कुरुते तद्धि शरीरं चेतनस्य तु ॥ १२ ॥

नन्वधर्मादेव नरकप्राप्तिर्धर्मात्तु स्वर्गादिलोकसुखानुभव इत्याशङ्क्य परशिवस्वरूपभूतसुखातिरिक्तस्य सर्वस्य वैषयिकसुखस्य दुःखात्मकत्वं प्रतिपादयितुं भोगायतनदेहादौ जुगुप्सितत्वं प्रतिपादयति—शुक्रं च शोणितमित्यादिना । पितुः शुक्रं मातुः शोणितं तदुभयं हि शरीरस्योपादानम् । तज्जातीययोः स्वदेहादन्यत्र दर्शनस्पर्शनादौ यथा जुगुप्सैवं तन्मये स्वशरीरेऽपि विवे-

---

१ क. ग. घ. ङ. च. छ. ज. 'ल्पितत्वे सा' । २ क ग. ङ. च. छ. ज. 'प.द्य शो' ।

किनो जुगुप्सैव भवति न त्वहंबुद्धिरुदेति। अविद्यावशान्मूढो जनस्त्वहं मनुष्यो ममेदं शरीरमिति चाभिमन्यत इत्यर्थः। एवमुत्तरत्र सर्वत्र योज्यम् ॥ १२ ॥

तस्मिञ्शरीरेऽहंबुद्धिं सदा कः कुरुते जनः।
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति विग्रहम् ॥ १३ ॥
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा चर्म भूमितले स्थितम्।
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ॥ १४ ॥
तथैवाऽऽत्मतयाऽग्राह्ये शरीरे चर्म यद्भवेत्।
तस्मिंश्चर्मण्यहंबुद्धिं सदा कः कुरुते नरः ॥ १५ ॥
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम्।
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा मांसं भूमितले स्थितम् ॥ १६ ॥
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात्।
तथैवाऽऽत्मतयाऽग्राह्ये देहे मांसं तु यद्भवेत् ॥ १७ ॥
तस्मिन्मांसे त्वहंबुद्धिं सदा कः कुरुते जनः।
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम् ॥ १८ ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा शिरां[1] भूमितले स्थिताम्[2]।
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ॥ १९ ॥
तथैवाऽऽत्मतयाऽग्राह्या शरीरस्था च या शिरा।
तस्यामेव त्वहंबुद्धिं सदा कः कुरुते जनः ॥ २० ॥
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम्।
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा चास्थि भूमितले स्थितम्॥ २१॥
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात्।
तथैवाऽऽत्मतयाऽग्राह्यं शरीरस्यास्थि यद्भवेत् ॥ २२ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

---

१ घ. शिरो। २ घ. स्थितम्।

तस्मिन्नेव त्वहंबुद्धिं सदा कः कुरुते जनः ।
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम् ॥ २३ ॥
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा रोमपुञ्जं भुवि स्थितम् ।
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ॥ २४ ॥
तथा देहस्थितं रोमनिचयं यद्द्विजोत्तमाः ।
तस्मिन्नेव त्वहंबुद्धिं सदा कः कुरुते जनः ॥ २५ ॥
॥ २३ ॥ २४ ॥ २५ ॥
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम् ।
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा रक्तं भूमितले स्थितम् ॥ २६ ॥
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ।
तथैवाऽऽत्मतयाऽग्राह्यं रक्तं यद्देहसंस्थितम् ॥ २७ ॥
तस्मिन्नेव त्वहंबुद्धिं सदा कः कुरुते जनः ।
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम् ॥ २८ ॥
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा पूयं भूमितले स्थितम् ।
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ॥ २९ ॥
तथैवाऽऽत्मतयाऽग्राह्यं पूयं यद्देहसंस्थितम् ।
तस्मिन्नेव त्वहंबुद्धिं सदा कः कुरुते जनः ॥ ३० ॥
॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम् ।
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा श्लेष्मराशिं भुवि स्थितम् ॥३१॥
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ।
तथैव पुरमध्यस्थे श्लेष्मराशौ विचक्षणः ॥ ३२ ॥
कः करोति त्वहंबुद्धिं मनुष्यः पण्डितोत्तमाः[1] ।
मूढोऽहंममबुद्धिभ्यामिदं गृह्णाति संततम् ॥ ३३ ॥
॥ ३१ ॥ ३२ ॥ ३३ ॥

१ ग. ङ. च छ. ज. °त्तमः ॥ मू° ।

दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा पित्तं भूमितले स्थितम् ।
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ॥ ३४ ॥
तथा देहस्थिते पित्ते हेये वेदान्तपारगाः ।
कः करोति त्वहंबुद्धिं मूढ एव करोति हि ॥ ३५ ॥
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा मूत्रं भूमितले स्थितम् ।
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ॥ ३६ ॥
तथा देहस्थिते मूत्रे हेये वेदान्तपारगाः ।
कः करोति त्वहंबुद्धिं मूढ एव करोति हि ॥ ३७ ॥
दृष्ट्वा स्पृष्ट्वा तथा स्मृत्वा पुरीषं भूतले स्थितम् ।
उद्गारं कुरुते मर्त्यः स्वयं तद्दोषदर्शनात् ॥ ३८ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

तथा देहस्थिते हेये पुरीषे मतिमत्तमाः ।
कः करोति त्वहंबुद्धिं मूढ एव करोति हि ॥ ३९ ॥
चन्दनागरुकर्पूरप्रमुखा अपि शोभनाः ।
मलं भवन्ति यत्स्पर्शात्तत्कथं शोभनं वपुः ॥ ४० ॥
भक्ष्यभोज्यादयः सर्वे पदार्थाश्चातिशोभनाः ।
मलं भवन्ति यत्स्पर्शात्तत्कथं शोभनं वपुः ॥ ४१ ॥
सुगन्धि शीतलं तोयं मूत्रं यत्संगमाद्भवेत् ।
तत्कथं शोभनं पिण्डं भवेद्ब्रूत द्विजोत्तमाः ॥ ४२ ॥
अतीव धवलाः शुद्धाः पटा यत्संगमेन तु ।
भवन्ति मलिना वर्ष्म कथं तच्छोभनं भवेत् ॥ ४३ ॥
रक्तजाः क्रिमयोऽनन्ता मांसजाः क्रिमयस्तथा ।
क्रिमिकोशमिदं वर्ष्म दुःखाय न सुखाय हि ॥ ४४ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

गर्भं तु कललावस्थं कृमिभिर्भक्षितं भवेत् ।
दुःखमेव तदा सौख्यं न किंचिदपि विद्यते ॥ ४५ ॥

कललावस्थमिति । मातुर्गर्भाशय एकरात्रोषितं शुक्रशोणितं कललम्॥४५॥

बुद्बुदाकारतापन्नं भक्षयन्ति कलेवरम् ।
क्रिमयो दुःखमेव स्यात्तदा सौख्यं न किंचन ॥ ४६ ॥
जठराग्नौ भवेत्तप्तं गर्भं मातुः सदैव तु ।
दुःखमेव तदा तस्य सुखं किंचिन्न विद्यते ॥ ४७ ॥
जठरे वायुसंचारघूर्णिते गर्भतां गतः ।
दुःखमेव तदा तस्य सुखं किंचिन्न विद्यते ॥ ४८ ॥
पुरीषमूत्रसंपूर्णे जठरे गर्भतां गतः ।
दुःखमेव सदा याति न किंचित्सुखमाप्नुयात् ॥ ४९ ॥

बुद्बुदाकारतापन्नमिति । तदेव सप्तरात्रोषितं बुद्बुदाकारम् ॥ ४६ ॥ ॥ ४७ ॥ ४८ ॥ ४९ ॥

जरायुमध्ये निश्छिद्रे निमग्नो गर्भतां गतः ।
दुःखमेव सदा याति न किंचित्सुखमाप्नुयात् ॥ ५० ॥
रौरवादिषु यद्दुःखं नरकेषु निरन्तरम् ।
गर्भे तत्कोटिगुणितं भवेद्दुःखं न संशयः ॥ ५१ ॥
गर्भे तु जायमानस्य दुःखं वक्तुं न शक्यते ।
अहो दुर्वास एवास्य गर्भवासो मुनीश्वराः ॥ ५२ ॥

जरायुमध्य इति । जरायुर्गर्भवेष्टनम् ॥ ५० ॥ ५१ ॥ ५२ ॥

बाल्ये पीडा महातीव्रा गणपीडा महत्तरा ।
पिपीलिकादिपीडा च परिहर्तुं न शक्यते ॥ ५३ ॥

गणपीडेति । बालग्रहपीडेत्यर्थः ॥ ५३ ॥

---

१ ग. सदा ।

व्याधिपीडा महातीव्रा क्षुत्पीडा च दिने दिने ।
पिपासा च महापीडा कथं यांति[1] सुखं नरः[2] ॥ ५४ ॥
अक्षरग्रहणे पीडा पीडा च पठने तथा ।
शब्दजालस्य दुःखाब्धेर्न पारो दृश्यते मया ॥ ५५ ॥
श्रौतस्मार्तसदाचारे महापीडा च दारुणा ।
निषिद्धपरिहारे च कथं याति सुखं नरः ॥ ५६ ॥
यौवने च महादुःखं स्त्रीसंसर्गे महत्तरम् * ।
स्त्रीभोगात्मकता दुःखं दुःखमेव विचारतः ॥ ५७ ॥
स्त्रीणामाराधने दुःखं तासां संरक्षणेऽपि च ।
तासां परिभवे दुःखं दुःखमेव विचारतः ॥ ५८ ॥
वस्त्रसंपादने दुःखं भूषणानां तथैव च ।
रक्षणे च तथा तेषां दुःखमेव विचारतः ॥ ५९ ॥
गृहक्षेत्रधनादीनां दुःखं संपादने तथा ।
रक्षणे च तथा दुःखं तेषामेव विचारतः ॥ ६० ॥
पुत्रमित्रादिजन्तूनां दुःखे दुःखं तथैव च ।
जन्मनाशभयाद्दुःखं दुःखमेव विचारतः ॥ ६१ ॥
राज्यभारे महद्दुःखममात्यत्वे महत्तरम् ।
दासभावे[3] महद्दुःखं दुःखमेव विचारतः ॥ ६२ ॥
वेदमार्गेतरे मार्गे निष्ठा दुःखं तथैव च ।
मार्गोत्कर्षपरिज्ञाने दुःखमेव विचारतः ॥ ६३ ॥

॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ॥ ६३ ॥

---

* एतदग्रे गचपुस्तकयोः श्लोकार्धमधिकं दृश्यते तद्यथा ' स्त्रीवियोगान्महादुःखं दुःखमेव विचारतः ' इति ।

---

१ ग. यान्ति । २ ग. नराः । ३ क. ख. °वे तथा दुःखं ।

स्वदारिद्र्ये महद्दुःखं परस्त्रीदर्शने तथा।
पैशुन्ये महद्दुःखं दुःखमेव विचारतः ॥ ६४ ॥
वायुपीडाऽग्निपीडा च तोयपीडा तथैव च।
सर्पादिदंशने पीडा दुःखमेव विचारतः ॥ ६५ ॥
भूतप्रेतपिशाचानां यक्षादीनां तथैव च।
पदप्राप्तौ महादुःखं दुःखमेव विचारतः ॥ ६६ ॥
इन्द्रलोके महादुःखं प्राजापत्ये महत्तरम्।
विष्णुलोके च रौद्रे च दुःखमेव विचारतः ॥ ६७ ॥

॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

बहुनोक्तेन किं देहेऽहंममज्ञानवान्यदि।
दुःखमेव सदा याति सुखं याति न किंचन ॥ ६८ ॥

दुःखमेव सदेति। उक्तरीत्या देहेऽहंमभिमानवतः पुरुषस्य ब्रह्मविष्णुरुद्रलोकान्ते संसारमण्डले सुखलेशोऽपि नास्ति। विचारतस्तु सर्वं दुःखात्मकमेवेत्यर्थः ॥ ६८ ॥

दुःखं दुःखात्मना किंचिज्जानाति विवशः पुमान्।
सुखात्मना च जानाति भ्रमाद्दुःखं कदाचन ॥ ६९ ॥

ननु वैषयिकं सुखमपि दुःखं चेद्दुःखमिति किमर्थं न जानातीत्यत आह—दुःखं दुःखात्मनेति। वस्तुतो दुःखमपि भ्रमवशात्सुखात्मना जानातीत्यर्थः ॥ ६९ ॥

आत्मनस्तु स्वरूपं हि सुखं नान्यद्विचारतः।
तदज्ञानबलेनैव सुखप्रेप्सा नृणां बुधाः ॥ ७० ॥

ननु रुद्रलोकावधि सर्वं दुःखात्मकं चेत्किं तर्हि सुखमित्यत आह—आत्मनास्तीति। नन्वात्मनः स्वरूपमेव स्वप्रकाशसुखात्मकं चेत्तत्परित्यज्य विषयसुखलिप्सा पुरुषस्य कुत इत्यत आह— तदज्ञानबलेनेति ॥ ७० ॥

---

१ घ. °दिदर्शने। २ ङ. °खमपि किं°। ३ ङ. °प्सावशः पुमान् ॥ ७० ॥

तदज्ञाने निवृत्ते तु प्राप्तमेति सुखं स्वतः ।
जहाति दुःखमप्राप्तं स्वतः सत्यं मयोदितम् । ७१ ॥

तदज्ञान इति । तस्मिन्नज्ञाने निवृत्ते स्वस्वरूपत्वेन पूर्वप्राप्तमेव सुखं पुनः प्राप्नोति । अज्ञानावरणेनाप्राप्तप्रायत्वात् । शुद्धबुद्धमुक्तस्वभावत्वेन प्रागप्यप्राप्तमेव दुःखमज्ञानबलात्प्राप्तमिव प्रतिभासमानं पुनर्जहाति । ज्ञानेनाज्ञानस्य निवर्तनादित्यर्थः ॥ ७१ ॥

अज्ञानस्य निवृत्तिश्च ज्ञानादेव न कर्मणा ।
ज्ञानं नाम महादेवज्ञानं वेदान्तवाक्यजम् ॥
विरक्तस्य हि संसाराज्ज्ञानं नान्यस्य कस्यचित् ॥ ७२ ॥

इत्थं वैराग्यं सप्रपञ्चं निरूप्य तस्य वेदान्तवाक्यजनितज्ञानं प्रति साधनत्वमाह—विरक्तस्येति । उक्तविधवैराग्यसंपन्नस्य सर्वविषयविक्षेपोपशमनान्निर्वातनिष्कम्पदीपसदृशेनैकाग्र्येण मनसा सूक्ष्मतत्त्वं साक्षात्क्रियते नान्यस्य विक्षिप्तचित्तस्येत्यर्थः ॥ ७२ ॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
तदा मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ ७३ ॥

अस्मिन्नर्थे प्रमाणभूतां श्रुतिमपि संगृह्णाति—यदा सर्व इति । श्रूयते हि—

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति ॥

पुरुषस्यान्तःकरणावस्थितस्य स्वर्गादिसर्वभोगविषयस्य रागजातस्य प्रविलयो यदा भवत्यनन्तरमेव स मर्त्यो मरणधर्मकादेहाद्विरक्तः संस्तस्मिन्नेव देहे ब्रह्म भवतीत्यर्थः ॥ ७३ ॥

वैराग्यहीनस्य न सत्यवेदनं
न मुक्तिसिद्धिर्न च बन्धनच्छिदा ।
न धर्मसिद्धिश्च ततः पुरातनै-
रिदं विशिष्टं कथितं कृपाबलात् ॥ ७४ ॥

१ ग. 'तिभाति न पु° । २ ख. स्थिताः ।

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
वैराग्यविचारो नाम सप्तदशोऽध्यायः ॥ १७ ॥

न च बन्धनच्छिदेति । छिदा छेदः । भिदादित्वादङ् ॥ ७४ ॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकाख्यटीकायां चतुर्थे यज्ञ-
वैभवखण्डे वैराग्यविचारो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः ।

सूत उवाच—

अथानित्यं प्रवक्ष्यामि समासेन न विस्तरात् ।
यज्ज्ञानेनैव संसारद्वैराग्यं जायते हृदि ॥ १ ॥

एवं वैराग्यस्य ज्ञानसाधनत्वं निरूप्य नित्यानित्यवस्तुविवेकस्यापि वैराग्य-
जननद्वारा ज्ञानोत्पत्तिसाधनत्वं प्रतिपादयितुं तावदनित्यं वस्तु विभजति—
अथानित्यमित्यादिना । यज्ज्ञानेनेति । ऐहिकामुष्मिकस्य विषयस्य नश्वर-
त्वेऽवगते हि नित्यनिरतिशयं स्वरूपसुखं प्राप्तुकामः पुरुषस्ततो विरज्यते ।
ततोऽनित्यत्वज्ञानात्तत्र वैराग्यं जायत इत्यर्थः ॥ १ ॥

अनात्मा जडरूपो यः स एवानित्यमुच्यते ।
अनात्मनामनित्यत्वं घटादीनां जडात्मनाम् ।
आबालपण्डितं दृष्टं यतोऽतः पण्डितोत्तमाः ॥ २ ॥

विमतो जडवर्गोऽनित्योऽनात्मत्वाद्घटवादित्याभिप्रेत्याऽऽह—अनात्मेति ।
यो जडरूपो वियदादिभूतभौतिकोऽनात्मप्रपञ्चः[स एव] घटपटादिवदनात्मत्व-
साम्यादनित्य इत्यर्थः । अनात्मत्वानित्यत्वयोर्व्याप्तिमुपपादयति—आबा-
लेति ॥ २ ॥

कार्यस्यैव ह्यनित्यत्वं वर्णयन्तीह केचन ।
न तद्युक्तमकार्यस्याप्यनित्यत्वप्रसिद्धितः ॥ ३ ॥
अकार्यस्य घटादीनां प्रागभावस्य जन्तुभिः ।
दृष्टमेव ह्यनित्यत्वं नादृष्टं पण्डितोत्तमाः ॥ ४ ॥

१ ङ. ते । ऽतोऽ° । २ क. ख. ग. घ. च. छ. ज. 'दिति त्येति । यो ।

उक्तानुमान उपाधिमाशङ्कते—कार्यस्येति । घटपटादेः कृतकत्वान्नित्यत्वं न त्वनात्मत्वात् । अतो वियदादेरनित्यत्वं कथं स्यादित्यर्थः । अयमाशयः—अनित्यत्वलक्षणे साध्ये कृतकत्वमुपाधिः । यत्रानात्मत्वं तत्र कृतकत्वमिति साधनव्याप्तिर्नास्ति । मायायां प्रागभावादिष्वनात्मत्वमस्ति कृतकत्वाभावात् । अतः साधनाव्यापकत्वं दृष्टान्ते सर्वत्र । यत्रानित्यत्वं तत्र कृतकत्वमिति व्याप्तिसद्भावात्साध्यव्यापकत्वम् । साधनाव्यापकत्वे सति साध्यस्य व्यापकत्वमिति हि तल्लक्षणम् । तस्यादनात्मकत्वान्नित्यत्वं न भवतीत्यर्थः । साध्यव्यापकत्वाभावेनोपाधिं दूषयति—न तदुक्तमिति । घटप्रागभावस्यानित्यत्वे सत्यपि तस्यानादित्वेन कृतकत्वाभावात्साध्याव्यापकत्वमित्यर्थः । अक्षरार्थस्तु कार्यत्वादेवानित्यत्वमिति यत्तन्न युक्तम् । अकार्यस्यापि क्वचिदनित्यत्वदर्शनात् । घटप्रागभावस्य हि घटोत्पत्तिनिवर्त्यस्यानित्यत्वं सर्वैरप्यनुभूयते । न चासौ कृतकस्तस्यानादित्वादिति ॥ ३ ॥ ४ ॥

भावरूपस्य कार्यत्वमनित्यत्वे प्रयोजकम् ॥ ५ ॥
अपि सर्वस्य पूर्वोक्तमनात्मत्वं प्रयोजकम् ।
दिक्कालाकाशपूर्वाणामनित्यत्वमनात्मनाम् ॥ ६ ॥
श्रुतयोऽनित्यतामेषां प्रवदन्ति हि सादरम् ।
श्रुत्यनुग्राहकस्तर्को न स्वतन्त्र इति स्थितिः ॥ ७ ॥

अथ साध्यविशिष्टोपाधेः साध्यव्यापकत्वमुपपादयति—भावरूपस्येति । भावत्वे सत्यनित्यत्वं तत्कृतकत्वं न व्यभिचरतीति साध्यव्यापकं कृतकत्वमेवानित्यत्वे प्रयोजकमित्यर्थः । एवमपि साधनाव्यापकत्वाभावेनोपाधिं दूषयति—अपि सर्वस्येति । भावत्वे सत्यनित्यत्वस्य यद्यपि कार्यत्वं प्रयोजकम् । [तथाऽपि] भावाभावात्मकस्य सर्वस्य प्रपञ्चस्यानात्मत्वादेवानित्यत्वं सेत्स्यतीत्यर्थः । अयमभिप्रायः—न तावत्कृतकत्वोपाधेः साधनाव्यापकत्वमुपपादयितुं शक्यम् । ब्रह्मस्वरूपातिरिक्तघटादिप्रागभावावियदादिषु ब्रह्मकार्यत्वश्रवणान्मायायाश्चोपाधिवादिनाऽनङ्गीकारादतोऽनात्मत्वलक्षणसाधनवतो हेतोः सर्वत्र व्याप्यवृत्तेर्न साधनाव्यापकत्वमित्यर्थः । एषां ब्रह्मकार्यत्वमेवोपपादयति—दिक्कालेति । एषां दिक्कालादीनामनात्मनामेव श्रुतयो ब्रह्मकार्यत्वप्रतिपादनेनानित्यत्वं प्रकटयन्ति ।

---

१ क. ग. ङ. छ. ज. साध्यं वि° । २ क. ग. घ. ङ. च. छ. ज. °शिष्टमुपा° । ३ ङ. ङ. अथ साधनव्यापकत्वमाह—न । ४ ङ. °षु सर्वस्य ब्र° । ५ घ. °धित्वे तत्त्वा° ।

तस्मान्नित्यत्वं नोपपद्यत इत्यर्थः । श्रूयते हि—"पद्भ्यां भूमिर्दिशः श्रोत्रात्" "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि" "कला मुहूर्ताः काष्ठाश्च, अहोरात्राश्च सर्वशः" "आत्मन आकाशः संभूतः" "इदं सर्वमसृजत यदिदं किंच" इति । एवमादीनि वाक्यानि ब्रह्मणः सकाशादिगादीनामुत्पत्तिं प्रतिपादयन्ति । ननु यद्याकाशादिकं घटादिवदनित्यं स्यात्तर्हि तदेव स्वरूपाच्यून परिमाणेन सजातीयद्रव्यान्तरेण स्थितं च स्यान्न च तथाविधमारम्भकम्[1] । सजातीयद्रव्यान्तरेणाऽऽरब्धमपि च स्यान्न च तथाविधमारम्भकं द्रव्यान्तरमस्ति । तस्मादनित्यं न भवतीत्यनित्यत्वाभावस्तर्कबलादवगम्यत इत्याशङ्क्याऽऽह—श्रुत्यनुग्राहक इति । श्रुत्यर्थानुसार्येव तर्कः प्रमाणम् । उक्तश्च तर्कस्तद्विरुद्धमेवार्थं स्वातन्त्र्येण प्रतिपादयतीति प्रमाणं न भवतीत्यर्थः ॥ ५ ॥ ॥ ६ ॥ ७ ॥

दृष्टसाम्येन वेदज्ञाः खलु तर्कोऽर्थसाधकः ॥
श्रुतिरन्यानपेक्षा हि द्विजेन्द्रा अर्थसाधिका ॥ ८ ॥

ननु तर्कस्यापि श्रुतिवत्स्वातन्त्र्येण प्रमेयव्यवस्थापकत्वं किं न स्यादित्यत आह—दृष्टसाम्येनेति । आपाद्यापादकयोर्बहुशोऽनुभूतत्वात्तत्साम्येन तर्को विप्रतिपन्नविषयेऽप्यापादको बलादापाद्यमर्थमुपस्थापयति । श्रुतिस्तु दृष्टसाम्यं विनाऽपि मानान्तरानधिगतमर्थं स्वातन्त्र्येण प्रतिपादयति । अतोऽन्यसापेक्षात्तर्कादन्यानपेक्षा श्रुतिरेवार्थव्यवस्थापिका ॥ ८ ॥

प्रत्यक्षादिप्रमाणानां पञ्चानां पण्डितोत्तमाः ॥
अगम्यं ब्रह्म धर्मश्चाधर्मः श्रुत्यैव गम्यते ॥ ९ ॥

ननु श्रुतेरपि संगतिग्रहणादौ प्रत्यक्षादिप्रमाणान्तरसापेक्षत्वादन्यानपेक्षत्वमसिद्धमित्याशङ्क्याऽऽह—प्रत्यक्षादीति । श्रुतिर्यद्यपि संगतिग्रहणादौ प्रत्यक्षादिकं प्रमाणान्तरमपेक्षते[3] ।

"शब्दो वृद्धान्विधेयांश्च प्रत्यक्षेणानुपश्यति ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टयेत्" ॥

इत्यादिना संगतिग्रहणसमये शब्दस्य तत्सापेक्षत्वस्य भट्टाचार्यैरुक्तत्वात् । तथाऽपि पदानामेव पदार्थैः संगतिग्रहणं न तु वाक्यानां वाक्यार्थे तेषामान-

---

१ ख. घ. ङ. च. ङ. ज. काष्ठाः, अ° । २ ख. घ. ङ. च. छ. ज. °म्भकं द्र° । ३ ख. ग. °माग्म° ।

न्त्याद्व्यभिचाराच्च । अतः श्रुतिवाक्यं प्रत्यक्षादिप्रमाणैरनधिगतं ब्रह्म धर्माधर्मादिकं च स्वातन्त्र्येणैव वाक्यार्थत्वेन प्रतिपादयति । न हि तादृशोऽर्थस्तर्कशतेनापि प्रतिपादयितुं शक्यः ॥ ९ ॥

अन्तरेण श्रुतिं बोद्धुं यतन्तेऽतीन्द्रियं पदम् ॥
ते करेणापि माधुर्यं जानन्त्येव सुनिश्चितम् ॥ १० ॥

ईदृग्विधे विषयेऽपि श्रुतिं विहाय प्रमाणन्तरैर्ये जिज्ञासन्ते तानुपहसति—अन्तरेणेति ॥ १० ॥

पुरा कश्चिन्महामूर्खः संगिरो नाम वाडवः ॥
पूर्वजन्मकृतात्पापाद्वेदश्रद्धाविवर्जितः ॥ ११ ॥
तर्कशास्त्ररतः साक्षाद्ब्रह्मातीन्द्रियमव्ययम् ॥
धर्माधर्मौ च तर्केण केवलेन मुनीश्वराः ॥ १२ ॥
अक्लेशेन परिज्ञातुमकरोद्यत्नमुत्तमम् ॥
तर्को नानाविधस्तस्य प्रतिभातो मुनीश्वराः ॥ १३ ॥
तेन मोहावृतः सद्यः संगिरो मुनिपुंगवाः ॥
चकार दीक्षां पाषण्डमार्गे[1] श्रद्धापुरःसरम् ॥ १४ ॥

इत्थं श्रुत्यर्थाविरोधिस्वतन्त्रतर्कस्य पुरुषार्थव्यवस्थापकत्वाभावमभिधायाथ तस्य प्रत्युतानर्थहेतुत्वज्ञापकमितिहासमुपपादयति—पुरा कश्चिदित्यादिना ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

पुनस्तर्कप्रतिष्ठानात्संगिरोऽतीव मोहितः ॥
चकार दीक्षां पाषण्डविशेषेषु यथारुचि ॥ १५ ॥

पुनस्तर्कप्रतिष्ठानादिति । आगमनिरपेक्षस्य शुष्कतर्कस्य पुरुषोत्प्रेक्षामूलत्वात्तस्याश्रानवस्थितत्वात्तन्मूलस्तर्कोऽप्यनवस्थित इत्यर्थः । उक्तं हि—

"यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते" इति ॥ १५ ॥

पुनस्तर्कप्रतिष्ठानान्मायया परिमोहितः ।
त्यक्त्वा पाषण्डमार्गं च चचार च यथारुचि ॥ १६ ॥

---

१. ध. पाखण्डमार्गे ।

पुनर्मोहावृतः साक्षात्स्वसारं मातरं तथा ।
गत्वा ममार कालेन संगिरः सोऽहंसी द्विजः ॥ १७ ॥
अत्युग्रा अतिसंनद्धा यमदूता भयंकराः ।
संगिरं तु समादाय शीघ्रं विप्रा यमं ययुः ॥ १८ ॥
यमस्तं संगिरं क्रुद्धो विलोक्याऽऽह भयंकरम् ।
यथाशक्ति भटा एष पीड्यतां मम संनिधौ ॥ १९ ॥
इति प्राह यमः सोऽपि संगिरो यमकिंकरैः ।
अतीव पीडितो विप्रा अभवच्च विचेष्टितः ॥ २० ॥
पुनश्च तीक्ष्णया वाचा यमः प्राह सुदारुणम् ।
भियतां संगिरो दुष्टश्छियतां दह्यतामयम् ॥ २१ ॥
इक्षुयन्त्रादिषु ह्येष पीड्यतामनिशं भटाः ।
अन्यैर्नानाविधैः क्रूरैरुपायैः पीड्यतामिति ॥ २२ ॥
संगिरो यमदूतैश्च क्रमेण नरकार्णवे ।
यन्त्रैर्नानाविधैरन्यैरुपायैरतिदारुणैः ॥ २३ ॥
अतीव पीडितो विप्रा अभवत्कोटिवत्सरम् ।
पुराकृतमहापुण्यपरिपाकबलेन च ॥ २४ ॥
प्रसादादेव रुद्रस्य शिवस्य परमात्मनः ।
अकस्मादागतस्तत्र महातेजा महामतिः ॥ २५ ॥
शंभुभक्तः शतानन्दो नाम्ना शंभुरिवापरः ।
स पुनः पीड्यमानं तं विलोक्य करुणाबलात् ॥ २६ ॥
प्राहों नमः शिवायेति मन्त्रराजं षडक्षरम् ।
तदैव नरकः साक्षात्स्वर्गलोकोऽभवद्द्विजाः ॥ २७ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ ॥ २५ ॥ २६ ॥ २७ ॥

---

१ घ. सहसा । २ घ. °हसद्द्विजः ।

पुष्पवृष्टिरभवत्सुमङ्गला
सिद्धयक्षमुनयः सनातनाः ।
तत्र नृत्तमतिशोभनं मुदा
चक्रुरग्निविमला विचक्षणाः ॥ २८ ॥
नृत्तगीतमुखरा अपि द्विजा
अप्सरोभिरतिशोभनाः सह ।
यक्षकिंनरपुरःसरा भृशं
नृत्तगीतसुखभोगिनोऽभवन् ॥ २९ ॥
देवैरशेषैरमराधिपः स्वयं
सह प्रमोदेन ननर्त शोभनम् ।
प्रजापतिश्चापि ननर्त भार्यया
श्रिया च विष्णुः सह मोदसंयुतः ॥ ३० ॥
यमोऽतिभीतः परमेश्वराज्ञया
प्रवर्तमानश्च कृताञ्जलिर्द्विजाः ।
सह स्वकीयैरपि कम्पितः स्वयं
बहुप्रणामं शिवशङ्क्याऽकरोत् ॥ ३१ ॥
यमं शतानन्दसमाह्वयो मुनि-
र्विलोक्य भीतं कृपयैव केवलम् ।
विमुञ्च भीतिं यम शंकराज्ञया
प्रवर्तमानेति वचः सुखावहम् ॥ ३२ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

---

१ क. °ला यक्षसिद्धयु° ।

अब्रवीदशुभप्रतिभापहः
शुद्धबोधसुखवस्तुनि स्थितः ।
तद्वचःश्रवणभग्नसंशयो
निर्भयश्च तरसाऽभवद्यमः ॥ ३३ ॥
पुनः शतानन्दसमाह्वयो मुनि-
र्यमं समाहूय समस्तसंनिधौ ।
इदं बभाषे वचनं सुखावहं
समस्तलोकस्य मुनीश्वरेश्वरः ॥ ३४ ॥

शतानन्द उवाच—

विष्णुप्रजापतीन्द्रादिदेवताभ्यो महेश्वरम् ।
विशिष्टं यो विजानाति तं त्वं परिहर प्रभुम् ॥ ३५ ॥
शिवरुद्रादिशब्दं यो विशिष्टं वेद मानवः ।
नारायणादिशब्देभ्यस्तं त्वं परिहर प्रभुम् ॥ ३६ ॥
उमया सहितां शुद्धां त्रिनेत्रां चन्द्रशेखराम् ।
परस्य मूर्तिं यो वेद तं त्वं परिहर प्रभुम् ॥ ३७ ॥
समस्तजगतो मूलं समस्तस्यावभासकम् ।
यो वेदाऽऽत्मतया नित्यं तं त्वं परिहर प्रभुम् ॥ ३८ ॥
त्रिपुण्ड्रं भस्मना स्कन्धे ललाटे च तथा हृदि ।
यो दधाति महाप्रीत्या तं त्वं परिहर प्रभुम् ॥ ३९ ॥
अग्निरित्यादिभिर्मन्त्रैर्भस्मनैवावगुण्ठितम् ।
यः करोति स्वकं देहं तं त्वं परिहर प्रभुम् ॥ ४० ॥
नित्यं लिङ्गे महादेवं साक्षात्संसारमोचकम् ।
आराधयति यो मर्त्यस्तं त्वं परिहर प्रभुम् ॥ ४१ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

रुद्राक्षं त्रीणि[1] षड्वैकं[2] परया श्रद्धया सह ।
दधाति नित्यं यो मर्त्यस्तं त्वं परिहर प्रभुम् ॥ ४२ ॥
शान्तिदान्त्यादिसंयुक्तः शंकरे भक्तिसंयुतः ।
यः सर्वकर्मसंन्यासी तं त्वं परिहर प्रभुम् ॥ ४३ ॥
वेदान्तश्रवणं नित्यं मननं चिन्तनं तथा ।
यः करोति महाप्रीत्या तं त्वं परिहर प्रभुम् ॥ ४४ ॥
वेदवेदान्तनिष्ठस्य गुरोः शुश्रूषणे रतः ।
यः करोतीह शुश्रूषां तं त्वं परिहर प्रभुम् ॥ ४५ ॥
यज्ञदानतपोहोमस्वाध्यायाध्ययनादिभिः[3] ।
यो रुद्रं यजते प्रीत्या तं त्वं परिहर प्रभुम् ॥ ४६ ॥
श्रौतस्मार्तसदाचारैरन्यैरपि शिवार्चनम् ।
यः करोति महाप्रीत्या तं त्वं परिहर प्रभुम् ॥ ४७ ॥
उत्कर्षं सर्वदेवेभ्यः शिवस्य परमात्मनः ।
यो न वक्ति सदा प्रीत्या तं त्वं घातय दुर्जनम् ॥ ४८ ॥
महादेवसमं विष्णुं ब्रह्माणं चान्यमेव वा ।
मनुते यः स्वमोहेन तं त्वं घातय दुर्जनम् ॥ ४९ ॥
श्रौतस्मार्तसदाचाराञ्श्रद्धयैव दिने दिने ।
यो नाऽऽचरति मोहेन तं त्वं घातय दुर्जनम् ॥ ५० ॥
मानुषं दैविकं चान्यत्स्वशरीरेऽङ्कनं नरः ।
यः करोति भ्रमाद्वाऽपि तं त्वं घातय दुर्जनम् ॥ ५१ ॥
ऊर्ध्वपुण्ड्रं त्रिशूलं वा वर्तुलं यस्तु वैदिकः ।
दधाति मोहतो वाऽपि तं त्वं घातय दुर्जनम् ॥ ५२ ॥

॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ॥ ५१ ॥ ५२ ॥

---

१ ग. °णि वा चैकं । २ च. छ. षट्कैकं । ३ ख. °तपःकर्मस्वा° । ४ ज. °याध्यापना° ।

अश्रौताचारसंपन्नः श्रौताचारपराङ्मुखः ।
गुरुद्रोही च यो मर्त्यस्तं त्वं घातय दुर्जनम् ॥ ५३ ॥
उत्कर्षं वेदमार्गस्य यो न जानाति मानवः ।
वेदादन्यस्य चोत्कर्षं तं त्वं घातय दुर्जनम् ॥ ५४ ॥

सूत उवाच—

एवमुक्त्वा मुनिः श्रीमाञ्शतानन्दसमाह्वयः ।
कैलासमगमद्भद्रं तत्र स्तोतुं कुतूहलात् ॥ ५५ ॥
यमोऽपि संगिरं विप्राः समाहूयाऽऽदरेण च ।
विनैव वेदं तर्कस्य केवलस्य परिग्रहात् ॥ ५६ ॥
त्वया भुक्तं महादुःखमप्रसह्यमनेकशः ।
पुराकृतेन पुण्येन महादेवप्रसादतः ॥ ५७ ॥
षडक्षरमहामन्त्रश्रवणाच्च तथैव च ।
दुःखादपि विनिर्मुक्तस्त्वं महात्मन्सुखप्रदम् ॥ ५८ ॥
ब्राह्मण्यं प्राप्य वेदस्य विदित्वा वैभवं पुनः ।
तदुक्तं धर्ममास्थाय पुनर्वेदान्तवाक्यजम् ॥ ५९ ॥
शिवज्ञानमवाप्याऽऽशु विमुक्तो भव बन्धनात् ।
इत्युक्त्वाऽऽशु यमः श्रीमानगमत्स्वपुरं प्रति ॥ ६० ॥
अतो वेदोदितो ह्यर्थः सम्यगर्थः सुनिश्चितः ।
तर्कसिद्धोऽतिदुःस्थोऽर्थः प्रत्यवायस्य कारणम् ॥ ६० ॥
बहवः केवलं तर्कं समाश्रित्य विना श्रुतिम् ।
रौरवादिषु संतप्ता अभवन्वेदवित्तमाः ॥ ६२ ॥
हैतुकैः[1] सह वासश्च सह पङ्क्तौ तु भोजनम् ।
स्पृष्टिस्तेषां नराणां तु नरकाय न संशयः ॥ ६३ ॥

॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥
॥ ६२ ॥ ६३ ॥

---

१ ज. ततः ।

हैतुकस्तु महापापी महापातकिना समः ।
न तस्य निष्कृतिस्तस्माद्धैतुकं परिवर्जयेत् ॥ ६४ ॥

॥ ६४ ॥

तस्माद्वेदोदितेनैव प्रकारेण विचक्षणः ।
विजानीयादनात्मानमनित्यमिति निश्चितम् ॥ ६५ ॥

तस्मादिति । यस्माच्छुष्कतर्केणावधृतोऽर्थ उक्तरीत्या महादुःखहेतुस्तस्मादेव वाक्योक्तप्रकारेणैव वियदादिकं सर्वमनात्मप्रपञ्चमनित्यमिति विजानीयात् ॥ ६५ ॥

आत्मनोऽन्यस्य सर्वस्य यदनित्यत्ववेदनम् ।
तद्धि संसारवैराग्यजनकं नापरं द्विजाः ॥ ६६ ॥
विरक्तस्य हि संसारात्किमन्यत्काङ्क्षितं भवेत् ।
वैराग्ये सति संसारात्सर्वदुःखं न विद्यते ॥ ६७ ॥
रागेणैव हि संसारमहादुःखं तु देहिनाम् ।
विरक्तस्य न रागोऽस्ति ततो वैराग्यतः सुखम् ॥ ६८ ॥
तस्माद्वैराग्यलाभाय चराचरमिदं जगत् ।
अनित्यमिति जानीयादनात्मानमशेषतः ॥ ६९ ॥

तस्य चानित्यत्ववेदनस्य वैराग्यजननद्वारा निःशेषदुःखनिवृत्तिनिरतिशयानन्दाभिव्यक्तिलक्षणहेतुत्वमाह—आत्मनोऽन्यस्येत्यादिना ॥ ६६ ॥ ६७ ॥ ॥ ६८ ॥ ६९ ॥

घटादीनामनित्यत्वं स्वत एव प्रकाशते ।
गृहप्रासादपूर्वाणामपि वेदविदां वराः ॥ ७० ॥
पुत्रमित्रकलत्रादिभोगो विद्युदिव स्वतः[1] ।
विनश्यति महामोहान्नित्यं तं मनुते जनः ॥ ७१ ॥
मण्डलाधिपतिर्मर्त्यो महाभोगसमन्वितः ।
विनाऽऽधिपत्यं तत्तूष्णींभूतो दृष्टः स्वभावतः[2] ॥ ७२ ॥

१ ग. घ. °हसा° । २ ख. घ. ङ. स्थितः ।

तथा राजा महाभूमेः स्वयमेकोऽधिपः सुखी ।
विना राज्यसुखं दुःखी दृष्टः सर्वजनैरपि ॥ ७३ ॥
एवं सत्यपि मोहान्धतमसा परिवेष्टितः ।
ईहते सुखभोगाय त्वहो मोहस्य वैभवम् ॥ ७४ ॥

इत्थमनात्मत्वहेतुना जडप्रपञ्चस्य सामान्येनानित्यत्वं प्रतिपाद्य विशेषतोऽपि प्रतिपादयति—घटादीनामित्यादिना ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥

परलोकसुखं चापि कर्मणा साध्यते यतः ।
अतस्तदपि विप्रेन्द्रा नश्यत्येव न संशयः ॥ ७५ ॥

ऐहिकसुखवत्स्वर्गादिब्रह्मलोकान्तस्य पारलौकिकसुखस्याप्यनित्यत्वं प्रतिपादयति—परलोकेति । यागहोमादिक्रियासाध्यत्वात्स्वर्गलोकादिसुखमपि लौकिकक्रियासाध्यरूयन्नपानाद्युपभोगसुखवदनित्यमेवेत्यर्थः । श्रूयते हि—" तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते " इति ॥ ७५ ॥

महाभूमिरियं नष्टा भविष्यति महोदधौ ।
प्रलये तद्गता लोका अपि नश्यन्ति सर्वथा ॥ ७६ ॥
समुद्राः सप्त विप्रेन्द्रा नश्यन्ति वडवानले ।
वडवा च महावह्नौ वह्निर्वायौ विनश्यति ॥ ७७ ॥
वायुर्नश्यति चाऽऽकाशे तथाऽऽकाशः स्वकारणे ।
शब्दादीनि च भूतानि नश्यन्त्येव न संशयः ॥ ७८ ॥
भूतानामपि नाशेन भौतिकान्यखिलान्यपि ।
नश्यन्त्येव स्वभावेन किं नित्यं गम्यतेऽनघाः ॥ ७९ ॥

अथ वियदादिक्रमेण सृष्टानां भूतानां विपरीतक्रमेण स्वस्वकारणेषु लयमाह—महाभूमिरित्यादिना । विद्यमान एव कारणे भोक्तृणामदृष्टवशात्कार्यस्य तत्र लयात् । न तु कारणद्रव्यनाशात्कार्यद्रव्यनाश इति वैशेषिकाद्यभिमतक्रमो युक्त इत्यर्थः । कारणप्राप्तिर्हि कार्यस्य नाशो नाम मृत्कार्यस्य घटादेर्ध्वंसे पुनर्मृद्भावापत्तेर्दृष्टत्वात् । अतो विपरीतक्रमेणैव लयो न तु सृष्टिक्रमेणेत्यर्थः । स्मर्यते च—

" जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
आपो ज्योतिषि लीयन्ते तेजो वायौ प्रलीयते ॥
वायुः प्रलीयते व्योम्नि तदव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्म निष्कले संप्रलीयते " इति ॥

बादरायणोऽपीममर्थमसूत्रयत्—"विपर्ययेण तु क्रमोऽत उपपद्यते च" इति । शब्दादीनां कारणानि शब्दतन्मात्राद्यात्मकान्याकाशादिसूक्ष्मभूतान्यपि विपरीतक्रमेण प्रलीयन्त इत्यर्थः ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥

ब्रह्मान्ताः स्तम्बपूर्वाश्च चेतना विविधा अपि ।
नश्यन्त्येव स्वभावेन किं नित्यं गम्यतेऽनघाः ॥ ८० ॥
विष्णुर्विश्वजगद्योनिः प्रादुर्भावैः स्वकैः सह ।
विनाशं प्रलये याति किं नित्यं गम्यतेऽनघाः ॥ ८१ ॥
अतः साक्षात्स्वयंज्योतिःस्वभावः परमेश्वरः ।
एक एव द्विजा नित्यस्ततोऽन्यत्सकलं मृषा ॥ ८२ ॥
अनात्मभूतं सकलं जडात्मकं
मृषेति पश्यञ्श्रुतितश्च युक्तितः ।
क्रमेण शंभुं सततोदितं प्रभुं
प्रयाति सत्यं परिभाषितं मया ॥ ८३ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डेऽनित्यवस्तुविचारो नामाष्टादशोऽध्यायः ॥ १८ ॥

ब्रह्मान्ता इति । स्तम्बप्रभृतिचतुर्मुखान्ता ये जीवास्तेऽपि भूतकार्यस्वस्वोपाधिविलयेन लीयन्त इति नाऽऽत्यन्तिको विलयस्तथा सत्यागामिनि कल्पे पुनरन्येषामुत्पत्तौ कृतनाशाकृताभ्यागमप्रसङ्गात् । अतो वासनाशेष एव जीवोपाधिप्रलय इत्यभिप्रायः । एक एवेति । निरुपाधिकः परशिव एक एव परमार्थः । ब्रह्मविष्ण्वादिकः सर्वोऽपि सोपाधिकत्वान्मृषैवेत्यर्थः ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डेऽनित्यवस्तुविचारो नामाष्टादशोऽध्यायः ॥ १८ ॥

---

१ घ. तिर्विली' । २ ज. 'ते द्रुवाः ॥ ८१ ॥ अ° । ३ ज. 'षजी° ।

अथैकोनविंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि नित्यं वस्तु समासतः ।
यज्ज्ञानेन शिवज्ञानं जायते सुदृढं द्विजाः ॥ १ ॥

आत्मव्यतिरिक्तस्य भोक्तृभोग्यात्मकप्रपञ्चस्यानित्यत्वं प्रतिपाद्य संभवच्छङ्कानिरासेन नित्यत्वमात्मनः प्रतिपादयितुमध्याय आरभ्यते—अथात इति । यज्ज्ञानेनेति । यस्य नित्यवस्तुनो ज्ञानाच्छिवज्ञानं जायते तदनन्यत्वादित्यर्थः ॥ १ ॥

य आत्मा केवलः शुद्धो निर्विकारो निरञ्जनः ।
स एव नित्यश्चिन्मात्रः साक्षी सर्वस्य सर्वदा ॥ २ ॥

किं तन्नित्यवस्तु तदाह—य आत्मेति । निरञ्जनः । अञ्जनं मायातत्कार्यजातम् । यतस्तद्रहितोऽतो निर्विकारः सर्वविक्रियारहितः । अत एव शुद्धो निर्मलः । आत्मा सर्वप्रत्यग्भूतः । य एवंलक्षणः स एव नित्यः । एवंभूतस्य तस्य पारोक्ष्यं व्यावर्तयति—साक्षीति । यतः स आत्मा चिन्मात्रस्वरूपोऽतः सर्वदाऽतीतानागतादिसर्वेष्वपि कालेषु सर्वस्यापि साक्ष्यजातस्य साक्षी साक्षाद्द्रष्टा । उक्तरीत्याऽनित्यत्वं जडप्रपञ्चस्यैव न तु तत्साक्षिचैतन्यस्येत्यर्थः । ॥ २ ॥

अनित्यता जडस्यैव न चिद्रूपस्य वस्तुनः ।
अनित्यता चितः कैश्चिन्न दृष्टा खलु सुव्रताः ॥ ३ ॥

कुत इत्यत आह—अनित्यतेति । कैश्चिदपि साक्षिचैतन्यस्यानित्यत्वं च न दृष्टं तद्दर्शनसमयेऽपि तद्द्रष्टृत्वेन साक्षिणः सद्भावावश्यंभावादित्यर्थः । एतत्स्वयमेवाग्रे प्रतिपादयिष्यति ॥ ३ ॥

घटादिप्रत्ययस्यापि नानित्यत्वं विचारतः ।
चित्तवृत्तिनिमित्ता हि प्रतीतिः प्रत्ययस्य तु ॥ ४ ॥

ननु मा भूत्साक्षिचैतन्यस्यानित्यत्वं तज्जातीयस्यायं घट इत्यादिविषयगोचरज्ञानस्यानित्यत्वं दृश्यत इत्याशङ्क्याऽऽह—घटादीति । विचारतः परमा-

१ ग. °र्वप्रग्भू° । २ ख. घ. °वात् । ए° । ३ घ. ङ. च. तज्जन्यस्या° । ४ ग. परं घटपटा° ।

र्थतो निरूपणे घटादिगोचरस्य विज्ञानस्यानित्यत्वं नास्त्येवेत्यर्थः । नन्वयं घट इत्यादिज्ञानोदयसमये तत्पूर्वभावि घटगोचरं ज्ञानं नानुवर्तते कथं तस्य नित्यत्वमित्यत आह—चित्तवृत्तीति । चित्तं सत्त्वपरिणामरूपमन्तःकरणं तस्यार्थेन्द्रियसंप्रयोगवशाद्या घटादिविषयाकारा वृत्तिस्तस्यां यदनित्यत्वं तदेव तदभिव्यक्ते चैतन्येऽपि प्रतीयते स्फटिके जपाकुसुमलौहित्यवन्न तु परमार्थत इत्यर्थः ॥ ४ ॥

प्रत्यये तु चिदाकारो वृत्त्याकारश्च सुव्रताः ।
विद्यते मोहमाहात्म्यादेकाकारावभासनम् ॥ ५ ॥

भवेदेवं यद्ययं घट इत्यादौ ज्ञाने स्फटिकजपाकुसुमादिवद्वृत्त्याकाराश्चिदाकारश्चेति विविक्तमाकारद्वयमनुभूयेत न तथाऽनुभूयत इत्यत आह—प्रत्यय इति । यद्यपि परमार्थतो विविक्तमेवाऽऽकारद्वयं तथाऽप्यविद्यावशादग्न्ययःपिण्डवदेकाकारमेवावभासत इति तत्रैकाकारो भ्रम इत्यर्थः ॥ ५ ॥

भावांशः करणांशश्च विद्यते प्रत्ययेऽपि च ।
भावांशस्तु चिदाकारो वृत्त्यंशः करणांशकः ॥ ६ ॥

एतदेवाऽऽकारद्वयमुपपादयति—भावांश इति । प्रतीयतेऽनेनेति प्रत्ययः । " एरच् " इति करणार्थेऽच्प्रत्ययः । एवं प्रत्ययशब्दस्य प्रकृतिप्रत्ययात्मकत्वात्तदर्थोऽपि प्रत्ययार्थ इति द्विधा भिन्न इत्यर्थः । तत्र यो भावांशो धात्वर्थभागः स चिदाकारः । यस्तु प्रत्ययार्थः स करणांशः सोऽनित्योऽचिद्वृत्त्याकार इत्यर्थः ॥ ६ ॥

वृत्त्यंश एव नष्टस्तु जडत्वात्कुम्भवस्तुवत् ।
चिदंशो नैव नष्टः स्याद्दृष्टत्वात्तु केनचित् ॥ ७ ॥

अस्त्वेवं प्रत्ययस्याऽऽकारद्वैविध्यम् । तत्र करणांशस्यानित्यत्वं न तु प्रतीतेरित्यत्र किं विनिगमनकारणमित्यत आह—वृत्त्यंश इति । अन्तःकरणपरिणामरूपो वृत्त्यंशो जडत्वाद्घटवदनित्यः । न तु चिदंशः । तन्नाशस्य केनापि द्रष्टुमशक्यत्वान्नाशसाक्षितयाऽपि चितोऽवगतेरित्यर्थः ॥ ७ ॥

अत्रापि ज्ञप्तिमात्रस्य विनाशो नैव दृश्यते ।
वृत्तिग्रस्तस्य भावस्य खलु नाशः प्रकाशते ॥ ८ ॥

---

१ घ. च. ज. °मस्तस्या । २ ख. घ. ङ. च. ज. °स्या एवानि° । ३ घ. च. ज. °दौ ज्ञ° । ४ ग. घ. ज. °चिदाका° । ५ च. प्रवर्तते । ज. प्रतीयते ।

नन्वयं घट इति ज्ञानं पटज्ञानसमये नास्ति यतस्तन्नाशोऽनुभूयत एवेत्यत आह—अत्रापीति । विषयाकारवृत्तिविशिष्टज्ञानस्यैव विशेषणभूतवृत्तिनाशान्नाशः प्रतीयते तथा विशेषणभूतदण्डनाशे दण्डित्वनाशः । विशेष्यभूतज्ञप्तिमात्रस्य तु देवदत्तस्वरूपवन्नाशो नैव भवेदित्यर्थः ॥ ८ ॥

अतो नाशप्रतीतिस्तु भ्रमो भावांशकस्य तु ।
चित्तवृत्तावभिव्यक्तं चिदाकारं विमोहिताः ॥ ९ ॥
जातमित्यभिमन्यन्ते न विद्वांसः कदाचन ।
वृत्तिनाशेन वृत्तिस्थं चिदाकारं मुनीश्वराः ॥ १० ॥

यस्मादेवं विचारतो धात्वर्थस्य प्रतीत्यंशस्य विनाशो नास्त्यतः कारणात्तत्र विनाशप्रतीतिर्नाशवद्वृत्तितादात्म्याध्यासादेवेत्यर्थः । नन्वात्ममनःसंयोगादसमवायिकारणादात्मनि समवायिकारणे ज्ञानं जन्यते तच्चाऽऽशुतरविनाशीति वैशेषिकादयः संगिरन्ते तेषां किं मूलमित्याशङ्क्याऽऽह—चित्तवृत्ताविति । विषयसंप्रयोगानन्तरं तदाकारान्तःकरणवृत्तौ जातायां तदभिव्यक्तं चैतन्यमप्यनाद्यविद्यापरिमोहिता जातमित्यभिमन्यन्ते न तु विशेषज्ञाः ॥ ९ ॥ १० ॥

अनभिव्यक्ततोऽज्ञानान्नष्टमेवेति मन्वते ।
अतश्चैतन्यमात्रस्य नास्त्यनित्यत्वमास्तिकाः ॥ ११ ॥

एवं भ्रमवशादेव भावांशकरणांशयोर्विवेकापरिज्ञानात्करणांशवृत्तिनाशे तदवच्छिन्नचैतन्यस्यापि तेषां नाशप्रतिभास इत्यर्थः ॥ ११ ॥

ज्ञाताज्ञातार्थजातस्य यः साक्षी भासते स्वयम् ।
स एव साक्षाच्चिन्मात्रस्वभावात्मा न चापरः ॥ १२ ॥

यद्येवमयं घट इत्यादिप्रत्ययेषु चिन्मात्रस्य नाशो नास्ति तर्हि तेनैवाऽऽत्मनोऽद्वितीयत्वं विहन्यत इत्यत आह— ज्ञाताज्ञातेति । ज्ञातं ज्ञानेन विषयीकृतम् । अज्ञातमज्ञानक्रोडीकृतम् । तदुभयविधस्यार्थजातस्य यः साक्षी । सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एवेत्युक्तत्वात् । स एव साक्षाच्चिन्मात्रस्वभावात्मा घटपटाद्याकारवृत्तिविशेषेषु यदनुवृत्तं नित्यं निर्विशेषं चैतन्यं तच्च साक्षिस्वरूपं न ततोऽतिरिक्तमित्यर्थः ॥ १२ ॥

---

२ घ. ङ. °तघटनाशे वि° । २ ख. ग. °वृत्त्यभिव्यक्तौ चैतन्याभासाद्वि° । ३ ख. घ. मन्यते । ४ घ. ङ. °स्यानत्वभा° ।

तस्य जन्मविनाशौ तु न विद्येते विचारतः ।
जन्मकाले तु साक्षित्वाज्जन्मनो जनिरस्य न ॥ १३ ॥

अथ साक्षिचैतन्यस्यापि जन्मनाशौ न स्त इति प्रतिपादयितुमुपक्रमते—तस्य जन्मेत्यादिना । साक्षिचैतन्यस्य जन्मसमये स्वजन्मनो भासकत्वेनावस्थानाभावे तदप्रतीतमेव स्यात् । प्रतीयते यस्मात्तदा तत्साक्षिसद्भावोऽङ्गीकर्तव्यः । तथा चास्याजनिरनुत्पत्तिरेवेत्यर्थः ॥ १३ ॥

विनाशे साक्षिणो नाशस्तथा नैव भविष्यति ।
सत्ताकाले तु सत्त्वाच्च विनाशः सुतरां न हि ॥ १४ ॥

एवं विनाशसमयेऽपि तत्प्रकाशनाय साक्षित्वेनावस्थाननियमान्नाशोऽप्यस्य नास्तीत्यर्थः । प्रतीतिसमये तु विद्यमानत्वादेवास्य न नाश इत्यर्थः ॥ १४ ॥

जन्मनाशप्रतीतिस्तु नान्तरेणैव साक्षिणम् ।
जन्मनाशौ मुनिश्रेष्ठाः स्वत एव न सिध्यतः ॥ १५ ॥
दृश्यत्वेन जडत्वाच्च घटकुड्यादिवस्तुवत् ।
साक्षिणो जन्मनाशौ तु न चान्येनैव सिध्यतः ॥ १६ ॥
जडरूपेण चान्येन जन्मनाशौ न सिध्यतः ।
साक्षिरूपेण चान्येन जन्मनाशौ न सिध्यतः ॥
अभावादेव चान्यस्य साक्षिरूपस्य सुव्रताः ॥ १७ ॥

ननु जन्मनाशसमये साक्ष्यवस्थानाभावेऽपि तत्तदाकारवृत्त्यवच्छिन्नचैतन्येनैव स्फुरणं संभाव्यत इत्यत आह—जन्मनाशेति । तद्वृत्त्यवच्छिन्नचैतन्यमेव साक्षीति जन्मनाशौ साक्षिणैव भास्येते इत्यर्थः । साक्षिणमन्तरेण प्रकाशमानौ जन्मनाशौ किं स्वप्रकाशत्वेन भासेते किंवाऽन्येन । तदाऽपि किं जडरूपेण साक्षिरूपेणेति विकल्प्याऽऽद्यं दूषयति—जन्मनाशाविति । साक्षिणमन्तरेण न सिध्यतः । घटादिवद्दृश्यत्वेन जडत्वनिर्धारणात् । नापि द्वितीये प्रथम इत्याह—जडरूपेणेति । न हि जडौ जन्मनाशौ जडेनान्येन प्रकाश्येते इति वक्तुं युक्तम् । जडत्वाविशेषात् । नापि द्वितीय इत्याह—साक्षिरूपेणेति । एतत्साक्षिव्यतिरिक्तस्य साक्षिणोऽभावादित्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥

---

१ ख. ग. घ. च छ. ज. 'नाशसा° । २ ग. घ. च. छ. 'नाशगणः सा° । ३ ग. घ. च. छ. भास्यत ई ।

साक्ष्याकारेण चैकत्वात्साक्षिभेदो न सिध्यति ॥ १८ ॥
साक्ष्यरूपेण भेदस्तु साक्ष्यस्यैव न साक्षिणः ।
साक्षिमात्रतया भेदाभावेऽप्यस्यैव साक्षिणः ॥ १९ ॥
विशेषाकारतो भेदं वदन्ति भुवि केचन ।
ते महामोहसर्पेण दष्टा एव न संशयः ॥ २० ॥

ननु घटसाक्षी पटसाक्षीति साक्षिभेदोऽनुभूयत एवेत्यत आह—साक्ष्याकारेणेति । साक्षित्वाकारेण सर्वत्रैक्यावगतेर्न तद्भेदशङ्कावकाश इत्यर्थः । ननु मा भूत्साक्षित्वाकारेण भेदः साक्ष्यरूपेण तद्भेदः किं न स्यादित्यत आह—साक्ष्यरूपेणेति । घटपटादिसाक्ष्यप्रयुक्तो भेदस्तु साक्ष्याणामेव न तु तत्साक्षिण इत्यर्थः । विशेषाकारत इति । घटपटाद्याकारास्ते ज्ञानगता एवेति वदन्तो विज्ञानवादिनस्तत्तदाकारवशेनाऽऽत्मस्वरूपभूतस्यापि विज्ञानस्य नानात्वमिच्छन्तीत्यर्थः । तदेतन्निरस्यति—ते महामोहेति ॥ १८ ॥ १९ ॥ ॥ २० ॥

विशेषरूपं चिद्रूपं जडरूपं तु[1] वा भवेत् ।
न रूपान्तरमेव स्यात्तादृशस्यानिरूपणात् ॥ २१ ॥
चिद्रूपं साक्षिमात्रं स्यान्न चान्यत्परमार्थतः ।
जडरूपं च नास्त्येव साक्षिणः परमार्थतः ॥ २२ ॥
चिद्रूपस्य जडाकारो विरोधान्नैव सिध्यति ।
प्रकाशस्य तमोरूपं यथा लोके न सिध्यति ॥ २३ ॥

किं तत्साक्षिणो विशेषरूपं चिदात्मकं जडं वेति विकल्पयति—विशेषरूपमिति । आद्यं निरस्यति—चिद्रूपमिति । यदि विशेषरूपमपि चिदात्मकं स्यात्तदा साक्षिचैतन्यान्न व्यतिरिच्यत इत्यर्थः । द्वितीयं प्रत्याह—जडरूपमिति । साक्षिणो जडाकारो विशेषरूपोऽपि न युज्यते । तमःप्रकाशयोरिव चिज्जडयोरेकत्वविरोधादित्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥

अतो विशेषाकारेण भेदं ये सर्वसाक्षिणः ।
वदन्ति ते महाभ्रान्ता निमग्नाश्च भवार्णवे ॥ २४ ॥

अतो विशेषाकारेण साक्षिभेदवर्णनं भ्रान्तप्रलपितमित्युपसंहरति—अत इति ॥ २४ ॥

१ घ. तु भावयेत् ।

आत्मनः सर्वसाक्षित्वमेकत्वं च तथैव च ।
नित्यत्वं चैव शुद्धत्वं भूमानन्दत्वमेव च ।
ब्रह्मत्वं च द्विजा वेदा वदन्ति श्रद्धया सह ॥ २५ ॥

यथोदीरितसाक्षिसद्भावे श्रुतिं संवादयति—वेदा वदन्तीत्यादिना। "साक्षी चेता केवलो निर्गुणश्च" इत्यात्मनः सर्वसाक्षित्वम् । तत्र हि साक्ष्यविशेषस्यानुपादानात्सर्वसाक्ष्यप्रतियोगित्वं साक्षिणोऽवगम्यते । "एकमेवाद्वितीयम्" "एको देवः सर्वभूतेषु गूढः" इत्येकत्वम् । "नित्यो नित्यानां चेतनश्चेतनानाम्" इति नित्यत्वम् । "आस्नाविरꣳ शुद्धमपापविद्धम्" इति शुद्धत्वम् । "यो वै भूमा तत्सुखम्" इति भूमात्मकत्वम् । "विज्ञानमानन्दं ब्रह्म" इत्यानन्दब्रह्मात्मकत्वं च श्रुतयः प्रतिपादयन्तीत्यर्थः ॥ २५ ॥

स्मृतयश्च पुराणानि भारतादीनि चाऽऽस्तिकाः ॥ २६ ॥
महादेवश्च विष्णुश्च ब्रह्मा च मुनयस्तथा ।
नित्यत्वं शुद्धबुद्धत्वमात्मनः प्रवदन्ति हि ॥ २७ ॥
तस्मादात्मैव विप्रेन्द्रा नित्यं वस्तु न चापरम् ।
जिह्वायां परशुं तप्तं धारयामि न संशयः ॥ २८ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे नित्यवस्तुविचारो नामैकोनविंशोऽध्यायः ॥ १९ ॥

न केवलं श्रुतय एव तदर्थानुसारिस्मृतिपुराणेतिहासादयोऽपि साक्षिण उक्तरूपं प्रतिपादयन्तीत्याह—स्मृतयश्चेति ॥ २६ ॥ २७ ॥ २८ ॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकाख्यटीकायां चतुर्थे यज्ञवैभवखण्डे नित्यवस्तुविचारो नामैकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि विशिष्टं धर्ममादरात् ।
शृणुतात्यन्तकल्याणं मुनयः परया मुदा ॥ १ ॥

---

१ घ. सर्वदेहेषु । २ घ. ङ. च. °नन्दं ब्र° ।

पुरा वेदविदां मुख्याः कावषेया महर्षयः ।
सत्रावसाने संभूय श्रद्धया परया सह ॥ २ ॥

यस्मादुक्तरीत्याऽऽत्मस्वरूपमेव नित्यमतस्तद्गोचरं वेदान्तवाक्यमेव मुख्यं प्रमाणं तज्जनितं परब्रह्मात्मविषयं ज्ञानमेव परमो धर्म इति प्रतिपादयितुमध्याय आरभ्यते—अथात इति ॥ १ ॥ २ ॥

विचार्य सुचिरं कालं विशिष्टं धर्ममास्तिकाः ।
पुनः संशयमापन्ना विषण्णा विवशाश्च ते ॥ ३ ॥
गत्वा हिमवतः पार्श्वं त्रिकालस्नानसंयुताः ।
भस्मोद्धूलितसर्वाङ्गास्त्रिपुण्ड्राङ्कितमस्तकाः ॥ ४ ॥
रुद्राक्षमालाभरणा जटावल्कलसंयुताः ।
लिङ्गार्चनपरा नित्यं शंभोरमिततेजसः ॥ ५ ॥
तप्तवन्तस्तपः सर्वे वत्सराणां त्रयं महत् ।
महादेवप्रसादेन महाकारुणिकोत्तमः ॥ ६ ॥
शक्तिपाणिर्महातेजा द्वितीय इव शंकरः ।
स्कन्दः सर्वजगत्स्वामी प्रत्यक्षमभवत्स्वयम् ॥ ७ ॥
तं दृष्ट्वा मुनयः सर्वे प्रसन्नेन्द्रियमानसाः ।
भक्त्या परमया युक्ता विवशा गद्गदस्वराः ॥ ८ ॥
प्रणम्य दण्डवद्भूमावुत्थायोत्थाय सादरम् ।
स्तोत्रैः स्तुत्वा महात्मानं समभ्यर्च्य यथाबलम् ॥ ९ ॥
कृताञ्जलिपुटा भूत्वा पप्रच्छुर्धर्ममुत्तमम् ।
सोऽपि सर्वजगत्स्वामी तारकारिर्महाद्युतिः ॥ १० ॥
सर्वविज्ञानरत्नानामाकरः करुणाकरः ।
सुप्रसन्नः स्वयं प्राह मुनीनां धर्ममुत्तमम् ॥ ११ ॥

स्कन्द उवाच—

शृणुध्वं मनुयः सर्वे महाभाग्यसमन्विताः ।
वदामि संग्रहेणाहं युष्माकं धर्ममुत्तमम् ॥ १२ ॥

पुनः संशयमापन्ना इति । ईश्वरार्पणबुद्ध्याऽनुष्ठितैर्यागहोमादिभिः प्रक्षीणकल्मषाः कावषेयाः पुनः प्रतिबन्धकदुरितलेशावशेषेण नानाविधैरागमैर्वेदुधोच्यमानं तत्त्वमिदमीदृगिति विचार्य निश्चेतुमशक्ताः सन्तः संशयाविष्टा एवाभवन्नित्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥११॥१२॥

स्वमनीषिकयोत्पन्नो निर्मूलो धर्मसंज्ञितः ।
श्रद्धया सहितो यस्तु सोऽपि धर्म उदाहृतः ॥ १३ ॥

वेदान्तवाक्यजनितस्य च ज्ञानस्य परमधर्मत्वं सत्स्वेवापरधर्मेष्वित्यभिप्रेत्य तानुत्तरोत्तरमुत्कृष्टत्वेन प्रतिपादयति—स्वमनीषिकयेत्यादिना । शास्त्रादनवगम्यैव बुद्ध्युत्प्रेक्षामात्रेण यत्तपः क्रियते स धर्मो भवति । निर्मूलो मूलागमरहितः ॥ १३ ॥

निर्मूलोऽपि स्वबुद्ध्यैव कल्पितोऽपि महर्षयः ।
देवताराधनाकारो धर्मः पूर्वोदिताद्वरः ॥ १४ ॥

पुरुषोत्प्रेक्षामात्रनिबन्धनो धर्मो देवताराधनरूपश्चेत्तदा पूर्वोक्ताद्धर्माद्देवताराधनविलक्षणाच्छ्रेष्ठः । एवमुत्तरत्रापि योज्यम् ॥ १४ ॥

देवताराधनाकारान्निर्मूलाद्बुद्धिकल्पितात् ।
धर्माच्छ्रेष्ठः समाख्यातः समूलो धर्म आस्तिकाः ॥ १५ ॥

समूल इति । मूलसहित इत्यर्थः ॥ १५ ॥

समूलेषु च धर्मेषु बुद्धागमसमन्वितः ।
धर्मः श्रेष्ठ इति प्रोक्तो मया वेदार्थपारगाः ॥ १६ ॥

बुद्धागमेति । बुद्धप्रोक्ता आगमा बुद्धागमाः ॥ १६ ॥

बुद्धागमोदिताद्धर्मादर्हागमसमीरितः ।
धर्मः श्रेष्ठ इति प्रोक्तो धर्मतत्त्वविशारदैः ॥ १७ ॥

अर्हागमेति । क्षपणकागम इत्यर्थः ॥ १७ ॥

अर्हागमोदिताद्धर्मात्प्राजापत्यागमोदितः ।
धर्मः श्रेष्ठ इति प्रोक्तः सर्वधर्मार्थवेदिभिः ॥ १८ ॥

---

१ ग. घ. च. छ. ज 'लेपाव° । २ ग. घ. च. रमध° । ३ घ मूलभूत ।

प्राजापत्यागमप्रोक्ताद्धर्माद्वेदविदां वराः ।
मया श्रेष्ठ इति प्रोक्तो धर्मो विष्ण्वागमोदितः ॥ १९ ॥
विष्ण्वागमोदिताद्धर्मादशेषादास्तिकोत्तमाः ।
शैवागमोदितो धर्मो वरिष्ठो नैव संशयः ।
शैवागमोदितो धर्मो द्विधा पूर्वमुदीरितः ॥ २० ॥

प्राजापत्यागमेति । ब्रह्मणा प्रोक्तो ब्रह्मविषयो वाऽऽगमः । विष्ण्वागमशेषागमशब्दयोरप्येवमेवार्थः ॥ १८ ॥ १९ ॥ २० ॥

अधःस्रोतोद्भवस्त्वेक ऊर्ध्वस्रोतोद्भवोऽपरः ॥ २१ ॥
अधःस्रोतोद्भवाद्धर्मादूर्ध्वस्रोतोद्भवः परः ।
कामिकादिप्रभेदेन स भिन्नोऽनेकधा द्विजाः ॥ २२ ॥

उक्तधर्मस्य द्वैविध्यमाह—अधःस्रोतोद्भव इति । अधःस्रोतांसि लीलाविग्रहधारिणः परशिवस्य नाभेरधोभागस्तदुद्भवो धर्मोऽधःस्रोतोद्भवः । ऊर्ध्वस्रोतांसीशानतत्पुरुषादिपञ्च वक्त्राणि तदुद्भवो धर्म ऊर्ध्वस्रोतोद्भवः कामिकादिभेदेन बहुधा भिन्नः । उक्तं ह्यागमिकैः—

"सद्योजातमुखाज्जाताः पञ्चाऽऽद्याः कामिकादयः ।
वामदेवमुखाज्जाता दीप्ताद्याः पञ्च संहिताः ॥
अघोरवक्त्रादुद्भूताः पञ्चाऽऽग्नेविजयादयः ।
पुंवक्त्रादपि चोद्भूताः पञ्च वै रौ(भै)रवादयः ॥
ईशानवदनाज्जाताः प्रोद्गीताद्याष्ट संहिताः" इति ॥२१॥२२॥

अधःस्रोतोद्भवो धर्मो बहुधा भेदितस्तथा ।
ऊर्ध्वस्रोतोद्भवाद्धर्मात्स्मार्ता धर्मा महत्तराः ॥ २३ ॥

अधःस्रोतोद्भव इति । अधःस्रोतोद्भवोऽपि धर्मः कापालादिमतभेदेन बहुधा भेदित इत्यर्थः । स्मार्ता धर्मा इति । मन्वादिस्मृतिपुराणरथा इत्यर्थः ॥ २३ ॥

स्मार्तेभ्यः श्रौतधर्माश्च वरिष्ठा मुनिसत्तमाः ।
तेषां शान्त्यादयः श्रेष्ठास्तेषां भस्मावगुण्ठनम् ॥ २४ ॥

---

१ ख. ग. घ. ज. °द्भवः प° । २ ग. च. छ. ज. °वस्याऽऽना° । ३ ख. ग. घ. ङ. च. ङ. ज. भागोऽध.स्रोतस्त° ।

रुद्राक्षधारणं चापि शिवाद्याख्याभिभाषणम् ।
शिवलिङ्गार्चनं भक्त्या शिवोऽहमिति भावना ॥ २५ ॥
शिवज्ञानैकनिष्ठस्य शुश्रूषा च विशिष्यते ।
तेषां वेदान्तवाक्यानां तात्पर्यस्य निरूपणम् ॥ २६ ॥

तेषामिति । श्रौतधर्माणां मध्ये ये प्रवृत्तिहेतवो यागहोमाद्यास्तेभ्योऽपि निवृत्तिहेतवः शान्तिदान्त्यादयः श्रेयांस इत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥

वरिष्ठं सर्वधर्मेभ्यो ज्ञानं मोक्षैकसाधनम् ।
ज्ञानान्नास्ति परो धर्म इति वेदार्थनिर्णयः ॥ २७ ॥

उक्तानां धर्माणां पूर्वस्मात्पूर्वस्मादुत्तरोत्तरो धर्मो यथोत्कृष्यत एवं वेदान्तवाक्यजनिताज्ज्ञानादपि कश्चिदुत्कृष्टो धर्मोऽस्त्वित्यत आह—ज्ञानान्नास्तीति ॥ २७ ॥

पूर्वोदितेभ्यः सर्वेभ्यः सत्यधर्मपरायणाः ।
ज्ञानाङ्गेभ्यः समासेन भस्मैकं परमं मतम् ॥ २८ ॥

शान्तिदान्त्यादिभ्योऽपि भस्मावगुण्ठनस्य वैशिष्ट्यमाह—पूर्वोदितेभ्य इति ॥ २८ ॥

भस्मसाधननिष्ठानां साक्षाद्भस्म शिवाभिधम् ।
प्रकाशते यथा शान्त्या शान्तं वस्तु परात्परम् ॥ २९ ॥

साक्षाद्भस्म शिवाभिधमिति । तदुक्तं प्राक्—"शिवस्वरूपं परमं भासनाद्भस्म संमतम्" इति ॥ २९ ॥

ज्ञानस्य कारणेभ्यस्तु श्रुतिरेव महत्तरा ।
ज्ञानानां शंभुविज्ञानं वरिष्ठं नेतरद्भवेत् ॥ ३० ॥
वेदवाक्यसमुत्पन्नं शिवज्ञानं निरूपणे ।
सम्यग्ज्ञानं मयाऽऽख्यातमितरद्व्यवहारतः ॥ ३१ ॥

श्रुतिरेव महत्तरेति । ज्ञानसाधने सर्वाधिकेत्यर्थः । शंभुविज्ञानमिति । वेदान्तवाक्यजनितं यत्परशिवस्वरूपविषयं ज्ञानं तदेव विषययाथार्थ्यात्प्रत्यक्षादिप्रमाणजनितज्ञानानां मध्ये प्रशस्ततरमित्यर्थः ॥ ३० ॥ ३१ ॥

---

१ ब. 'दान्तादि° । २ ख. ग. घ. ङ. च. छ ज. अनुक्तानां । ३ ख. घ. °दन्यध° । ४ ब. 'ष्ठं तेन तद्भ° ।

चोदनालक्षणो धर्मो धर्मः साक्षान्निरूपणे ।
इतरो व्यवहारे तु धर्म इत्यभिशब्द्यते ॥ ३२ ॥

चोदनालक्षण इति । चोदना वेदवाक्यं तत्प्रतिपादितो धर्मः । तथा च जैमिनिसूत्रम्—" चोदनालक्षणोऽर्थो धर्मः " इति । यद्येवं तदतिरिक्तेष्वागमादिसिद्धेषु पूर्वोक्तेष्वर्थेषु धर्मशब्दप्रयोगः कथमित्यत आह—इतरो व्यवहार इत्यादि ॥ ३२ ॥

आस्तिक्यान्वयमात्रेण धर्माभासेऽपि सुव्रताः ।
प्रयुक्तो धर्मशब्दस्तु मुख्यो धर्मस्तु वेदजः ॥ ३३ ॥

आस्तिक्यान्वयमात्रेणेति । यथा श्रौतधर्मेष्वास्तिक्यं तथैव तदितरधर्माभासेऽपि तद्दर्शनात्तत्र धर्मशब्दप्रयोगो गौण इत्यर्थः ॥ ३३ ॥

यथा शंभुसमो देवो नास्ति पुण्यवतां वराः ।
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ३४ ॥

अथ बहुभिर्निदर्शनैः श्रुतिप्रमाणस्योत्कर्षं प्रतिपादयति—यथा शंभुसम इत्यादिना ॥ ३४ ॥

यथा विप्रसमो मर्त्यो नास्ति वेदविदां वराः ।
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ३५ ॥
यथैवान्नसमं भोज्यं नास्ति लोके विचक्षणाः
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ३६ ॥
यथा गङ्गासमा पुण्या नदी लोके न विद्यते ।
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ३७ ॥
यथा वाराणसीतुल्या पुरी लोके न विद्यते ।
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ३८ ॥
यथा दैवसभातुल्यं स्थानं लोके न विद्यते ।
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ३९ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

---

१ ख. घ. °व तारवपि तद्° । २ क. छ. °दृस्त° ।

षडक्षरसमो मन्त्रो यथा लोके न विद्यते ।
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ४० ॥
यथा गुरुसमस्त्राता नास्ति संसारसागरात् ।
तथा वेदसमं मानं नास्ति तत्र न संशयः ॥ ४१ ॥
अतश्च संक्षेपमिमं वदामि वः
श्रुतिः प्रमाणं शिव एव केवलः ।
वरिष्ठ उक्तः सितभस्मगुण्ठनं
विशुद्धविद्या च न चेतरत्परम् ॥ ४२ ॥

सूत उवाच—

एवमुक्त्वा मुनीन्द्रेभ्यः श्रीमान्बर्हिणवाहनः ।
जगत्स्वामी महातेजास्तत्रैवान्तर्हितोऽभवत् ॥ ४३ ॥
कावषेया अपि श्रेष्ठाः प्रसादात्तारकारिणः ।
महादेवं महात्मानं ददृशुः स्वयमागतम् ॥ ४४ ॥
तं प्रणम्य महादेवं सर्वज्ञमपराजितम् ।
श्रीमत्पञ्चाक्षरेणैव पूजयामासुरादरात् ॥ ४५ ॥
देवदेवो महादेवो देवानामपि देशिकः ।
मुनिभ्यः कावषेयेभ्यः स्वात्मज्ञानं ददौ मुदा ॥ ४६ ॥
मुनीन्द्रा अपि ते सर्वे विशुद्धज्ञानिनां वराः ।
प्रणम्य देवमीशानं साम्बं संसारभेषजम् ॥ ४७ ॥

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

प्रसादयित्वा देवेशं कृतार्था आत्मवेदनात् ।
निःस्पृहाः स्वात्मनोऽन्यत्र ययुर्हिमवतो गुहाम् ॥ ४८ ॥

---

१ ग. °ष्टमुक्तं सि° ।

विशिष्टधर्मः कथितः समासतो
मयैव वेदार्थविचारणक्षमः ।
इतोऽतिरिक्तं सकलं पलालव-
द्वृथा न लाभाय विशुद्धचेतसाम् ॥ ४९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे विशिष्टधर्मविचारो नाम विंशोऽध्यायः ॥ २० ॥

निःस्पृहाः स्वात्मनोऽन्यत्रेति । सच्चिदानन्दैकरसस्वस्वरूपानुसंधानादन्यस्मिन्धर्मे निःस्पृहाः । श्रूयते ह्यैतरेयके—"एतद्ध स्म वै तद्विद्वांस आहुरकषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इति ॥४८॥४९॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे विशिष्टधर्मविचारो नाम विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः ।

सूत उवाच—
अथातः संप्रवक्ष्यामि मुक्तिसाधनमास्तिकाः ।
शृणुत श्रद्धया सार्धं साक्षाद्वेदान्तदर्शितम् ॥ १ ॥

अथ मुक्तेरन्तरङ्गबहिरङ्गसाधनप्रतिपादनव्याजेन शमदमादिसाधनसंपन्नस्यैव तत्राधिकारो नान्यस्येति प्रतिपादयितुमुपक्रमते—अथात इति । वेदान्तदर्शितमिति । "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येत्" इतिवेदान्तवाक्यप्रतिपादितमित्यर्थः ॥ १ ॥

पुरा श्वेतादिकृष्यन्ता मुनयो मुनिसत्तमाः ।
संख्या च शतमेतेषां सह द्वादशसंख्यया ॥ २ ॥
त एते भस्मदिग्धाङ्गास्त्रिपुण्ड्राङ्कितमस्तकाः ।
रुद्राक्षमालाभरणा रुद्राराधनतत्पराः ॥ ३ ॥

तच्चोक्तसाधनमीश्वरानुग्रहेणैव लभ्यमिति ज्ञापयितुं पुरावृत्तमुदाहरति—पुरेति ॥ २ ॥ ३ ॥

१ ग. °रलक्षणः । इ° । २ घ. वक्ष्यामहे ।

तपश्चेरुर्महातीव्रं परया श्रद्धया सह ।
श्रीमद्दक्षिणकैलासे साक्षात्संसारनाशके ॥ ४ ॥

पुण्यक्षेत्रवासोऽपि मुक्तावुपाय इत्यभिप्रेत्याऽऽह—श्रीमद्दक्षिणकैलास इत्यादिना ॥ ४ ॥

यस्य दर्शनमात्रेण पापानि सकलानि तु ।
नश्यन्ति वह्निसंयुक्तं यथा तूलं प्रदह्यते ॥ ५ ॥
यस्मिन्निवसतां नृणामशेषाणां महेश्वरः ।
ददाति परमां मुक्तिमचिरेण द्विजोत्तमाः ॥ ६ ॥
यत्र भस्मरतानां तु द्विजानां प्रतिवत्सरम् ।
यथाशक्ति धनं दत्त्वा मुच्यते भवबन्धनात् ॥ ७ ॥
यत्र प्रतिदिनं पुंसां भक्तानामीश्वरस्य तु ।
मुष्टिमात्रप्रदानेन महापापाद्विमुच्यते ॥ ८ ॥
यत्र साक्षाच्छिवज्ञाननिष्ठस्यातिप्रियेण तु ।
भोजनं च तथा वस्त्रं दत्त्वा मुच्येत बन्धनात् ॥ ९ ॥
यत्र जप्तं हुतं दत्तं चिन्तितं च दिने दिने ।
ब्राह्मणानां तथाऽन्येषामनन्तं भवति ध्रुवम् ॥ १० ॥
तपसा शंकरस्तेषां प्रसन्नः करुणानिधिः ।
सांनिध्यमकरोत्तत्र शक्त्या परमया सह ॥ ११ ॥
तं दृष्ट्वा साम्बमीशानं साक्षात्संसारभेषजम् ।
प्रणम्य दण्डवद्भूमौ पप्रच्छुर्मुक्तिसाधनम् ॥ १२ ॥
देवोऽपि करुणाविष्टः साक्षात्संसारमोचकः ।
मुनीनामुग्रतपसां बभाषे मुक्तिसाधनम् ॥ १३ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

ईश्वर उवाच—

वक्ष्यामि परमं गुह्यं मुक्तिसाधनमादरात् ।
वर्णाश्रमसमाचारादेव मुक्तिर्न चान्यतः ॥ १४ ॥

॥ १४ ॥

स्वजातिविहितं धर्मं यः करोति प्रियेण तु ।
स जायते कुले मुख्ये विप्राणामीश्वराज्ञया ॥ १५ ॥

स्वजातिविहितमिति । ब्राह्मणक्षत्रियवैश्यशूद्राणां मध्ये यस्य यो धर्मो विहितः स स्वजातिविहितः । ब्राह्मणस्य यजनादिकं क्षत्रियस्य राज्यपरिपालनादिकं वैश्यस्य कृषिगोरक्षादिकं शूद्रस्य द्विजशुश्रूषेत्येते स्वजातिविहिता धर्माः ॥ १५ ॥

स पुनर्जातकर्मादिसंस्कारैरपि संस्कृतः ।
उपनीतो गुरोर्वेदानधीत्य विधिवत्पुनः ॥ १६ ॥

वेदानधीत्य विधिवदिति । अनेनैव ब्रह्मचारिणामनुष्ठानमुक्तम् ॥ १६ ॥

दारानाहृत्य यज्ञं च दानं च विविधं तथा ।
तपश्च विविधं घोरं कृत्वा कामनया विना ॥ १७ ॥

दारानाहृत्येत्यादिना गार्हस्थ्याश्रमधर्मप्रतिपादनम् । तपश्च विविधमिति वानप्रस्थाश्रमधर्माः । कामनया विनेति । फलसंधानविरहेण केवलमीश्वरार्पणबुद्ध्यैवानुष्ठिता वर्णाश्रमधर्मा अध्ययनादयः पापप्रणाशनेन चित्तशुद्धिद्वारा परम्परया मुक्तिसाधनत्वं प्रतिपद्यन्त इत्यर्थः । श्रूयते हि—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति ॥ १७ ॥

प्रनष्टपापः शुद्धान्तःकरणो ज्ञानवाञ्छया ।
विरक्तः सर्वलोकेभ्यो दोषाणां तु निरूपणात् ॥ १८ ॥

एवमाश्रमत्रयानुष्ठितैः कर्मभिश्चित्तशुद्धौ जातायां संसारदोषदर्शनात्ततो वैराग्यं जायत इत्याह—विरक्त इति ॥ १८ ॥

चित्तपाकानुगुण्येन प्रव्रज्यां कुरुते पुनः ।
तत्रानुमुक्षुः संन्यासी प्रेरितः परमेश्वरात् ॥ १९ ॥

---

१ च. °रक्षणादि° ।

कुटीचकाभिधां वृत्तिं वृत्तिं वाऽथ बहूदकाम् ।
हंसवृत्तिं तु वा नित्यं वाञ्छते मुनिसत्तमाः ॥ २० ॥

प्रव्रज्यां कुरुत इति । " यदहरेव विरजेत्तदहरेव प्रव्रजेत् " इति श्रुतेः ॥ १९ ॥ २० ॥

मुमुक्षुर्भिक्षुको नित्यं परहंसाभिधां शुभाम् ।
वृत्तिमिच्छति देवेशप्रसादेन द्विजोत्तमाः ॥ २१ ॥

वैराग्यजननानन्तरं चित्तैकाग्र्यलाभाय संन्यास एव कर्तव्य इत्याह — भिक्षुक इति । साधनचतुष्टयान्तर्वर्ति यन्मुमुक्षुत्वं तदीश्वरप्रसादेन परमहंसस्यैव जायते नान्येषां कुटीचकादीनामित्यर्थः ॥ २१ ॥

कुटीचकादिवृत्तिस्थो मुक्तिमिच्छति चेद्द्विजाः ।
परहंसाभिधां वृत्तिं प्राप्नुयाच्छंकराज्ञया ॥ २२ ॥

कुटीचकादिभिरपि यदा मुक्तिरन्विष्यते तदा तैरपि परमहंसाश्रम एव कर्तव्य इत्याह—कुटीचकादीति ॥ २२ ॥

सर्वेषामेव भिक्षूणां शान्तिर्दान्तिस्तितिक्षुता ।
स्नानं शौचमहिंसा च मिथ्याभाषणवर्जनम् ॥ २३ ॥
अग्निरित्यादिभिर्मन्त्रैर्भस्मनोद्धूलनं तथा ।
त्रिपुण्ड्रधारणं साक्षाद्ब्रह्मविष्णुशिवात्मकम् ॥ २४ ॥
लिङ्गे शिवार्चनं नित्यं धर्मः प्रोक्तः सनातनैः ।
साक्षाद्वेदान्तवाक्यानां श्रवणं मननं तथा ॥ २५ ॥
निदिध्यासनमाचार्यपरिचर्या प्रियेण तु ।
परहंसस्य धर्मोऽयं विशेषेण समीरितः ॥ २६ ॥
पूर्वपुण्यबलात्साक्षात्प्रसादाच्च शिवस्य तु ।
ब्रह्मात्मविषयं ज्ञानं लभते भिक्षुकोऽचिरात् ॥ २७ ॥

अथ वेदान्तज्ञानोत्पत्तावन्तरङ्गसाधनभूतांस्तुरीयाश्रमधर्मानाह—सर्वेषामित्यादिना । शान्तिर्ज्ञानेन्द्रियाणाम् । तितिक्षुता शीतोष्णसुखदुःखादिद्वंद्वसहिष्णुत्वम् । शान्त्यादीनि द्वंद्वाद्युपघातकत्वेन परम्परया मुक्तिसाधनानि । वेदान्तवाक्यश्रवणादिकमव्यवधानेन मुक्तिसाधनमित्यर्थः । तत्र श्रवणं नाम

वेदान्तवाक्यानामद्वितीये परशिवरूपे तात्पर्येण प्रतिपादनसामर्थ्यावधारणम् । श्रुतस्यार्थस्यासंभावनाविपरीतभावनानिरासाय युक्तिभिरनुचिन्तनं मननम् । एवं श्रवणमननाभ्यामवधृतस्यार्थस्य साक्षात्कारोपयोगिचित्तैकाग्र्यलाभाय विजातीयप्रत्ययान्तरितसजातीयप्रत्ययप्रवाहरूपेण ध्यानं निदिध्यासनम् । एतेषां तत्साधनत्वं श्रूयते—" आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः " इति ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

ज्ञानाद्वेदान्तवाक्योत्थान्मुक्तिं भिक्षुरवाप्नुयात् ।
विना ज्ञानेन मुक्तिस्तु न सिध्यति न सिध्यति ॥ २८ ॥
मुक्तिसाधनमाख्यातं संग्रहेण मुनीश्वराः ।
ज्ञाने यूयमपि श्रद्धां कुरुध्वं यत्नतः सदा ॥ २९ ॥

सूत उवाच—

इत्युक्त्वा भगवान्रुद्रः साक्षात्संसारमोचकः ।
आगमान्तैकसंवेद्यस्तत्रैवान्तर्हितोऽभवत् ॥ ३० ॥
भवन्तोऽपि प्रसादेन शिवस्य परमात्मनः ।
मत्तो लब्धपरिज्ञाना अभवन्नचिरेण तु ॥ ३१ ॥

[1]ज्ञानादिति । इत्थमध्ययनयजनशमदमाद्यन्तरङ्गबहिरङ्गसाधनकलापसहकृताद्वेदान्तवाक्यश्रवणाद्यद्वाक्यजं ब्रह्मात्मैकत्वविषयं ज्ञानं जायते तदेव मुक्तिसाधनं नान्यदित्यर्थः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

श्रीमद्दक्षिणकैलासं सर्वस्थानोत्तमोत्तमम् ।
वाञ्छितार्थप्रदं नृणामिति वित्त विचक्षणाः ॥ ३२ ॥

इति वित्त विचक्षणा इति । उक्तप्रकारेण वित्त जानीतेत्यर्थः ॥ ३२ ॥

श्रीमद्दक्षिणकैलासमदृष्ट्वा मुक्तिमिच्छतः ।
नास्ति संसारविच्छित्तिः सत्यं सत्यं न संशयः ॥ ३३ ॥
वर्णाश्रमसमाचारं विना कैवल्यमिच्छतः ।
नास्ति कैवल्यसंसिद्धिः सत्यं सत्यं न संशयः ॥ ३४ ॥

---

१ ग. ज्ञानम° ।

विष्णुप्रजापतीन्द्रेभ्यः शिवस्याऽऽधिक्यमादरात् ।
अविज्ञाय न संसारान्मुच्यते जन्मकोटिभिः ॥ ३५ ॥

पुण्यक्षेत्रवासवर्णाश्रमधर्मादीनामुक्तं मुक्तिसाधनत्वं व्यतिरेकमुखेण द्रढयति — श्रीमद्दक्षिणकैलासमिति ॥ ३३ ॥ ३४ ॥ ३५ ॥

प्रत्यग्ब्रह्मैकताज्ञानं विना कैवल्यमिच्छताम् ।
नास्ति कैवल्यमित्येषा शाश्वती श्रुतिराह हि ॥ ३६ ॥
भगवानपि सर्वज्ञः शिवः कारुणिकोत्तमः ।
विना वेदान्तविज्ञानं न मुक्तिरिति चाऽऽह हि ॥ ३७ ॥
विष्णुप्रजापतीन्द्रादिदेवताश्च तथैव च ।
विना ज्ञानं न कैवल्यमित्याहुर्वेदवित्तमाः ॥ ३८ ॥
मुनयश्च महात्मानः सत्यसंधा जितेन्द्रियाः ।
विना ज्ञानं न कैवल्यमित्याहुर्वेदवित्तमाः ॥ ३९ ॥
अथ किं बहुनोक्तेन मुनीन्द्रा वेदवित्तमाः ।
मुक्तिसाधनविज्ञानं वेदादेव न चान्यतः ॥ ४० ॥

शाश्वती श्रुतिराह—हीति । " ब्रह्म वेद ब्रह्मैव भवति " " तरति शोकमात्मवित् " इति ब्रह्मात्मैकत्वविदुष एव मुक्तिं ब्रूते भेददर्शिनस्तु " अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद " इत्यज्ञत्वं प्रतिपादयतीत्यर्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

वेदमार्गजनितं तु वेदनं दोषहीनमतिशोभनं सदा ।
अन्यमार्गजनितं विचारतो वेदमार्गरुचिकारणं क्रमात् ॥ ४१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
मुक्तिसाधनविचारो नामैकविंशोऽध्यायः ॥ २१ ॥

अन्यमार्गेति । वेदव्यतिरिक्तैरागमान्तरैः प्रतिपादितमर्थजातमुक्तरूपवेदान्त-

१ ख. ग. ङ. °त्याहुः पुरुषाधिकाः ॥ ३८ ॥

विज्ञाने परमपुरुषार्थे रुचिजननद्वारेणोपयुज्यते न तु स्वातन्त्र्येण पुरुषार्थसाधनमित्यर्थः ॥ ४१ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां तात्पर्यदीपिकाख्यायां चतुर्थे यज्ञवैभवखण्डे मुक्तिसाधनविचारो नामैकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि मार्गप्रामाण्यनिर्णयम् ।
श्रद्धया सहिता यूयं शृणुध्वं मुनिपुंगवाः ॥ १ ॥

ननु बौद्धार्हताद्यागमानां वेदविरुद्धार्थप्रतिपादकानां वेदैकसमधिगम्ये ब्रह्मात्मैकत्वविज्ञाने रुचिजनकत्वं नोपपद्यतेऽतो वैदिकमार्गव्यतिरिक्तानां सर्वेषामप्रामाण्यमेवेत्याशङ्क्य तत्प्रामाण्यं समर्थयितुमारभते—अथात इति । श्रुतिस्मृत्यादिभिः शैवपाशुपतबुद्धाद्यागमैः समये नानाविधा मार्गाः प्रतिपादितास्तेषामधिकारिभेदेन प्रामाण्यनिर्णयः क्रियत इत्यर्थः ॥ १ ॥

वेदांश्च धर्मशास्त्राणि पुराणं भारतं तथा ।
वेदाङ्गान्युपवेदांश्च कामिकाद्यागमानपि ॥ २ ॥
कापालं लाकुलं चैव तयोर्भेदान्द्विजर्षभाः ।
तथा पाशुपतं सोमं भैरवप्रमुखागमान् ॥ ३ ॥
तेषामेवोपभेदांश्च शतशोऽथ सहस्रशः ।
विष्ण्वागमांस्तथा ब्राह्मान्बुद्धार्हाद्यागमानपि ॥ ४ ॥
लोकायतं तर्कशास्त्रं बहुविस्तरसंयुतम् ।
मीमांसामतिगम्भीरां सांख्ययोगौ तथैव च ॥ ५ ॥

उपवेदांश्चेति । आयुर्वेदधनुर्वेदादय उपवेदाः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

अनेकभेदभिन्नानि तथा शास्त्रान्तराणि च ।
निर्ममे शंकरः साक्षात्सर्वज्ञः संग्रहेण तु ॥ ६ ॥

निर्ममे शंकर इति । श्रुतिस्मृतीतिहासपुराणादीनि वैदिकानि शास्त्राणि तदर्थानुसारिशैवपाशुपताद्यागमान्बुद्धार्हतादिबहुभेदभिन्नान्वेदविरु-

१ छ. °ण्यमित्य° । २ ख. ग. घ. °र्णयमित्य° । ३ ख. नाकुलं ।

द्धांश्च सर्वज्ञः शिव एव स्वशक्त्या निर्मितवानित्यर्थः । अतः सर्वज्ञेन शिवेनैव प्रणीतत्वादेषां मध्ये कस्यचिदप्यप्रामाण्यं न युक्तमिति भावः ॥ ६ ॥

प्रसादादेव रुद्रस्य ब्रह्मविष्ण्वादयः सुराः ।
सिद्धविद्याधरा यक्षा राक्षसाद्यास्तथैव च ॥ ७ ॥
मुनयश्च मनुष्याश्च यथाभाग्यं द्विजोत्तमाः ।
तान्येव विस्तरेणैव संग्रहेणैव वा पुनः ॥ ८ ॥
कुर्वन्ति तानि नामानि कथितानि मनीषिभिः ।
अधिकारिविभेदेन नैकस्यैव सदा द्विजाः ।
तर्कैरेते हि मार्गास्तु न हन्तव्या मनीषिभिः ॥ ९ ॥

ननु ब्राह्मवैष्णवबुद्धाद्यागमेषु ब्रह्मविष्ण्वादितत्तदागमप्रणेतारः[1] पुरुषविशेषाः स्मर्यन्ते । तथा सांख्यतर्कादिशास्त्रेषु कपिलकणादजैमिनिप्रभृतयो निर्मातारः प्रसिद्धाः । अतः शिवस्यैव निर्माणमनुपपन्नमित्यत आह—प्रसादादेवेति । परमेश्वरानुग्रहादेव ब्रह्मविष्ण्वादयस्तान्निर्मितानागमान्स्वस्वव्यवहारसिद्धये पुनः संग्रहविस्ताराभ्यां कुर्वन्ति । कपिलकणभुग्जैमिन्निप्रभृतयो मुनयश्च स्वशिष्यबुद्धिगुणानुसारेण परमेश्वरनिर्मितान्येव शास्त्राणि तत्प्रसादादेव पुनः संग्रहविस्ताराभ्यां कुर्वन्तीत्यविरोधः । यद्यप्येवमीश्वरनिर्मितत्वात्सर्वेषां प्रामाण्यं तथाऽपि परस्परविरुद्धार्थप्रतिपादकत्वादप्रामाण्यमपि स्यादित्यत आह—अधिकारीति । यथा 'उदिते जुहोति' 'अनुदिते जुहोति' इत्यादिविरुद्धार्थप्रतिपादकानां वाक्यानामधिकारिभेदाद्विरोधाभावेन प्रामाण्यमेवमत्रापीत्यर्थः । एवमेते मार्गाः शुष्कतर्कबलान्न बाध्या इत्यर्थः ॥ ७ ॥ ८ ॥ ९ ॥

यथा तोयप्रवाहाणां समुद्रः परमावधिः ।
तथैव सर्वमार्गाणां साक्षान्निष्ठा महेश्वरः ॥ १० ॥

साक्षान्निष्ठेति । सर्वेष्वपि मार्गेष्वस्ति कश्चिदेव इति संमतत्वात्तस्य च परमेश्वरव्यतिरिक्तस्याभावात्तत्तदागमोक्तगुणवैशिष्ट्येन शिवः प्रतिपाद्यत इति भवति तस्मिन्सर्वेषां मार्गाणां पर्यवसानमित्यर्थः ॥ १० ॥

---

१ ख. घ. °रः सा°।

येन येन प्रकारेण जनैरेभिरुपासितः ॥ ११ ॥
तत्तन्मार्गानुगुण्येन साधकत्वं ह्युपैति सः ।
तत्प्रसादात्क्रमान्मार्गान्विशिष्टानेति मानवः ॥ १२ ॥

येन येनेति । नानाविधागमोक्तेन येन येनोपाधिना परमेश्वर उपास्यते तत्तदागमानुसारेण तत्तदुपाधियुक्तः परमेश्वरो भवतीत्यर्थः । तत्प्रसादादिति । तत्तदागमप्रतिपाद्यतयाऽवस्थितस्य शिवस्य प्रसादादेवोत्तरोत्तरमुत्कृष्टान्मार्गान्साधको लभत इत्यर्थः ॥ ११ ॥ १२ ॥

तत्र तत्र स्थितो देवः प्रसादं कुरुतेऽस्य तु ।
सोपानक्रमतो देवा वेदमार्गस्य हेतवः ॥
वेदमार्गस्थितो देवः साक्षान्मुक्तेस्तु कारणम् ॥ १३ ॥

सोपानक्रमत इति । तत्र तत्राऽऽगमेषु तत्तद्देवतारूपो देवः सोपानक्रमेण वेदमार्गप्राप्तौ कारणम् । स एव वेदमार्गप्रतिपादितः सन्मुक्तिहेतुर्भवतीत्यर्थः ॥ १३ ॥

तत्रापि कर्मभागस्थो ज्ञानश्रद्धांप्रदो हरः ।
ज्ञानभागस्थितः शंभुर्ज्ञानद्वारेण मोक्षदः ॥ १४ ॥

कर्ममार्गस्थ इति । कर्मकाण्डे स्थितो विविदिषाप्रद इत्यर्थः । उपनिषत्सु प्रतिपाद्यतया स्थितः शिवः स्वयाथात्म्यज्ञानजननेन मुक्तिप्रद इत्यर्थः ॥ १४ ॥

एकरूपा परा मुक्तिस्ततस्तद्विषया मतिः ॥ १५ ॥
एकरूपा भवेन्नैव नानारूपा भविष्यति ।
वेदान्तः शंकरं साक्षान्निर्विशेषाद्वयात्मना ॥ १६ ॥
वक्ति मार्गान्तरान्नैवं ततो विद्या तु वेदजा ।
अतो मार्गान्तराज्जाता मतयो मुनिसत्तमाः ॥
अविद्या नैव विद्याः स्युरिति सम्यङ्निरूपणम् ॥ १७ ॥

ननु मार्गान्तरज्ञानैरपि साक्षान्मुक्तिः किं न स्यादित्याशङ्क्य तेषामवस्तुविषयत्वेनाविद्यात्वं प्रतिपादयन्नौपनिषदज्ञानस्य विद्यारूपतामाह—एकरूपेत्यादिना । मुक्तिस्वरूपस्य सर्वेष्वपि मार्गेषु परमपुरुषार्थत्वेन संमतत्वात्तस्य नित्यत्वमेष्टव्यम् । तच्च निर्विशेषस्यैव घटते । सविशेषस्य भेदसव्यपेक्षत्वाद्भे-

दस्य च निर्वक्तुमशक्यत्वात्तस्य प्रागुपपादितत्वात्कल्पितत्वेन ज्ञाननिवर्त्यत्वे सति भेदसापेक्षं सविशेषं मुक्तिस्वरूपमपि निवर्तेत । तथा च तन्मुक्तिस्वरूपं सविशेषकं स्वर्गादिवदनित्यमेव स्यात् । अतो निर्विशेषमेव तादिति तद्गोचरं ज्ञानमपि तथाविधम् । तदिदमुक्तं निर्विशेषाद्वयात्मनेति । "एकमेवाद्वितीयं ब्रह्म" "अशब्दमस्पर्शमरूपमव्ययम्" "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतिरेव निर्विशेषं मुक्तिस्वरूपं प्रतिपादयति । ततश्चाबाधितविषयत्वादुपनिषद्वाक्यजनितं ज्ञानमेव विद्या मार्गान्तरात्तु नैवं निर्विशेषमुक्तिस्वरूपमवगम्यते । जीवेश्वरादि भेदादिविशेषमेव भवति । तज्जनितज्ञानानां बाधितविषयत्वादविद्यात्वमतो न तेषां मुक्तिसाधनत्वमित्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥

तस्मान्मार्गान्तराणां तु प्रामाण्यं वेदवित्तमाः ॥ १८ ॥
मुक्तेरन्यत्र नात्रैव क्रमेणैवात्र मानता ।
अतो वेदान्तभागस्थो महादेवोऽचिरेण तु ॥ १९ ॥
मुक्तिं ददाति नान्यत्र स्थितः सोऽपि क्रमेण तु ।
ददाति परमां मुक्तिमित्येषा शाश्वती श्रुतिः ॥ २० ॥

यदि मार्गान्तरजनिता मतयोऽविद्यास्तर्हि तेषामप्रामाण्यमेवेत्याशङ्क्याऽऽह—तस्मादिति । मुक्तेरन्यत्रेति । मुक्तिव्यतिरिक्त एव विषये मार्गान्तरस्य प्रामाण्यं न तु मुक्तौ । तत्रापि पूर्वोक्तसोपानक्रमेण वेदमार्गप्राप्तिद्वारा प्रामाण्यम् । नान्यत्रेति । वेदान्तवाक्यप्रतिपाद्यतया शिवः साक्षान्मुक्तिप्रदः । आगमान्तरे त्ववस्थितो न साक्षान्मुक्तिं ददाति । किंतूत्तरोत्तरविशिष्टमार्गप्राप्त्येति । " तं त्वौपनिषदं पुरुषं पृच्छामि " इत्यादावुपनिषत्स्वेवाधिगत औपनिषद इत्युपनिषदेकवेद्यस्य परशिवस्य परमपुरुषार्थप्रदत्वेन श्रुतत्वादित्यर्थः ॥ १८ ॥ १९ ॥ २० ॥

अतो वेदस्थितो मर्त्यो नान्यमार्गं समाश्रयेत् ।
वेदमार्गैकनिष्ठानां न किंचिदपि दुर्लभम् ॥ २१ ॥

नान्यमार्गं समाश्रयेदिति । वेदमार्गस्य साक्षान्मुक्तिप्रदत्वादित्यर्थः ॥२१॥

अत्रैव परमा मुक्तिर्भुक्तयश्चात्र पुष्कलाः ।
अतोऽधिकारिभेदेन मार्गा मानं न संशयः ॥ २२ ॥

---

१ ङ. च. °निर्वर्त्य° । २ ख. ध. छ. ज. निवर्त्यत । ङ च. निर्वर्त्येत । ३ ग. ङ. ज. °ज्जन्मनि तज्ज्ञाना° । ४ ग. घ. ङ. च. छ. °स्थितानां न ।

अतोऽधिकारीति । वेदमार्गानधिकृतान्बौद्धार्हताद्यधिकारिविशेषान्प्रति तत्तन्मार्गप्रामाण्यमस्त्येवेत्यर्थः ॥ २२ ॥

ईश्वरस्य स्वरूपं च बन्धहेतौ तथैव च ।
जगतः कारणे मुक्तौ ज्ञानादौ च तथैव च ॥ २३ ॥
मार्गाणां ये विरुद्धांशा वेदान्तेन विचक्षणाः ।
तेऽपि मन्दमतीनां च महामोहावृतात्मनाम् ।
वाञ्छामात्रानुगुण्येन प्रवृत्ता न यथार्थतः ॥ २४ ॥

नन्वेषां मार्गाणां परस्परविरुद्धार्थप्रतिपादकानां प्रामाण्यं नोपपद्यते प्रबलतरश्रुतिप्रमाणविरुद्धार्थप्रतिपादकत्वादित्यत आह—ईश्वरस्येत्यादिना । तत्रेश्वररूपादौ मार्गाणां विप्रतिपत्तिरास्ति । तथा हि—तत्र " ईश्वर एव नास्ति " इति सांख्या मीमांसकाश्च । " अस्ति पुण्यपापाशयैरपरामृष्टः पुरुषविशेषः " इति पातञ्जलाः । " नित्यज्ञानाधारः " इति तार्किकाः । तथा " प्रकृतिपुरुषयोरविवेकात्क्षेत्रज्ञस्य संसारः " इति सांख्यादयः । " तस्य स्वार्जितपुण्यपापवशाद्बन्ध इति तत्कारणं प्रकृतिरिति प्रकृतिपुरुषयोर्विवेकज्ञानेन भ्रमापगमे स्वरूपेणावस्थानं मुक्तिः " इति सांख्यादयः । " बुद्धिसुखदुःखादिनवगुणानामनात्मपदार्थेभ्यः पुरुषान्यथाख्यातिविरहादत्यन्तोच्छेदो मुक्तिः " इति तार्किकादयः । एवमन्येषामपि वादिनां मतेषु विषयेषु भूयस्यो विप्रतिपत्तय एवमाद्या वेदान्तविरुद्धा अन्यमार्गेषु दृश्यन्ते । तत्सर्वमर्थजातमनादिमायया मोहितानामत एवाल्पबुद्धीनां वेदानधिकृतानां बौद्धादीनां प्रथमत एवात्यन्तसूक्ष्मपरशिवस्वरूपग्रहणसामर्थ्याभावाद्वेदविरुद्धमपि प्रतिबन्धकपापक्षयार्थं तत्तल्लोकप्राप्तिरूपफलप्रदानेन वशीकरणार्थं च प्रथममीश्वरेणोपदिष्टं न परमार्थत इत्यर्थः ॥ २३ ॥ २४ ॥

दर्शयित्वा तृणं मर्त्यो धावन्तीं गां यथाऽग्रहीत् ॥ २५ ॥
दर्शयित्वा तथा क्षुद्रमिष्टं पूर्वं महेश्वरः ।
पश्चात्पाकानुगुण्येन ददाति ज्ञानमुत्तमम् ॥ २६ ॥

तत्र दृष्टान्तः—दर्शयित्वेति । यथा गां जिघृक्षन्पुरुषः प्रथमं तृणादिकं दर्शयित्वा तां गृह्णात्येवं परमेश्वरोऽपि तत्तन्मार्गानुरूपमिष्टं प्रापयित्वा(त्य)वशीकृत्य तत्तन्मार्गोक्तज्ञानेन प्रतिबन्धकपापक्षये सति तेषां चित्तपरिपाकानुसा-

१ ङ. 'त्रिपु' । २ ग. °ति पातञ्जलाः । प्रकृतिपुरुषविधे° । ३ ङ. °र्गोपयुक्त° ।

रेण निःश्रेयससाधनं परमपुरुषार्थभूतं ज्ञानमपि क्रमेण प्रयच्छतीत्यर्थः ॥ २५ ॥ २६ ॥

तस्मादुक्तेन मार्गेण शिवेन कथिता अमी ।
मार्गा मानं न चामानं मृषावादी कथं शिवः ॥ २७ ॥
महाकारुणिको देवः सर्वज्ञो निर्मलः खलु ।
तथाऽपि वेदो मार्गाणामुत्तमः सर्वसाधकः ॥ २८ ॥
सर्वमुक्तं समासेन मार्गप्रामाण्यनिर्णयम् ।
एवं बुद्ध्वा श्रुतौ श्रद्धां कुरुध्वं यत्नतो द्विजाः ॥ २९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे मार्गप्रामाण्यवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥

मार्गान्तराणामपि प्रतिपादितं प्रामाण्यमुपसंहरति—तस्मादिति । यस्मादुक्तप्रकारेण शिवेनैवोपदिष्टाः सर्वे मार्गास्तस्मात्तत्सर्वं प्रमाणमेव । अन्यथा मृषावादित्वप्रसङ्गादित्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे मार्गप्रामाण्यवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि प्रसादक्रममादरात् ।
यस्य विज्ञानमात्रेण प्रसादः शांकरो भवेत् ॥ १ ॥
पुरा सनत्कुमाराख्यो मुनिः सत्यपरायणः ।
ब्रह्माणं ब्रह्मसंपन्नमपृच्छदिदमादरात् ॥ २ ॥
सोऽपि सर्वजगद्धाता सह तेन मुनीश्वराः ।
नारायणमनाद्यन्तमपृच्छदिदमुत्तमम् ॥ ३ ॥

सोऽपि नारायणः श्रीमान्सह ताभ्यामुमापतिम् ।
कैलासशिखरे रम्ये समासीनमतिप्रभुम् ॥ ४ ॥
प्रणम्य दण्डवद्भक्त्या स्तुत्वा रुद्रेण हृद्व्रताः ।
अपृच्छद्देवदेवेशमिदं परमकारणम् ॥ ५ ॥
देवदेवोऽपि सर्वज्ञः साम्बः सर्वफलप्रदः ।
प्राह गम्भीरया वाचा विष्णवे मुनिपुंगवाः ॥ ६ ॥
तच्छ्रुत्वा भगवान्व्यासः साक्षात्प्रत्यक्षशंकरात् ।
सनत्कुमारात्सर्वज्ञादुक्तवान्मम सादरम् ॥ ७ ॥
अहं भाग्यवतामद्य युष्माकं मुनिपुंगवाः ।
केवलं कृपया वक्ष्ये तदेव परया मुदा ॥ ८ ॥

पूर्वस्मिन्नध्याये तत्र तत्र स्थितो देवः प्रसादं कुरुत इति तत्तदुपाधिविशिष्टस्येश्वरप्रसादकर्तृत्वप्रतिपादनात्तत्तत्प्रसादोऽप्युपाधिवशान्नानाविध इति सूचितम् । ते च मुमुक्षुणा पुरुषेण क्रमेण संपादनीयास्तत्र कीदृक्प्रसादानन्तरं कीदृक्प्रसाद इति क्रमजिज्ञासायां तन्निर्णयायाध्याय आरभ्यते—अथात इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

नित्यकर्माद्यनुष्ठानात्पापनाशो भवत्यतः ।
चित्तशुद्धिर्भवेज्जन्तो रुद्रस्यैव प्रसादतः ॥ ९ ॥
तया संसारदोषस्य दर्शनं भवति स्वतः ।
ततो विरक्तिः संसारात्पुनस्त्यागश्च कर्मणाम् ॥ १० ॥

नित्यकर्मादीति । आदिशब्देन नैमित्तिकसंग्रहः । फलादिविरहेणेश्वरार्पणबुद्ध्या वर्णाश्रमादिविहितयोर्नित्यनैमित्तिकयोर्यदनुष्ठानं तेन तत्त्वज्ञानप्रतिबन्धकपापक्षयो भवति। अयं प्रथमः प्रसादः। अत इति । अस्मादेव पापक्षयात्मकात्प्रसादाच्चित्तशुद्धिर्भवति । कालुष्यहेतोः पापस्य तदा प्रक्षीणत्वादित्यर्थः । रुद्रस्यैवेति । संहृतिव्यापारस्तमोगुणा(णोपा)धिकः शिवो रुद्रस्तत्प्रसादात्संहर्तृश्वरसाक्षात्कारेणात्र विरक्तिर्जायते । पुनस्तत्प्रसादादेव वैराग्यवशाद्यज्ञदानादिकर्मत्यागलक्षण उत्तमाश्रमस्वीकारो भवतीत्यर्थः । रुद्रो हि सर्वं संहरत्यतस्तत्प्रसादादस्यापि प्रवृत्तिर्मार्गानिवर्तकत्वं युक्तम् ॥ ९ ॥ १० ॥

१ घ. °त्तिर्भोग°।

विरिञ्चस्य प्रसादेन ततः शान्त्यादिसाधनम् ।
प्रसादाद्विष्णवात्साक्षान्मुमुक्षुत्वं पुनः स्वतः ॥ ११ ॥

विरिञ्चस्येति । ततः कर्मत्यागानन्तरं सृष्टिव्यापारस्य रजोगुणोपाधिकस्य प्रसादेन शमादिकं ज्ञानोत्पत्तावन्तरङ्गत्वेनान्त्याश्रमधर्मत्वेन विहितं साधनकलापं लभत इत्यर्थः। ब्रह्मणो रजोगुणवशात्प्रवर्तकत्वात्तत्प्रसादस्यापि शान्त्यादिसाधनेषु प्रवृत्तिहेतुत्वं युक्तम् । प्रसादाद्विष्णवादिति । सत्वगुणोपाधिको विष्णुस्तदीयप्रसादाद्भवति मुमुक्षुत्वम् । दग्धार्धकायः पुरुषो विचारमन्तरेण झटिति जले निमज्जत्येवमेव संसारतप्तस्य पुरुषस्य या मोक्षविषया हठात्प्रवृत्तेरिच्छा सा मुमुक्षुत्वं तद्विष्णोः प्रसादाज्जायत इत्यर्थः ॥ ११ ॥

विघ्नराजप्रसादेन गुरुपादपरिग्रहः ।
तेन योगाभिधं ध्यानमैश्वरं ज्ञानसाधनम् ॥ १२ ॥

एवं त्रिमूर्तिप्रसादेन साधनचतुष्टयसंपन्नस्य गुरूपसत्तिकरो विनायकप्रसाद इत्याह—विघ्नराजेति । योगाभिधामिति । गुरूपदिष्टेश्वरस्वरूपविषयं साक्षात्कारज्ञानसाधनं योगाख्यं प्रत्ययतमितविजातीयप्रत्ययसजातीयप्रत्ययप्रवाहरूपकं ध्यानं गुरुप्रसादाल्लभत इत्यर्थः ॥ १२ ॥

पुनः सांख्याभिधं ज्ञानं पार्वत्यास्तु प्रसादतः ।
सांख्यस्योत्पत्तिवेलायां मोचकस्य शिवस्य तु ॥ १३ ॥
प्रसादो जायते तेन संसारस्य विमर्दनम् ।
संसारमोचकः साक्षाच्छिव एव न चापरः ॥ १४ ॥

सांख्याभिधमिति । सम्यक्ख्यायते ज्ञायतेऽनयेति साक्षात्कारज्ञानजननी बुद्धिः संख्या तज्जन्यं सांख्यं तथाविधं ज्ञानं पार्वतीप्रसादाल्लभत इत्यर्थः। उक्तं हि—

"पार्वती परमा देवी ब्रह्मविद्याप्रदायिनी" इति ॥

संसारस्य विमर्दनमिति । साक्षात्कारज्ञानोत्पत्तिसमये जायमानः परशिवप्रसाद एव साक्षात्संसारस्य निवृत्तिं करोतीत्यर्थः ॥ १३ ॥ १४ ॥

अन्याश्च देवताः सर्वाः प्रणाडचैव हि मोच(चि)काः ।
अनेकजन्मसंसिद्धः श्रौतस्मार्तपरायणः ॥ १५ ॥

---

१ घ. °भिधं ज्ञान° । ङ. °भिसंधान° । २ घ. °रस्तत्साध°।

क्रमेणैव महादेवं मोचकं परमेश्वरम् ।
प्राप्नुयादप्रमादेन मुमुक्षुरिति हि श्रुतिः ॥ १६ ॥

प्रणाड्यैवेति । उक्तरीत्या साक्षात्संसारमोचको निरुपाधिकः परशिव एव । सोपाधिकास्तु ब्रह्मविष्ण्वाद्या वैराग्यादिजननेन परम्परयैव मोचका इत्यर्थः । अप्रमादेनेति । " प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् " इत्येषा श्रुतिः प्रमादरहितस्य सावधानस्य मुमुक्षोः परशिवप्राप्तिं प्रतिपादयतीत्यर्थः ॥ १५ ॥ १६ ॥

प्रसादहेतुभूतेषु प्रणवाख्यो महामनुः ।
वरिष्ठः कथितः प्राज्ञैर्देवतासु विशेषतः ॥ १७ ॥
विष्णुर्मुख्य इति प्रोक्तस्तथा सकलधर्मतः ।
रुद्राराधनमेवोक्तं वरिष्ठमिति वैदिकैः ॥ १८ ॥
ओंकारस्य प्रसादेन विष्णोश्चैव प्रसादतः ।
रुद्राराधनवाञ्छा स्यात्तदाराधनतः पुनः ॥ १९ ॥

वरिष्ठः कथित इति । "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् " इति श्रुतेरित्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥

ज्ञानमानन्दमद्वैतं परं ब्रह्माधिगच्छति ।
प्रसादादेव रुद्रस्य ज्ञानं मोक्षैकसाधनम् ॥ २० ॥
देवयानाभिधा विष्णोर्गतिः स्रष्टुः प्रसादतः ।
ब्राह्मण्यं कीर्तिरिन्दोश्च रवेरारोग्यमेव तु ॥ २१ ॥
अग्नेरैश्वर्यमतुलं पितृयाणो[2] यमस्य तु ।
पुरंदरस्य सौभाग्यं बलं वायोः प्रसादतः ॥ २२ ॥
विघ्नराजस्य देवस्य कार्यसिद्धिरविघ्नतः ।
षण्मुखस्य प्रसादेन सर्वसिद्धिरयत्नतः ॥ २३ ॥

---

१ ङ. वरिष्ठैः । २ ङ. पितृयाणं ।

भारत्याश्च प्रसादेन वाग्विभूतिरयत्नतः ।
श्रीदेव्यारतु प्रसादेन सर्वैश्वर्यमयत्नतः ॥ २४ ॥

ज्ञानमानन्दमिति । सत्यज्ञानानन्दैकरसमित्यर्थः ॥ २० ॥ २१ ॥ २२ ॥ ॥ २३ ॥ २४ ॥

दुर्गादेव्याः प्रसादेन सर्वत्र विजयो भवेत् ।
कामिनां देवताः सर्वाः सांसारिकफलप्रदाः ॥ २५ ॥
कामनारहितानां तु शुद्धिद्वारेण देवताः ।
महादेवप्रसादस्य हेतुभूता भवन्ति हि ॥ २६ ॥

कामिनामिति । फलकामनापुरःसरं देवताराधनं कुर्वतां विष्ण्वाद्या देवता यथोदीरितदेवयानप्राप्त्यादिरूपसांसारिकफलप्रदाः । निष्कामाणां तु प्रतिबन्धकपापनिर्हरणेन चित्तशुद्धिजननद्वारा परमेश्वरप्रसादहेतव इत्यर्थः ॥२५॥२६॥

महादेवप्रसादस्तु न हेतुः कस्यचिद्द्विजाः ।
स्वयं भुक्तिकरः पुंसां कामिनामचिरेण तु ॥ २७ ॥
स्वयं मुक्तिकरः साक्षात्कामनारहितस्य तु[1] ।
चिरेणैव तु कालेन शिवस्यैव प्रसादतः ॥ २८ ॥
देवता भुक्तिदा एव मुक्तिदा न स्वतन्त्रतः ।
महादेवप्रसादेन समः कश्चिन्न विद्यते ॥ २९ ॥
महादेवप्रसादेन खलु विष्णुपदं द्विजाः ।
ब्रह्मेन्द्रादिपदं चापि न स्वतः सर्वदेहिनाम् ॥ ३० ॥

एवं देवतान्तरप्रसादस्य परशिवप्रसादहेतुत्वमभिधाय तत्प्रसादस्य माहात्म्यं प्रपञ्चयति—महादेवेत्यादिना ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

प्रसादे सति देवस्य शिवस्य परमात्मनः ।
वैदिकानां तथाऽन्येषामपि मुक्तिर्हि सिध्यति ॥ ३१ ॥
॥ ३१ ॥

---

१ छ. तु ॥ अचिरेण तु ।

ब्राह्मणाश्च विमुच्यन्ते प्रसादेन शिवस्य तु ।
क्षत्रियाश्च तथा वैश्याः शूद्रा अपि च संकराः ॥ ३२ ॥
पाषाण्डिनो[1] विमुच्यन्ते प्रसादेन शिवस्य तु ।
किं पुनर्वैदिका विप्राः स्त्रियः सर्वा मुनीश्वराः ॥ ३३ ॥
खरोष्ट्रतरवोऽपीशप्रसादेनैव केवलम् ।
अयत्नेन विमुच्यन्ते[2] नात्र संदेहकारणम् ॥ ३४ ॥
गर्भस्थो मुच्यते कश्चिज्जातमात्रेण कश्चन ।
बाल्ययौवनवार्धक्याद्यवस्थासु च कश्चन ॥ ३५ ॥
पाषण्डाश्च विमुच्यन्ते प्रसादेन महेशितुः ।
वैदिकाश्च खरोष्ट्रादिजातयश्च तथैव च ॥ ३६ ॥
पांसवः पर्वतायन्ते पांसूयन्ते च पर्वताः ।
शिवप्रसादयुक्तानामाज्ञयैव तु केवलम् ॥ ३७ ॥
ब्रह्मनारायणाद्यास्तु देवता अखिला अपि ।
वि[3]नायन्ते च नश्यन्ति ह्याज्ञयैव प्रसादिनः ॥ ३८ ॥
प्रसादस्य च माहात्म्यं शिवस्य परमात्मनः ।
अपि देवा न जानन्ति श्रुतयश्च न संशयः ॥ ३९ ॥
शंकरोऽपि महातेजाः शांकरी वा मुनीश्वराः ।
शिवप्रसादमाहात्म्यं किंतु जानाति वा न वा ॥ ४० ॥
॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥
भवन्तोऽपि महादेवप्रसादाय मुनीश्वराः ।
गुरुपादाम्बुजं नित्यं पूजयध्वं यथाबलम् ॥ ४१ ॥
श्रीमद्व्याघ्रपुरे पुण्ये सर्वदेवसमावृते ।
स्वस्वरूपानुसंधानप्रमोदेनैव केवलम्[4] ॥ ४२ ॥

---

१ घ छ. पाखण्डिनो । २ छ. °न्ते प्रसादेन शिवस्य तु ॥ ३४ ॥ ग° । ३ ग. °न शिवस्य तु । वै° । घ. °न विनेशि° । ४ छ. °वताः सकला । ५ ङ. °म् ॥ ४२ ॥ तत्र साक्षाद्भ्रम° ।

साक्षाद्[1]भ्रसभामध्ये नृत्यन्तं देवनायकम् ॥
अम्बिकासहितं नित्यं भजध्वं परया मुदा ॥ ४३ ॥
श्रीकालहस्तिनाथस्य प्रणामालोकनादयः ॥
अपि शंभोः प्रसादाय भवन्ति द्विजपुंगवाः ॥ ४४ ॥
वाराणस्यां महादेवप्रणामालोकनादयः ॥
अपि शंभोः प्रसादाय भवन्ति द्विजपुंगवाः ॥ ४५ ॥

तथाविधप्रसादलाभाय तत्साधनमुपदिशति—भवन्तोऽपीत्यादिना ॥ ४१ ॥ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

प्रसादलाभाय हि धर्मसंचयः
प्रसादलाभाय हि देवतार्चनम् ॥
प्रसादलाभाय हि देवतास्मृतिः
प्रसादलाभाय हि सर्वमीरितम् ॥ ४६ ॥
शिवप्रसादेन विना न भुक्तयः
शिवप्रसादेन विना न मुक्तयः ॥
शिवप्रसादेन विना न देवताः
शिवप्रसादेन हि सर्वमास्तिकाः ॥ ४७ ॥

न केवलं महादेवप्रसादलाभे गुरूपसत्तिपुरःसरं तदर्चनमेव कारणमपि तु वर्णाश्रमविहितं यज्ञदानादिकं देवतान्तरार्चनादिकं च यन्निष्कामेण क्रियते तत्सर्वमपि परम्परया शिवप्रसादसाधनमित्याह—प्रसादलाभायेत्यादिना ॥ ४६ ॥ ४७ ॥

शिवप्रसादेन समो न विद्यते
शिवप्रसादादधिको न विद्यते ॥
शिवप्रसादेन शिवस्य सन्निधिः
शिवप्रसादेन विशुद्धताऽऽत्मनः ॥ ४८ ॥

१ ग. घ. छ. °क्षाद्भ्र° । २ ग. च. छ. कर्मसंचयः । घ. कार्यसंचयः ।

शिवप्रसादेन युतस्य वैदिकं
न विद्यते कर्म जनस्य सुव्रताः ।
शिवप्रसादेन युतस्य तान्त्रिकं
न विद्यते कर्म तथैव किंचन ॥ ४९ ॥
शिवप्रसादेन युतस्य सुव्रता
न जन्मनाशौ भवतः सदैव तु ।
शिवप्रसादेन युतः स्वयं शिवः
शिवप्रसादस्तु शिवप्रसादतः ॥ ५० ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे शंकरप्रसादक्रमवर्णनं नाम
त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ ४८ ॥ ४९ ॥ ५० ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे शंकर-प्रसादक्रमवर्णनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि प्रसादस्य तु वैभवम् ।
अत्यन्तश्रद्धयोपेताः शृणुतातीव शोभनम् ॥ १ ॥

श्रीमद्व्याघ्रपुरादिस्थानेषु परमेश्वरमुपासीनानामुक्तप्रभावः परशिवप्रसादो जायत इत्युक्तम् । तत्रापि श्रीमद्व्याघ्रपुरे परमेश्वरोपासनं महापातकादिदोषदूषितस्यापि शिवप्रसादहेतुर्भवतीति दर्शयितुमध्याय आरभ्यते—अथात इति ॥ १ ॥

पुरा कश्चिन्महापापी दुर्घटो नाम नामतः ।
जात्या शूद्रो महाक्रुद्धो[1] महासाहसिकोत्तमः[2] ॥ २ ॥

१ ज. महाक्रूरो । २ ङ. °कोऽधमः ।

अभूतेन महामोहाद्ब्राह्मणानां शतं हतम् ।
गवां शतं हतं तेन दग्धं गेहशतं तथा ॥ ३ ॥
अथ चौर्यं कृतं तेन नराणामविचारतः ।
बलात्परस्त्रियो भुक्ता बहुशो दृष्टिगोचराः ॥ ४ ॥
वापीकूपतडागादिजलं तेनैव दूषितम् ।
वर्णाश्रमसमाचारमर्यादा तेन भेदिता ॥ ५ ॥
सहस्रजन्मतः पूर्वं दुर्घटेन मुनीश्वराः ।
शिवयोगिकरे तेन सुवर्णं निष्कमुत्तमम् ॥ ६ ॥
दत्तं तेन मतिस्तस्य जाता कालेन शोभना ।
अहो मोहेन पापानि कृतानि सुबहूनि च ॥ ७ ॥
मया तेषां न पश्यामि विनाशस्य तु कारणम् ॥
ब्राह्मणा वेदविद्वांसो वदन्ति नरकान्मम ॥ ८ ॥
इति व्याकुलचित्तस्य दुर्घटस्य दुरात्मनः ॥
मतिप्रदानं कृतवान्ब्राह्मणः कश्चिदास्तिकः ॥ ९ ॥

ब्राह्मण उवाच--

श्रीमद्व्याघ्रपुरं नाम स्थानमस्ति महीतले ।
यत्र नृत्यति विश्वात्मा शिवः संसारमोचकः ॥ १० ॥
यस्य माहात्म्यविज्ञानाद्विष्णुर्विश्वजगन्मयः ।
तताप परमं घोरं तपस्तत्रेश्वरं प्रति ॥ ११ ॥
यस्य माहात्म्यविज्ञानाद्ब्रह्मा विश्वामराधिपः ।
तताप परमं घोरं तपस्तत्रेश्वरं प्रति ॥ १२ ॥
यस्य माहात्म्यविज्ञानादिन्द्रः शस्त्रभृतां वरः ।
तताप परमं घोरं तपस्तत्रेश्वरं प्रति ॥ १३ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

१ च. °सदाचा° । २ घ. ज. दास्तिकाः । ३ ख. ग. घ. ज. सर्वात्मा ।

यस्य माहात्म्यविज्ञानादेवा यक्षाश्च किंनराः ।
तपवन्तो महाघोरं तपस्तत्रेश्वरं प्रति ॥ १४ ॥
यस्य माहात्म्यविज्ञानान्मुनयो मुनिसत्तमाः ।
तपवन्तो महाघोरं तपस्तत्रेश्वरं प्रति ॥ १५ ॥
यत्र सर्वेश्वरं दृष्ट्वा प्रसादं लब्धवान्हरिः ।
तत्र देवमुपास्स्व त्वं प्रनृत्यन्तमुमापतिम् ॥ १६ ॥
यत्र सर्वेश्वरं दृष्ट्वा प्रसादं लब्धवानजः ।
तत्र देवमुपास्स्व त्वं प्रनृत्यन्तमुमापतिम् ॥ १७ ॥
यत्र वज्री हरं दृष्ट्वा प्रसादं लब्धवान्द्विजाः ।
तत्र देवमुपास्स्व त्वं प्रनृत्यन्तमुमापतिम् ॥ १८ ॥
यत्र दृष्ट्वा हरं देवा अशेषा आस्तिकोत्तमाः ।
यक्षराक्षसगन्धर्वसिद्धविद्याधरादयः ॥ १९ ॥
प्रसादं लब्धवन्तस्तु स्वाधिकारानुरूपतः ।
तत्र देवमुपास्स्व त्वं प्रनृत्यन्तमुमापतिम् ॥ २० ॥

सूत उवाच—

इत्येवं ब्राह्मणेनोक्तो दुर्घटः पुण्यगौरवात् ।
श्रीमद्व्याघ्रपुरं गत्वा श्रद्धया परया सह ॥ २१ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

प्रदक्षिणत्रयं कृत्वा स्नात्वा नित्यमतन्द्रितः ।
नमोन्तं शिवमन्त्रं तु जपित्वाऽष्टोत्तरं शतम् ॥ २२ ॥

नमोन्तं शिवमन्त्रमिति । उक्तं हि शिवमाहात्म्यखण्डे चतुर्थेऽध्याये शिवपूजाविधौ—

" नमोन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ।
विरक्तानां च शूद्राणामेवं पूजा प्रकीर्तिता " इति ।

एवं चास्मिन्पुराणे शूद्रस्य शिवाय नम इत्येवं पञ्चाक्षरमन्त्रः पूजादौ प्रयो-

क्तव्यत्वेनाभिमतः । पुराणान्तरे तु षडक्षरमन्त्रेण प्रणवं विहायावशिष्टेन पञ्चाक्षरेण शूद्रादीनामपि पूजादि कार्यमित्युक्तम् । यथाऽऽह वसिष्ठः—

" ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
सदों नमः शिवायेति शिवमन्त्रं समाश्रयेत् ॥
पञ्चाक्षरः सप्रणवो द्विजराज्ञोर्विधीयते ।
विट्शूद्रजन्मनां वाऽपि स्त्रीणां निर्बीज एव हि ॥
सबीजः सस्वरः सौम्यो विप्रक्षत्रिययोर्द्वयोः ।
नेतरेषामितीशानः स्वयमेवाऽऽह शंकरः ॥
दुर्वृत्तो वृत्तहीनो वा पतितोऽप्यन्त्यजोऽपि वा ।
जपेत्पञ्चाक्षरीं विद्यां जपेनैवाऽऽप्नुयाच्छिवम् " इति ॥ २२ ॥

श्रीमद्भसभामध्ये प्रनृत्यन्तमुमापतिम् ।
दृष्ट्वा भूमौ महाभक्त्या दण्डवत्प्रणिपत्य च ॥ २३ ॥
रुद्रभक्ताय विप्राय भस्मनोद्धूलिताय च ।
शिवज्ञानैकनिष्ठाय दत्त्वा धान्यं धनं मुदा ॥ २४ ॥
सत्यवाक् शौचसंपन्नः कामक्रोधादिवर्जितः ।
वत्सराणां त्रयं तत्र उवासातिप्रियेण सः ॥ २५ ॥
देवदेवो महादेवो महाकारुणिकोत्तमः ।
प्रसादमकरोत्तस्य दुर्घटस्य दुरात्मनः ॥ २६ ॥
॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

शिवप्रसादेन स दुर्घटः पुनः
समस्तलोकाधिपतिर्बभूव ।
विमुक्तिमप्याप महत्तरामिमां
परप्रमातृप्रथनैकलक्षणाम् ॥ २७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे प्रसादवैभवं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

परप्रमातृप्रथनैकलक्षणामिति । प्रमाताऽन्तःकरणोपहितः साक्षी परं निर-

तिशयं प्रमातुरुपाधिविलयेन यत्प्रथनं ख्यापनं तदेकमेव लक्षणं यस्यास्तामित्यर्थः ॥ २७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे प्रसादवैभवं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

अथ पञ्चविंशोऽध्यायः।

सूत उवाच—

भूयोऽपि देवदेवस्य प्रसादस्य तु वैभवम् ।
प्रवक्ष्यामि समासेन शृणुत श्रद्धया सह ॥ १ ॥

त्रयोविंशेऽध्याये—

" संसारमोचकः साक्षाच्छिव एव न चापरः ।
अन्याश्च देवताः सर्वाः प्रणाड्यैव हि मोचिकाः ॥ "

इति यदुक्तं तद्विष्णुना स्ववचनेनैव प्रतिपादितमिति समर्थयितुमध्याय आरभ्यते—भूयोऽपीति ॥ १ ॥

पुरा कश्चिद्द्विजश्रेष्ठः सर्वलक्षणसंयुतः ।
सत्यसंधाभिधः शुद्धो विष्णुभक्तो विशेषतः ॥ २ ॥
अभूत्तेन कृतं सर्वं श्रुतिस्मृत्युदितं मुदा ।
प्रतिष्ठा च कृता विष्णोर्बहुशः पण्डितोत्तमाः ॥ ३ ॥
आराधितश्च भगवान्विष्णुर्विश्वजगन्मयः ।
दिने दिने महाभक्त्या सुगन्धकुसुमादिभिः ॥ ४ ॥
वैष्णवा विविधा मन्त्रास्तेन जप्ता दिने दिने ।
चिरंतनानि स्थानानि विष्णोर्दृष्टानि सादरम् ॥ ५ ॥
वैष्णवा मनुजास्तेन पूजिताश्च दिने दिने ।
सर्वस्वं वैष्णवे दत्तं सत्यसंधेन सादरम् ॥ ६ ॥
पुनर्नारायणः श्रीमाञ्शङ्खचक्रगदाधरः ।
प्रत्यक्षमभवत्तस्य प्रसन्नः पङ्कजेक्षणः ॥ ७ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

तं दृष्ट्वा सत्यसंधस्तु प्रसन्नेन्द्रियमानसः ।
प्रणम्य दण्डवद्भूमौ भक्त्या परमया सह ॥ ८ ॥
गन्धपुष्पादिभिर्दिव्यैः समाराध्य यथाबलम् ।
स्तोतुमारभते विष्णुं विश्वलोकैककारणम् ॥ ९ ॥

सत्यसंध उवाच-

विष्णवे विश्वलोकानां हेतवे विविधात्मने ।
वेदवेदान्तनिष्ठानामात्मभूताय ते नमः ॥ १० ॥
कृष्णाय क्लेशहन्त्रे च मम केनापि हेतुना ।
प्रत्यक्षाय प्रबोधाय विदुषामात्मने नमः ॥ ११ ॥
केशवायातिशुद्धाय केवलाय परात्मने ।
केषांचिच्छुद्धचित्तानां प्रसन्नाय नमो नमः ॥ १२ ॥
॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥
मुञ्जकेशाय मुण्डाय मुण्डिनामार्तिहारिणे ।
मौननिष्ठस्य मूर्खस्य मुक्तिदाय नमो नमः ॥ १३ ॥
श्रीवत्साङ्काय वर्याय वरदाय परात्मने ।
वञ्चकानामगम्याय वस्तुभूताय ते नमः ॥ १४ ॥
श्रीपते भूपते तुभ्यं गोपते ममरूपिणे ।
ममकारमहामोहविनाशाय नमो नमः ॥ १५ ॥

मुञ्जा इवात्यायताः केशा यस्य स तथोक्तः । मुण्डिनामिति । यतीनामित्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥

पीतवासाय पीताय पापपञ्जरहारिणे ।
पापकर्मपराणां तु भञ्जकाय नमो नमः ॥ १६ ॥
विष्वक्सेनाय विश्वाय विश्वोत्पत्त्यादिहेतवे ।
विश्वविज्ञानरूपाय निर्मलाय नमो नमः ॥ १७ ॥

---

१ ङ. °त्मात्मने न° । २ ङ. °तात्मने न° ।

विश्वरूपाय विश्वासलभ्यायाविदितात्मने ।
विश्वोत्तीर्णाय विश्वस्य साक्षिरूपाय ते नमः ॥ १८ ॥
मुरारिणे मुहूर्ताय मुहूर्तस्य विधायिने ।
मुहूर्तं भजतां नृणां मुक्तिदाय नमो नमः ॥ १९ ॥
शौरिणे शार्ङ्गिणे तुभ्यं शङ्खकुन्देन्दुरूपिणे ।
शाकमूलपराणां तु शान्तिदाय नमो नमः ॥ २० ॥
पद्मनाभाय पद्माया: पतये पद्मचक्षुषे ।
हृत्पद्मकर्णिकामध्ये समासीनाय ते नमः ॥ २१ ॥

भञ्जकायेति । हिंसकायेत्यर्थः । "भञ्ज नाशने" इति धातुः ॥१६॥१७॥ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

मुकुन्दाय मुकुन्दस्य महामूर्खस्य रक्षसः ।
हर्त्रे भर्त्रे विशिष्टानामात्मने विदुषां नमः ॥ २२ ॥

मुकुन्दस्येति । मुकुन्दो नाम कश्चिद्राक्षसोऽप्यस्ति । तस्य हन्त्र इत्यर्थः ॥ २२ ॥

गोविन्दाय गवां नित्यं पालकाय परात्मने ।
नन्दगोपाय गुप्ताय नमः सर्वस्य गुप्तये ॥ २३ ॥

नन्दगोपायेति । भीमसेनो भीम इतिवन्नन्दगोप एव नन्दस्तं गोपायतीति नन्दगोपः श्रीकृष्णः ॥ २३ ॥

भूधराय भुजंगस्य महाकोपच्छिदेऽचिरात् ।
भूतनाथाय भूतानामाधाराय नमो नमः ॥ २४ ॥

भुजंगस्येति । यमुनामध्यवर्तिनः कालियाख्यस्येत्यर्थः ॥ २४ ॥

वैकुण्ठाय विशिष्टानां विशिष्टज्ञानदायिने ।
विशिष्टाय विरिञ्चादिदेवेभ्यश्च नमो नमः ॥ २५ ॥
क्षीरोदशायिने साक्षात्क्षीरोदस्यापि हेतवे ।
निराधाराय नित्याय नित्यानन्दाय ते नमः ॥ २६ ॥

॥ २५ ॥ २६ ॥

यज्ञरूपाय यज्ञस्य फलप्राप्त्येकहेतवे ।
यज्ञानां पतये तुभ्यं यज्ञगम्याय ते नमः ॥ २७ ॥
जनार्दनाय दैत्यानां शत्रवे शक्तिदायिने ।
स्वभक्तानां विशुद्धानां विशेषेण नमो नमः ॥ २८ ॥
वासुदेवाय वस्वादिदायिने वासवादिभिः ।
पूजिताय पुराणाय पुंसे पूर्णात्मने नमः ॥ २९ ॥
दामोदराय देवानां शत्रुनाशैकहेतवे ।
दान्तचित्तजनस्यास्य रक्षकाय नमो नमः ॥ ३० ॥
अच्युताय[1]खिलस्यास्य साक्षिणेऽच्युतवस्तुभिः ।
असक्ताय सुसक्ताय स्वसंवेद्याय[2] ते नमः ॥ ३१ ॥
हरये हारकेयूरकटकादिविभूषणैः ।
अलंकृताय कल्याणशरीराय नमो नमः ॥ ३२ ॥
हृषीकेशाय हेमादिधनधान्यप्रदायिने ।
हृदि चिन्तयतां नित्यं नमः सत्यपरात्मने ॥ ३३ ॥
नारायणाय नरकार्णवतारणाय
नानाविधस्य जगतः स्थितिकारणाय ।
मोहावृतस्य निखिलस्य जनस्य सद्यः
श्रेयस्कराय पुरुषाय नमः परस्मै ॥ ३४ ॥
॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

सूत उवाच—

एवं भक्त्या हरिं स्तुत्वा सत्यसंधो महाद्विजः ।
प्रसादं कुरु मे देव मुच्येयं येन बन्धनात् ॥ ३५ ॥
इति तं प्रार्थयामास सत्यसंधो जनार्दनम् ।
जनार्दनोऽपि भगवान्सर्वभूतहिते रतः ॥ ३६ ॥

१ ज. यज्ञानां । २ ग. स्वसंवे° ।

सत्यवागनसूयश्च सम्यग्ज्ञानमहोदधिः।
प्राह गम्भीरया वाचा सत्यसंधं प्रति द्विजाः ॥ ३७ ॥

विष्णुरुवाच—

सत्यसंध महाभक्त मम सत्यपरायण।
श्रौतस्मार्तैकनिष्ठानामुत्तमोत्तम सुव्रत ॥ ३८ ॥
नाहं संसारमग्नानां साक्षात्संसारमोचकः।
ब्रह्मादिदेवताश्चान्या नैव संसारमोच(चि)काः ॥ ३९ ॥
शिव एव हि जन्तूनां महासंसारवर्तिनाम्।
संसारमोचकः साक्षात्सर्वज्ञः साम्ब ईश्वरः ॥ ४० ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

न तस्य कार्यं करणं वस्तुतो विद्यतेऽनघ।
न तत्समश्चाप्यधिकश्चेतनो विद्यते क्वचित् ॥ ४१ ॥
तथाऽपि परमा शक्तिर्विविधा तस्य शूलिनः।
श्रूयते सर्ववेदेषु स्वज्ञानं च बलं स्वकम्।
स्वव्यापारश्च तस्यास्य स्वतःसिद्धो न चान्यतः ॥ ४२ ॥

एवं विष्णुः स्वस्य ब्रह्माद्यन्यदेवतानां च साक्षात्संसारमोचकत्वाभावं परमेश्वरस्य च साक्षात्संसारमोचकत्वमभिधाय तदुपपादयितुं परमेश्वरस्य स्वरूपमादतिशयं दर्शयति—न तस्य कार्यमित्यादिना। तस्य परशिवस्य वस्तुतः परमार्थतो भूतारब्धत्वात्कार्यं शरीरं रूपग्रहणादौ करणं चक्षुरादीन्द्रियं तदुभयमपि नास्ति। एवं स्थूलसूक्ष्मशरीरद्वयनिषेधेन तदुपादानभूतमूलाविद्याऽपि परमार्थतस्तस्मिन्नास्तीत्युक्तं भवति। किंच तत्सदृशस्तदधिको वा पुरुषः कुत्रापि परमार्थतो नैव विद्यते यद्यप्येवमेव परमार्थदृष्टौ तथाऽपि तस्य परशिवस्य पुनरा निरतिशया सच्चिद्रूपिण्येकैव शक्तिर्विविधस्वरूपप्रतियोगिदशाज्ञानाविधैव सर्वेषु वेदेषु श्रूयते। अत एव त्रयोदशेऽध्याय एकस्याः परशक्तेरुपाधिवशाज्ज्ञानाभावोऽधस्तात्प्रतिपादितः 'जगत्कारणमाप्नुयु' इत्यादिना। तथा निरतिशयं ज्ञानं कृत्स्नजगन्निर्माणादिसामर्थ्यलक्षणं बलं तन्निष्पाद्या क्रिया चैतत्त्रितयमपि तस्य स्वभावसिद्धं न स्वन्यापेक्षमित्यर्थः। अयमेवार्थः श्वेताश्वतरशाखाया-

१ ख. शिवो हि सर्वज°। २ ग. °ज्ञानस्य ब°। ३ परमा। ४ घ. °शान्माना°।

माम्नायते—" न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च " ॥ इति । ॥ ४१ ॥ ४२ ॥

मम ब्रह्मादिदेवानामपि तस्य प्रसादतः ।
विज्ञानादित्रयं यस्मात्स एव भवमोचकः ॥ ४३ ॥
अहं ब्रह्मादिदेवाश्च प्रसादात्तस्य शूलिनः ।
प्रणाडयैव हि संसारमोचका नात्र संशयः ॥ ४४ ॥

एवं विष्णुः शिवस्य ज्ञानबलक्रियाणां स्वाभाविकत्वेनातिशयमुपपाद्य स्वस्यान्येषां च ज्ञानादित्रितयं तत्प्रसादलभ्यमिति दर्शयति—मम ब्रह्मेति। स एवेति । यस्माच्छिवस्य ज्ञानादित्रितयं स्वभावसिद्धं तस्मात्स एव साक्षात्संसारमोचकः । वयं तु परम्परयैवेत्यर्थः ॥ ४३ ॥ ४४ ॥

प्रसादो मुक्तिदः साक्षाच्छिवात्सत्यादिलक्षणात् ॥ ४५ ॥
अप्रसक्तभवाच्छुद्धादसङ्गात्सर्वसाक्षिणः ।
अम्बिकासहितादस्मात्सर्वज्ञादेव नान्यतः ॥ ४६ ॥
मम ब्रह्मादिदेवानामपि साक्षाच्छिवेच्छया ।
भोगमोक्षप्रदः पुंसां प्रसादो जायतेऽनघ ॥ ४७ ॥

यदीयप्रसादः साक्षान्मुक्तिप्रदस्तस्य परशिवस्य नैजं रूपमाह—शिवात्सत्यादिलक्षणादित्यादिना । "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" इत्युक्तस्वरूपादित्यर्थः । अप्रसक्तभवादिति । अप्रसक्तोऽप्राप्त एव संसारो यस्मिन्स तथोक्तः । अत एव शुद्धः । एतदुभयमपि कुत इत्यत आह—असङ्गादिति । मायातत्कार्येषु क्वचिदपि न सज्जत इत्यसङ्गः "असङ्गो न हि सज्जते" इति श्रुतेः । असङ्गत्वमपि कुत इत्यत आह—सर्वसाक्षिण इति । यस्मात्सर्वस्य मायातत्कार्यप्रपञ्चस्यासौ साक्षी तटस्थेन द्रष्टा ततस्तत्स्वरूपानुप्रवेशादसङ्ग इत्यर्थः ॥ ४५ ॥ ४६ ॥ ४७ ॥

तस्मात्प्रसादश्चान्येषां मम चाऽऽश्रित्य शूलिनः ॥
प्रसादं भोगमोक्षाय न स्वयं नात्र संशयः ॥ ४८ ॥

पुनः पूर्णप्रसादाय सत्यसंध मम प्रिय ॥
महादेवं महात्मानं भज कारुणिकोत्तमम् ॥ ४९ ॥

तस्मात्प्रसाद इति । अन्येषां ब्रह्मादीनां मम च यः प्रसादोऽसौ परमेश्वरस्य प्रसादमाश्रित्यैव पुंसां भोगमोक्षप्रदो न स्वतन्त्र इत्यर्थः ॥ ४८ ॥४९॥

महादेवं समाश्रित्य वाञ्छितं नाऽऽप्नुयाद्यदि ॥
महादेवो महादेवं कथमन्यं समाश्रयेत् ॥ ५० ॥

महादेवं समाश्रित्येति । महादेवमाश्रितेनेष्टफलानवाप्तौ तस्य साधकस्य तत्फलप्रापणाय स महादेवः कथमन्यं महादेवं समाश्रयेत् । स्वस्मादन्यस्य महतो देवस्याभावादित्यर्थः ॥ ५० ॥

नामतश्चार्थतश्चापि महादेवो महेश्वरः ॥
तदन्ये केवलं देवा महादेवा न तेऽनघ ॥ ५१ ॥

एतदेवोपपादयति—नामत इति । महांश्चासौ देवश्चेति यो महादेवशब्दार्थस्तदर्थपर्यालोचनादपि परमेश्वर एव महादेवस्तथा नामतोऽपि स एव महादेवस्तदन्ये तु केवलं देवा एव । अतः परमेश्वरादन्यो महादेवो नास्तीत्यर्थः ॥ ५१ ॥

महादेवं विना यो मां भजते श्रद्धया सह ॥
नास्ति तस्य विनिर्मोक्षः संसाराज्जन्मकोटिभिः ॥ ५२ ॥
सर्वमुक्तं समासेन मम भक्तस्य तेऽनघ ॥
शिवादन्यं परित्यज्य शिवं साम्बं सदा भज ॥ ५३ ॥

महादेवं विनेति । महादेवेन सहैव मम विष्णोर्मूर्तिराराधनीयेत्यर्थः । स्पष्टमन्यत् ॥ ५२ ॥ ५३ ॥

सूत उवाच—

एवमुक्त्वा हरिः श्रीमान्किरीटी गरुडध्वजः ॥
सर्वविज्ञानसंपन्नस्तत्रैवान्तर्हितोऽभवत् ॥ ५४ ॥
सत्यसंधो महाधीमान्महाविष्णोः प्रसादतः ॥
परित्यज्याखिलान्देवानाश्रितोऽम्बिकेश्वरम् ॥ ५५ ॥

॥ ५४ ॥ ५५ ॥

---

१ ब. 'तं प्राप्नु'।

ईश्वरस्य प्रसादेन सत्यसंधो महाद्विजः ॥
ज्ञानं वेदान्तजं लब्ध्वा विमुक्तो भवबन्धनात् ॥ ५६ ॥
भवन्तोऽपि द्विजश्रेष्ठाः शिवादन्यत्तु दैवतम् ॥
परित्यज्य प्रसादाय भजध्वं शिवमव्ययम् ॥ ५७ ॥
सर्वमुक्तं समासेन युष्माकं मुनिपुंगवाः ॥
मम वाक्येऽतिविश्वासं कुरुध्वं यत्नतो द्विजाः ॥ ५८ ॥
अतिरहस्यमिदं कथितं मया
श्रुतिपरम्परया च समागतम् ॥
मुनिपरम्परया च समागतं
न कथितव्यमशिष्टजनस्य तु ॥ ५९ ॥
इति श्रीस्कन्दपुराणे श्रीसूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
प्रसादवैभवं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

इति श्रीस्कन्दपुराणे श्रीसूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे
प्रसादवैभवं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

अथ षड्विंशोऽध्यायः ।

अथातः संप्रवक्ष्यामि शिवभक्तिं समासतः ॥
यया भुक्तिर्विमुक्तिश्च मुनीन्द्राः सर्वदेहिनाम् ॥ १ ॥

अथास्य परशिवप्रसादस्य हेतुभूता भक्तिविशेषाः प्रदर्श्यन्ते— अथात इति। यया भुक्तिर्विमुक्तिरिति । यया शिवभक्त्या । ईश्वरप्रसादहेतुभूतयेत्यर्थः॥ १ ॥

भक्तिर्बहुविधा ज्ञेया भवानीसहितस्य तु ॥
एका शंकरसायुज्यश्रद्धा सारतरा परा ॥ २ ॥
अन्या शंकरसारूप्यश्रद्धाऽतीव शिवप्रिया ॥

१ क. ग. 'दभू' ।

अपरा शिवसामीप्यश्रद्धा वेदविदां वराः ।
इतरा शिवसालोक्यश्रद्धाऽभीष्टफलप्रदा ॥ ३ ॥

शंकरसायुज्येति । सायुज्यसारूप्यसामीप्यसालोक्यरूपा मुक्तिविशेषाः । तत्र सायुज्यं नाम मत्यगात्मनः परशिवस्वरूपसाक्षात्कारेण[1] तदात्मनाऽवस्थानम् । अतस्तस्य सर्वोत्कृष्टत्वात्तद्विषया श्रद्धा मुख्या शिवभक्तिः । सारूप्यं नाम रुद्रलोकादौ शिवसमानरूपतयाऽवस्थानम् । बिभिन्नरूपस्यैव जीवस्य समीपदेशवर्तित्वं सामीप्यम् । तल्लोकमात्रे वर्तनं सालोक्यम् । एते चोत्तरोत्तरं निकृष्टाः । एतद्विषया श्रद्धा च शिवभक्तिरित्यर्थः ॥ २ ॥ ३ ॥

अपरा च शिवज्ञानश्रद्धा पाशनिकृन्तनी ॥ ४ ॥
अन्या वेदशिरःश्रद्धा साक्षाद्विज्ञानदायिनी ।
अपरा श्रवणश्रद्धा प्रोक्ता वेदान्तवेदिभिः ॥ ५ ॥

शिवज्ञानश्रद्धेति । शिवस्वरूपविषयं यद्वेदान्तजनितं ज्ञानं तच्छ्रद्धेत्यर्थः ॥ ४ ॥ ५ ॥

इतरा मननश्रद्धा नृणां संभावनाप्रदा ।
अन्या देवेश्वरध्यानश्रद्धारूपा महत्तरा ॥ ६ ॥

संभावनाप्रदेति । गुरुशास्त्रेणानुमतेऽपि परतत्त्वेऽसंभावनाविपरीतभावनाभ्यां संदेहो जायते । ते चानुकूलयुक्त्यनुसंधानात्मके मननेन निरस्येते । अतो मननश्रद्धा संभावनाप्रदेत्यर्थः ॥ ६ ॥

अपरोद्धूलनश्रद्धा भस्मना पापनाशिनी ।
त्रिपुण्ड्रधारणश्रद्धा तदन्या तत्त्वदायिनी ॥ ७ ॥
रुद्राक्षधारणश्रद्धा चापि भक्तिरुदीरिता ।
षडक्षरजपश्रद्धा चापि भक्तिर्महत्तरा ॥ ८ ॥
शिवलिङ्गार्चनश्रद्धा चापि भक्तिरनुत्तमा ।
लिङ्गार्चनदिदृक्षा च महाभक्तिः प्रकीर्तिता ॥ ९ ॥
॥ ७ ॥ ८ ॥ ९ ॥

---

१ घ. °ग तादात्म्येना° ।

अनुमोदनमीशस्य पूजायां भक्तिरुच्यते ।
पूजोपकरणश्रद्धा चापि भक्तिरुदीर्यते ॥ १० ॥
शिवोत्सवदिदृक्षा च शिवभक्तिर्महत्तरा ।
तथैवोत्सवसेवा च भक्तिरुक्ताऽतिशोभना ॥ ११ ॥
तथैवोत्सवसेवार्थमागतानां महात्मनाम् ।
अन्नपानप्रदानं च शिवभक्तिरुदीरिता ॥ १२ ॥
महादेवैकथादीनां श्रवणेच्छा महर्षयः ।
महाभक्तिरिति प्रोक्ता महामाहेश्वरैर्जनैः ॥ १३ ॥
कथाश्रवणकाले तु शिवस्य परमात्मनः ।
विकारः स्वरनेत्रादेर्भक्तिरुक्ता महात्मभिः ॥ १४ ॥
उद्यानकरणं शंभोः शिवभक्तिरुदाहृता ।
वापीकूपतडागादिकरणं च मनीषिभिः ॥ १५ ॥
प्राकारगोपुरादीनां शिवस्यामिततेजसः ।
इष्टकाद्यैश्च निर्माणं शिवभक्तिरुदीरिता ॥ १६ ॥
शिवशासनयुक्तस्य पूजा श्रद्धापुरःसरम् ।
शिवभक्तिरिति प्रोक्ता शिवभक्तिपरायणैः ॥ १७ ॥
शिवाराधनबुद्ध्यैव नित्यानामपि कर्मणाम् ।
नैमित्तिकानां करणमपि भक्तिः शिवस्य तु ॥ १८ ॥
अभ्यासः शिवविद्यायास्तस्या अध्यापनं तथा ।
शिवभक्तिरिति प्रोक्ता शिवदृष्टिपरायणैः ॥ १९ ॥
लेखनं शिवविद्यायाः प्रदानं पुस्तकस्य तु ।
शिवभक्तिरिति प्रोक्ता शिवशास्त्रविशारदैः ॥ २० ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

---

१ ख. घ. °वादरी । २ छ °रुदीरिता । ३ ग. °तडागादि° । ४ ज. °रुदाहृता । ५ ज. °क्तिरि° ।

शिवपुस्तकनिक्षेपस्थाननिर्माणमास्तिकाः ।
शिवभक्तिरिति प्रोक्ता शिवदृष्टिपरायणैः ॥ २१ ॥
शिवज्ञानैकनिष्ठस्य मठिकादानमेव च ।
अन्नपानादिदानं च शिवभक्तिरुदीरिता ॥ २२ ॥
शिवज्ञानैकनिष्ठस्य शुश्रूषा श्रद्धया सह ।
शिवभक्तिरिति प्रोक्ता शिवभक्तिपरायणैः ॥ २३ ॥
जापिनां शिवमन्त्रस्य शुश्रूषा च महात्मनाम् ।
शिवभक्तिरिति प्रोक्ता शिवतत्त्वविचिन्तकैः ॥ २४ ॥
शिवयात्रापराणां तु शुश्रूषा च तथैव च ।
शिवयात्रा च विद्वद्भिः शिवभक्तिः प्रकीर्तिता ॥ २५ ॥
शिवयात्रापराणां तु बाधकानां तु बाधनम् ।
शिवभक्तिरिति प्रोक्ता शिवयात्रापरायणैः ॥ २६ ॥
शिवापराधनिष्ठानां छेदनं परया मुदा ।
शिवभक्तिरिति प्रोक्ता शिवाराधनतत्परैः ॥ २७ ॥
शिवज्ञानैकनिष्ठानां शिवज्ञानस्य सुव्रताः ।
दूषकस्य शिरश्छेदः शिवभक्तिः प्रकीर्तिता ॥ २८ ॥
भस्मसाधननिष्ठानां दूषकस्य मुनीश्वराः ।
छेदनं शिरसः साक्षाच्छिवभक्तिरुदीरिता ॥ २९ ॥
विष्णवादीनां तु देवानां दूषकस्य दुरात्मनः ।
बाधनं शिवभक्तिस्तु प्रोक्ता वेदान्तवेदिभिः ॥ ३० ॥
विष्णवादिदेवताभक्तस्यैव दूषणकारिणः ।
बाधनं च महाप्राज्ञैः शिवभक्तिः प्रकीर्तिता ॥ ३१ ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥
॥ ३० ॥ ३१ ॥

देवद्रव्यस्य भोक्तुश्च ब्राह्मणद्रव्यहारिणः ।
बाधनं च महाप्राज्ञैः शिवभक्तिः प्रकीर्तिता ॥ ३२ ॥
आतुराणां नृणां रक्षा रक्षकाणां च रक्षणम् ।
भीतस्याभयदानं च शिवभक्तिः प्रकीर्तिता ॥ ३३ ॥
सर्वभूतेषु कारुण्यं प्रियभाषणमेव च ।
सर्वभूतहिते श्रद्धा साक्षाद्भक्तिः शिवस्य तु ॥ ३४ ॥
॥ ३२ ॥ ३३ ॥ ३४ ॥

सर्वभूतेषु दोषस्यादर्शनं गुणदर्शनम् ।
सर्वभूतेषु मैत्री च शिवभक्तिरुदीरिता ॥ ३५ ॥
महादेवेऽतिविश्वासो विश्वासः शिववेदने ।
वेदान्तेषु च विश्वासः शिवभक्तिरुदीरिता ॥ ३६ ॥
गुरूक्तार्थेषु विश्वासो गुरुशुश्रूणं तथा ।
साऽपि भक्तिरिति प्रोक्ता वेदवेदान्तवेदिभिः ॥ ३७ ॥

भक्तिरेव परमार्थदायिनी
भक्तिरेव भवरोगनाशिनी ।
भक्तिरेव परवेदनप्रदा
भक्तिरेव परमुक्तिकारिणी ॥ ३८ ॥

सर्वभूतेषु मैत्री चेति । तथाच पातञ्जलं सूत्रम्—"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" इति ॥ ३५ ॥
॥ ३६ ॥ ३७ ॥ ३८ ॥

भक्तियुक्तजनचित्तपङ्कजे
भुक्तिमुक्तिफलदः पुरातनः ।
शक्तियुक्तपरविग्रहः शिवः
सत्यमेव सततं प्रकाशते ॥ ३९ ॥

---

१ ब. छ. ज. °हितश्र°।

भक्तियुक्तजनपरितुष्टः परमेशः
सत्यसुखबोधपरमं वपुरनन्तम् ।
स्वस्य मुनयः परमकारुणिक ईशः
शक्तिसहितस्त्रिनयनः खलु दर्शति ॥ ४० ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे शिवभक्तिविचारो नाम
षड्विंशोऽध्यायः ॥ २६ ॥

सत्यमेव प्रकाशत इति । श्रूयते हि—

" यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" ॥ इति ॥३९॥४०॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे शिवभक्तिविचारो नाम षड्विंशोऽध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि परात्परतरं पदम् ।
यत्सत्तायोगतः सर्वं सत्यवद्भवति द्विजाः ॥ १ ॥
यस्यैव चित्प्रकाशेन सर्वं चेतयते जगत् ।
यस्याऽऽनन्दाभिसंबन्धात्सर्वं प्रेमास्पदं भवेत् ॥ २ ॥

एवं परतत्त्वज्ञानोपायत्वेन शिवप्रसादतद्भक्ती प्रपञ्च्यैकं परशिवस्वरूपमुपदिशति—परात्परतरमिति । प्रागुदीरितशक्तितत्त्वोपाधिकः परस्ततोऽपि परः शिवतत्त्वोपाधिकस्ततोऽपि परं निरुपाधिकं सच्चिदानन्दलक्षणं स्वप्रतिष्ठं परशिवस्वरूपं तत्परात्परतरम् । अथास्य तत्त्वस्य सर्वप्रमाणाविषयत्वा-

---

१ घ. °पञ्च्य प° । २ ग. च. छ. ज. °ञ्च्यैकप° । ङ. °ञ्च्यैव प° । ३ ङ. °सुपादि° । ४ ग. °नन्दैकल° ।

च्छशविषाणवदवस्तुत्वमाशङ्क्य निरस्यति—यत्सत्तायोगत इत्यादिना । यथैकस्मिन्नेव रज्ज्वा इदमंशे सर्पधारादयो बहव अकारा अविद्यावशादारोप्यन्ते तथैवाद्वितीये सच्चिदानन्दरूपे पराशिवस्वरूपे स्वमायावशेन भूतभौतिकात्मकं नानाविधं जगदारोप्यते यथा सर्पधारादिष्वारोप्येष्वयं सर्प इयं धारेत्यधिष्ठान इदमाकारानुवृत्तिरेवमारोपिते जगत्यधिष्ठानसच्चिदानन्दरूपत्वमनुवृत्तं भासते । तथा चायमर्थः—यस्याधिष्ठानभूतस्य परतत्त्वस्य स्वरूपभूतसत्तासंबन्धवशात्तत्स्वरूपे परिकल्पितं सर्वं जगत्त्वतो मायामयत्वेन सदसद्विलक्षणमपि सन्घटः सन्पट इत्यादिव्यवहाररूपेण सत्यवदवभासते । तथा यस्यैवाधिष्ठानस्य ब्रह्मणः स्वरूपभूतचित्प्रकाशेन तत्स्वरूपे परिकल्पितं सर्वं जडं जगच्चेतयते चैतन्यविशिष्टं भासते । तथा यस्यैवाधिष्ठानस्य स्वरूपभूतानन्दसंबन्धवशादनानन्दमप्यानन्दरूप आरोपितं सर्वं जगत्प्रेमास्पदमनुकूलवेदनीयं भवति । तथाविधं सच्चिदानन्दरूपं परतत्त्वं संप्रवक्ष्यामीति संबन्धः ॥ १ ॥ २ ॥

प्रतीताद्भौतिकादस्माद्भूतानि मुनिपुंगवाः ।
उत्कृष्टानि तथा तेभ्यो जीवात्मा चेतनः प्रभुः ॥ ३ ॥

अस्य च तत्त्वस्य परात्परतरत्वोपपादनाय निरतिशयोत्कर्षावधित्वं वक्तुमारभते—प्रतीतादित्यादिना । भूतकार्यं जगद्भौतिकं तस्मात्तत्कारणान्याकाशादिभूतान्युत्कृष्टानि । तदायत्तत्वाद्भौतिकस्वरूपलाभस्येत्यर्थः । भूतेभ्योऽपि तदुपादानत्वेन तत्स्वरूपानुप्रविष्टमायासत्त्वगुणोपाधिकश्चेतनो जीवात्मोत्कृष्टः । आविर्भूतचैतन्यत्वात् ॥ ३ ॥

समष्टिव्यष्टिभावेन सोऽपि भिन्नः परस्परम् ।
व्यष्टयश्च तथा भिन्नाः स्वस्वभावानुरूपतः ॥ ४ ॥
देवतिर्यङ्मनुष्यादिशरीरं प्राप्नुवन्ति च ।
आसां समष्टिभूतस्तु श्रेष्ठः सर्वात्मना बुधाः ॥ ५ ॥

समष्टिव्यष्टिभावेनेति । तत्र निर्मलसत्त्वोपाधेरप्रतिहतज्ञानत्वात्स्वात्मानं स्वेतरसकलं च समश्नुते व्याप्नोतीति समष्टिर्हिरण्यगर्भः । मलिनसत्त्वोपाधेः परिच्छिन्नज्ञानत्वान्मालिन्यतारतम्येन नानाविधत्वात्तदुपाधिका जीवा विभक्तं

१ ङ. च. छ. °दव्यक्तत्व° । छ. प्रकृष्टानि । ३ ग. °र्थार्थित्वं । ४ छ. °र्मलोपा° । ५ ग. घ. च. ज. °त्वोपा° । ६ ग. °नतत्त्वो° । ख. ङ. च. ज. °नत्वोपा° । ७ घ. °धिकृ-जीवपि° ।

स्वात्ममात्रमेवाश्नुवते व्याप्नुवन्तीति व्यष्टयः । स्वस्वभावानुरूपत इति । उत्क्रान्तिसमये परिपक्वपुण्यपापजनितो भाविजन्मगोचरः संकल्पविशेषो भावस्तदनुसारेणेत्यर्थः । आसां समष्टिव्यष्टीनां मध्ये समष्टिभूतो हिरण्यगर्भः श्रेष्ठोऽप्रतिहतज्ञानत्वात् ॥ ४ ॥ ६ ॥

ततो विशिष्टाः सकला ब्रह्मणस्तु विभूतयः ।
ताश्चान्योन्यं विशिष्टाः स्युर्यथा जीवा मुनीश्वराः ॥ ६ ॥

ततो विशिष्टा इति । तस्माद्धिरण्यगर्भादपि रजोगुणोपाधिकस्य ब्रह्मणः संकल्पमात्रसिद्धा या विभूतयोऽवतारविशेषास्ता विभूतय उत्कृष्टाः । अन्योन्यं विशिष्टाः स्युरिति । संकल्पस्योच्चावचत्वात्तन्मात्रसिद्धानां विभूतीनामपि परस्परमुत्कर्षापकर्षौ विद्येते इत्यर्थः ॥ ६ ॥

तासां ब्रह्माऽधिकस्तस्माद्विष्णुर्मुख्यः प्रकीर्तितः ।
सोऽपि स्वव्यष्टिभूतेभ्यो वरिष्ठः परिकीर्तितः ॥ ७ ॥

तासां ब्रह्माऽधिक इति । तथाविधसंकल्पाश्रयो ब्रह्मा स्वविभूतिभ्यः श्रेष्ठ इत्यर्थः । तस्माद्विष्णुरिति । रजोगुणोपाधिकाद्ब्रह्मणोऽपि सत्त्वगुणोपाधिर्विष्णुः श्रेष्ठः । सत्त्वस्य सुखप्रकाशात्मकत्वेन रजोगुणादुत्कृष्टत्वात् । स्वव्यष्टिभूतेभ्यो वरिष्ठ इति । तस्य विष्णोरपि संकल्पमात्रसिद्धा व्यष्टिभूता येऽवतारविशेषास्तेभ्योऽपि समष्टिभूतो विष्णुरुत्कृष्टः ॥ ७ ॥

ततो रुद्रोऽधिकः सोऽपि स्वव्यष्टिभ्योऽधिकः स्मृतः ।
ब्रह्मा विष्णुश्च रुद्रश्च परतत्त्वविभूतयः ॥ ८ ॥

ततो रुद्रोऽधिक इति । विष्णोरुपाधिर्हि बहिःसत्त्वविशिष्टं तमः । रुद्रस्य तु बहिस्तमोयुक्तं सत्त्वम् । एतच्चाग्रे स्वयमेव सूतगीतायां प्रतिपादयिष्यति । तथा च तस्माद्विष्णोरपि रुद्रोऽधिकः । तथा तस्य रुद्रस्यापि संकल्पमात्रसिद्धा या व्यष्टयस्ताभ्योऽपि स एवोत्कृष्टः । परतत्त्वविभूतय इति । यद्वक्ष्यमाणं सच्चिदानन्दैकरसं निर्गुणं परं तत्त्वं तदेव स्वीकृतमायागुणोपाधिवशेन ब्रह्मविष्ण्वादिरूपेणावस्थितमिति भवन्ति ब्रह्माद्यावतारस्य विभूतय इत्यर्थः ॥ ८ ॥

एषां त्रयाणामधिकः सर्वकारणमीश्वरः ।

---

१ ख. ब. च छ. °न्तिव° ।

ततोऽधिकं परं तत्त्वं ज्ञानमानन्दमद्वयम् ।
इयमेव हि सर्वेषां काष्ठा प्रोक्ता श्रुतौ स्मृतौ ॥ ९ ॥

एषामिति । गुणविभागरहितमायोपाधिकं तदेव परतत्त्वं जगत्कारणं सदीश्वरः । सोऽपि मद्विभक्तगुणोपाधिकानामेषां ब्रह्मादीनामुत्कृष्टस्तत्स-मष्ट्यात्मकत्वादित्यर्थः । यस्य निरतिशयोत्कर्षप्रतिपादनायैतदुत्कर्षतारतम्य-मनुक्रान्तं तद्दर्शयति—ततोऽधिकमिति । कारणत्वोपलक्ष्यं सच्चिदानन्दाखण्डै-करसं यत्परं तत्त्वं ततसोपाधिकाज्जगत्कारणादधिकमुत्कृष्टम् । एतदीयोत्कर्षस्य निरतिशयत्वमुपपादयति—इयमेवेति । यदेतदुक्तं परतत्त्वमेतदेव सर्वेषां पूर्वो-क्तानां सातिशयोत्कर्षभाजां विश्रान्तिभूमित्वेन श्रुतिस्मृत्या प्रतिपादितम् । हिशब्दो हेत्वर्थः । यस्मादेवं तस्मादितरदुत्कृष्टं किमपि नास्तीत्यर्थः । तत्र श्रुतिस्तावत्सर्वस्यापि भोक्तृभोग्यात्मकस्य प्रपञ्चस्य सर्वोत्कृष्टे ब्रह्मणि विश्रान्तिं प्रतिपादयति "सर्वं खल्विदं ब्रह्म" "ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण" इत्यादि । स्मृतिश्च—"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" इत्यादिका सर्वस्य जगतः कारणे ब्रह्मणि विश्रान्ति-मवगमयति । युक्तं चैतत् । सच्चिदानन्दरूपेऽधिष्ठाने मायावशात्प्रतीतं जगद-धिष्ठानयाथात्म्यज्ञानेन शुक्तौ रजतवत्तत्रैव लीयते । अधिष्ठानादन्यत्राऽऽरो-प्यस्य लयासंभवात् । अतोऽधिष्ठानस्य परब्रह्मणो यो निरतिशयोत्कर्षः स एव परिकल्पिते जगति सच्चिदानन्दरूपादनुगतः संस्तत्तदुपाधितारतम्यात्सा-तिशयो नानाविध इव प्रतिभासत इत्यर्थः ॥ ९ ॥

योऽयं मानुष आनन्दस्ततः शतगुणोत्तरः ।
मनुष्यगन्धर्वादीनामानन्द इति गम्यते ॥ १० ॥

एवमीश्वरस्वरूपमेव परमार्थं सदन्यत्सर्वं परिकल्पितमित्युपपाद्य तत्स्वरूप-भूतयोर्ज्ञानानन्दयोरपि निरवधित्वं प्रतिपादयति—योऽयं मानुष इत्यादिना । सार्वभौमस्य भोक्तृशक्तिसंपन्नस्य धनधान्यादिसमृद्धपृथिव्युपभोगाद्योऽयं मानुष आनन्दस्तस्माच्छतगुणोत्तर आनन्दो मनुष्यगन्धर्वाणाम् । तथाच श्रूयते—" युवा स्यात्साधुयुवाऽध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठस्तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः ।" इति । अत्र श्रुतौ मनु-ष्यगन्धर्वाणामानन्दादनन्तरं देवगन्धर्वादीनां ब्रह्मान्तानां योऽयमुत्तरोत्त

शतगुणित आनन्दस्तत्सर्वस्य संग्रहायाऽऽदिशब्दं प्रयुङ्क्ते—मनुष्यगन्धर्वादीनामिति ॥ १० ॥

ब्रह्मानन्दशतं विष्णोरेक आनन्द उच्यते ॥ ११ ॥
तस्याऽऽनन्दशतं रुद्रस्यैक आनन्द एव हि ।
रुद्रानन्दशतं सर्वकारणस्य शिवस्य तु ॥ १२ ॥

स एको ब्रह्मण आनन्द इति रजोगुणोपाधिकस्य ब्रह्मणो य आनन्द आम्नातस्तमारभ्योत्तरोत्तरं शतगुणित आनन्दो विष्णुरुद्रजगत्कारणानामाधिगन्तव्य इत्याह—ब्रह्मानन्दशतमित्यादिना ॥ ११ ॥ १२ ॥

कारणत्वोपलक्ष्यस्य शिवस्य परमात्मनः ।
सत्यचिन्मात्ररूपस्य भूमाऽऽनन्द उदाहृतः ॥ १३ ॥

सत्यचिन्मात्ररूपस्येति । मात्रशब्देन सकलोपाधिविरहो विवक्षितः । सत्यचिन्मात्ररूपस्य कारणत्वोपलक्ष्यस्य परशिवस्वरूपत्वेन भूमाऽऽनन्द उदाहृतः श्रुत्या दर्शितः । परिच्छेदकोपाध्यभावात्परशिवस्वरूपभूत आनन्दोऽनवच्छिन्नो निरतिशय इत्यर्थः । सा च श्रुतिः—" भूमा त्वेव विजिज्ञासितव्यो यो वै भूमा तत्सुखम् " इत्यादिका ॥ १३ ॥

एवं क्रमेण सर्वेषां ज्ञानाधिक्यमपीष्यते ।
स्कन्धशाखादिभेदेन यथा वृक्षो व्यवस्थितः ॥ १४ ॥
तथा रुद्रादिभेदेन शिव एको व्यवस्थितः ।
उत्कर्षश्चापकर्षश्च स्कन्धशाखादिवस्तुषु ॥ १५ ॥
तथोत्कर्षोऽपकर्षश्च रुद्रविष्ण्वादिषु स्थितः ।
तरङ्गबुद्बुदादीनां यथा लोके व्यवस्थितः ।
उत्कर्षश्चापकर्षश्च तथा रुद्रादिषु स्थितः ॥ १६ ॥

एवं परशिवस्वरूपानन्दस्य निरतिशयत्वमुपपाद्य तत्स्वरूपभूतज्ञानस्याप्यनेनैव न्यायेन निरतिशयत्वमवगन्तव्यामित्यतिदिशति—एवमिति । एकस्यैव परशिवस्य रुद्रविष्वादिनानाविधजगदाकारेणावस्थानं सदृष्टान्तमुपपादयति—स्कन्धशाखेति ॥ १४ ॥ १५ ॥ १६ ॥

विश्वाधिकत्वं रुद्रस्य कारणस्य शिवस्य च ।
न वदन्ति जना ये ते राक्षसाः स्युर्न संशयः ॥ १७ ॥

विश्वाधिकत्वमिति । उक्तरीत्या सर्वस्मादप्युत्कृष्टत्वात्परशिवो विश्वाधिकः । विश्वाधिको रुद्रो महर्षिरिति श्रुतेश्च शिवस्यैव विश्वाधिकत्वम् ॥ १७ ॥

व्यावहारिकदृष्ट्याऽयं विभागः परिकीर्तितः ॥ १८ ॥
प्रमाणदृष्ट्या वस्त्वेकमेव नित्यं न संशयः ।
अनादृत्य महामोहात्प्रमाणं भुवि मानवाः ॥ १९ ॥
अयं परस्त्वयं नेति विवदन्ते परस्परम् ।
महापापवतां नृणां रुद्राधिक्यं न भासते ॥ २० ॥
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम् ।
रुद्राधिक्यं स्वतो भाति प्रमाणैरपि तर्कतः ॥ २१ ॥
सोपानक्रमतो देवा नृणां संसारमोचकाः ।
रुद्रः संसारमग्नानां साक्षात्संसारमोचकः ॥ २२ ॥
अतः सर्वं परित्यज्य शिवादन्यत्तु दैवतम् ।
शिव एकः सदा ध्येयः साक्षात्संसारमोचकः ॥ २३ ॥
वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा ।
शिवध्यानेन देवाश्च तथा तृप्ता भवन्ति हि ॥ २४ ॥

ननु यथा वृक्षः स्कन्धशाखादिभेदेन नानाकारोऽवतिष्ठत एवं परशिवोऽपि रुद्रविष्ण्वादिजगदाकारेणावतिष्ठते चेत्तर्ह्यद्वैतव्याकोप इत्यत आह—व्यावहारिकदृष्ट्येति । निर्विकार एव परशिवस्वरूपे मायावशाद्विचित्रं जगदारोप्यते न परतत्त्वं स्कन्धशाखाद्यात्मना वृक्षवत्परिणमते । अतो नानाविधभावमात्रसाम्येनैव दृष्टान्तोपादानमित्यर्थः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ ॥ २३ ॥ २४ ॥

विकल्परहितं तत्त्वं ज्ञानमानन्दमव्ययम् ।
ये पश्यन्ति विमुक्तास्ते जीवन्तोऽपि न संशयः ॥ २५ ॥

विकल्परहितामिति । निर्विशेषे ब्रह्मणि विकल्पहेतूनां विशेषाणामभावात्तत्स्वरूपभूतं ज्ञानं विकल्परहितम् । अत्यन्तं निर्विकल्पकमित्यर्थः । सर्वदा बाध-

वैधुर्यात्तदेव तत्त्वं परमार्थम् । अपराधीनप्रकाशत्वाज्ज्ञानम् । अत्यन्तानुकूलवेदनीयत्वादानन्दम् । अव्ययम् । व्ययोऽपगमोऽन्तवत्त्वं तद्रहितम् । देशकालवस्तुकृतपरिच्छेदरहितमित्यर्थः ॥ २५ ॥

निर्विकल्पं परं तत्त्वं तर्कतो यस्य भासते ।
सोऽपि मुच्येत संसाराद्यथा स्वप्नप्रपञ्चतः ॥ २६ ॥

तर्कत इति । प्रतीतिबाधान्यथानुपपत्त्या दृश्यप्रपञ्चमिथ्यात्वेऽवगते प्रतीत्यधिष्ठानत्वेन च किंचित्पारमार्थिकं वस्त्वङ्गीकर्तव्यम् । इतरथा निरधिष्ठानभ्रमस्य निरवधिकबाधस्य च प्रसक्तेरित्यादिरूपस्तर्कः । श्रुतिरपि तर्कं दर्शयति—"असन्नेव स भवति" "असद्ब्रह्मेति वेद चेत्" "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति ॥ २६ ॥

निर्विकल्पं परं तत्त्वं प्रमाणेनैव केवलम् ।
यस्य भाति स मुच्येत स्वसंसारमहोदधेः ॥ २७ ॥

प्रमाणेनैवेति । "सत्यं ज्ञानमनन्तं ब्रह्म" "अहं ब्रह्मास्मि" इत्यादिवेदान्तवाक्यं प्रमाणम् ॥ २७ ॥

न च नामानि रूपाणि शिवस्य परमात्मनः ।
तथाऽपि मायया तस्य नामरूपे प्रकल्पिते ॥ २८ ॥

न च नामानीति । "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम्" इति श्रुतेः परमार्थतो नामरूपे न स्त इत्यर्थः ॥ २८ ॥

शिवो रुद्रो महादेवः शंकरो ब्रह्म सत्परम् ।
एवमादीनि नामानि विशिष्टानि परस्य तु ॥ २९ ॥

शिवो रुद्र इति । मायापरिकल्पितनाम्नां मध्ये शिवरुद्रादिनामानि परशिवस्वरूपे रूढितो वर्णनान्मुख्यानि । शिवो रुद्र इत्यादि नामचतुष्टयं रुद्रमूर्तेरभिधायकम् । ब्रह्म सत्परमिति त्रितयं परशिवस्य साक्षाद्वाचकम् । परशिवमूर्त्या सह रुद्रमूर्तेस्तत्प्रायःपिण्डवदविभागापत्तिं स्वयमेवाग्रे वक्ष्यति । अतो मूर्तिद्वयस्यैकीभूतत्वात्तथाविधे तान्युभयविधनामानि रूढ्यैव वर्तन्त इति मुख्यान्नि ॥ २९ ॥

विष्णुनारायणादीनि नामानि परमेश्वरे ।
कथंचि ..गवृत्त्या तु वर्तन्ते न तु मुख्यया ॥ ३० ॥

विष्णुनारायणादीनीति । विष्ण्वादिमूर्तीनां पराशिवमूर्त्या वैलक्षण्याद्विविक्तत्वमपि वक्ष्यति । अतो विष्ण्वादिमूर्तिषु रूढा विष्ण्वादयः शब्दास्तस्मिन्परतत्त्वे न रूढ्या वर्तन्तेऽपि तु व्याप्नोतीति विष्णुरित्येवमाद्यवयवव्युत्पत्त्या वर्तन्ते ॥ ३० ॥

अरूपस्य शिवस्यापि मूर्तिर्ध्येया ह्युपासकैः ।
उमार्धविग्रहा शुक्ला त्रिनेत्रा चन्द्रशेखरा ॥ ३१ ॥

एवं मायापरिकल्पितनामानि दर्शयित्वा परिकल्पितं मूर्त्यात्मकं रूपमपि पराशिवस्य ध्यानार्थं दर्शयति—अरूपस्येत्यादिना ॥ ३१ ॥

नीलग्रीवा परानन्दप्रमोदा ताण्डवप्रिया ।
ब्रह्मविष्णुमहादेवैरुपास्या गुणमूर्तिभिः ॥ ३२ ॥

गुणमूर्तिभिरिति । सत्त्वरजस्तमोगुणोपाधिकैरित्यर्थः ॥ ३२ ॥

सर्वमूर्तिविहीनस्य सर्वमूर्तेः शिवस्य तु ।
तथाऽप्येषा परा मूर्तिरित्येषा शाश्वती श्रुतिः ॥ ३३ ॥

सर्वमूर्तेरिति । परमार्थतः सर्वप्रकारमूर्तिरहितस्यापि मायापरिकल्पितं सर्वं जगदप्यन्या मूर्तिरित्यर्थः । शाश्वती श्रुतिरिति । परमार्थतो विग्रहरहितस्य शिवस्य तत्सद्भावं श्रुतिरपि दर्शयतीत्यर्थः । श्रूयते हि कैवल्योपनिषदि— "उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् " इति ॥ ३३ ॥

तप्तायःपिण्डवद्विप्रा रुद्रमूर्तिः परस्य तु ।
मूर्त्या तुल्याऽन्यमूर्तिभ्यो लक्षणैर्मुनिसत्तमाः ॥ ३४ ॥

रुद्रमूर्तेः पराशिवमूर्त्या सहैकत्वं वक्ष्यतीति यदवादिष्म तदाह—तप्तायःपिण्डवादित्यादिना । विशुद्धसत्त्वगुणो हि रुद्रस्योपाधिस्तमस्तु संहरणाय तत्स्वरूपाद्बहिरेव वर्तते । अतो रुद्रमूर्तिर्विशुद्धसत्त्वात्मकत्वात्सत्त्वस्य च सुखप्रकाशस्वरूपत्वात्साक्षिचित्प्रकाशरूपया पराशिवमूर्त्या प्रकाशसुखादिलक्षणैः सदृशी । अतो विष्ण्वादिमूर्तिभ्यो विलक्षणा च तप्तायःपिण्डवत्पराशिवमूर्त्याऽविभागापन्नैवेत्यर्थः ॥ ३४ ॥

विष्वादीनां तु सर्वेषां मूर्तयो व्यवधानतः ।
न तुल्याः परतत्त्वस्य मूर्त्या वेदान्तपारगाः ॥ ३५ ॥

न तुल्याः परतत्त्वस्येति । विष्ण्वादिमूर्तिषु रजस्तमसोः प्राचुर्यलक्षणेन व्यवधानेन सच्चिदानन्दरूपायाः परशिवमूर्तेः साकल्येन प्रतिफलनायोगात्परशिवमूर्त्या न तास्तुल्याः । अतस्तद्विविक्ततयैव तासामुपलम्भात्तथाविधमूर्त्यभिधायकानि विष्ण्वादिनामानि परशिवस्वरूपमूर्ताववयवप्रसिद्धिसव्यपेक्षत्वेन विलम्बितप्रतीतिजनकत्वान्न मुख्यानि । शिवरुद्रनामानि तूक्तरीत्या परशिवरुद्रमूर्त्योरेकीभूतत्वात्तदुभयात्मिकायां मूर्त्यामवयवप्रसिद्धिमन्तरेण समुदायप्रसिद्ध्यैव वर्तन्त इति शीघ्रप्रतीतिजनकत्वान्मुख्यानीत्यभिप्रायः ॥ ३५ ॥

परतत्त्वस्य नामानि प्रत्यासत्त्या मुनीश्वराः ।
त्रिमूर्तीनां तु रुद्रस्याव्यवधानानि सुव्रताः ॥ ३६ ॥

एवं रुद्रमूर्त्यभिधायकानां शिवरुद्रादिनाम्नां परतत्त्वविषये मुख्यत्वमुपपाद्य निरुपाधिकपरशिवस्वरूपप्रतिपादकानां ब्रह्म सत्परमित्यादिनाम्नामपि रुद्रमूर्तौ मुख्यत्वं प्रतिपादयति—परतत्त्वस्येत्यादिना । ब्रह्म सत्परमित्यादीनि यानि निरुपाधिकतत्त्वस्य नामानि तानि त्रिमूर्तीनां मध्ये रुद्रस्य प्रत्यासत्त्याऽव्यवधानानि[3] नामानि निरुपाधिकस्वरूपप्रतिपादनेन सोपाधिकाद्रुद्रात्परतत्त्वं व्यवधीयत एभिरिति करणव्युत्पत्त्या तानि नामानि व्यवधानानीमित्तानि रुद्रस्योपाधेर्निरतिशयसत्त्वोत्कर्षवत्त्वात्कात्स्न्येन बिम्बग्रहलक्षणा प्रत्यासत्तिरस्ति तया प्रत्यासत्त्याऽव्यवधायकानि तानि नामानीहाव्यवधानसद्भावबलादेव तयोर्मूर्त्योर्भेदेन व्यवहारः ॥ ३६ ॥

विष्ण्वादीनां च देवानां तानि नामानि सुव्रताः ।
तत्त्वान्वयेन नामानि भवन्ति ब्रह्मवित्तमाः ॥ ३७ ॥

विष्ण्वादीनामिति । विष्णुब्रह्महिरण्यगर्भादीनां तानि परतत्त्वनामानि परतत्त्वान्वयसद्भावमात्रेण प्रतिपादकानि । अयमर्थः—सच्चिदानन्दैकलक्षणोऽद्वितीयः सर्वगतः परशिव एव नानाविधोपाधिसंबन्धवशाद्ब्रह्मविष्णुरुद्रादिरूपेण नानेवावभासते । तत्र ब्रह्मविष्णुरुद्रहिरण्यगर्भसूत्रात्मादीनां स्वस्वव्यापारविषयेष्वप्रतिहतज्ञानत्वात्तेषां सर्वेषामुपाधिषु सत्त्वस्य निरतिशयोत्कर्ष एष्टव्यः । इतरथाऽस्मदादिजीववत्किंचिज्ज्ञत्वप्रसङ्गेन सकलसृष्टिस्थित्यादिव्यवहारविलोपप्रसङ्गात् । ननूपधेयवदुपाधीनामप्यैकरूप्ये ब्रह्मविष्ण्वादिभेदव्यवहारो नोपपद्यत इति चेत् । मैवम् । ब्रह्माद्युपाधिषु वस्तुतः सत्त्वोत्कर्षस्यैकरूप्ये

---

१ घ. °मूर्तेरव्य° । २ ख. ग. ङ. च. छ. ज. °स्याप्यभिधा° । ३ ख. °धानेन ना° ।

सत्यपि रुद्रोपाधिव्यतिरिक्तेषु तेष्वाहार्यरजस्तमःप्रयुक्तो नानाविधोऽपकर्षोऽप्यस्ति । अतस्तत्प्रयुक्तो ब्रह्मविष्ण्वादिभेदव्यपदेशो न सोऽपकर्षस्तेषां वास्तव इति मन्तव्यम् । तथा सत्यस्मदादिवत्तेषामपि जीवत्वप्रसङ्गात् । एवं ब्रह्मविष्ण्वादिमूर्तिष्वाहार्यापकर्षसद्भावात्परतत्त्वप्रत्यासत्तिर्नास्तीति भवन्ति तानि व्यवधायकान्यमुख्यानीत्यर्थः ॥ ३७ ॥

तथाऽपि रुद्रे तान्येव प्रत्यासत्त्या परेण तु ।
मुख्यानि न तथाऽन्येषु व्यवधानात्परेण तु ॥ ३८ ॥

नन्वेवमुभयत्राप्युपाधिव्यवधानेन साम्ये सत्यपि परतत्त्वनाम्नां क्वचिन्मुख्यत्वं क्वचिन्नेति वैलक्षण्यं कुत इत्यत आह— तथाऽपीति । यद्यप्युक्तरीत्या रुद्रमूर्तावपि परतत्त्वाद्व्यवधानमस्ति तथाऽपि पराशिवस्वरूपेण रुद्रमूर्तेः पूर्वोक्ता या प्रत्यासत्तिरतद्भावेन तत्र परतत्त्वनामानि मुख्यानीत्युच्यन्ते । अन्येषां तु ब्रह्मविष्ण्वाद्युपाधीनां च न तथा प्रत्यासत्तिरस्ति । आहार्यापकर्षसद्भावात् । अतो व्यवधानात्परतत्त्वनामानि तेषां न मुख्यानीत्यर्थः ॥ ३८ ॥

परतत्त्वपरिज्ञानं तस्य मूर्तिप्रसादतः ।
तत्प्रसादश्च तद्ध्यानपूजाभ्यामेव नान्यथा ॥ ३९ ॥
अन्नादिभोजनान्नॄणां यथा क्षुद्विनिवर्तते ।
तथा मूर्तिप्रसादेन तत्तत्त्वं च प्रकाशते ॥ ४० ॥
परतत्त्वं तु सर्वेषां स्वरूपमपि सर्वदा ।
तस्य मूर्तिप्रसादेन विना नैव प्रकाशते ॥ ४१ ॥
तस्मान्मूर्तिर्हि सर्वेषां भोगमोक्षफलप्रदा ।
अतो मूर्तिं महाभक्त्या भजध्वं मुनिपुंगवाः ॥ ४२ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे परपदस्वरूपविचारो नाम सप्तविंशोऽध्यायः ॥ २७ ॥

एवं विष्ण्वादिमूर्तिभ्यो विलक्षणा ' उमार्धविग्रहा ' इत्यादिना या परतत्त्वमूर्तिरभिहिता तत्प्रसादादेव भोगमोक्षरूपफलप्राप्तिरिति सा सर्वैः सर्वदा सेव्येत्युपसंहरति—परतत्त्वपरिज्ञानमित्यादिना ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे परपदस्वरूपविचारो नाम सप्तविंशोऽध्यायः ॥ २७ ॥

अथाष्टाविंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि शिवलिङ्गं समासतः ।
यस्य विज्ञानमात्रेण विमुक्तो मानवो भवेत् ॥ १ ॥

एवं परशिवस्य ध्यानपूजाद्यर्थं परिकल्पितां विशिष्टां मूर्तिं प्रतिपाद्य शिवलिङ्गस्वरूपमपि निर्णेतुं प्रतिजानीते—अथात इति ॥ १ ॥

शिव एव स्वयं लिङ्गं लिङ्गं गमकमेव हि ।
शिवेन गम्यते सर्वं शिवो नान्येन गम्यते ॥ २ ॥

शिवस्य लिङ्गं शिवलिङ्गमिति भ्रमं व्युदसितुमाह—शिव एव स्वयं लिङ्गमिति । तदुपपादयति—लिङ्गं गमकमित्यादिना । लोके हि वह्न्यादिलक्षणस्यार्थान्तरस्य यद्गमकं ज्ञापकं धूमादि लिङ्गमित्युच्यते । शिवोऽपि स्वप्रकाशचिद्रूपत्वेन[1] सर्वस्य जडवर्गस्य गमको न त्वन्येन गम्यः । अतो गमकत्वात्स्वयमेव लिङ्गम् ॥ २ ॥

जडं हि गम्यतेऽन्येन नाजडं मुनिपुंगवाः ।
शिवो नैव जडः साक्षात्स्वप्रकाशैकलक्षणः ॥ ३ ॥

एतदेव गमकत्वमुपपादयति—जडं हीत्यादिना । घटपटाद्यात्मकं जडं जगदेव स्वव्यतिरिक्तेन चित्प्रकाशेन ज्ञाप्यते । जडविलक्षणं चैतन्यं नान्येन गम्यते किंतु स्वयं प्रकाशते । अतः स्वप्रकाशचिद्रूपः परशिवो नैव जडः । यतो न जडोऽतो न गम्यः । अपि तु स्वप्रकाशचिद्रूपत्वाद्गमकः । अतः स्वयमेव लिङ्गमित्यर्थः ॥ ३ ॥

अस्वप्रकाशश्चेत्साक्षाच्छिवो नैव शिवो भवेत् ।
अस्वप्रकाशं कुड्यादि न शिवः संमतं खलु ॥ ४ ॥

भवेदेवं यदि शिवः स्वप्रकाशचिद्रूपः स्यात्तथात्वे तु सर्वदा सर्वथा भावत्वेन तद्गोचरप्रमाणनैरपेक्ष्यादुपनिषदेकसमधिगम्यत्वभङ्गप्रसक्तेरस्वप्रकाश एव स इत्यत आह—अस्वप्रकाशश्चेदिति । यदि शिवः स्वप्रकाशचिदात्मको न स्यात्तर्हि तस्य शिवत्वमेव हीयेत । पराधीनप्रकाशानां घटकुड्यादीनामाशिव-

---

१ घ. °र्वज्रडाजं° । २ ङ. °शरूप° ।

त्वदर्शनात् । विषतः शिवः स्वप्रकाशो भवितुमर्हति शिवत्वात् । यो न स्वप्रकाशो नासौ शिवो यथा घटपटादिः । शिवश्चायं तस्मात्स्वप्रकाश एवेत्यभिप्रायः ॥ ४ ॥

शिवेऽस्ति मुनिश्रेष्ठाः स्वप्रकाशैकलक्षणे ।
अप्रतीतं भवेत्सर्वं ततः शून्यमशेषतः ॥ ५ ॥

विपक्षे बाधकमाह—शिव इति । जडं सर्वं जगत्तावच्छिवस्वरूपचैतन्यबलादेव प्रतीयते तदपि चैतन्यं प्रतीयमानमेवार्थं प्रत्याययतीत्यङ्गीकार्यम् । दीपादौ तथा दृष्टत्वात् । तच्चेज्ज्ञानान्तरेण प्रतीयेत तदप्येवमिति तस्यापि स्वप्रकाशत्वं एष्टव्यः । तथाच तज्ज्ञानान्तरं स्वयं प्रकाशते चेत्प्रथमज्ञानमेव तथा भवतु पराधीनप्रकाशं चेत्किं तत्परं प्रथमज्ञानमेव तदाऽन्योन्याश्रयादेकमपि न सिध्येत् । अथ तृतीयं ज्ञानान्तरं तस्यापि प्रकाशावश्यंभावाज्ज्ञानान्तरं वक्तव्यं स्यात्तथाऽप्येवमित्यनवस्था मूलक्षयकरी स्यात् । एवं च परशिवस्वरूपस्य स्वप्रकाशतानङ्गीकारे ज्ञानज्ञेयात्मकं सर्वमप्रतिभातं सच्छून्यमेव भवेदित्यर्थः ॥ ५ ॥

शून्यसिद्धिरपि श्रेष्ठाः शून्येनैव न सिध्यति ।
खलु सर्वात्मना भानविहीनं शून्यलक्षणम् ॥ ६ ॥

सिद्धं नः समीहितमिति यदि शून्यवादी प्रत्यवतिष्ठेत तं प्रत्याह—शून्यसिद्धिरिति । शून्यवादिनाऽपि सर्वशून्यत्वं केनचित्प्रमाणज्ञानेनैव प्रतिपादनीयं न तु शून्येनैव । मेयसिद्धेर्मानाधीनत्वात् । तथाच तज्ज्ञानस्य सत्त्वात्सर्वशून्यत्वं न सिध्येत् । सर्वप्रकारेणापि प्रतिभानराहित्यस्यैव शून्यलक्षणत्वादित्यर्थः ॥ ६ ॥

अतः साक्षी शिवः साम्बः स्वप्रकाशैकलक्षणः ।
तेन सर्वमिदं गम्यं गम्यतेऽसौ न गम्यते ॥ ७ ॥

एवं सर्वशून्यमतेऽपि ज्ञानसद्भावावश्यंभावात्तस्य च पराधीनप्रकाशत्वाङ्गीकारेऽनवस्थायां ज्ञानस्य स्वप्रकाशत्वाभावेन सर्वजगदान्ध्यप्रसङ्गात्स्वप्रकाशमेव तदित्यङ्गीकर्तव्यम् । घटज्ञानं पटज्ञानमिति नानात्वप्रतीतेरप्युपाधिकृतत्वादद्वितीयं स्वप्रकाशचैतन्यमेव परशिवस्वरूपमिति निगमयति—अत इति । तेन स्वप्रकाशपरशिवस्वरूपचैतन्येन सर्वमिदं पराभूतं जगद्गम्यते । अतस्तत्स्वरूपं गम्यकम् । यतः स्वप्रकाशत्वादन्येन न गम्यतेऽतो न गम्यत इत्यर्थः । अय-

मभिप्रायः । यद्यपि परशिवरदरूपचैतन्यं स्वप्रकाशं तथाऽप्यनाद्यविद्याविलासवशेनाऽऽवृतमिव भवति । तच्चाऽऽवरणमुपनिषद्वाक्यजनितया परशिवस्वरूपविषयान्तःकरणवृत्त्याऽपनीयते । तस्मिंश्चापनीते तत्तत्त्वं स्वरूपप्रकाशेनैव प्रकाशते न तु घटादिवत्स्वातिरिक्तं चैतन्यमपेक्षते । अतः फलव्याप्यत्वाभावात्स्वयंप्रकाशत्वं वृत्तिव्याप्यत्वसद्भावाच्चोपनिषदेकसमधिगम्यत्वं न च विरुध्यते ॥ ७ ॥

स्वयंज्योतिरिति प्राह श्रुतिः साध्वी महेश्वरम् ।
तस्य भासा सर्वमिदं विभातीत्यपि चाऽऽह हि ॥ ८ ॥

इत्थं स्वप्रकाशत्वं तर्कतो निरूप्य तदनुग्राह्यं स्वप्रकाशत्वगमकं प्रमाणमप्युपन्यस्यति—स्वयंज्योतिरिति । "अत्रायं पुरुषः स्वयंज्योतिः" इत्येतद्वाक्यमित्यर्थः । तथा शिवस्वरूपातिरिक्तस्य सर्वस्य मायापरिकल्पितस्य तदधीनप्रकाशत्वमित्यत्रापि श्रुतिं प्रमाणयति—तस्य भासा सर्वमिति । श्रूयते हि—"न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति ॥ ८ ॥

अतः शिवः सर्वजगद्विभासकः
स्वयंप्रकाशः स्वयमेव केवलम् ।
मयोदितं[1] लिङ्गमिति द्विजर्षभा-
स्तदेव पूज्यं श्रुतिमस्तकस्थितम् ॥ ९ ॥

शिव एव लिङ्गमिति प्रतिज्ञातं सिद्धमिति निगमयति—अत इति । श्रुतिमस्तकस्थितमिति । वेदान्तैः प्रतिपादितं सच्चिदानन्दैकरसमद्वितीयं परशिवस्वरूपमित्यर्थः ॥ ९ ॥

शिवस्य लिङ्गं शिवलिङ्गमन्ये
मुनीश्वरा वेदविदो वदन्ति ।
स्वयंप्रकाशस्य न युज्यते त-
त्ततश्च शंभुः स्वयमेव लिङ्गम् ॥ १० ॥

स्वयंप्रकाशस्य न युज्यत इति । स्वप्रकाशचैतन्यस्य गमकान्तरनैरपेक्ष्येणावस्थितस्य लिङ्गं गमकमित्येतन्नोपपद्यत इत्यर्थः ॥ १० ॥

---

१ ग. घ. च. छ. ज. मयोदितो ।

विवेकहीनमर्त्यस्य चित्तवृत्त्यापेक्षया
शिवस्य लिङ्गमित्ययं रवः समस्तजन्तुभिः ।
निगद्यते शिवः स्वतः प्रसिद्ध एव सर्वदा
ततः शिवस्य लिङ्गमित्ययं रवो न संगतः ॥ ११ ॥

ननु शिवस्य लिङ्गं शिवलिङ्गमिति लोके पूज्यत्वेन प्रसिद्धं तत्कथं शिव एव लिङ्गमित्यत आह—विवेकेति । परशिवस्वरूपं विविच्य ज्ञातुमशक्तस्य मर्त्यस्य चित्तवृत्तिमपेक्ष्य तदनुसारेणैव शिवस्य लिङ्गं शिवलिङ्गमिति लोकव्यपदेशः । विवेकदृष्ट्या तु स्वप्रकाशपरशिवस्वरूपस्य गमकाभावाच्चासौ न युक्त इत्यर्थः ॥ ११ ॥

स्वत एव प्रगमोऽपि शंकरो
न विभातीव विभाति मायया ।
स्वत एव श्रुतिकोविदाः शिवः
स्वकलिङ्गेन[1] निगम्यते स्फुटम् ॥ १२ ॥

ननु विवेकरहितस्यापि परशिवः स्वप्रकाश एव । न हि वस्तु पुरुषविशेषमपेक्ष्यान्यथा भवति। अतस्तच्चित्तानुसारेणापि शिवस्य लिङ्गमित्येतन्न युज्यत इत्यत आह—स्वत एवेति । प्रगमयति प्रकर्षेण सर्वं प्रकाशयतीति प्रगमः । गमयतेः पचाद्यच् । सर्वस्य गमकत्वेन स्वयंप्रकाशमानोऽपि शिवो न विभाति न प्रकाशत इत्यज्ञानत्वेन[2] मायावशादविवेकिनां न प्रकाशते । अतस्तैर्मायाबद्धदृष्टिभिरज्ञायमानः स्वयंप्रकाशमानः शिवः स्वरूपावगमकेनान्येन लिङ्गेन स्पष्टं तैर्ज्ञायत[3] इति भवति । विवेकहीनचित्तवृत्त्यपेक्षयैव शिवस्य लिङ्गमित्यपि व्यवहार इत्यर्थः ॥ १२ ॥

शिवस्य लिङ्गं कथयन्ति केचि-
द्बहुप्रकारं व्यवहारदृष्ट्या ।
न तत्त्वदृष्ट्या परमेश्वरस्य
स्वयंप्रभस्यास्य न चास्ति लिङ्गम् ॥ १३ ॥

एवं स्वप्रकाशस्यापि शिवस्य मायावशादज्ञायमानस्य गमकानि लिङ्गानि

१ ख. °त न ग° । २ घ. °त्यज्ञातत्वेन । ३ ख. ग. च. छ. ज तैर्न ज्ञा° ।

व्यवहारदशायां विद्वद्भिः प्रतिपाद्यन्त इति दर्शयति—शिवस्य लिङ्गमिति । तत्सर्वं व्यवहारदृष्ट्यैव लिङ्गं न तु परमार्थविषयया दृष्ट्या परशिवस्वरूपस्य स्वयंप्रभत्वेन गमकान्तरनिरपेक्षत्वात्स्वयमेव सर्वस्य गमकत्वाच्छिवस्वरूपमेव लिङ्गं न तु शिवस्य लिङ्गं किंचिदित्यर्थः ॥ १३ ॥

वेदान्तवाक्योत्थपरात्मविद्यां
शिवस्य लिङ्गं कथयन्ति केचित् ।
विचारजन्यामपि सत्यविद्यां
ब्रुवन्ति चान्ये परमस्य लिङ्गम् ॥ १४ ॥
स्मृतिजामितिहासजामिमां
परविद्यामपि लिङ्गमीशितुः ॥
अतिशुद्धामपि तां पुराणजां
प्रवदन्ति श्रुतिवित्तमोत्तमाः ॥ १५ ॥

तान्येव बहुविधानि लिङ्गानि क्रमेणाऽऽचष्टे—वेदान्तेत्यादिना । वेदान्तवाक्यजनिता या परशिवस्वरूपविषया मनोवृत्तिः सा तत्स्वरूपावरणाविद्यापनयनद्वारा स्वयंप्रकाशयापि तस्य व्यवहारदृष्ट्या गमकत्वाल्लिङ्गमित्यर्थः । एवमुत्तरत्रापि योज्यम् । विचारजन्यामिति । विचारो मीमांसा सा चात्रोपनिषद्वाक्यनिर्णायकवेदान्तशास्त्रं तत्परिशीलनजन्यामित्यर्थः ॥ १४ ॥ १५ ॥

शिवस्य लिङ्गं कथयन्ति मायां
शिवस्य दृश्यां शिववस्तुनिष्ठाम् ।
वदन्ति केचिज्जनचित्तमन्ये
त्वहंकृतिं चापि मनश्च बुद्धिम् ॥ १६ ॥

एवं शास्त्रस्मृतीतिहासपुराणजन्याद्वितीयपरशिवस्वरूपविषया मनोवृत्तयो लिङ्गत्वेनोक्ताः । अथ तत्स्वरूपे परिकल्पितं मायातत्कार्यं सूर्यमपि स्वाधिष्ठानस्य परशिवस्वरूपस्य गमकत्वाल्लिङ्गत्वेन व्यवहियत इति दर्शयति—शिवस्येति । शिवस्य दृश्यामिति । शिवेन प्रकाश्याम् । शिववस्तुनिष्ठां वस्तुभूते परशिवस्वरूपे समाश्रितामित्यर्थः । ईदृशी माया हि परमात्मनः कारणशरीरं तदुपाधिवशादुपहितं सत्यरूपं परशिवस्वरूपमवगच्छत इति मायाया लिङ्गत्वम् ।

जनचित्तामिति । जनानां प्राणिनां मायासत्त्वपरिणामरूपमन्तःकरणं तद्वृत्तयोऽहंकारादयः पूर्वोक्तस्वरूपाः ॥ १६ ॥

प्राणं च लिङ्गं प्रवदन्ति केचि-
च्छरीरमन्ये प्रवदन्ति लिङ्गम् ।
त्वगादिकानि प्रवदन्ति केचि-
त्समूहमन्ये परमेश्वरस्य ॥ १७ ॥

प्राणस्य च लिङ्गत्वं श्रुतौ दर्शितम्—" कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्प्रतिष्ठिते प्रतिष्ठास्यामि " इति " स प्राणमसृजत " इति श्रुतत्वात् । शरीरमन्य इति । मनोबुद्धिप्राणादिसमुदायरूपं यत्सूक्ष्मशरीरं तदपि स्वोपहितस्य गमकत्वाल्लिङ्गमित्यर्थः । त्वगादिकानीति । त्वगसृङ्मांसाद्या ये सप्त धातवस्तेऽपि प्रत्येकं चेतनस्य गमकत्वाल्लिङ्गम् । समूहमन्य इति । त्वगादीनां समुदायरूपं स्थूलशरीरमित्यर्थः ॥ १७ ॥

शब्दादिभूतानि महेश्वरस्य
स्थूलानि भूतानि च संगिरन्ते ।
पाताललोकादि समस्तमेत-
ल्लिङ्गं महेशस्य वदन्ति केचित् ॥ १८ ॥

एवं शरीरत्रयात्मकस्य दृश्यस्य लिङ्गत्वमभिधाय भूतभौतिकस्यापि दृश्यवर्गस्य तल्लिङ्गत्वमाचष्टे—शब्दादीत्यादिना । शब्दतन्मात्राद्यात्मकानि सूक्ष्मभूतानि शब्दादिभूतानि । पाताललोकादीति । आदिशब्देनान्ये त्रयोदश लोका गृह्यन्ते ॥ १८ ॥

यदस्ति यन्नास्ति महेश्वरस्य
समस्तमेतत्प्रवदन्ति लिङ्गम् ।
विशुद्धविद्याः परयोगिणोऽस्य
स्वयंप्रभस्यैव न लिङ्गमूचुः ॥ १९ ॥

इत्थं व्यवहारदृष्टिमाश्रित्य वादिभिर्बहुधाऽभिधीयमानं लिङ्गजातमभिधाय परमार्थदर्शिनां मतमाह—विशुद्धविद्या इति । विशुद्धा संशयविपर्यासादि-

१ ग. घ. 'स्य लि' । २ छ. °पर्ययादि° ।

रहिता वेदान्तमहावाक्यजनिता प्रत्यग्ब्रह्मैक्यविषया विद्या येषां ते तथोक्ताः। अत एव परयोगिणस्तेऽस्य परशिवस्य स्वरूपातिरिक्तं किमपि लिङ्गं न प्रतिपादयन्ति । अपि तु स्वयमेव लिङ्गं भवतीति ब्रुवते ॥ १९ ॥

यद्यल्लिङ्गतया शिवस्य कथितं तत्तज्जडं वस्तुतो
लिङ्गं नैव भवेद्विशुद्धमतयो ज्ञानं हि लिङ्गं भवेत् ।
तस्मादेव महेश्वरः परतरस्तत्तज्जडोपाधिक-
श्चिद्रूपः प्रथितः प्रभोर्गमकमित्यर्थस्थितिः स्वस्य तु ॥ २० ॥

किंचोक्तेषु सर्वेष्वपि लिङ्गेषु स्वरूपेण ज्ञायमानस्यैव परशिवस्वरूपगमकत्वात्प्राप्ताप्राप्तविवेकेन सोपाधिकश्चिद्रूपः शिव एव निरुपाधिकस्य स्वस्य गमक इति स्वयमेव लिङ्गमित्येतदेव युक्तमित्याह—यद्यल्लिङ्गतयेति । अतीतेन ग्रन्थसंदर्भेण यद्यज्जडं वस्तु शिवस्य लिङ्गत्वेनानुक्रान्तं तत्तद्वस्तुतः स्वसत्तामात्रेण न लिङ्गम् । अपि तु ज्ञायमानमेव । यतः पण्डिता लोके ज्ञातमेव धूमादिकं लिङ्गमिति ब्रुवते । तस्मात्कारणात्तत्तज्जडाधिष्ठानत्वेन तत्तद्भासकस्तदुपाधिपरिच्छिन्नश्चिद्रूपः शिव एव प्रभोर्व्यापकस्यानवच्छिन्नस्य स्वस्वरूपस्य गमकं लिङ्गं भवतीत्येवार्थस्थितिर्वस्तुस्थितिः । अतः परशिवः स्वयमेव लिङ्गमित्यस्मिन्नेवार्थे सर्वेषां पर्यवसानमित्यर्थः ॥ २० ॥

आलयं लिङ्गमित्याहुरपरे वेदवित्तमाः ।
तदाऽपि शंकरः साक्षाल्लिङ्गं नान्यन्मुनीश्वराः ॥ २१ ॥

एवं गमकं लिङ्गमिति पक्षे शिवस्वरूपस्यैव सर्वगमकत्वाल्लिङ्गत्वमुपपाद्य मतान्तरेऽपि तथात्वमुपपादयितुमनुभाषते—आलयमिति । स्वस्वरूपस्य शिवस्य ध्यानपूजाद्यर्थं लिङ्गप्रतिमादिकं यदालम्बनं तल्लिङ्गमित्यर्थः । तस्मिन्नपि मते शिव एव लिङ्गमित्ययमेवार्थः पर्यवस्यतीत्याह—तदाऽपीति ॥ २१ ॥

आलयो नाम चाऽऽधारः सर्वाधारः शिवः खलु ।
सदासत्यस्वभावत्वात्सत्य एव शिवः खलु ॥ २२ ॥

तदेवमुपपादयितुमालयशब्दार्थमाह—आलयो नामेति । आधारोऽधिकरणमधिष्ठानमिति यावत् । तच्चाऽऽधारत्वं निरूप्यमाणे परशिवस्यैव घटते नान्यस्येत्युपपादयति—सर्वाधार इति । सच्चिदानन्दलक्षणेऽद्वितीये परशिवस्वरूपे हि

१ छ. किंतु । २ छ. च. कथितः ।

मायावशाद्भूतभौतिकात्मकं सर्वं जगत्परिकल्पितमित्याधारत्वं शिवस्यैव पारमार्थिकं न तु मायाकार्यस्यान्यस्येत्यर्थः । कुत इत्यत आह—सदेति । सत्यरूपे हि वस्तुनि शुक्तिकाशकलादौ मायामयरजतादिकं परिकल्पितं दृष्टं शिवश्च सत्यस्वभावः । अतस्तत्स्वरूपे मिथ्याभूतस्य दृश्यप्रपञ्चस्य परिकल्पितत्वमङ्गीकार्यमिति भवत्यस्य सर्वाधारत्वमित्यर्थः । भवेदेवं यद्यसौ शिवः सत्यः स्यात्सत्तायोगि हि सत्यं निर्धर्मकस्य सत्तासंबन्धलक्षणधर्माङ्गीकारानुपपत्तेरित्यत आह—सत्य एवेति ॥ २२ ॥

चिद्रूपं हि सदा सत्यं नाचिद्रूपं कथंचन ।
असत्यत्वस्य दृष्टत्वादचिद्रूपस्य वस्तुनः ॥ २३ ॥

यदि घटपटादेरपि सत्तायोगात्सत्त्वमङ्गी कुर्यस्तदा स्यादयमप्युपालम्भः सद्रूपे ब्रह्मणि परिकल्पितत्वादधिष्ठानसत्त्वमेवाऽऽरोप्येषु प्रतीयते सर्पधारादौ रज्वा इदमंशवत् । अस्त्वेवमारोप्येषु सत्त्वमतीतिराधिष्ठानभूतस्य निर्धर्मकस्य ब्रह्मणः कथं सत्यत्वं सर्वदा बाधवैधुर्यादिति ब्रूमः । तदपि कुत इत्यत आह—चिद्रूपं हीति । नानाविधेषु चेत्यरूपेषु व्यावर्तमानेषु तद्भावाभावसाक्षितयाऽनुवर्तमानं चिद्रूपमेव सत्यं जडरूपं तु मायामयत्वादनृतमतश्चिद्रूपत्वाच्छिवः सत्यः । ननु जडस्यापि सत्यत्वं कस्मान्न भवतीत्यत आह—असत्यत्वस्येति ॥ २३ ॥

शुक्तिकारजतादीनामसत्यत्वं हि संमतम् ।
अचेतनानामन्येषामसत्यत्वे निदर्शनम् ॥ २४ ॥
शुक्तिकारजतं विप्राः सत्य एव ततः शिवः ।
अतः कल्पितरूपाणामाधारो भगवाञ्शिवः ॥ २५ ॥

जडस्यासत्यत्वं कुत्र दृष्टमित्यत आह—शुक्तिकेति । शुक्तिरज्ज्वाद्यधिष्ठानेषु ये रजतसर्पादय आरोप्या जडास्तेषामसत्यत्वं तावदुभयवादिसंमतमित्यर्थः । अस्त्वेवमसत्येव प्रमातरि बाध्यमानत्वात्सति प्रमातर्यबाध्यमानानां घटपटादीनां तु कुतोऽसत्यत्वमित्यत आह—अचेतनानामिति । अचेतनत्वाच्छुक्तिरूप्यवदित्येतद्दृष्टान्तबलेन सर्वस्याप्यसत्यत्वं सेत्स्यतीत्यर्थः । एवं मायापरिकल्पितस्य दृश्यप्रपञ्चस्य व्यावहारिकसत्यत्वे सत्यपि " नेह नानाऽस्ति किंचन " इत्यादिका श्रुतिरपि पारमार्थिकसत्यत्वं निवारयति । तस्मात्परशिव एव परमार्थतः सत्यः । इत्थं परशिवस्य सत्यत्वं तदतिरिक्तस्यासत्यत्वं चोपपाद्योक्तं सर्वाधारत्वं निगमयति—अत इति ॥ २४ ॥ २५ ॥

१ छ. जडप्रपञ्चस्य । २ ख. ङ. च. °प्युपल° । ३ ग. सर्वाधारादौ । ४ ख. °च्छिव एव स°।

अनाधारो महादेवः सत्यचैतन्यलक्षणः ।
सर्वाधारस्य नाऽऽधारो विद्यते हि द्विजोत्तमाः ।
आकाशस्य यथा कश्चिन्नाऽऽधारो विद्यते द्विजाः ॥ २६ ॥

ननु यथा रजताद्यधिष्ठानस्य शुक्तिशकलादेरप्यन्यद्भूम्यादिकमधिकरणं दृश्यत एवं मायापरिकल्पितजगदधिष्ठानस्यापि शिवस्यान्यदधिष्ठानं किं न स्यादित्यत आह—अनाधार इति । " सत्यं ज्ञानमनन्तं ब्रह्म " इति हि परशिवस्य स्वरूपलक्षणम् । प्रत्यस्तमितसकलविशेषं तत्स्वरूपं सर्वथा बाधरहितत्वात्सत्यमित्युच्यते स्वपरव्यवहारे तु प्रकाशत्वाज्ज्ञानम् । ईदृग्रूपो यः परशिवः स महादेवः । ब्रह्मविष्ण्वादीनां सोपाधिकानां परिच्छिन्नत्वादस्य च तथाविधोपाधिपरिच्छेदाभावान्महत्त्वम् । ईदृग्विधस्य तस्याऽऽधारान्तरं नोपपद्यत इत्यर्थः । एतदेव सदृष्टान्तमुपपादयति— सर्वाधारस्येति । सर्वाधारो हि परशिवः स्वातिरिक्तस्य सर्वस्य मायया तत्स्वरूपे परिकल्पितत्वात्तस्य चाधिष्ठानादन्यत्रासंभवादधिष्ठानभूतस्य सर्वगतस्य परशिवस्याऽऽकाशस्येवाधिष्ठानान्तरं नोपपद्यत इत्यर्थः ॥ २६ ॥

व्यावर्तयति चाऽऽधारं शिवस्य परमात्मनः ॥ २७ ॥
स्वे महिम्नीति वेदान्तः सत्यवादी स्वतःप्रमा ।
वेदान्तवाक्यं मानानामतिमानमिति स्थितिः ॥ २८ ॥

एवं परशिवस्याऽऽधारान्तररहित्यं प्रतिपाद्य तत्र श्रुतिं प्रमाणयति—व्यावर्तयतीति । " स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि " इत्यादिकः स वेदान्तस्तस्य चार्थान्यथात्वशङ्कां निवर्तयति—सत्यवादीति । सत्यमबाधितं तत्स्वरूपं वदितुं शीलमस्येति तथोक्तः । ननु श्रुतिजन्यज्ञानमपि स्वार्थनिश्चयाय प्रमाणान्तरसंवादमपेक्षतेऽतः सापेक्षत्वादप्रामाण्यमित्यत आह—स्वतःप्रमेति । श्रुतिजन्या धीः स्वत एव प्रमा । अपौरुषेये वेदे पुरुषबुद्धिप्रभवाणां दोषाणामसंभवेन तज्जन्यप्रमाया विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वलक्षणस्य स्वतःप्रामाण्यस्य विद्यमानत्वात् । अबाधितार्थविषयत्वादपि वेदान्तस्यैव तत्त्वावेदकलक्षणं प्रामाण्यमित्याह—वेदान्तेति ।

उक्तं हि—

---

१ ग. रज्जाद्य° । २ ङ. च. छ. °ज्ञातम् । ३ घ. °व.क्यजं मानम° ।

" प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकम् ।
आश्रित्यायं प्रपञ्चः स्यादलीकोऽपि प्रमाणवान् ॥
अद्वैतागमवाक्यं तु तत्त्वावेदनलक्षणम् ।
प्रमाणभावं भजतां बाधवैधुर्यहेतुतः " इति ॥ ॥ २७ ॥ २८ ॥

अतः सत्यचिदानन्दलक्षणः परमेश्वरः ।
स्वयमेव सदा लिङ्गं न लिङ्गं तस्य विद्यते ॥ २९ ॥

शिवः स्वयमेव लिङ्गमिति यत्प्रतिज्ञातं तत्समर्थयितुमुपसंहरति—अत इति । उक्तरीत्या सदानन्दरूपः परशिव एव सर्वस्याऽऽधार इति स एव लिङ्गमित्यर्थः ॥ २९ ॥

संसारार्णवमग्नानामज्ञानान्धीकृतात्मनाम् ।
चित्तपाकानुगुण्येन भावनार्थं द्विजर्षभाः ॥ ३० ॥
अनाधारस्य देवस्य शिवस्य परमात्मनः ।
आधारो मन्त्रसंस्कारात्कल्पितः सत्यवद्बुधाः ॥ ३१ ॥

नन्वेवं ध्यानपूजार्थं शिवस्याऽऽधारतया प्रतिष्ठादिसंस्कारैः संस्कृतं बाणलिङ्गादिकं न पूजनीयमेवेत्यत आह—संसारेति । अज्ञानान्धीकृतात्मनामिति । अज्ञानं मूलाविद्या तया कलुषीकृतचित्तानामित्यर्थः । उक्तलक्षणाद्वितीयपरशिवस्वरूपज्ञानरहितानां संसारिणां तच्चित्तपरिपाकानुसारेण प्रतिबन्धकपापक्षयार्थं ध्यानपूजादिकं कर्तव्यम् । अतस्तदर्थं निराधारस्यापि परशिवस्य बाणलिङ्गादिलक्षण आधारः[1] प्रासादपञ्चब्रह्मादिमन्त्रयुक्तसंस्कारैः प्रतिष्ठाद्यात्मकैः परमार्थवदागमैः परिकल्पित इत्यर्थः । अतः पूर्वोक्तपरशिवस्वरूपज्ञानवतां शिवस्वरूपमेव लिङ्गं[2] तदनुसंधानमेव तस्य यजनम् । तद्रहितानां तु मृच्छिलादिकृतं शिवस्याऽऽधारत्वेन परिकल्पितं बाह्यलिङ्गं पूजनीयमित्यर्थः । तदुक्तमागमिकैः—

" यतीनां योगिनां चैव बाह्योपरतिसक्तिषु ।
अन्तर्यागस्तु विहितो बाह्यपूजापरेषु च " ॥

अन्यत्रापि ज्ञानमधिकृत्योक्तम्—

" सर्वमन्यत्परित्यज्य चित्तमत्र निवेशय ।
मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत् " इति ॥३०॥३१॥

१ ग. छ. ज. °रः प्रसा° । २ ख. छ. ज. °दिमयं शि° ।

लयनाल्लिङ्गमित्याहुरपरे वेदवित्तमाः ।
तदाऽपि लिङ्गं भगवान्स्वयमेव महेश्वरः ॥ ३२ ॥

एवं तावल्लिगि गत्यर्थ इत्यस्माद्धातोर्णिजन्तात्पचाद्यचि लिङ्ग्यति गमयतीति लिङ्गमिति व्युत्पादयन्तां मते परशिवस्यैव लिङ्गतामुक्त्वा लीयतेऽस्मिन्निति लिङ्गमिति लीङ् संश्लेषण इत्यस्माद्धातोर्व्युत्पादयतामपि मते तथात्वमाह—लयनादिति ॥ ३२ ॥

लीयमानमिदं सर्वं ब्रह्मण्येव हि लीयते ।
न लीयते परं ब्रह्म सदासत्यस्वभावतः ॥ ३३ ॥
शुक्तिकारजतादीनामसत्यानां द्विजर्षभाः ।
लयो दृष्टो न सत्यस्य शुक्तिकाशकलस्य च ॥ ३४ ॥

तत्र हेतुः—लीयमानमिति । "यत्प्रयन्त्यभिसंविशन्ति" इति श्रुतेः । यथाऽन्यद्ब्रह्मणि लीयत इति ब्रह्म लिङ्गमेव । ब्रह्म यत्र यत्र लीयते तदपि कुतो न तल्लिङ्गमिति भ्रमं वारयति—न लीयत इति ॥ ३३ ॥ ३४ ॥

लीयते हि शिवादन्यदशेषमाशिवं शिवे ।
अतो लिङ्गं द्विजश्रेष्ठा अविनाशी हरः स्वयम् ॥ ३५ ॥

शुक्तिकाशकल इव लयो न दृष्टश्चेत्सोऽपि तर्हि ब्रह्मवदपरं लिङ्गमित्यत आह—लीयते हीति । व्यवहारदशायां कल्पितं रजतं यथा ज्ञानेन शुक्तिकाशकले लीयते नैवं शुक्तिकाशकलमन्यत्र तत्त्वदृष्ट्या तु शुक्त्यादिशकलं ब्रह्मण्येव लीयते न ब्रह्मान्यत्रेति ब्रह्मैव लिङ्गमित्यर्थः ॥ ३५ ॥

अन्ये च योगिनो विप्रा आमनन्ति शिवस्य तु ।
आधारेषु शरीरेऽस्मिँल्लिङ्गानि परमात्मनः ॥ ३६ ॥

विश्वप्रकाशकत्वेन विश्वाधिष्ठानत्वेन वा परशिव एव मुख्यं लिङ्गमित्युक्तं तस्य परशिवस्योपासनार्थमौपाधिकानि रूपाणि श्रुत्यनुसारादागमानुसाराद्वा लिङ्गतया व्यवहरतां मतमाह—अन्ये चेति । मूलाधारो मणिपूरकोऽनाहत आज्ञा द्वादशान्तः षोडशान्तश्चेत्यस्मिञ्शरीरे षडाधाराः शिवस्योपासनास्थानानि । अष्टवितस्तिपरिमितस्य शरीरस्य वितस्तिचतुष्टयानन्तरं मूलाधारस्तत्र गुणसामान्योपाधिकं परतत्त्वं लिङ्गमुपासनीयम् । नाभौ मणिपूरकस्तत्र तदेव

१ ख. शिवः ।

परतत्त्वं जगत्सर्गव्यापारं ब्रह्मसंज्ञितं लिङ्गमुपासनीयम् । हृदयेऽनाहतं तत्र सत्त्वगुणोपाधिकं तदेव तत्त्वं जगत्पालनव्यापारं विष्णुसंज्ञितम् । भ्रूमध्य आज्ञा तत्र तमोगुणोपाधिकं तदेव तत्त्वं संहारव्यापारं रुद्रसंज्ञितम् । ब्रह्मरन्ध्रे द्वादशान्ते तदेव तत्त्वं साक्षिरूपम् । ततः पश्चाच्चतुरङ्गुलानन्तरं षोडशान्तं तदेव तत्त्वं स्वप्रतिष्ठं लिङ्गरूपमुपासनीयमिति । उक्तमुत्तरतापनीयोपनिषदि—'मूलाधाग्निरूपं प्रणवं संदध्यात्' इत्यादि 'लिङ्गरूपानेव च संपूज्य' इत्यन्तम् । अतस्तामुपनिषदमनुसरन्तस्तच्छायानुसारिण आगमाननुसरन्तश्च योगिनोऽस्मिञ्शरीर उक्तेष्वाधारेषु यथोदीरितलिङ्गान्यामनन्तीत्यर्थः ॥ ३६ ॥

अधोमुखमनाद्यन्तमण्डं पिण्डसंज्ञितम् ।
ज्वलत्कालानलप्रख्यं स्वयंभु ब्रह्मसंज्ञितम् ॥ ३७ ॥

मणिपूरक उपासनीयस्य ब्रह्मलिङ्गस्य स्वरूपमाह—अधोमुखमिति । यदनाद्यन्तं स्वयंभु स्वप्रतिष्ठमपिण्डमशरीरं ब्रह्मसंज्ञितं परं तत्त्वं तदेव पिण्डसंज्ञितं पिण्डेन स्थूलशरीरेण समष्टिरूपेणोपाधिना संबन्धात्साक्षात्प्राजापत्यादिनामकम् । संज्ञा जाता, अस्येति संज्ञितम् । तारकादित्वादितच् । अत एवोपाधिसंबन्धाज्ज्वलत्कालानलप्रख्यं सुवर्णवर्णम् । अधोमुखं स्रष्टव्यजगल्लक्षणकार्याभिमुखम् । कारणकार्ययोरूर्ध्वाधःशब्दौ प्रसिद्धौ गीतासु—'ऊर्ध्वमूलमधःशाखम्' इति ॥ ३७ ॥

मध्यमस्थं महामन्त्रैरर्चनीयं तु योगिभिः ।
गुरूपदेशतो ज्ञेयं लिङ्गमेकं प्रकीर्तितम् ॥ ३८ ॥

मध्यमस्थमुदरमध्ये हि नाभिस्थाने स्थितं मणिपूरकं चक्रं मध्यमं तत्र स्थितमित्यर्थः । महामन्त्रैः । प्रणवप्रथमावयवभूतोऽकार एको महामन्त्रः । स ह्येकाक्षरमात्रत्वेन परिमाणतोऽल्पोऽपि परापररूपार्थप्राप्तिसाधनत्वेन फलतो महत्त्वान्महामन्त्रः । श्रूयते ह्यकारस्य महाफलत्वम् "जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा । आप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद" इति । प्रणवसमानार्थस्य हृल्लेखाप्रणवस्य प्रथमावयवो हकारोऽप्यकारसमानरीत्या द्वितीयो महामन्त्रः । अपरे बहवो मन्त्रा उत्तरतापनीयोपनिषद्भाष्ये प्रपञ्चिताः । अकारादिमन्त्राणां ब्रह्मात्मकता च श्रुत्यैवोक्ता—"अकारं ब्रह्माणं नाभौ । उकारं विष्णुं हृदये । मकारं रुद्रं भ्रूमध्ये । ओंकारं सर्वेश्वरं द्वादशान्ते" इति । बाह्योपकरणनिरपेक्षमनोमात्रसाधन उक्तलिङ्गार्चने योगिनामेवाधिकार इत्याशयेनोक्तं योगिभिरिति । ब्रह्मलिङ्गस्य सरस्वती-

शक्तिसाहित्यं परिवारान्महामन्त्रांश्च सांप्रदायिकानभिसंधायोक्तं गुरूपदेशत इति ॥ ३८ ॥

कोटिसूर्यप्रतीकाशं कोमलं द्विजपुंगवाः ॥ ३९ ॥
अपदं पदमव्यक्तमबाणं बाणमद्भुतम् ।
तृतीयस्थं सदैवोर्ध्वमुखं संसारनाशकम् ॥ ४० ॥
अर्चनीयं महामन्त्रैरात्मनिष्ठैस्तु योगिभिः ।
गुरूपदेशतो ज्ञेयं द्वितीयं लिङ्गमीरितम् ॥ ४१ ॥

अथ हृदयस्थेऽनाहत उपास्यस्यापि द्वितीयस्य विष्णुलिङ्गस्य स्वरूपमाह—कोटिसूर्येति । आत्मा नानायोनिषु कर्मफलभोगाय पद्यते गच्छत्यनेन करणेनेति पदं लिङ्गशरीरम् । श्रूयते हि—

"तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषिक्तमस्य ।
प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् ।
तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणे" इति ।

तेन पदेन रहितं परं तत्त्वम् । बाणमिति स्थूलशरीरम् । तथा हि प्रश्नोपनिषदि वागादीन्प्रति मुख्यस्य प्राणस्य वाक्यम्—"मा मोहमापद्यथाहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि" इति । तेन स्थूलशरीरेण रहितमबाणम् । श्रूयते हि पदस्य शरीरद्वयराहित्यं काठके—" अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् " इति । अत एव सकलकरणागोचरत्वादव्यक्तम् । तथाऽप्युपासनाय पदं बाणं सूक्ष्मस्थूलशरीरद्वयात्मकम् । अशरीरस्यैव शरीरद्वयात्मकत्वादद्भुतम् । कोटिसूर्यप्रतीकाशं कोमलम् । यतो रूपेणैवात्र सूर्यसादृश्यं न स्पर्शेनातः कोमलता । तृतीयमनाहतम् । यद्यप्युक्तमणिपूरकापेक्षया तदनाहतं द्वितीयं तथाऽपि मूलाधारापेक्षया तस्य तृतीयत्वमुक्तम् । मूलाधारेऽपि हि गुणसामान्योपाधिविशिष्टं परं तत्त्वं लिङ्गमुपास्यत्वेनोक्तमुत्तरतापनीये । इह चानाहतस्य तृतीयत्वाभिधानेन मूलाधारलिङ्गस्यापि संग्रहः सूचितः । यद्यपि तदपेक्षया विष्णुलिङ्गं तृतीयं तथाऽपि तस्येह साक्षादनुपन्यासादुपन्यस्तब्रह्मलिङ्गापेक्षया द्वितीयत्वमुक्तम् । एतच्च विष्णुलिङ्गमुपासकस्य मोक्षप्रदम् । यदाहुः—"मोक्षमिच्छेज्जनार्दनात्" इति । तदुक्तं संसारनाशकमिति । तथात्वं च प्रागुक्तकारणा-

१ ग. ङ. च. छ. ज. °क्षात्तदुप° । घ. क्षाद्वुप° ।

भिमुख्यात्तदाह—ऊर्ध्वमुखमिति । महामन्त्रैरिति । प्रणवद्वितीयमात्रोकारोऽत्र महामन्त्रः । अस्यापि हि महाफलत्वं श्रूयते " स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद " इति । हल्लेखाद्वितीयाक्षरं रेफो द्वितीयो महामन्त्रः । पूर्ववदन्ये महामन्त्राः । अत्र गुरूपदेशत इति लक्ष्मीसाहित्यं परिवारयोगश्च ॥ ३९ ॥ ४० ॥ ४१ ॥

चन्द्रकोटिप्रतीकाशं शांकरं शक्तिवल्लभम् ॥ ४२ ॥
अरूपं[1] रूपमव्यक्तमपरं परमाद्भुतम् ।
विसर्गाधिष्ठितं विश्वं[2] विश्वविज्ञानसाधकम् ॥ ४३ ॥
अर्चनीयं महामन्त्रैरतिशुद्धैस्तु योगिभिः ।
गुरूपदेशतो ज्ञेयं तृतीयं लिङ्गमीरितम् ॥ ४४ ॥

अथ भ्रूमध्य आज्ञायामुपास्यस्य रुद्रलिङ्गस्य स्वरूपमाह—चन्द्रकोटीति । शिवस्य वास्तवस्वरूपं हि सर्वातिशयित्वात्परम् । "अशब्दमस्पर्शमरूपमव्ययम्" इति श्रुतत्वेन रूपादिविरहादरूपम् । अत एवाव्यक्तं सदपि रूपमुपासकानुग्रहेण स्वीकृतादिव्यावतारं सगुणं ब्रह्म । अरूपस्य परस्यैव रूपत्वापरत्वसत्त्वादद्भुतत्वम् । किं तदुपासनीयं रूपमिति तदाह—चन्द्रकोटिप्रतीकाशमिति । आज्ञायामुपासनीयस्य रुद्रात्मकतामाह—शांकरमिति । उमाशक्तिसाहित्यं शक्तिवल्लभमिति । विसर्गाधिष्ठितमिति । सर्गः संसारश्च व्यपयात्यस्मिन्स्थाने । अविमुक्तोपासनेन संसारनिवृत्तिर्जाबालोपनिषदादिषु प्रसिद्धा तस्मिन्विसर्गे भ्रूमध्येऽधिष्ठितम् । विश्वं सर्वात्मकम् । " सर्वो वै रुद्रः " इति श्रुतेः । विश्वविज्ञानसाधकं तमेव विश्वात्मकं रुद्रं गोचरयति यज्ज्ञानं तद्विश्वविज्ञानं तत्साधयतीदं लिङ्गम् " ईश्वराज्ज्ञानमन्विच्छेत् " इति श्रुतेः । महामन्त्रैरिति । प्रणवस्य तृतीया मात्रा मकार एको महामन्त्रः । तस्यापि महाफलत्वं श्रूयते—" सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद " इति । हल्लेखातृतीयाक्षरमींकारो द्वितीयो महामन्त्रः । अन्येऽपि बहवो महामन्त्राः पूर्ववत्तत्रैव द्रष्टव्याः । तृतीयस्य पदसूचितस्य मूलाधारस्थस्य गुणसामान्योपाधिकलिङ्गस्य तु कृत्स्नः

---

१ ग. ङ. च. छ. ज. °रूपरू° । २ ङ. विश्वविज्ञानं ज्ञा° । ३ घ. ङ. ज. °तिशायि°।

प्रणव एको महामन्त्रः। तस्य च महाफलत्वम्। श्रूयते हि—" एवमोंकार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद " इति। द्वितीयः सर्वो हृल्लेखामन्त्रः। अन्ये तु पूर्ववत् ॥ ४२ ॥ ४३ ॥ ४४ ॥

एतेषु लिङ्गेषु शिवः पुराणः
स्वशक्तियुक्तः स्वजनप्रियाय।
प्रकाशते संततमात्मविद्या-
प्लवाभिलाषैरभिपूजनीयः ॥ ४५ ॥

उक्तलिङ्गोपासनस्य फलमाह—एतेष्विति। उक्तरूपः शिव एतेषु प्रकाशत इति कृत्वा संसारसागरोत्तरणायाऽऽत्मविद्यालक्षणं प्लवमपेक्षमाणैः पूजनीय इत्यर्थः ॥ ४५ ॥

अन्तर्लिङ्गं यो विजानाति शश्व-
द्बन्धच्छेदं शंकरस्य प्रसादात्।
कुर्यादाशु ब्रह्मविद्ब्रह्मनिष्ठाः
सत्यं प्रोक्तं सर्वलोकप्रियाय ॥ ४६ ॥
निस्तरङ्गशिवे परमात्मनि
प्रत्ययस्य लयः परयोगिणः।
मुख्यमर्चनमित्यभिपद्यते
पुष्पतोयफलप्रमुखाः कृशाः ॥ ४७ ॥
मन्त्रेण पूजा मतिमत्तमाना-
मबोधमूलस्य महाद्रुमस्य।
संसारसंज्ञस्य मुनीन्द्रमुख्या
नालं सदा मूलविमूलनाय ॥ ४८ ॥

उक्ततत्तल्लिङ्गपूजनाद्ब्रह्मविद्भूत्वा बन्धच्छेदं करोत्यतस्तत्कर्तव्यमित्याह—अन्तर्लिङ्गमिति ॥ ४६ ॥ ४७ ॥ ४८ ॥

ज्ञानमेव शिवार्चनमिष्यते
स्थूलमेव बहिर्भजनं नृणाम् ।
वेद एव सदा मितिकारणं
बोध एव परमं पदमास्तिकाः ॥ ४९ ॥
गुह्यमेव तु वः कथितं मया
मह्यमाह महेश्वरवल्लभः ।
व्यास आमरणान्तिकमास्तिकाः
पूजयध्वमसत्यनिवृत्तये ॥ ५० ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे शिव-
लिङ्गस्वरूपकथनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

ज्ञानमेवेति । मानसोपासनाज्ज्ञानरूपमर्चनं प्रशस्तम् । केवलविशुद्धसत्त्वस्य सकलवेदसारः प्रणवस्तत्साक्षात्कारलक्षणस्य बोधस्य हेतुरित्यर्थः ॥४९॥५०॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे शिव-
लिङ्गस्वरूपकथनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

अथैकोनत्रिंशोऽध्यायः ।

सूत उवाच—
अथातः संप्रवक्ष्यामि शिवस्थानं समासतः ।
यत्र संचिन्त्य देवेशं कैवल्यं लभते नरः ॥ १ ॥

उक्तलिङ्गोपासकानां प्रतिबन्धकपापकलापनिरासने सत्त्वशोधने चोपकारकाणि स्थानानि वक्तुं प्रतिजानीते—अथात इति ॥ १ ॥

पुरा नारायणः श्रीमान्किरीटी गरुडध्वजः ।
श्रीमत्कैलासपर्यन्ते ततापं परमं तपः ॥ २ ॥
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ।
रुद्राक्षमालाभरणो जटावल्कलसंयुतः ॥ ३ ॥

१ ख. घ. °कला° ।

तपसा तस्य देवस्य केशवस्य महात्मनः ।
प्रदुरासीन्महादेवः शंकरः करुणाकरः ॥ ४ ॥
तं दृष्ट्वा पुण्डरीकाक्षो महादेवं घृणानिधिम् ।
अम्बिकासहितं रुद्रं चन्द्रमौलिं सनातनम् ॥ ५ ॥
प्रणम्य दण्डवद्भूमौ भक्त्या परमया सह ।
स्तोत्रमारभते विष्णुः सर्वभूतहितावहम् ॥ ६ ॥

महद्भिरपि महता प्रयासेन ज्ञातानीति कथ्यमानस्थानाविशेषेष्वादरातिशयजननाय नारायणकथोपन्यासः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अकाराय नमः साक्षादनन्तानन्दमूर्तये ।
आत्मभूताय सर्वेषामतिशुद्धाय शूलिने ॥ ७ ॥
आकारायातिशुद्धाय साक्षिणे सर्ववस्तुनः ।
अम्बिकापतये तुभ्यमरूपाय नमो नमः ॥ ८ ॥

अकारायेत्यादिस्तोत्रे मातृकापञ्चाशदक्षररूपमन्त्रतादात्म्येन शिवमनुसंधत्ते विष्णुः । शिवोऽनन्तानन्दमूर्तिशब्दार्थात्मकः । स चार्थः स्ववाचकशब्दानुवेधेनैव प्रतिभासनात्तद्विवर्ततया तच्छब्दात्मकः । यदाहुः—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते" इति ॥

आहुश्च शब्दविवर्तितत्वमर्थस्य—

"शब्दब्रह्म यदेकं यच्चैतन्यं च सर्वभूतानाम् ।
यत्परिणामस्त्रिभुवनमखिलमिदं जयति सा वाणी" इति ।

हरिरप्याह वाक्यपदीयादौ—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" इति ।

अत्रानन्तानन्दमूर्तिशब्दस्यावर्णः प्रथमावयव इति तदनुसंधानजनितसंस्कृतायां बुद्धौ भासमानः स शब्दः सर्वोऽप्यवर्णात्मकः । यदाहुः—

"नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दो व्यवस्थितः" इति ॥

---

१ ख. स्तोतुमा° । २ ङ. °मूर्तिः श° । ३ ग. छ. °नुबन्धेनै° । ४ ग घ. ङ. च. छ. °रिमाणस्त्रि° । ५ ग. घ. च. छ. निवर्तते° । ज. निर्वर्तते ।

इत्थमकारात्मकशब्दप्रतिपादितार्थात्मकतया शिवस्याकारमन्त्रात्मकत्वमिति तादात्म्यमनुसंधेयम् । यदाहुः—

" गुरुदेवतामनूनामैक्यं संभावयेत्समाहितधीः " इति ।

इत्थं मन्त्रस्तोत्रे सर्वेषु तत्तदक्षरादिशब्दान्प्रयुञ्जानस्य विष्णोरभिप्रायो द्रष्टव्यः । अकारवाच्यतया वाऽकारादिशब्दवाच्यतया वोपचारादकारमन्त्ररूपतयाऽभिधानमिह न भवति किंतु प्रागुक्तरीत्याऽकारमन्त्रतादात्म्यादेवेति विवक्षया साक्षादित्युक्तम् । शिवस्वभावभूतो हि परम आनन्दः । " विज्ञानमानन्दं ब्रह्म " इति श्रुतेः । स च शुभकर्मोपस्थापितविषयेन्द्रियसंप्रयोगजानितवृत्त्यवच्छेदादनेक इव तारतम्यवानिवोत्पन्न इवान्तवानिव च लक्ष्यते । सर्वोपाधिविरहात्तु निरतिशयो नित्यः शिवस्याऽऽनन्दः । स च तस्य न गुणः किंतु मूर्तिः स्वरूपमेवेति विवक्षयोक्तम्—अनन्तानन्दमूर्तय इति । स चापि विशुद्धसत्त्वात्मकाविद्योपाधिसंबन्धादसंख्यजीवभावेन विशुद्धसत्त्वात्मकमायोपाधिसंबन्धादीश्वररूपेण च भेदेन भासमानोऽपि मायाविद्योपाधिसंबन्धपरित्यागादतिशुद्धः । अत एव तदुपाधिकस्य भेदस्यापि प्रविलयात्सर्वेषामात्मेत्याह—अतिशुद्धायाऽऽत्मभूतायेति । उक्तरूपस्य शिवतत्त्वस्य मन्दाधिकारिबुद्धिगोचरत्वासंभवात्तदनुग्रहाय स्वीकृतानेकदिव्याभरणं लीलावतारं सूचयति—शूलिन इति । शूलमिहानेकदिव्यायुधदिव्याभरणस्रक्चन्दनवाहनपरिवारादियोगोपलक्षणम् । इत्थं तत्र तत्र नामनि संभवदर्थजातमनुसंधेयमिति दिङ्मात्रं दर्शितं विस्तरपरिहाराय तु संदिग्धपदविवरणमात्रमत्र क्रियत इति । आत्मभूतायेत्यकारमन्त्र आकार उक्तः । आकारमन्त्रेऽप्यतिशुद्धायाम्बिकापतयेऽसङ्गायेत्यकार उक्तस्तदभेदका गुणा इति मतमनुसृत्यावर्णस्यैकत्वाभिप्रायेण । उक्तं हि कात्यायनेन—" एकत्वादकारस्य सिद्धम् " इति । भेदका गुणा इतिमतसूचनाय तु ह्रस्वदीर्घमन्त्रयोः पृथगुदाहरणोपन्यास इति । साक्षिण इति तु विशेष्यस्वरूपोपन्यासो न त्वाकारमन्त्रोदाहरणत्वेनेति । इत्थमुत्तरत्र द्रष्टव्यम् ॥ ७ ॥ ८ ॥

इकारायेश्वराख्याय सर्वसिद्धिकराय च ।
इन्द्रादिलोकपालानामियत्ताकारिणे नमः ॥ ९ ॥
ईकाराय वरिष्ठाय वाञ्छितार्थप्रदाय च ।
वञ्चकानामलभ्याय वसुदाय नमो नमः ॥ १० ॥

---

१ ग. घ. च. छ. ज. °मनुमायैवयं । २ ङ. °त्रेषु म° । ३ घ. ङ. °न्यः । आ° । ४ छ. °रूपमन्त्रत° ।

उकारायोग्रजन्तूनामुग्ररूपाय शूलिने ।
उत्तमानां तु जन्तूनामुपास्याय नमो नमः ॥ ११ ॥

इयत्ताकारिण इति । तत्तत्कृतसुकृतपरिपाकानुरूपपरिमितपदप्रदायिन इत्यर्थः ॥ ९ ॥ १० ॥ ११ ॥

ऊकारायोपवीताय ह्यूर्जितायोत्तमात्मने ।
उत्तमज्ञानगम्याय नमस्ते परमात्मने ॥ १२ ॥

उपवीताय भोगमोक्षार्थिभिः सकललोकैरुपगताय ॥ १२ ॥

ऋकारायाऽऽदिभूताय रामपूर्वार्चिताय च ।
ऋचामर्थस्वरूपाय नमः सत्यपरात्मने ॥ १३ ॥

ऋकारमंत्रे रामपूर्वेति पदं श्रुतिसामान्यादेकत्वाभिप्रायेण । सत्यपरात्मन इति विशेष्यस्वरूपोपन्यासेनेति द्रष्टव्यम् ॥ १३ ॥

ॠकाराय निसर्गाय नित्यतृप्ताय शंभवे ।
रसादिभूतरूपाय नमः शुद्धचिदात्मने ॥ १४ ॥

निसर्गाय समस्तवस्तूनां स्वाभाविकरूपाय । रसादीति श्रुतिसामान्यं विशेषनिर्देशो वा द्रष्टव्यः ॥ १४ ॥

ऌकाराय लसद्भुण्डमाण्डिताभरणाय च ।
लिङ्गलिङ्गचादिहीनाय लिङ्गरूपाय ते नमः ॥ १५ ॥

लिङ्गरूपाय । लिगिर्गत्यर्थः । गत्यर्था ज्ञानार्थाः । ज्ञानरूपाय तस्य स्वप्रकाशत्वेन मानमेयमातृविभागविरहमाह—लिङ्गलिङ्गचादिहीनायेति ॥ १५ ॥

ॡकाराय लयस्थाय ध्वंसकायाऽऽदिहेतवे ।
लाक्षारुणशरीराय लाभस्थानाय वै नमः ॥ १६ ॥

लयस्थाय लये प्रलयसमयेऽपि स्थिताय । लभ्यत इति लाभः कर्मफलं तत्तिष्ठत्यस्मिन्निति लाभस्थानं तस्मै " एष एव साधु कर्म कारयति तं यमूर्ध्वमुन्निनीषते " इति वाजसनेयश्रुतिः । " लभते च ततः कामान्मयैव विहितान्हितान् " इति स्मृतिः । ' फलमत उपपत्तेः ' इति बादरायणीयं सूत्रम् ॥ १६ ॥

एकाराय नमः शश्वदिदंतासाक्षिणे तथा ।
अहंतासाक्षिणे साक्षात्प्रत्यगद्वयवस्तुने ॥ १७ ॥

एकारस्य कण्ठतालुभवस्य संध्यक्षरतयाऽवर्णेवर्णात्मकत्वेनाहंतेदंतेति तदु-

भयोदाहरणम् । अन्तःकरणस्य स्वप्रतिविम्बितचैतन्याभिमुखा वृत्तिर्विषयाभिन्नाऽहंकारस्तद्रूपमात्रत्वाद्वस्तुत्वम् ॥ १७ ॥

ऐकारायामलज्ञानप्रभावपरिशीलिनाम् ।
आत्मरूपतया नित्यं प्रतीताय नमो नमः ॥ १८ ॥

अकारैकारयोर्योगादैकारः । तत्राकारांशस्योदाहरणममलेति । अन्तर्वर्तिन एकारस्यावर्णेवर्णात्मकत्वादात्मरूपतयेत्यवर्णस्येतायेतीवर्णस्य । प्रतीति हि पृथक्पदम् । " लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः " इति वीप्सायां कर्मप्रवचनीयः । तत्र तत्र वस्तुन्यात्मरूपतया स्वरूपतया वा प्रतीयत इत्यैकारोदाहरणम् ॥ १८ ॥

ओकाराय विरिञ्चाय विष्णवे रुद्रमूर्तये ।
वाच्यवाचकहीनाय स्वयंभानाय वै नमः ॥ १९ ॥

' अकारं ब्रह्माणं नाभौ ' इति श्रुतिः । विष्णोरुकारात्मकत्वाद्विष्णव इत्युकारोदाहरणम् । ' उकारं विष्णुं हृदये ' इति श्रुतिः । तयोश्च विष्णुब्रह्मणोरिह न स्वातन्त्र्येण निर्देशस्तथा सति प्रकृताननुगुणत्वाद्रुद्ररूपत्वेनैवेति दर्शयितुमुक्तं—रुद्रमूर्तय इति । रुद्रमूर्तये विरिञ्चाय रुद्रमूर्तये विष्णव इत्युभयत्र योज्यम् । विष्णुब्रह्माणावपि हि रुद्रात्मकौ ' सर्वो वै रुद्रः ' इति तैत्तिरीयकश्रुतिः । " यो वै रुद्रः स भगवान्यश्च ब्रह्मा तस्मै वै नमो नमः " " यो वै रुद्रः स भगवान्यश्च विष्णुस्तस्मै वै नमो नमः " इति चाऽऽथर्वणी श्रुतिः । उक्तमुच्यमानं वक्ष्यमाणं च[1] यन्मन्त्रतदर्थात्मकं शिवस्य न तत्स्वाभाविकं किंतु लीलयोपासकानुग्रहेण स्वेच्छया स्वीकृतमेव स्वाभाविकं तु निष्कलं स्वप्रकाशमित्याह—वाच्येत्यादिना ॥ १९ ॥

औकाराय महेशाय महामन्त्रार्थरूपिणे ।
महादेवाय मात्रादिप्रपञ्चाय नमो नमः ॥ २० ॥

शिवस्यौकारमन्त्रतादात्म्यप्रतिपत्तिदार्ढ्याय तयोः समानं धर्ममाह—महेशाय महामन्त्रार्थरूपिण इति । शिवस्तावन्निरतिशयैश्वर्ययोगाद्भजतां तत्प्रदातृत्वाच्च महेशः । महतः प्रणवप्रासादरुद्राध्यायादेर्मन्त्रस्य योऽर्थस्तद्रूपी तेन मन्त्रेण प्रतिपाद्यत्वाद्वाचकस्य वाच्यादभेदान्महामन्त्ररूपी च यथैवमौकारोऽपि । सोऽपि हि स्वयं महामन्त्रत्वात्स्वार्थाभेदाच्च महामन्त्रार्थरूपी स्वात्मानं परिशीलयतां निरतिशयज्ञानैश्वर्यप्रदानेन महेश्वर एवमौकारमन्त्रस्य शिवस्य च सारू-

१ घ. च यावन्म° । २ ख. ग. ध. °पि स्व° ।

प्यात्तन्मत्रात्मना शिवोऽनुसंधेयः । [1]औकारस्य यथोक्तप्रभावोपेतत्वं लघुनाम्ना स्वयंकृते सरस्वतीस्तोत्रे विशदीकृतम्—

"यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधै-
स्तार्तीयं तदहं नमामि शिरसा त्वद्बीजमिन्दुप्रभम् ।
अस्त्वौर्वोऽपि सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये
गौःशब्दो गिरि वर्तते स नियतं योगं विना सिद्धिदः" ॥ इति ।

जमदग्निना स्वकोपाग्निः सरस्वत्यां महानद्यां मुक्तः सन्सदा समुद्रं संहरत्येवमौरिति स्वर्गा(?)न्तर्[2]स्थत्वादौकारमन्त्रोऽपि सरस्वतीप्रतिपादकतया[3] वाऽनुगता जाड्याम्बुविच्छित्तये सकलसंसारकारणाविद्यासमुद्रसंहारायास्तु गौरिति यः शब्दो गिरि वाचि नित्यं वर्तत इत्यभिधानेषु प्रसिद्धं च स गकारं विनौरित्येतावन्महामन्त्रात्मकः सिद्धिदो भवतीति। किंच शिवो मानमेयमहादेवादिप्रपञ्चात्मकः । ते च शब्दा मकारादित्वादकारादिन्यायेन मकारात्मकाः । अतस्तदर्थद्वारा शिवोऽपि मकरात्मकः । औकारोऽप्युक्तरीत्या महेशत्वान्मकारात्मक इति मकारस्य साम्यादप्यौकारमन्त्रस्य शिवतादात्म्यं द्रष्टव्यमित्यर्थः ॥ २० ॥

बिन्दुरूपाय बीजाय बीजाधिष्ठानरूपिणे ।
बीजनाशकरज्ञानस्वरूपाय नमो नमः ॥ २१ ॥
विसर्जनीयरूपाय विस्मयाय महात्मने ।
विसर्जनीयनिष्ठानां विशेषार्थाय वै नमः ॥ २२ ॥

चरमस्वरयोः केवलयोः स्वरूपेणोच्चारयितुमशक्यत्वात्तद्वाचकबिन्दुविसर्जनीयशब्दाभ्यामेव तौ निर्दिश्य तदात्मकतामाह—बिन्दुरूपायेति । शिवो हि सर्गादौ स्वमायाशक्तौ प्रतिबिम्बितस्तदवस्थया तयाऽवच्छेदाद्बिन्दुरिति जगदङ्कुरयाऽवस्थया तयाऽवच्छेदाद्बीजमिति तस्या एवाग्र एतद्बीजाधिष्ठानमित्युपनिषज्जनितचरमसाक्षात्काररूपान्तःकरणवृत्तिप्रतिबिम्बितस्तन्नाशकतया बीजनाशकरज्ञानस्वरूप इति चोच्यते । बिन्द्वादिशब्दचतुष्टयस्य बकारादित्वेन बकारात्मकत्वात्तद्द्वारा तदर्थः शिवोऽपि बकारात्मक एवमनुस्वारोऽपि बिन्दुशब्दवाच्यतया बकारात्मक इति बकारमन्त्रतादात्म्येन शिवोऽनुसंधेयः । विविधत्वेन स्रष्टव्यतया विसर्जनीयं जगत्तद्रूपः शिवः ।

---

१ म. च. छ. ज. अकारस्य । २ ख. ग. घ. च. छ. ज. °न्तष्टत्वा° । ङ. °न्तर्दृष्टत्वा° । ३ घ. तदनुगतो । ४ ख. ग. घ. ङ. च. छ. ज ॡकारानेवाक्षरत्वम° ।

शिवः सर्वमिदं जगदित्याहुः । अखण्डैकरसो निष्कलः सन्नपि विविधजगदात्मको जात इत्याश्चर्यरूपत्वाद्विस्मयः । विसर्जनीयनिष्ठानामिति । "तयोरेव कृत्यक्तखलर्थाः" इत्यनीयर्प्रत्ययः । विसर्जनं परित्यागस्तन्निष्ठाः सकलसंसारपरित्यागनिष्ठा ये मुमुक्षवस्तेषाम् । कर्तरि षष्ठी । ऐश्वर्यार्थिभिरपि शिव एव यथा प्रार्थनीयस्तथा मुमुक्षुभिरपि विशेषेणार्थनीय इत्यर्थः । अत्र विसर्जनीयविस्मयविशेषार्थशब्दा वकारादित्वात्तदात्मकाः । तद्द्वारा तदर्थः शिवोऽपि वकारात्मकः । चरमस्वरोऽपि विसर्जनीय इति प्रसिद्धेः स्ववाचकद्वारा वकारात्मकः । तेन वकारात्मकत्वसाम्याद्विसर्जनीयमन्त्रात्मकतया शिवोऽनुसंधेय इत्यर्थः ॥ २१ ॥ २२ ॥

ककाराय कपूर्वादिदेवतापूजिताय च ।
करणग्रामसंहर्त्रे कालातीताय वै नमः ॥ २३ ॥

ककारायेति । को ब्रह्मा स पूर्व एषां ते कपूर्वा इन्द्रादयस्तदादिदेवताभिः पूजिताय । करणग्रामस्य जनकस्य कारणग्रामस्य शरीरस्य जन्यस्य[1] लिङ्गशरीरस्य तदाश्रयस्य स्थूलशरीरस्योपलक्षणं शरीरत्रयसंहर्त्रेऽशरीरत्वलक्षणमोक्षप्रदायेत्यर्थः । कालस्यापि स्रष्टृत्वेन तदनवच्छिन्नाय । अत्र कपूर्वादिशब्दत्रयं ककारादित्वेन तदात्मकं तदर्थतया शिवोऽपि तदात्मकः । अतः ककारमन्त्रतादात्म्येनानुसंधेयः ॥ २३ ॥

खकाराय खपूर्वादिभूतपञ्चकहेतवे ।
खमूर्ताय खलप्रज्ञागोचराय नमो नमः ॥ २४ ॥

खकारायेति । खमाकाशं पूर्वं यस्य तदादिभूतपञ्चकमपञ्चीकृतं सूक्ष्मभूतपञ्चकं तस्य हेतवे । खमूर्ताय । आकाशवन्निर्लेपं मूर्तं मूर्तिर्यस्य तस्मै ॥ २४ ॥

गकाराय गणेशाय गणवृन्दार्चिताय च ।
गङ्गाधराय गुह्याय गुणातीताय ते नमः ॥ २५ ॥

गणाः प्रमथगणाः । गुह्याय गुहायां बुद्धौ भवाय "यो वेद निहितं गुहायाम्" इति श्रुतेः ॥ २५ ॥

घकाराय घनाकारघातकाय घनात्मने ।
घटादिजगदाकाररहिताय नमो नमः ॥ २६ ॥

---

१ घ. ङ. च. छ. 'स्य न लि°।

घनो निबिडः प्रपञ्चः सर्गसमये तदात्मने । प्रलयसमये तदाकारस्य संहर्त्रे ॥ २६ ॥

ङकाराय ङमन्त्रार्थस्वरूपाय शिवात्मने ।
ङाञीङ्संज्ञितार्थानामगम्याय नमो नमः ॥ २७ ॥

ङमन्त्रार्थः श्रीकण्ठादिषु मन्त्रशक्तिसहित एकरुद्र आर्द्राद्युपलक्षितः । ङाञीङ् इत्येते त्रयो वर्णा एतदुपलक्षिता वाऽन्येऽपि सर्वे वर्णाः कादिव्यञ्जनपञ्चत्रिंशत्येकैकेनान्तरिताः संज्ञा जाता एषामर्थानां पार्वतीमूर्तीनां ते तत्संज्ञितार्थाः । तारकादित्वादितच् । तेषामप्यगम्याय । तत्त्वतस्तदभेदेन गन्तृगन्तव्यभावाभावात् । लीलया पृथग्भावेऽप्यवाङ्मनसगोचरत्वात् "अविज्ञातं विजानतां विज्ञातमविजानताम्" इति ॥ २७ ॥

चकाराय चमन्त्रार्थस्वरूपायामितात्मने ।
चमन्त्रार्थनिषण्णानाममृताय नमो नमः ॥ २८ ॥

चमन्त्रार्थ आत्मशक्तियुक्तः कूर्मेशः । उक्ते चमन्त्रार्थे निषण्णा निष्ठिता ये तेषाममृताय । अशरीरत्वरूपापवर्गप्रदानेन शरीरधर्मजरामृत्युनिषूदनादमृतस्वभावायेत्यर्थः ॥ २८ ॥

छकाराय च्छलालस्यच्छादनादिविशेषतः ।
छादनच्छन्दनच्छन्नविभागाय नमो नमः ॥ २९ ॥

छन्नश्छादितः "दस्तस्पष्टच्छन्नज्ञप्ताः" इति निपातनात् । छन्नत्वं गुहानिहितत्वात् "यो वेद निहितं गुहायाम्" इति श्रुतेः । छन्दनं निरस्तनिखिलोपप्लवनिरतिशयपरानन्दत्वेन विषयव्यावृत्तचक्षुषां धीराणां तत्त्वात्मनीच्छाजननम् । छादनमिह तस्य समस्तस्यापवरणम् । एतद्विभागत्रयात्मकायेत्यर्थः । किं तदित्थमनेनापवारणीयमित्यत आह—छलेति । छलं कौटिल्यं जिह्ममिति पर्यायाः । तद्विद्याफलब्रह्मलोकविरोधित्वादहितम् । श्रूयते हि—

"येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् ।
तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया"इति ॥

आलस्यं ह्यध्ययनानुष्ठानविरोधित्वेन धियः प्रतिबन्धादहितम् । छादनशब्दस्य प्रत्येकं संबन्धाच्छलत्वच्छादनमालस्यच्छादनं च । आदिशब्दा-

---

१ छ. ज. °श्चविंश° । २ ङ. कर्मेशः । ३ ग. घ. ङ. च. छ. ज. °नाय वि° । ४ ग. °स्याऽऽत्र° ।

द्व्याध्याद्यहितान्तरं[1] तच्छादनभेदा गृह्यन्ते । विशेषशब्दो भेदपरः । व्याध्याद्यहितभेदाच्च च्छादनभेदा अपि बहवः सन्ति । विशेषत इति बहुवचनान्तात्तसिः । अहितच्छादनविशेषैरित्यर्थः । अहितभेदा हि पठ्यन्ते—"व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपा योगान्तरायाः" इति । अकारात्मकत्वबच्छकारात्मकत्वम् ॥ २९ ॥

जकाराय जगच्छक्तिस्वरूपाय जयार्थिनाम् ।
जयप्रदाय देवाय जम्भमोहाय ते नमः ॥ ३० ॥

जगच्छक्तीति । जगत उत्पत्तिस्थितिसंहारविषया या शक्तिस्तदात्मकाय । शक्तिस्वरूपं तत्तादात्म्यं च वर्णितं प्राक् । जम्भयति पारवश्यमापादयति जीवानिति जम्भस्तादृशो मोहो मूलाज्ञानं यस्मिंस्तद्धि पराशिवाश्रितं पराशिवाधीनं चेति तस्मिन्नित्युच्यते ॥ ३० ॥

झकाराय झमन्त्रार्थस्वरूपायामृतात्मने ।
झमध्यचन्द्रबिम्बाय नमः साम्बाय शंभवे ॥ ३१ ॥

झमन्त्रार्थः श्रीकण्ठादौ द्राविणीशक्तियुक्तः । अमृतात्मकतां समर्थयते—झमध्येति । झ इति निवृत्तिकलादशकमध्ये नवमी स्थितिरुच्यते सा चेह कलाविशेषानुपादानान्नित्यैव गृह्यते । तस्याश्च हेतुरमृतमिति तद्वाचिना झकारेण तद्धेतुरमृतं लक्ष्यते । तच्च झकारलक्षितममृतं मध्यं यस्य चन्द्रस्यासौ झमध्यचन्द्रः स बिम्बं मूर्तिर्यस्याष्टमूर्तेः शिवस्य तस्मै । अनेन च विशेषणेन प्रकृतं झकारात्मकत्वमनन्तरोक्तममृतात्मकत्वं च मन्त्रार्थस्थितिकारिणी सुधामयचन्द्रात्मता प्रणिधानकर्तव्यता चेत्यर्थत्रयं समर्थितम् ॥ ३१ ॥

ञकाराय ञमन्त्रार्थस्वरूपाय ज्ञमूर्तये ।
ज्ञप्तिमात्रैकनिष्ठानां मुक्तिदाय नमो नमः ॥ ३२ ॥

ञमन्त्रार्थेति । नागरीशक्तिसहितः शर्वो ञमन्त्रार्थः । जानातीति ज्ञा[2] मूर्तिः स्वरूपं यस्य तस्मै । ज्ञप्तिमात्रं पराशिवस्वरूपम् । एतच्च विशेषणं यद्यपि पदद्वयात्मकं तथाऽपि ज्ञप्तिमात्रजकारादुत्तरो यो अकारस्तद्बुद्धिर्विशेषणावसानपर्यन्तमनुवर्तत एवेति कृत्स्नं विशेषणं अकारात्मकं तद्द्वारा तदर्थः शिवोऽपि तथेति अकारात्मकत्वसमर्थनोपपत्तिः । नन्विह अकारादपि प्रथमो झकारः । अतस्तद्बुद्धिरप्यनुवर्तते । अनुवर्ततां नाम तथाऽपि अबुद्धेरनुवृत्त्या प्रकृते प्रयो-

१ ङ. °न्तरच्छा° । २ ङ. तत्साधन° । ३ ख. ग. घ ङ. च. छ. ज. ज्ञान ।

जनं न वर्णान्तरबुद्धेरनुवृत्तेरिति न कश्चिद्विरोधः । श्लोकान्तरेष्वप्यनेकपदात्मकत्वविशेषणेष्वित्थमेव विवक्षिताक्षरबुद्ध्यनुवृत्तिर्द्रष्टव्या ॥ ३२ ॥

टकाराय टटाटीटूपूर्वकैस्तु महारवैः ।
अर्चिताय सुरश्रेष्ठैरसुरैश्च नमो नमः ॥ ३३ ॥

टटाटीटू, इति मुरजादिवाद्यध्वन्यनुकरणवर्णाः । एतैर्महारवैः करणैः सुरासुरैः कर्तृभिरर्चितायेत्यर्थः ॥ ३३ ॥

ठकाराय ठमन्त्रार्थस्वरूपाय ठमन्त्रतः ।
ठठादिगणपूज्याय ठमध्याय नमो नमः ॥ ३४ ॥

मञ्जरीशक्तिसहितो लाङ्गली ठमन्त्रार्थः । ठठाठिठीठुट्ट, इत्यादयो वाद्यध्वन्यनुकरणा वर्णास्तन्निष्पादका गणाष्ठठादिगणाः । ठमन्त्रतः । तृतीयार्थे सार्वविभक्तिकस्तसिः । तेन मञ्जरीशक्तिसहितलाङ्गलीयमन्त्रेण साधनेन ठठादिगणैः कर्तृभिः पूज्याय । ठमध्याय ठबिन्दुनोपेतस्तथा ठमध्यः शिवः । ठकारवाच्यो योऽनुस्वारस्तेन समाननाम्ना " विचिकीर्षुर्यनीभूतात्काचिदत्येति बिन्दुताम् " इत्यपरबिन्दुरहितशब्देन लक्षितः ॥ ३४ ॥

डकाराय डडाडीडुडेडोडैश्च महारवैः ।
डामरैरभिपूज्याय नमो नृत्यप्रियाय च ॥ ३५ ॥

डामरैर्भयंकरैर्महारवैः । यद्यपि सिंहव्याघ्रादिशब्दा भयजनकाः पूजाहेतवस्तथाऽपि ततोऽभेदेन ज्ञातास्तदनुकरणशब्दा भयानकाः सव्यञ्जनतया हर्षहेतव इति तैः पूज्यायेत्युक्तम् ॥ ३५ ॥

ढकाराय ढमन्त्रार्थपरिज्ञानवतां नृणाम् ।
ढसंज्ञितमहानन्दप्रदाय सततं नमः ॥ ३६ ॥

वीरिणीशक्तिसहितोऽर्धनारीश्वरो ढमन्त्रार्थः । ढकारेरनुक्रियमाणेनाट्टहासेन कार्येण व्यञ्जनीयतया लक्षणया ढसंज्ञितस्तत्कारणभूतो यो महानन्दस्तत्प्रदाय ॥ ३६ ॥

णकाराय णणाण्णीणूणेणैणोणौरवैः सदा ।
णाकिनीगणपूज्याय णसंज्ञाय नमो नमः ॥ ३७ ॥

---

१ ग. घ. ङ. च. छ. °किणीग° ।

णार्किनीशब्दानुकार्यघण्टादिध्वनिकर्तृतया तच्छब्दलक्ष्या गणा णार्किनीगणास्तैः कर्तृभिः । णणादिवर्णानुकार्यैर्मुरजादिभिर्ध्वनिभिः करणैः पूज्यायेत्यर्थः । कोटरीशक्तिसहित उमाकान्तो णमन्त्रार्थस्तया णसंज्ञस्तद्रूपाय ॥ ३७ ॥

तकाराय तशब्दा(मन्त्रा)र्थस्वरूपाय ताय च ।
तत्त्वमित्यभिपूज्याय तत्त्वभूताय वै नमः ॥ ३८ ॥

पूतनासहित आषाढीशस्तमन्त्रार्थस्तद्रूपाय । ताय परिपूर्णतया विस्तृताय । आत्मनो निष्कलपरशिवस्वरूपतामनुसंधाय तयाऽवस्थानमेव हि पूजेत्युक्तं प्राक्तदाह—तत्त्वमित्यभिपूज्यायेति ॥ ३८ ॥

थकाराय थमन्त्रार्थस्वरूपाय थसंज्ञितैः ।
महागणैश्च पूज्याय थमध्याय नमो नमः ॥ ३९ ॥
दकाराय दयारूपमहाशक्तिमयाय च ।
देशजातिविहीनाय दिवारात्राय वै नमः ॥ ४० ॥

भद्रकालीशक्तिसहितो दण्डी थमन्त्रार्थः । थमित्यादिशब्दानुकृतमुरजध्वनिकर्तारो महागणास्तैरनुकरणशब्दैर्लक्षणया संज्ञिताः । थकारो मध्ये यस्य प्रमथेश्वरशब्दस्य स थमध्यस्तद्वाच्यतया तद्रूपाय ॥ ३९ ॥ ४० ॥

धकाराय धरण्यादिमहाभूतस्वरूपिणे ।
धराधरहृदिस्थाय धमध्याय नमो नमः ॥ ४१ ॥
नकाराय नगेन्द्राय नामजात्यादिहेतवे ।
नमः शिवाय नम्याय नानारूपाय शूलिने ॥ ४२ ॥
पकाराय परानन्दस्वरूपाय परात्मने ।
परापरविहीनाय पावनाय नमो नमः ॥ ४३ ॥

धराधरः कैलासस्तस्य हृदि मध्ये स्थिताय । मेधाप्रदशब्दो धमध्यस्तद्वाच्यतया तद्रूपाय ॥ ४१ ॥ ४२ ॥ ४३ ॥

फकाराय फलाख्याय फलाख्यगणयोनये ।
फलाख्यगणपूज्याय नमः पूर्णस्वरूपिणे ॥ ४४ ॥

---

१ ग. च. °किणीश° । २ ग. च. °किणीम° । ३ ङ. नास्ति° ।

फलाख्याय । अष्टाङ्गयोगजन्यज्ञानेन प्राप्तव्यतया फलमित्याख्याय । बहुविधसत्कर्मसाध्यतया फलमित्याख्यायमानो यः प्रमथादिर्गणस्तस्य तदनुरूपफलप्रदानेन योनये कारणाय । तेन पूजनीयाय ॥ ४४ ॥

बकाराय बकाराख्यमहाबीजैकजापिनाम् ।
बन्धनागारनाशैकहेतवे वेधसे नमः ॥ ४५ ॥

बकारस्य ब्रह्मपदप्रथमवर्णत्वादकारन्यायेन ब्रह्मपदात्मकत्वद्वारा तदर्थपरतत्त्वस्वरूपतया सकलजगदुपादानत्वान्महाबीजत्वम् । तज्जपश्च तदर्थप्रणिधानतत्साक्षात्कारद्वारा तदविद्यालक्षणस्य बन्धनागारस्य निवृत्तावुपकरणं भवति ॥ ४५ ॥

भकाराय भवाब्धेस्तु तारकाय भवाय ते ।
भवशब्दैकवेद्याय भवानीपतये नमः ॥ ४६ ॥
मकाराय महामायापाशनाशैकहेतवे ।
ममकारविहीनानां महानन्दाय वै नमः ॥ ४७ ॥

भवशब्दः सद्रूपत्वमाह । तथात्वं च मुख्यं नामाऽऽत्यन्तिकबाधाविरहः । स च परशिवस्यैवेति स एक एव भवशब्देन वेद्य इत्यर्थः ॥ ४६ ॥ ४७ ॥

यकाराय यथार्थाय यथार्थज्ञानिनां नृणाम् ।
यथार्थप्रत्यगद्वैतब्रह्मणे सततं नमः ॥ ४८ ॥

जगद्येन जगदात्मना भासते न तत्सत्यं किंत्वधिष्ठानरूपेण । शिवस्तु येन सच्चिदानन्दप्रकारेण भासते तेनैव भूतः सत्य इति यथाभूतः स चासावर्थश्चेति यथार्थस्तस्मै मध्यमपदलोपी समासः । यथाशब्दश्च सत्तावत्यर्थे वृत्तावेव वृद्धव्यवहारानुसंगतिक इति । प्रतीपमञ्चतीति प्रत्यक्सर्वान्तरम् " अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा " इति तैत्तिरीयकश्रुतिः । तच्च तदद्वैतं ब्रह्म च ॥ ४८ ॥

रकाराय रतिप्रीतिप्रियाय रतिहेतवे ।
रशब्दवपुषे रोगभवनाशाय वै नमः ॥ ४९ ॥

रकारायेति । क्रियत इति कारः । रश्चासौ कारश्चेति रकारः । " वर्णात्कारः " इति हि कारप्रत्ययः "रादिफः" इत्यपवादेन बाधितः । रतिप्री-

तीति। सर्वात्मको हि शिवो मन्मथरूपेणावतीर्णो रतिपतीतिनाम्ना योषितः प्रियो भर्ता लोकस्य रतिहेतुश्च भवति। रशब्देति। रविशब्दो हि रेफादित्वादुक्तरीत्या स्वयं रशब्दस्तदर्थः सूर्योऽपि तथेति रशब्दवपुः स च चाष्टमूर्तेः शिवस्यैका मूर्तिरिति शिवस्तदात्मना रशब्दवपुः सन्रोगं संसारं च नाशयतीति ॥ ४९ ॥

लकाराय लतासोमस्वरूपाय लतात्मने ।
लाभालाभविहीनाय लब्धरूपाय वै नमः ॥ ५० ॥
वकाराय वरिष्ठाय वासुदेवादिहेतवे ।
वाञ्छावागुरविच्छित्तिहेतुभूताय वै नमः ॥ ५१ ॥

लतेति। अष्टमूर्तेः शिवस्य चन्द्र एका मूर्तिस्तस्य च प्रतिपदादिपौर्णमास्यन्ततिथिषु नित्यमेकैककला वर्धते पुनः प्रतिपदादिदर्शान्तेष्वेकैककला हीयते यथा तथा सोमलताया अपि पौर्णमासीपर्यन्तं नित्यमेकैकपत्रस्य वृद्धिः पुनर्दर्शपर्यन्तमेकैकपत्रस्य हानिः। अतः शिवोऽपि चन्द्रात्मलतासोमस्वरूपः। चन्द्रकिरणाधीनत्वात्सर्वलतानां वृद्धेश्चन्द्रो लतानामात्मा। अतश्चन्द्ररूपः शिवोऽपि लतात्मा तस्मै। लाभेति। अप्राप्तकामस्य प्राप्तिर्लाभः। अप्राप्तिरलाभः। शिवस्तु नित्यमाप्तकामत्वेनावाप्तव्याभावात्तदुभयहीनः। लब्धेति। अज्ञानेनाऽऽवृतत्वाज्जीवाः स्वमपि रूपं न लभन्ते। शिवस्त्वनावृतचित्प्रकाशतया नित्यं लब्धरूपः ॥ ५० ॥ ५१ ॥

शकाराय शरण्याय शंभवे शरणार्थिनाम् ।
शरणाय शरच्चन्द्रधवलाय नमो नमः ॥ ५२ ॥

शकारायेति। शरण्याय रक्षाशीलत्वेन। रक्षाशक्तत्वेन च रक्षकत्वादाह- शरणाय रक्षकाय ॥ ५२ ॥

षकाराय षडाधारषट्चक्रादिस्वरूपिणे ।
षडक्षरनिषण्णाय नमः षण्मुखहेतवे ॥ ५३ ॥

षकारायेति। आधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाः षडाधाराः। तत्रत्यानि चतुर्दलपद्मादीनि षट्चक्राणि। आदिशब्दात्तेषु ब्रह्मरन्ध्रादिषूपास्यमाना गणेशादयः षड्देवताः। सप्रणवः पञ्चाक्षरमन्त्रः षडक्षरस्तेन प्राप्यतया तत्र निषण्णः ॥ ५३ ॥

---

१ ख. ग. घ. ङ. च. छ. ज. अतस्तस्याग्रं द्वादशभेदाच्छिवो°।

सकाराय सशब्दार्थस्वरूपाय सदात्मने ।
साक्षिणेऽसाक्षिरूपाणां नमः साधूपकारिणे ॥ ५४ ॥

सशब्देति । सहजाशक्तिसहितो भृङ्गीशः सशब्दस्य सकारस्यार्थः। साक्षिणेऽसङ्गाय । असाक्षिरूपाणां विषयसङ्गिनां संसारिणाम् । साधूपकारिणे भोगमोक्षप्रदानेन सम्यगुपकर्त्रे ॥ ५४ ॥

हकारायाहमर्थाय सदाऽहंकारसाक्षिणे ।
हाहाहूहूकगीताय हंसरूपाय वै नमः ॥ ५५ ॥

हकारायेति । अहंकारेण सह तादात्म्याध्यासात्स्वतो निष्कलरूपत्वेऽपि जीवत्वं प्राप्य तद्रूपिणे ' अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य ' इति श्रुतेः । अत एवाहंशब्देनाभिधेयाय । हाहेति गायन्देवानां गन्धर्वो हाहा हूहू, इति गायन्हूहू हीहीति गायन्नेतैस्त्रिविधैर्गीयते श्रूयत इति हाहाहूहूकः । कै शब्द इत्यतः कर्मणि " घञर्थे कविधानम् " इति कप्रत्ययः । हंसरूपाय । अजपामन्त्रप्रतिपाद्यतया तदात्मने ॥ ५५ ॥

लकाराय लकाराख्यमहामन्त्रप्रियाय च ।
लोलाचञ्चलसंसारनाशनाय नमो नमः ॥ ५६ ॥

लकारायेति । व्यापिनीशक्तिसहितस्य शिवस्य प्रतिपादको मन्त्रो लकाराख्यस्तत्प्रतिपाद्यतया तत्प्रियः । लोलेति डलयोरभेदः । डोलावच्चञ्चलो यः संसारस्तन्नाशनाय ॥ ५६ ॥

क्षकाराय क्षमन्त्रार्थस्वरूपाय क्षमावताम् ।
क्षेमदाय मम क्षेमस्वरूपाय नमो नमः ॥ ५७ ॥

क्षकारायेति । क्षकारार्थो मायाशक्तिरहितः संवर्तकेयः। क्षमावतामित्यादि। शिवो हि वाग्रूपे प्रतीके क्षेमरूपेणोपास्यमानः क्षेमप्रद इत्युक्तं तैत्तिरीयके ' क्षेम इति वाचि ' इति ॥ ५७ ॥

मातृकावपुषे मातृमानमेयादिसाक्षिणे ।
मातृकामन्त्रलभ्याय महसे च नमो नमः ॥ ५८ ॥

एकैकवर्णात्मकत्वोक्त्यैव सकलवर्णसमाहारस्वरूपमातृकामन्त्रात्मकत्वस्य

---

१ ग. घ. च. छ. ज. °णे साक्षरू° ।

सिद्धस्यापि मातृकावपुष इति पुनः स्वशब्देनाभिधानं तेनापि प्रकारेण प्रणिधानाय । न केवलमेकैकवर्णात्मकत्वेन तत्समष्टिमातृकामन्त्रात्मकत्वम् । किंतु मकारादिभिरनेकैः शब्दैरभिधेयम् । एतेषां च प्रागुक्तवन्मकारात्मकत्वात्तद्द्वारा तदर्थः शिवोऽपि मकारात्मकः । मातृकामन्त्रोऽपि तेनैव मकारादिशब्देनाभिहितत्वान्मकारात्मक इत्यपि मातृकामन्त्रवशमिति दर्शयितुमाह—मातृमानेत्यादिना । मानानि प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावरूपाणि षडन्तःकरणवृत्तिविशेषात्मकानि तैर्मेयं व्यावहारिकसत्यं जगन्माता च मानानि च मेयं च मातृमानमेयानि । आदिशब्देन प्रातीतिकसत्यमविद्या तद्वृत्तिसंशयविपर्यायास्तद्विषया स्मृतिश्च गृह्यते । तस्य सर्वस्य साक्षिणे प्रकाशकाय स्वप्रकाशाय परमार्थसत्याय । महसे चित्प्रकाशाय " तस्य भासा सर्वमिदं विभाति " इति श्रुतेः ॥ ५८ ॥

मातृकाधारभूताय मातृकामूलरूपिणे ।
महामन्त्रैकवाच्याय महसे ब्रह्मणे नमः ॥ ५९ ॥

मातृकाधारेति । परशिवविवर्तरूपत्वान्मातृकायास्तां प्रति तस्य शिवस्याऽऽधारत्वम् । मातृकामूलेति । मातृकाया मूलं शब्दब्रह्म तदुपादानतया तद्रूपिणे । महामन्त्रेति । मातृकामन्त्राः प्रणवहृल्लेखाष्टाक्षरादयो महामन्त्राः । तेषां पृथक्पृथग्वाच्यास्तत्तद्देवतामूर्तयस्तद्द्वारा चिदानन्दैकरसः शिव एक एव तात्पर्येण प्रतिपाद्यः ॥ ५९ ॥

द्विधाभूतमहामन्त्रस्वरव्यञ्जनरूपतः ।
वाच्यायापदरूपाय पदाय महसे नमः ॥ ६० ॥

द्विधाभूतेति । द्विधा भूता हि महामन्त्रास्तैः स्वेन ध्वन्यात्मना तद्व्यङ्ग्येन स्फोटात्मना च । उक्तं हि महाभाष्ये—अथ गौरित्यत्र कः शब्दः । येनोच्चारितेन सास्नालाङ्गूलखुरककुद्विषाणाद्यर्थरूपं प्रतीयते स शब्दः । अथवा प्रतीतिपदार्थो लोके ध्वनिः शब्द इति । तत्र ह्युच्चारितेनेत्यभिव्यञ्जितेनेत्यर्थ इति व्याख्यातम् । तेन रूपेण स्फोटेन साक्षाद्वाच्यस्तद्द्वारा तद्व्यञ्जकेन स्वेन ध्वनिरूपेणेति । पदापदरूपत्वमुक्तं प्राक् ॥ ६० ॥

अष्टधा चाष्टवर्गैस्तु विभक्तायामलात्मने ।
अशेषशब्दभूताय तत्तदर्थाय वै नमः ॥ ६१ ॥

अष्टधेति । प्रथममलात्मने निष्कलाय ततो बिन्दुशब्दपरापश्यन्तीमध्यमावैखरीवागात्मकमातृकारूपतां प्राप्य पुनरकचटतपयशादिभिरष्टाभिर्वर्गैरष्टधा विभक्ताय । तत्तद्वर्णसमाहारात्मकपदवाक्यतत्तदर्थतां प्राप्तायेत्यर्थः ॥ ६१ ॥

शब्दान्वयविहीनाय शब्दलभ्याय साक्षिणे ॥
सर्वोपाधिविहीनाय स्वयंभानाय वै नमः ॥ ६२ ॥

शब्दान्वयेति । सर्वोपाधिविहीनाय निरस्तसमस्तोपाधिकस्वरूपप्रतिष्ठाय । अत एव सकलशब्दप्रवृत्तिनिमित्तजात्यादिविरहाद्वाचकशब्दहीनाय । स्वयंभानाय स्वरूपप्रकाशेनैव भासमानाय । एवंरूपोऽपि यदा स्वमायातत्कार्यसाक्षी भवति तदा " साक्षी चेता केवलः " इत्यादिशब्दलभ्याय ॥ ६२ ॥

प्रत्यक्षादिप्रमाणानामगम्यायापरोक्षतः ॥
प्रतीताय स्वयं सर्वसाक्षिणे महसे नमः ॥ ६३ ॥

प्रत्यक्षेति । स्वयं परमार्थवस्तुतयाऽवस्तुगोचरैः प्रत्यक्षादिभिरगम्याय । प्रमाणानामिति कर्तरि षष्ठी । तथाऽपि स्वयं स्वरूपप्रकाशेनैवापरोक्षतया प्रतीताय स्फुरते । स्वातिरिक्तस्य सर्वस्यापरोक्षहेतवे । महसे प्रकाशाय ॥ ६३ ॥

स्वस्वरूपादिहीनाय वस्तुतोऽवस्तुतोऽपि च ॥
अर्थाय महते साक्षात्स्वयंभानाय वै नमः ॥ ६४ ॥

स्वस्वरूपेति । अत्र प्रथमः स्वशब्द आत्मनि द्वितीय आत्मीये वस्तुभूतेनापि स्वेनाऽऽत्मना हीनाय स्वात्मनि वृत्तिविरोधात् । अवस्तुतोऽवस्तुभूतेन स्वीयेन रूपाद्येन हीनाय तस्यावस्तुत्वादेव । महते देशकालवस्तुकृतपरिच्छेदविरहादपरिच्छिन्नाय । अर्थाय परमार्थाय साक्षादपरोक्षतया स्वयमेव भानं यस्य तस्मै । अत्र स्तोत्रे महसे स्वयंभानायेत्यादयः शब्दा यद्यप्यसकृदावर्तन्ते तथाऽपि न पौनरुक्त्यं शङ्क्यम् । निरर्थकं हि पुनर्वचनं पुनरुक्तम् । इदं तु स्तोत्रं न स्वरूपोपदेशपरम् । येन सकृदुक्तया प्रतिपन्नस्य पुनरुपदेशोऽनर्थकः स्यात् । विष्णुना हि कृतमुपासनं तस्य तथैवाऽऽनुपूर्व्या तथैव बुद्धौ विनिवेशाय ग्रन्थनात्मकोपासने चाऽऽवृत्तिरलंकारो न दोषः । आवृत्त्येकशरीरत्वात्तस्येति ॥ ६४ ॥

---

१ ङ. 'त्तिनिवृत्तिजा° । २ ग. °रूपेग हीं° । ३ ख. ग. ङ. छ. ज. °पादहीं° ।

प्रसादलभ्याय शिवाय सत्यचि-
न्महासुखायापरवर्जिताय ।
अतीव शुद्धस्य हृदम्बुजालये
विभासमानाय नमो नमस्ते ॥ ६५ ॥

प्रसादलभ्यायेति । प्रसीदति रजस्तमोभ्यामनभिभूतं भवति बुद्धिसत्त्वमनेनेति प्रसाद ईश्वरस्यानुग्रहो निरतिशयभक्तिलभ्यः ॥ ६५ ॥

सूत उवाच——

एवं नारायणेनैव शंकरोऽभिष्टुतः पुनः ॥
प्राह गम्भीरया वाचा किमर्थं तप्तवांस्तपः ॥ ६६ ॥
इत्याकर्ण्य महाविष्णुः प्रणम्य परमेश्वरम् ॥
तव स्थानानि[1] मे देव ब्रूहि साक्षात्कृपाकर ॥ ६७ ॥
इत्युक्तो विष्णुना शंभुः सर्वज्ञः करुणाकरः ॥
प्राह सर्वेश्वरेशानः स्थानानि स्वस्य विष्णवे ॥ ६८ ॥

ईश्वर उवाच——

मम स्थानानि वक्ष्यामि महामोहनिवृत्तये ॥
अतीव श्रद्धया सार्धं शृणुष्व पुरुषोत्तम ॥ ६९ ॥
अध्यात्मे चाधिभूते च स्थानानि सुबहूनि मे ॥
स्वर्गापवर्गसिद्ध्यर्थमुपास्यानि मनीषिभिः ॥ ७० ॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

ब्रह्मरन्ध्राभिधं स्थानं विशिष्टं योगि[2]सेवितम् ॥
विमुक्तिसाधनं नृणामिति विद्धि विचक्षण ॥ ७१ ॥
मुखमण्डलमाश्चर्यं भुक्तिमुक्तिफलप्रदम् ॥
मोहनाशकरं साक्षात्स्थानं विद्धि जनार्दन ॥ ७२ ॥

---

१ ब. °नि भेदेन भू° । २ ज. °गिसंमत° ।

चक्षुषी च तथा श्रोत्रे नासिके च जनार्दन ।
गण्डोष्ठदन्तमूर्धा च स्थानान्यास्ये ममानघ ॥ ७३ ॥

स्थानविशेषेषु कृतस्योपासनस्य सकलपुरुषार्थसाधनत्वादुपासनस्थानान्येव विष्णुना पृष्टः शंभुस्तावदाध्यात्मिकानि स्थानान्याह—ब्रह्मरन्ध्राभिधमित्यादिना । ब्रह्मरन्ध्रादीन्यास्यान्तानि षोडश क्रमेण स्वरैरुपासनस्थानानि ॥७१॥ ॥ ७२ ॥ ७३ ॥

हस्तपादगताः सर्वे संधयः पुरुषोत्तम ।
स्थानानि मम कल्याण तथा पार्श्वद्वयं मम ॥ ७४ ॥
पृष्ठश्च नाभिदेशश्च हृद्देशश्च जनार्दन ।
धातवः सप्त मे साक्षात्स्थानानि पुरुषोत्तम ॥ ७५ ॥

हस्तपादद्वयसंधयः साग्राः कचटतपवर्गैरुपासनस्थानानीत्याह—हस्तपादेति । संधिग्रहणं समग्रस्याप्युपलक्षणम् । पवर्गस्थानपञ्चकमाह—पार्श्वेति । नाभिग्रहणं कुक्षेरप्युपलक्षणम् । यादिदशकोपासनस्थानान्याह—हृद्देशश्चेति । आपादमस्तकं व्याप्तं त्वगादिधातुसप्तकं प्राणजीवापानात्मलक्षणमर्थत्रयं च हृदयेऽपि व्याप्य वर्तत इति हृद्येव तत्र स्थानदशकं यादिभिरुपासनीयमित्यर्थः । धातुग्रहणं प्राणादित्रयस्याप्युपलक्षणम् ॥ ७४ ॥ ७५ ॥

मूलाधारमधिष्ठानं पूरकाख्यमनाहतम् ।
विशुद्धाख्यं च मत्स्थानं विद्धि पङ्कजलोचन ॥ ७६ ॥
महाज्ञासिद्धिसंज्ञं च विष्णो वाराणसी पुरी ।
प्रणवांशत्रयं बिन्दुनादशक्तिसमाह्वयम् ॥ ७७ ॥
बीजस्थानं च मेढ्रं च रोमाणि विविधानि च ।
मम स्थानानि कल्याण विद्धि पङ्कजलोचन ॥ ७८ ॥

बहिरुपासनस्थानान्यभिधायाऽऽन्तराण्यप्याह—मूलाधारमिति । देहमध्ये मूलाधारस्तत्र चतुर्दलपद्मे वर्णचतुष्टयेनोपास्य(सन)म् । लिङ्गमूलं स्वाधिष्ठानं तत्र षड्दलषट्के वर्णषट्केनोपासनम् । नाभौ मणिपूरकं तत्रत्यपद्मदशके वर्णदशकेन । अनाहतं हृदि तत्रत्यपद्मदलद्वादशके वर्णद्वादशकेन । कण्ठे विशुद्धं तत्र-

---

१ घ. पार्श्वयुं । २ ख. ङ. च. छ. ज. प्राणाजी° ३ ख. वानात्मकल° । ४ ख. °अदलद्°।

त्यपद्मदलषोडशके वर्णषोडशकेन । भ्रूमध्य आज्ञा तत्रत्यपद्मदलद्वये वर्णद्वयेन। सिद्धिसंज्ञं ब्रह्मरन्ध्रं तत्रत्यसहस्रदलपद्म एकेन वर्णेन। इत्येकपञ्चाशता मातृकावर्णैरन्तरुपासनस्थानानि । वाराणसी भ्रूमध्यम् । श्रूयते हि—'भ्रुवोर्घ्राणस्य च यः संधिः' इति । अकारोकारमकाराः। चकाराच्छान्तं च ॥७६॥७७॥७८॥

यथाऽध्यात्मे महाविष्णो स्थानानि सुबहूनि मे ।
तथाऽधिभूते मे विष्णो स्थानानि सुबहूनि च ॥ ७९ ॥
कैलासपर्वतः साक्षात्स्थानं विष्णो ममानघ ।
श्रीमद्दक्षिणकैलासपर्वतश्च तथैव च ॥ ८० ॥
वाराणसी पुरी पुण्या विमुक्तिफलदा नृणाम् ।
मरणादेव सर्वेषां तच्च स्थानं ममानघ ॥ ८१ ॥
श्रीसोमनाथसंज्ञं च तथा केदारमद्भुतम् ।
श्रीपर्वतं च मे स्थानं विद्धि पङ्कजलोचन ॥ ८२ ॥
श्रीमद्वृद्धाचलं पुण्यं तथा गोपर्वतं हरे ।
तथा श्रीहरतीर्थं[1] च विद्धि स्थानं ममाव्ययम् ॥ ८३ ॥
आधिग्राममसमाख्यं च श्वेतारण्यं महत्तरम् ।
दन्तिस्थानं[1] च मे विष्णो स्थानं विद्धि महत्तरम् ॥ ८४ ॥
त्रिकोटिहाख्यं गम्भीरं तथा गोपुटतीर्थकम्[2] ।
मध्यार्जुनं च मे स्थानं विद्धि पङ्कजलोचन ॥ ८५ ॥
श्रीमन्मङ्गलवंशाख्यं कुम्भकोणसमाह्वयम् ।
तथा सव्येतरावर्तं विद्धि स्थानं ममानघ ॥ ८६ ॥
जप्येश्वरसमाख्यं च तथा वल्मीकमुत्तमम् ।
गजारण्यसमाख्यं मे विद्धि स्थानं विचक्षण ॥ ८७ ॥
वेदारण्यसमाख्यं च तथा हालास्यसंज्ञितम् ।
श्रीमद्रामेश्वराख्यं च स्थानं विद्धि ममाद्भुतम् ॥ ८८ ॥

---

१ ग. दृष्टिस्थानं । ङ. दृतिस्थानं । २ ख. ग. घ. गोपटुनी ।

पुण्डरीकपुरमुत्तमं मम
स्थानमग्निसदृशं विशोधनम् ।
योगनिष्ठमुनिसंघसेवितं
भोगमुक्तिफलदं पुरातनम् ॥ ८९ ॥

इत्थमाध्यात्मिकान्युक्त्वाऽऽधिभौतिकान्याह—यथेति ॥ ७९ ॥ ८० ॥ ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥

त्वया मया वज्रधरेण नन्दिना
विनायकाद्यैरखिलैरतिप्रियात् ।
निषेवितं संततमास्तिकैर्जनैः
स्वराट्समाख्यस्य हृदि स्थितं शुभम् ॥ ९० ॥

प्रकृतस्य पुण्डरीकपुरस्यात्यन्तवैशिष्ट्ये हेतुमाह—त्वयेति । स्वराट्समाख्यस्येति । विराडात्मकं ब्रह्माण्डात्मकं समष्टिरूपस्य शिवस्य स्थूलशरीरं तदन्तर्वर्ति स्वराट्समाख्यं यल्लिङ्गशरीरं तस्य हृदयस्थानं तदित्यर्थः ॥ ९० ॥

श्रुतिस्मृतिभ्यामपि सर्वशक्तिभि-
र्न गोचरीकर्तुमलं महत्तरम् ।
प्रसादिभिर्लभ्यमतीव शोभनं
गुणाकरं गुह्यमशोभनापहम् ॥ ९१ ॥
सदा परानन्दविकासकारणं
दिवाकराणामपि कोटिभिः समम् ।
पुरातनानामपि पुण्यशीलिनां
विमोहनाशाय मयैव निर्मितम् ॥ ९२ ॥
स्थानमेतदतिप्रियमास्तिकै-
र्वेदविद्भिरतिप्रियकारिभिः ।
पूजितं पुरुषोत्तम मुक्तिदं
सेवितं च सततं मयैव तु ॥ ९३ ॥

१ ख. ग. च. छ. ज. विशोधने । २ ङ. मतीव शोभनम् ।

सर्वशक्तिभिरिति । सर्वा शक्तिः समग्रं सामर्थ्यमेषामस्ति तैर्महर्षिभिः श्रुति-स्मृतिभ्यामपि यद्गोचरीकर्तुमशक्यम् । किंतु शिवप्रसादवद्भिरेव लभ्यमि-त्यर्थः ॥ ९१ ॥ ९२ ॥ ९३ ॥

अत्र नृत्तमतिशोभनं परं
सत्यबोधसुखवस्तुबोधकम् ।
भक्तचित्तहृदयस्थितं हरे
व्यक्तमेव सततं करोम्यहम् ॥ ९४ ॥

सत्येति । सत्यमनवच्छिन्नमवाध्यं सुखं ज्ञानानन्दघनं यद्वस्तु तस्य साध-कम् ॥ ९४ ॥

शंकरी च परमा विनायकः
षण्मुखश्च सुयशाः पतिः प्रभुः ।
अन्तरङ्गजनमप्यतिप्रियं
नृत्तमत्र परिपश्यति स्वयम् ॥ ९५ ॥
त्वं च पद्मजनितः पुरंदरः
पङ्कजाऽपि परमा सरस्वती ।
मत्प्रसादजनितेन चक्षुषा
नृत्यमत्र ददृशुः समञ्जसम् ॥ ९६ ॥
शब्दजालपरिमोहिता जना-
स्तर्कजालपरिमोहिता अपि ।
अत्र नैव ददृशुश्च नर्तनं
भक्तिहीनजनताऽप्यधोक्षज ॥ ९७ ॥
वेदबाह्यसरणिस्थिता जनाः
केवलाश्च मनुजा अपि प्रियम् ।
अत्र भक्तिसहिता अपि स्वतः
सत्यमेव ददृशुश्च नर्तनम् ॥ ९८ ॥

अत्र नृत्तमविलोक्य मानवः
स्वर्गलोकमपि नैति चेज्यया ।
नित्यशुद्धसुखसत्यचिद्घनं
ब्रह्म मुक्तिमपि नैति विद्यया ॥ ९९ ॥

शंकरीति । उक्तशंकर्यादिरन्तरङ्गजनः । आर्षं नपुंसकत्वम् । निगदव्याख्यानमन्यत् ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥

नृत्तदर्शनविवर्जितः पुमा-
नत्र कीटसदृशश्च केशव ।
तस्य पुण्यमपि दुष्कृतं भवे-
त्सत्यमेव कथितं मयाऽच्युत ॥ १०० ॥
नृत्तदर्शनविहीनवाङवः
सत्यमत्र पुरुषोत्तमान्त्यजः ।[1]
तस्य जन्म विफलं ह्यहो हरे
कः स्वमोहमतिवर्तते नरः ॥ १०१ ॥
बहुप्रलापेन किमत्र लभ्यते
विचित्रमेतत्पुरमाहृतं मया ।
विमुक्तिभाजामपि पुण्यशीलिनां
विमुक्तिहेतुः सकलोत्तमोत्तमम् ॥ १०२ ॥

सूत उवाच—

एवमुक्त्वा महादेवः साम्बः संसारमोचकः ।
सत्यज्ञानपरानन्दस्तत्रैवान्तरधीयत ॥ १०३ ॥
विष्णुर्विश्वजगन्नाथो विश्वलोकहिते रतः ।
शिवस्थानानि चाऽऽकर्ण्य श्रीवैकुण्ठं गतोऽभवत् ॥ १०४ ॥

॥ १०० ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥

---

१ ख. सत्यमेव ।

भवद्भिश्च महाभाग्याच्छिवस्थानानि सुव्रताः ।
श्रुतानि तानि मोक्षार्थं भजध्वं श्रद्धया सह ॥ १०५ ॥
स्थानानि सर्वाणि मयोदितानि
द्विजेन्द्रवृन्दा अतिशोभनानि ।
भजेदविद्याविनिवृत्तिकामः
प्रियेण चैकं परमेश्वरस्य ॥ १०६ ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे शिवस्थानविचारो नामैकोन-
त्रिंशोऽध्यायः ॥ २९ ॥

॥ १०५ ॥ १०६ ॥

इति श्रीसूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे शिवस्थानविचारो नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

अथ त्रिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि भस्मधारणवैभवम् ।
यस्य विज्ञानमात्रेण नरो मुच्येत बन्धनात् ॥ १ ॥
भस्म नानाविधं प्रोक्तं धार्मिकैस्तत्त्वचिन्तकैः ।
एकं विप्रा महाभस्म स्वल्पमन्यत्प्रकीर्तितम् ॥ २ ॥

शिवस्योपासनस्थानान्युक्त्वा तत्रोपासकानां भस्मधारणविधानाय त्रिंशमध्यायमारभते—अथात इति ॥ १ ॥ २ ॥

महाभस्म महादेवो महामायावभासकः ।
भर्त्सनात्तर्वपापानां[1] भासनं तस्य विद्यया ॥ ३ ॥

महत्त्वाल्पत्वाभ्यां द्विधा भस्माभिधाय महतः स्वरूपमाह—महाभस्मेति ।

---

१ ख. घ. भर्त्सनं ।

मायातत्कार्यसाक्षित्वेन तदवभासनात्तत्त्वज्ञानप्रदानेन सर्वपापक्षयकरतया तद्भर्त्सनाद्वा महादेवो महाभस्म । तत्र भर्त्सनं तस्य महादेवस्य । कर्मणि षष्ठी । तद्विषयया विद्यया भवति ॥ ३ ॥

विद्या वेदोद्भवा साक्षान्मुनयः संशितव्रताः ।
अविद्या फलतश्चान्याः सत्यमेव मयोदितम् ॥ ४ ॥

विद्येति । अन्या औपनिषद्व्य(द्रव्य)तिरिक्ताः कलाशास्त्रादिविद्याः । फलस्य बन्धस्य हेतुत्वात्फलतोऽविद्या ॥ ४ ॥

यस्य साक्षान्महाभस्म भाति स्वात्मतया स्वतः ।
न तस्य भस्मना कार्यं न जटाभिर्न चीवरैः ॥ ५ ॥

महाभस्मतत्त्वविद्यावतोऽग्निहोत्राद्यल्पभस्मानपेक्षामाह—यस्य साक्षादिति । तत्साहचर्येण प्राप्तयोर्जटाचीवरयोरपि तद्वदेवानपेक्षामाह—नेति ॥ ५ ॥

यस्य भस्म स्वतो भाति स्वात्मना मुनिपुंगवाः ।
न तस्य वर्णधर्मेण कार्यं नाऽऽश्रमधर्मतः ॥ ६ ॥

अत्यल्पमिदमुच्यते वर्णाश्रमधर्मैरपि न तस्योपकार इत्याह—यस्य भस्मेति । स्वतो भासकप्रमाणानपेक्षत्वेन यस्य स्वात्मना स्वसादात्म्येन भासत इत्यर्थः ॥ ६ ॥

यस्य भस्माऽऽत्मरूपेण विभाति परयोगिणः ।
न तस्य तपसा कार्यं न दानेन न चेज्यया ॥ ७ ॥

सामान्येनोक्तस्य वर्णादिधर्मस्य वैफल्यं विशेषतोऽप्याह—यस्य भस्मेति । तपसेति वनस्थादिधर्मेण । इज्ययेति गृहस्थधर्मेण । दानेनेति साधारणधर्मेण॥७॥

यस्य साक्षिस्वरूपेण भस्म भाति स्वयंप्रभम् ।
न तस्य कार्यं वेदेन न च स्मृतिपुराणकैः ॥ ८ ॥

वेदशास्त्राध्ययनरूपेण ब्रह्मचारिधर्मेणापि तस्य न प्रयोजनमित्याह—यस्येति ॥ ८ ॥

यस्य भस्म द्विजा भाति प्रत्यग्रूपेण संततम् ।
न तस्य कार्यं तीर्थेन नार्चनेन शिवस्य तु ॥ ९ ॥

स्नातकबहूदकधर्मेण तीर्थयात्रादिनाऽपि नार्थ इत्याह—यस्य भस्म द्विजा इति । तद्ब्रह्म स्वयं तु प्रत्यगिति संज्ञामात्रेण भेदभानं न स्वरूपेणेत्यर्थः॥९॥

भस्मविज्ञानसंपन्नो महायोगी महत्तरः ।
कृतकृत्यश्च मेधावी का कथा शिव एव सः ॥ १० ॥
भस्मविज्ञानलाभाय खलु वेदाः सनातनाः ।
प्रवृत्ताः स्मृतयः सर्वाः पुराणं भारतादि च ॥ ११ ॥

उक्ततत्तद्धर्मविरहेऽपि तत्तत्फलविरहोऽपि स्यादिति चेन्न । तस्य परिशेषतया परमैश्वर्यत्वेनार्वाचीनेषु निःस्पृहता स्यादित्याह—भस्मविज्ञानेति ॥ १० ॥ ॥ ११ ॥

भस्मविज्ञाननिष्ठस्य न कर्तव्यं कथंचन ।
केवलं देहयात्रैव कार्याऽऽदेहान्तमास्तिकाः ॥ १२ ॥

प्रागुक्तवेदार्थवैफल्यं कथमिति चेत्तस्य ज्ञानसाधनत्वाद्विदुषस्तत्साध्यज्ञानस्य सिद्धत्वादित्याह—भस्मविज्ञानेति । न केवलं वेदशास्त्रस्य व्यवहारो देहयात्रानुपयुक्तो लौकिकव्यवहारोऽपि तस्य निष्प्रयोजन इत्याह—केवलमिति । आदेहान्तमामरणम् ॥ १२ ॥

स्वल्पं भस्म द्विजश्रेष्ठा बहुधा परिकीर्तितम् ।
श्रौतमेकं तथा स्मार्तमपरं पण्डितोत्तमाः ॥ १३ ॥
श्रौतं भस्म द्विजा मुख्यं स्मार्तं गौणं प्रकीर्तितम् ।
अन्यच्चास्ति द्विजा भस्म लौकिकं केवलं परम् ॥ १४ ॥

महाभस्मोक्त्वा स्वल्पभस्मनो वैदिकस्मार्तलौकिकभेदेन विभागमाह—स्वल्पं भस्मेत्यादिना । श्रुतिविहितेनाऽऽधानेन संस्कृताग्नावग्निहोत्राद्यनुष्ठानेन यन्निष्पन्नं तच्छ्रौतं भस्म । तदेव हि लिङ्गपुराणे भस्मस्नानाङ्गत्वेनोक्तम्—

"भस्मस्नानं पुनः कुर्याद्विधिवद्देहशुद्धये ।
शोध्य भस्म यथान्यायं पुराणेनाग्निहोत्रजम् ॥
ईशानेन शिरोदेशं मुखं तत्पुरुषेण तु ।
उरोदेशमघोरेण गुह्यं वामेन सुव्रताः ॥
सद्येन पादौ सर्वाङ्गं प्रणवेनाभिषिञ्चयेत् ।
भस्मस्नानपरो विप्रो भस्मस्नायी जितेन्द्रियः ॥
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ।
यद्यकार्यसहस्राणि कृत्वा वै स्नाति भस्मना ॥
तत्सर्वं दहते भस्म यथाऽग्निस्तेजसा वनम्" ॥ इति ।

कल्पानुकल्पोपकल्पाकल्पभेदेन भस्मनश्चातुर्विध्यमभिधाय तस्य मुख्यं कल्पत्वमस्यैवोक्तं सिद्धान्तशेखरे—

" मूलेन शोधितं भस्म कल्पाख्यं परिकीर्तितम् ।
अग्निहोत्रसमुद्भूतमथवा भस्म कल्पकम् " ॥ इति ।

बौधायनादिस्मृतिपुराणोक्तविधानेन संस्कृतं भस्म स्मार्तम् । यदाह बौधायनः—

"सद्येन गोशकृद्ग्राह्यं वामे पिण्डाभिमन्त्रणम् ।
अघोरेण दहेत्पिण्डं ग्राह्यं तत्पुरुषेण तु ॥
स्नानमीशानमन्त्रेण कुर्यान्मूर्धादिपादतः ।
आचम्य कूर्च आसीनः शिवो भूत्वा शिवं यजेत् " ॥ इति ।

तथा शिवपुराणे—

भस्मस्नानं तु कृत्वा तु विधिना पञ्चभिः क्रमात् ।
मन्त्रस्नानं पुनः कुर्यात्कृत्वाऽऽदौ वारुणं मुने ॥
प्रणवेन तु संशोध्य ततो हस्ततलं क्रमात् ।
गन्धादिभिश्च संमृज्य जपेदित्थं षडक्षरम् ॥
रुद्राग्नेर्यत्परं वीर्यं तद्भस्म परिकीर्तितम् ।
तस्मात्सर्वेषु लोकेषु वीर्यवान्भस्मसंयुतः ॥
भासकं भसितं चोक्तं भस्म कल्मषभक्षणात् ।
भूतिर्भूतिकरं पुंसां रक्षा रक्षाकरं परम् " ॥ इति ।

तथा भविष्यपुराणे—

" यः स्नानमारभेन्नित्यमाग्नेयं संयतेन्द्रियः ।
कुलैकविंशमुत्तार्य स गच्छेत्परमां गतिम् ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकैः ।
भस्मस्नाननिषेवेण मुच्यते सर्वपातकैः " ॥ इति ।

श्रीमहाभारते—

" आयुष्कामो नरो राजन्भूतिकामोऽथवा नरः ।
नित्यं वै धारयेद्भस्म मोक्षकामी च वै द्विजः " ॥ इति ।

कूर्मपुराणे—

" ब्रह्मचारी मिताहारो भस्मनिष्ठः समाहितः ।
जपेदामरणं रुद्रं स याति परमां गतिम् " ॥ इति ।

---

१ ख. ग. ङ. च. जपेत् । २ ख. घ. छ. ज. °ष्यत्पु° ।

शिवधर्मे—

" भस्मस्नानं जलस्नानादसंख्येयगुणाधिकम् ।
तस्माद्वारुणमुत्सृज्य स्नानमाग्नेयमाचरेत् ॥
योऽश्नीयादन्नमस्नातः पापमात्ति च केवलम् ।
तस्मात्स्नात्वैव भुञ्जीत भस्मना सलिलेन च ॥
प्रातः स्नात्वाऽम्भसा गच्छेद्भस्मना च शिवं पदम् ।
पापकञ्चुकमुत्सृज्य कुलसप्तकमुद्धरेत् ॥
दुःशीलः शीलयुक्तो वा यो वा को वाऽथ लक्षितः ।
भूतिशासनसंयोगात्स पूज्यो राजपुत्रवत् ॥
वनस्पतिगते सोमे भस्मोद्धूलितदेहभृत् ।
अर्चितं शंकरं दृष्ट्वा सर्वपापैः प्रमुच्यते "॥ इति ॥ १३ ॥ १४ ॥

श्रौतं भस्म तथा स्मार्तं द्विजानामेव कीर्तितम् ॥
अन्येषामपि सर्वेषामपरं भस्म लौकिकम् ॥ १५ ॥
सर्वाङ्गोद्धूलनेनैव तथा तिर्यक्त्रिपुण्ड्रकैः ॥
भस्म धार्यमिति प्रोक्तं द्विजानां मुनिपुंगवैः ॥ १६ ॥
धारणं मन्त्रतः प्रोक्तं द्विजानां मुनिपुंगवैः ॥
केवलं धारणं विप्रा अन्येषामपि कीर्तितम् ॥ १७ ॥

उक्तभस्मनोऽधिकारिविभागमाह—श्रौतं भस्म तथेति । श्रौतस्मार्तभस्मद्वयस्य वेदमन्त्रैककरणकत्वेन तत्र शूद्रादेरनधिकारात् ॥ १५ ॥ १६ ॥ १७ ॥

अग्निरित्यादिभिर्मन्त्रैर्जाबालोपनिषद्गतैः ॥
सप्तभिर्धूलनं कार्यं भस्मना सजलेन च ॥ १८ ॥

अग्निरित्यादिभिरिति । "अग्निरिति भस्म । वायुरिति भस्म । जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वꣳ ह वा इदं भस्म । मन एतानि चक्षूंषि भस्मानि" इत्येते च सप्त मन्त्रा यद्यप्यथर्वशिरस्यधीयन्ते तत्र विनियुज्यन्ते तथाऽपि जाबालोपनिषद्यपि विनियोग एतेषामस्तीति जाबालोपनिषद्गतैरित्युक्तम् । श्रूयते हि तत्रापि—" अग्निरित्यादिना भस्म गृहीत्वा निमृज्याङ्गानि संस्पृशेत् " इति ॥ १८ ॥

त्रियायुषेण मन्त्रेण द्विजास्तिर्यक्त्रिपुण्ड्रकम् ॥
धार्यं प्रोक्तं द्विजश्रेष्ठा धार्मिकैर्वेदपारगैः ॥ १९ ॥

भस्मस्नानानन्तरं त्रिपुण्ड्रधारणमाह—त्रियायुषेणेति । स च मन्त्र एवम्—"त्रियायुषं जमदग्नेः कश्यपस्य त्रियायुषम् । अगस्त्यस्य त्रियायुषं यद्देवानां त्रियायुषम् । तन्मे अस्तु त्रियायुषम्" इति । त्रिपुण्ड्रधारणे बृहज्जाबालश्रुतिः । "तथोपरि तिर्यक्त्रिपुण्ड्रं धारयेत्" इति ।

तथा लौगाक्षिः—

"मध्यमानामिकाङ्गुष्ठैर्ललाटे भस्मना कृतः ।
स त्रिपुण्ड्रो भवेच्छस्तो महापातकनाशनः ॥
त्रिपुण्ड्रं धारयेद्यस्तु शिवप्रणतमानसः ।
भूर्भुवः स्वस्त्रयो लोका धृतास्तेन महात्मना ॥
त्रिपुण्ड्रधृद्विप्रवरो यो रुद्राक्षधरः शुचिः ।
स हन्ति रोगदुरितव्याधिदुर्भिक्षतस्करान् ॥
स प्राप्नोति परं ब्रह्म यस्मान्नाऽऽवर्तते पुनः ।
स पङ्क्तिपावनः श्राद्धे पूज्यो विप्रैः सुरैरपि ॥
श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ।
धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जयति मानवः" ॥ इति ।

भविष्यत्पुराणे—

"शिवाग्निकार्यं यः कृत्वा कुर्यात्त्रियायुषाऽऽत्मवित् ।
मुच्यते सर्वपापैस्तु स्पृष्टेन भवभस्मना ॥
सितेन भस्मना कुर्यात्त्रिसंध्यं यस्त्रिपुण्ड्रकम् ।
सर्वपापविनिर्मुक्तः शिवेन सह मोदते" ॥ इति ।

कूर्मपुराणे—

"सितेन भस्मना कुर्याल्ललाटे तु त्रिपुण्ड्रकम् ।
योऽसावनादिर्भूतादिर्लोकात्मा स धृतो भवेत् ।
उपर्यधोभागयोगात्त्रिपुण्ड्रस्य तु धारणम्" ॥ इति ।

स्कन्दपुराणेऽपि—

"शिरोललाटश्रुतिकण्ठबाहुरोमाभियुक्तानि षडङ्गुलानि ।
स्थानेषु चैतेषु चतुर्ष्वपीह नक्षत्ररूपाणि सितानि विद्धि ॥
त्रियायुषं जमदग्नेरिति कुर्यात्त्रिपुण्ड्रकम् ॥

---

१ ग. ङ. च. छ. ज. °णे जाबा° । २ घ. °नाऽङ्गिनः । ३ ङ. च. °व्यपुरा° । ४ घ. °र्ध्वललाटे तु त्रिपु° । ५ ख. ग. घ. युक्तेषु ।

अथर्वसूत्रमन्त्रेण कुर्यात्तत्पुरुषेण वा ।
वर्तुलेन भवेद्व्याधिर्दीर्घेणैव तपःक्षयः ॥
नेत्रयुग्मप्रमाणेन त्रिपुण्ड्रं धारयेद्बुधः" ॥ इति ।

शिवपुराणे—

अकृत्वा भस्मना स्नानं न जपेद्वै षडक्षरम् ।
त्रिपुण्ड्रं च लिखित्वा तु विधिना भस्मना जपेत् ।
अन्त्यजो वाऽधमो वाऽपि मूर्खो वा पतितोऽपि वा ॥
यस्मिन्देशे वसेन्नित्यं भूतिशासनसंयुतः ।
तस्मिन्सदाशिवः सोमः सर्वभूतगणावृतः ॥
सर्वतीर्थैश्च तीर्थज्ञैः सांनिध्यं कुरुते सदा ।
सर्वाङ्गोद्धूलनं चैव न तु कल्पं त्रिपुण्ड्रकैः ॥
त्रिपुण्ड्रसहितो विप्रः पूज्यः सर्वैः सुरासुरैः ।
यस्मिन्देशे शिवज्ञानी भूतिशासनसंयुतः ॥
गतो यदृच्छया वाऽपि तस्मिंस्तीर्थाः समागताः ।
बहुनाऽत्र किमुक्तेन संपूज्याः शिवयोगिनः ॥
लिङ्गार्चनं सदा कार्यं जप्यो मन्त्रः षडक्षरः" ॥ इति ॥ १९ ॥

मेधावीत्यादिना वाऽपि ब्रह्मचारी दिने दिने ।
भस्मना सजलेनैव धारयेच्च त्रिपुण्ड्रकम् ॥ २० ॥
त्र्यम्बकेण मन्त्रेण प्रणवेन शिवेन वा ।
गृहस्थश्च वनस्थश्च धारयेच्च त्रिपुण्ड्रकम् ॥ २१ ॥
ओंकारेण निरुक्तेन सहंसेन त्रिपुण्ड्रकम् ।
धारयेद्भिक्षुको नित्यमिति जाबालिकी श्रुतिः ॥ २२ ॥
ललाटे चैव दोर्द्वंद्वे[1] तथैवोरसि बुद्धिमान् ।
त्रिपुण्ड्रं धारयेन्नित्यं भुक्तिमुक्तिफलप्रदम् ॥ २३ ॥
वर्णानामाश्रमाणां च मन्त्रतोऽमन्त्रतोऽपि च ।
त्रिपुण्ड्रोद्धूलनं प्रोक्तं जाबालैरादरेण च ॥ २४ ॥

१ ख. दोर्दण्डे ।

उद्धूलनं त्रिपुण्ड्रं च ज्ञानाङ्गत्वेन सादरम् ।
आमनन्ति मुनिश्रेष्ठाः श्वेताश्वतरशाखिनः ॥ २५ ॥

आश्रमभेदेन विकल्पितान्मन्त्रभेदानाह—मेधावीत्यादिनेति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

अयमत्याश्रमो धर्मो यैः समाचरितो मुदा ।
तेषामेव शिवज्ञानं संसारच्छेदकारणम् ॥ २६ ॥

श्वेताश्वतरशाखिन आमनन्तीत्युक्तं ते यदामनन्ति तदाह—अयमत्याश्रम इति ॥ २६ ॥

उद्धूलनं त्रिपुण्ड्रं च मायापाशनिवृत्तये ।
आमनन्ति मुनिश्रेष्ठा अथर्वशिरसि स्थिताः ॥ २७ ॥

श्रुत्यन्तरेऽपि संवादमाह—उद्धूलनमिति ॥ २७ ॥

तथाऽपि मायाविच्छेदो ज्ञानादेव तु केवलात् ।
अज्ञानस्य तु विज्ञानं बाधकं खलु नेतरत् ॥ २८ ॥

पाशनिवृत्तये चेदामनन्ति तर्हि ज्ञानाङ्गत्वेनाऽऽमनद्भिः सह विरोध इत्यत आह—तथाऽपीति । तत्र हेतुमाह—ज्ञानादेवेति । केवलादिति । न भस्मस्नानसहितादित्यर्थः । तत्रोपपत्तिमाह— अज्ञानस्येति । " तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय " इति श्रुत्या मायानिवृत्तिरूपेऽमृतत्वे ज्ञानातिरिक्तसाधननिरासादित्यर्थः ॥ २८ ॥

व्रतं पाशुपतं येन सम्यगाचरितं बुधाः ।
तस्य ज्ञानं विजायेत तेन पाशविमोचनम् ॥ २९ ॥

तर्हि व्रतवैयर्थ्यमित्यत आह— व्रतं पाशुपतमिति । व्रतक्षपितकल्मषस्यैवोपनिषज्ज्ञानान्मायापाशस्य निवृत्तिरिति व्रतात्तन्निवृत्तिरित्युच्यते । एवं हि श्रूयते " व्रतमेतत्पाशुपतं पशुपाशविमोक्षाय " इति । अथर्वशिरसि साक्षान्मायापाशनिवृत्तिहेतुत्वेन श्रुतमपि व्रतमौपनिषदज्ञानद्वारेणैव न साक्षादितिन्यायादुक्तम् ॥ २९ ॥

---

१ ख. °सारोच्छे° । २ ख. ग. घ. ङ. च. छ. ज. °त्वेन मन्वद्भिः । ३ म. °त पशुपा° । ४ ख. ग. घ. च छ. ज. °षज्ज्ञान° ।

उद्धूलनं त्रिपुण्ड्रं च ज्ञानाङ्गत्वेन केवलम् ।
आमनन्ति मुनिश्रेष्ठाः साक्षात्कैवल्यशाखिनः ॥ ३० ॥

न केवलं न्यायात्प्रत्यक्षश्रुतावप्येवमाम्नायत इत्याह—साक्षात्कैवल्यशाखिन इति ॥ ३० ॥

अतोऽपि पाशविच्छेदलाभाय ज्ञानसिद्धये ।
उद्धूलनं त्रिपुण्ड्रं च मुमुक्षुः सम्यगाचरेत् ॥ ३१ ॥

ज्ञानद्वारेण साधनतामुक्तामुपसंहरति—अतोऽपीति । अस्मिन्परम्परासाधनत्वेऽपीत्यर्थः ॥ ३१ ॥

अग्न्यादिभ्यः परा भूतिस्तया तिर्यक्त्रिपुण्ड्रकम् ।
धूलनं चाऽऽचरेदेव मुमुक्षुर्ज्ञानसिद्धये ॥ ३२ ॥

उद्धूलनत्रिपुण्ड्रयोरुक्ते ज्ञानसाधनत्व उपपत्तिमाह—अग्न्यादिभ्य इति । अग्न्यम्बुपृथिवीलक्षणात्तत्त्वज्ञानसाधनाद्भूतत्रयादुत्पन्ना भूतिः । अतस्तया कृतमुद्धूलनं त्रिपुण्ड्रं च ज्ञानसाधनमित्यर्थः । भूतत्रयस्य च ज्ञानसाधनतोक्ता छन्दोगोपनिषदि—"अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ" इति ॥ ३२ ॥

भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
प्रमादादपि मोक्षार्थी न त्यजेदिति हि श्रुतिः ॥ ३३ ॥

उद्धूलनत्रिपुण्ड्रयोः कैवल्यसिद्धये कर्तव्यतोक्ता । अकरणे तदसिद्धिमाह—भस्मनोद्धूलनमिति । मुमुक्षोस्त्यागनिषेधादेव त्याग इष्यमाणमुक्तेरसिद्धिर्ज्ञायते । इत आरभ्याध्यायशेषेण भस्मोद्धूलनस्य त्रिपुण्ड्रधारणस्य च करणे याः सिद्धय उक्ता अकरणे च प्रत्यवायास्तत्सर्वं प्रपञ्चितं कालाग्निरुद्रोपनिषदि । अतः सा सर्ववोदाहियते—"अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छाधीहि भगवंस्त्रिपुण्ड्रविधिं[2] तत्त्वं किं द्रव्यं कियत्स्थानं कति प्रमाणं का रेखाः के मन्त्राः का शक्तिः किं दैवतं कः कर्ता किं फलमिति । तं होवाच भगवान्यद्द्रव्यं तदाग्नेयं[3] भस्म सद्योजातादिपञ्चब्रह्ममन्त्रैः परिगृह्याग्निरिति भस्मेत्यनेन[4] मन्त्रेणाभिमन्त्र्य मा नस्तोक इति समुद्धृत्य[5] जलेन संसिच्य त्रिया-

१ घ. 'मुक्तश्चोप' । २ ग. °धिं किं त° । ३ ङ. च. छ. ज. °ग्नेयमग्नेयं । ४ छ. °त्यभि° । ५ घ. ङ. °नेन चाभि° । ६ ख. ग. घ च. छ. °त्य त्रि° ।

युषामिति शिरोललाटवक्षस्कन्धेष्विति त्रिभिस्त्रियायुषैस्त्रियम्बकैस्तिर्यक्त्रिलो रेखाः प्रकुर्वीत व्रतमेतच्छांभवं सर्वेषु वेदेषु वेदवादिभिरुक्तं तत्समाचरेन्मुमुक्षुरपुनर्भवाय । अथ सनत्कुमारः प्रमाणमस्य त्रिधा चाऽऽ ललाटादा चक्षुषश्चाऽऽ भ्रुवोर्मध्यतो याऽस्य प्रथमा रेखा गार्हपत्यश्चाकारो रजो भूर्लोकश्चाऽऽत्मा क्रियाशक्तिर्ऋग्वेदः प्रातःसवनं महेश्वरो देवतेति । याऽस्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्त्वमन्तरिक्षमन्तरात्मेच्छाशक्तिर्यजुर्वेदो माध्यंदिनं सवनं सदाशिवो देवतेति । याऽस्य तृतीया रेखा साऽऽहवनीयो मकारस्तमो द्यौः परमात्मा ज्ञानशक्तिः सामवेदः सायंदिनं सवनं महादेवो देवतेति । यस्त्रिपुण्ड्रं भस्मना करोति यो विद्वान्ब्रह्मचारी गृही वानप्रस्थो यतिर्वा स समस्तमहापातकोपपातकेभ्यः पूतो भवति स सर्वेषु तीर्थेषु स्नातो भवति स संततं सर्वरुद्रजापी भवति स सर्वान्वेदानधीतो भवति स सकलभोगभुग्देहं त्यक्त्वा शिवसायुज्यमेति न स पुनरावर्तते न स पुनरावर्तत इत्याह भगवान्कालाग्निरुद्रः । यस्त्वेतदधीते सोऽप्येवमेव भवतीत्यों सत्यमित्युपनिषत् " इति ॥ ३३ ॥

भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
महापापविनाशाय विधत्ते वैदिकी श्रुतिः ॥ ३४ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
रक्षार्थं सर्वजन्तूनां विधत्ते वैदिकी श्रुतिः ॥ ३५ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
मङ्गलार्थं च सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ३६ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
पवित्रार्थं च सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ३७ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
माहेश्वराणां लिङ्गार्थं विधत्ते वैदिकी श्रुतिः ॥ ३८ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
लिङ्गार्थं चैव सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ३९ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

---

१ छ. °षैरिति इदम्ब° । २ ख. घ. ङ. °श्चाऽऽत्मकि° । ३ ग. घ. च. छ. ज. °वता याऽ° ।

भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
स्नानत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ४० ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
व्रतत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ४१ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
दानत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ४२ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
तपस्त्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ४३ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
यज्ञत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः ॥ ४४ ॥
भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
सर्वधर्मतया पुंसां विधत्ते वैदिकी श्रुतिः× ॥ ४५ ॥
शिवेन विष्णुना चैव ब्रह्मणा वह्निना तथा ।
देवताभिर्धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ॥ ४६ ॥
उमादेव्या च लक्ष्म्या च वाचा चान्याभिरास्तिकाः ।
सर्वस्त्रीभिर्धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ॥ ४७ ॥
यक्षराक्षसगन्धर्वसिद्धविद्याधरादिभिः ।
मुनिभिश्च धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ॥ ४८ ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरपि च संकरैः ।
अपभ्रंशैर्धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ॥ ४९ ॥
उद्धूलनं त्रिपुण्ड्रं च यैः समाचरितं मुदा ।
त एव शिष्टा विद्वांसो नेतरे मुनिपुंगवाः ॥ ५० ॥
॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

× एतदग्रे ह्युपुस्तके, "भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् । मोक्षधर्मतया पुंसां विधत्ते वैदिकी श्रुतिः" इत्यधिकं दृश्यते ।

उद्धूलनं त्रिपुण्ड्रं च श्रद्धया नाऽऽचरन्ति ये ॥
तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः ॥ ५१ ॥
उद्धूलनं त्रिपुण्ड्रं च श्रद्धया नाऽऽचरन्ति ये ॥
तेषां नास्ति शिवज्ञानं कल्पकोटिशतैरपि ॥ ५२ ॥
उद्धूलनं त्रिपुण्ड्रं च श्रद्धया नाऽऽचरन्ति ये ॥
तेषां नास्ति समाचारो वर्णाश्रमसमन्वितः ॥ ५३ ॥
उद्धूलनं त्रिपुण्ड्रं च श्रद्धया नाऽऽचरन्ति ये ॥
ते महापातकैर्युक्ता इति शास्त्रस्य निर्णयः ॥ ५४ ॥
उद्धूलनं त्रिपुण्डं च श्रद्धया नाऽऽचरन्ति ये ।
तैः समाचरितं सर्वं विपरीतफलाय हि ॥ ५५ ॥
महापातकयुक्तानां जन्तूनां पूर्वजन्मसु ।
त्रिपुण्ड्रोद्धूलनद्वेषो जायते सुदृढं बुधाः ॥ ५६ ॥
त्रिपुण्ड्रोद्धूलने श्रद्धा येषां नैवोपजायते ।
उपपातकदोषेण दुष्टास्ते नात्र संशयः ॥ ५७ ॥
त्रिपुण्ड्रोद्धूलनादौ च दर्शने श्रवणेऽपि च ।
वाञ्छा न जायते येषां ते महापापसंयुताः ॥ ५८ ॥
येषां क्रोधो भवेद्भस्मधारणे तत्प्रमाणके ।
ते महापातकैर्युक्ता इति मे निश्चिता मतिः ॥ ५९ ॥
भस्मधारणमाहात्म्यं मया वक्तुं न शक्यते ।
गुरुणा चापि मे विप्राः कल्पकोटिशतैरपि ॥ ६० ॥
ब्रह्मणा विष्णुना चापि रुद्रेणापि मुनीश्वराः ।
भस्मधारणमाहात्म्यं न शक्यं परिभाषितुम् ॥ ६१ ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

अहो मोहस्य माहात्म्यं मुनीन्द्रा ब्रह्मवादिनः ॥
ये नरा भस्म संत्यज्य कुर्वन्त्यन्यत्समीहितम् ॥ ६२ ॥
अतिरहस्यमिदं मुनिपुंगवाः
कथितमेव समस्तजगद्धितम् ॥
यदि समाचरितं मनुजैर्मुदा
सफलमेव हि जन्म न संशयः ॥ ६३ ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
भस्मधारणवैभवं नाम त्रिंशोऽध्यायः ॥ ३० ॥

॥ ६२ ॥ ६३ ॥

इति श्रीस्कन्दपुराणे सूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे भस्मधारणवैभवं नाम त्रिंशोऽध्यायः ॥ ३० ॥

अथैकत्रिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि शिवप्रीतिकरं मुदा ॥
श्रद्धया सह विप्रेन्द्राः शृणुतातीव शोभनम् ॥ १ ॥

भस्मोद्धूलनत्रिपुण्ड्रधारणवद्यदन्यच्छिवप्रीतिकरं तद्वक्तुं प्रतिजानीते— अथात इति ॥ १ ॥

जीवब्रह्मैक्यविज्ञानं विशुद्धं वेदसंभवम् ॥
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ २ ॥

जीवब्रह्मेति । तद्धि शिवपूजाभेदानां मध्य उत्तमा निराधारा पूजेति पूर्वमुक्तम् । निगदव्याख्यानमन्यत् ॥ २ ॥

सर्वं ब्रह्मेति विज्ञानं यत्तद्वेदान्तवाक्यजम् ॥
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ ३ ॥

१ ग. घ. ङ. च. छ. अतो ।

साम्बमूर्तिधरस्यास्य शिवस्य ध्यानमास्तिकाः ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ ४ ॥
नृत्यमानस्य देवस्य ध्यानं यत्तद्द्विजोत्तमाः ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ ५ ॥
शिवशंकररुद्रादिशब्दाभ्यासश्च सादरम् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरः सदा ॥ ६ ॥
शिवभक्तिश्च विप्रेन्द्रा गुरुभक्तिस्तथैव च ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरी सदा ॥ ७ ॥
श्रुतिस्मृतिपुराणेषु विश्वासो यः स आस्तिकाः ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरः सदा ॥ ८ ॥
अध्यापनं चाध्ययनं वेदवेदान्तयोरपि ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ ९ ॥
वेदवेदान्तवाक्यानां तात्पर्यस्य निरूपणम् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १० ॥
त्रिपुण्ड्रोद्धूलनाचारो जाबालोक्तेन वर्त्मना ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरः सदा ॥ ११ ॥
कण्ठे शिरसि वा हस्ते रुद्राक्षाणां च धारणम् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १२
लिङ्गे शिवार्चनं नित्यं वेदोक्तेनैव वर्त्मना ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १३ ॥
वाराणस्यादिके स्थाने यात्राकरणमादरात् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १४ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥
॥ १४ ॥

शान्तिदान्त्यादिसंपत्तिर्मुमुक्षुत्वं मुनीश्वराः ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १५ ॥
नित्यानित्यार्थविज्ञानं वैराग्यं सुदृढं तथा ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १६ ॥
यज्ञदानतपःकर्मनिष्ठा चाऽऽश्रमरक्षणम् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १७ ॥
स्वजातिविहिताचारस्तथाऽन्याचारवर्जनम् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १८ ॥
निषिद्धकर्मणां त्यागो दुर्वृत्तानामुपेक्षणम् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ १९ ॥
दया सर्वेषु भूतेषु मार्गदूषणवर्जनम् ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरं सदा ॥ २० ॥
द्विजानामपि शुश्रूषा ज्ञानिनां च विशेषतः ।
देवदेवस्य विप्रेन्द्रा महाप्रीतिकरी सदा ॥ २१ ॥
शिवज्ञानैकनिष्ठस्य गुरोः शुश्रूषणं सदा ।
शिवप्रीतिकराणां तु विशिष्टं नात्र संशयः ॥ २२ ॥
पुरा काचित्कुलालस्त्री बभूवातीव सुन्दरी ।
सा सहस्रत्रयं दृत्वा विप्राणामर्थवाञ्छया ॥ २३ ॥
महाधनवती भूत्वा मायया परिमोहिता ।
यथेष्टं भूतले विप्राश्चचार परिगर्विता ॥ २४ ॥
कश्चिद्विज्ञानसंपन्नो महायोगी सुनिश्चलः ।
श्रीमद्दक्षिणकैलासं शिवस्थानोत्तमोत्तमम् ॥ २५ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥
॥ २४ ॥ २५ ॥

वर्तितुं श्रद्धयाऽगच्छद्विदित्वा देशवैभवम् ।
तं दृष्ट्वा सा स्वभोगार्थं प्रणिपत्य तपस्विनम् ॥ २६ ॥
परिगृह्यातिसंतुष्टा गृहे स्वीये विचक्षणा ।
स्नाप्य वस्त्रादिकं दत्त्वा भोजयित्वाऽनुमोदितः(ता) ॥ २७ ॥
चन्दनाद्यैरलंकृत्य दत्त्वा ताम्बूलपूर्वकम् ।
समाश्वास्य महात्मानं प्रियं भुक्तवती द्विजाः ॥ २८ ॥
सोऽपि विज्ञानसंपन्नो महायोगी निराकुलः ।
अतीव प्रीतिमापन्नस्तया सह मुनीश्वराः ॥ २९ ॥
श्रीमद्दक्षिणकैलासे शिवस्थानोत्तमोत्तमे ।
अवर्तत[1] चिरं कालमतीव प्रीतिसंयुतः ॥ ३० ॥
देवदेवो महाप्रीतस्तया शुश्रूषया द्विजाः ।
तस्यै परमकैवल्यं ददौ विज्ञानपूर्वकम् ॥ ३१ ॥
बहवो ज्ञाननिष्ठस्य शुश्रूषाबलतो द्विजाः ।
शिवप्रीतिमवाप्याऽऽशु विमुक्ता भवबन्धनात् ॥ ३२ ॥
अत उक्तेषु सर्वेषु शुश्रूषा शिवयोगिनः ।
शिवप्रीतिकरी साक्षादिति वेदार्थसंग्रहः ॥ ३३ ॥
अतः शिवप्रीतिकरं विचार्य द्विजोत्तमा वेदविदां वरिष्ठाः ।
मदुक्तमार्गेण शिवप्रियेण सदाशिवप्रीतिकरं कुरुध्वम् ॥ ३४ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
जीवब्रह्मैक्यनिरूपणं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

इति श्रीसूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे जीवब्रह्मैक्यनिरूपणं
नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

---

१ ग. ङ. आवर्तत ।

अथ द्वात्रिंशोऽध्यायः ।

सूत उवाच—

अथ वक्ष्ये महादेवश्रद्धाभावस्य कारणम् ।
मनुष्याणां मुनिश्रेष्ठाः शृणुत श्रद्धया सह ॥ १ ॥

श्रद्धाविरोधिनस्तदभावस्य कारणं ज्ञेयतया ज्ञातव्यमिति तद्वक्तुं प्रतिजानीते—अथ वक्ष्य इति ॥ १ ॥

पुरा कालविपाकेन प्राणिकर्मवशेन च ।
पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुः ॥ २ ॥

श्रेयोर्थिनामपि पुरुषाणां सकलश्रेयोहेतुभूतायाः श्रद्धाया अभावे गौतमशापः कारणमिति वक्तुमितिहासमारभते—पुरा कालेति ॥ २ ॥

अनावृष्ट्या द्विजा भूमिर्दुर्भिक्षाऽभवदास्तिकाः ।
क्षुत्पीडा च महातीव्रा विजाता सर्वदेहिनाम् ॥ ३ ॥
मनुष्याश्वासमाचारा अभवन्नन्नवाञ्छया ।
हत्वा केचिन्मनुष्यांश्च भुक्तवन्तो विमोहिताः ॥ ४ ॥
हत्वा केचित्पशून्मोहादजान्केचन मोहिताः ।
तुरंगांश्च गजान्केचिद्भुक्तवन्तो यथाबलम् ॥ ५ ॥
ब्राह्मणाः केचिदालोड्य विशिष्टा मुनिसत्तमाः ।
गौतमस्याऽऽश्रमं पुण्यं ययुः सर्वे महत्तरम् ॥ ६ ॥
गौतमस्य तपोयोगात्प्रसादाच्छंकरस्य च ।
आश्रमस्तस्य विप्रेन्द्राः सुभिक्षस्त्वभवद्भृशम् ॥ ७ ॥
ते संभूय मुनिश्रेष्ठं गौतमं प्रणिपत्य च ।
प्रोचुः क्लेशेन संयुक्ता द्विजाः कारुणिकं प्रति ॥ ८ ॥
वयं क्षुत्पीडिताः सर्वे भगवन्भववल्लभ ।
केवलं कृपयैवास्मान्रक्ष रक्ष हिते रत ॥ ९ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

१ ख. °क्षोभ वि° ।

इति विज्ञापितः श्रीमान्महाकारुणिकोत्तमः ।
गौतमः सर्वविप्राणामभयं दत्तवान्प्रभुः ॥ १० ॥
पुत्रभार्यादियुक्तानां विप्राणां गौतमो मुनिः ।
ददौ धान्यं धनं वस्त्रं तिलं तैलं च गामपि ॥ ११ ॥
अन्यानि यानि जन्तूनामिष्टानि सकलानि तु ।
तानि तेषां मुनिः श्रीमान्ददौ कारुणिकोत्तमः ॥ १२ ॥
आधिव्याध्यस्त्रशस्त्रादिपीडाश्च विविधा द्विजाः ।
निवारिता मुनीन्द्रेण गौतमेन द्विजन्मनाम् ॥ १३ ॥
श्रौतस्मार्तसमाचारा उपदिष्टा द्विजन्मनाम् ।
गौतमेन मुनीन्द्रेण मुनीन्द्राः करुणाबलात् ॥ १४ ॥
एवं चिरगते काले गौतमस्य महात्मनः ।
तपसा केवलं भूमिः सुभिक्षाऽभवदास्तिकाः ॥ १५ ॥
ब्राह्मणैश्च पुनः सर्वैर्गौतमेन सुरक्षितैः ।
विचार्य कार्यं संभूय स्वदेशगमनाय वै ॥ १६ ॥
गौर्हता गौतमेनेति निर्घृणैः पुरुषाधमैः ।
कृतो मिथ्याभिशापस्तु महामोहवशेन तु ॥ १७ ॥
तज्ज्ञात्वा मुनिभिः श्रीमान्गौतमो मुनिसत्तमः ।
महाक्रोधेन संयुक्तः शशाप ब्राह्मणाधमान् ॥ १८ ॥

गौतम उवाच—

महादेवस्वरूपे च महादेवस्य विग्रहे ।
महादेवस्य भक्तौ च महादेवस्य नाम्नि च ॥ १९ ॥
महादेवस्य विज्ञाने महादेवपरिग्रहे ।
महादेवस्य च स्थाने महादेवस्य कीर्तिषु ॥ २० ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

१ ङ. द्विजन्मना । २ ग घ. °वमहादेवम° ।

महादेवाय दाने च महादेवाश्रयेषु च ।
महादेवस्य चोत्कर्षे त्रिपुण्ड्रोद्धूलनादिषु ॥ २१ ॥
रुद्राक्षधारणे रुद्रलिङ्गस्यैव तु पूजने ।
रुद्रालयदिदृक्षायां रुद्रयात्रादिकर्मसु ॥ २२ ॥
यद्यत्तु रुद्रसंबन्धि तत्र तत्रापि दुर्जनाः ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ २३ ॥
नित्यकर्माद्यनुष्ठाने तथा काम्यविवर्जने ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ २४ ॥
शान्तिदान्त्यादिविज्ञानसाधनेषु द्विजाधमाः ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ २५ ॥
स्वाध्याये च जपे चैव तथा प्रवचनेऽपि च ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ २६ ॥
नानाविधेषु दानेषु यज्ञेषु विविधेषु च ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ २७ ॥
कृच्छ्रचान्द्रायणादौ च तथा मासोपवासके ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ २८ ॥
वेदभक्तौ तथाऽऽस्तिक्ये योगाङ्गेषु यमादिषु ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ २९ ॥
श्रुतिस्मृतिपुराणोक्तेष्वर्थेषु सकलेषु च ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ ३० ॥
स्वदारगमने चैव परदारविवर्जने ।
भवतानुन्मुखा यूयं सर्वदा ब्राह्मणाधमाः ॥ ३१ ॥
विष्ण्वादिदेवताः सर्वा विशिष्टाः शंकरादिति ।
भ्रान्तिविज्ञानसंपन्ना भवत ब्राह्मणाधमाः ॥ ३२ ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥
॥ ३० ॥ ३१ ॥ ३२ ॥

शङ्खचक्रगदापद्मदण्डपाशाङ्कुशादिभिः ।
अङ्किताः श्रद्धया यूयं भवत ब्राह्मणाधमाः ॥ ३३ ॥
विहीनजातिनाम्ना तु रूपेण च तथैव च ।
अङ्किताः श्रद्धया यूयं भवत ब्राह्मणाधमाः ॥ ३४ ॥
चर्तुलाश्वत्थपत्रार्धचन्द्रदीपादिलिङ्गिनः ।
भवत श्रद्धया सार्धं ललाटे ब्राह्मणाधमाः ॥ ३५ ॥
पितृमातृसुतभ्रातृभार्याविक्रयिणः सदा ।
बन्धुविक्रयिणस्तद्वद्भवत ब्राह्मणाधमाः ॥ ३६ ॥
वेदविक्रयिणस्तद्वत्तीर्थविक्रयिणस्तथा ।
धर्मविक्रयिणस्तद्वद्भवत ब्राह्मणाधमाः ॥ ३७ ॥
सुराविक्रयिणस्तद्वन्मांसविक्रयिणस्तथा ।
मत्स्यविक्रयिणस्तद्वद्भवत ब्राह्मणाधमाः ॥ ३८ ॥
पाञ्चरात्रे च कापाले तथा कालामुखेऽपि च ।
शाक्ते (क्ये) च दीक्षिता यूयं भवत ब्राह्मणाधमाः ॥ ३९ ॥
बौद्धे चार्हन्मते चैव तथा पाशुपतेऽपि च ।
शांभवे दीक्षिता यूयं भवत ब्राह्मणाधमाः ॥ ४० ॥
पाषण्डेषु तथाऽन्येषु मार्गेष्वश्रौतकेषु च ।
श्रद्धया दीक्षिता यूयं भवत ब्राह्मणाधमाः ॥ ४१ ॥
युष्माकं वंशजाताश्च सर्वे स्त्रीभिः सह द्विजाः ।
मदुक्तार्थप्रकारेण भवन्तु ब्राह्मणाधमाः ॥ ४२ ॥
बहुनोक्तेन किं साक्षाच्छिवे संसारमोचके ।
तत्संबन्धिषु सर्वेषु श्रुतिस्मृत्यादिकेषु च ॥ ४३ ॥
युष्माकं वंशजातानां युष्माकं च तथैव च ।
श्रद्धाभावः सदैवास्तु शापस्तीव्रः कृतो मया ॥ ४४ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥
॥ ४२ ॥ ४३ ॥ ४४ ॥

१ ख. भवेयुर्वा ।

सूत उवाच—

एवं मुनीन्द्रेण कृते च शापे
द्विजाधमाश्चापि तदाज्ञयैव ।
तथाऽभवंस्तत्कुलजाश्च सर्वे
स्वभावजो ह्येष मुनेः प्रभावः ॥ ४५ ॥
श्रद्धाभावस्तेन जातो नराणां
साक्षाद्रुद्रे तस्य धर्मे च विप्राः ।
तस्माद्विद्वांस्तद्विनाशाय साक्षा-
द्रुद्रं नित्यं पूजयेच्छ्रद्धयैव ॥ ४६ ॥
त्रिपुण्ड्रोद्धूलनमास्तिकोत्तमाः
समाचरेन्नित्यमतन्द्रितस्तथा ।
विशेषतः शांकरवेदने रतो
भवेदशेषं कथितं मयाऽनघाः ॥ ४७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे भक्त्यभावकारणनिरूपणं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

अथ त्रयस्त्रिंशोऽध्यायः ।

सूत उवाच—

अथ नामानि वक्ष्यामि परतत्त्वस्य सुव्रताः ।
यानि संकीर्तयन्मर्त्यो विमुक्तिफलभाग्भवेत् ॥ १ ॥

अथ श्रद्धावतोऽपि विवेकज्ञानहेतुश्रवणाद्यधिकारविरहे किं कर्तव्यमित्याशङ्क्य तस्य परतत्त्वनामकीर्तनादेव श्रवणाधिकारविवेकज्ञानमज्ञाननिवृत्तिरूपा मुक्तिश्च सिध्येदित्यभिप्रेत्य तानि नामानि वक्तुं प्रतिजानीते—अथ नामानीति ॥ १ ॥

शिवो रुद्रो महादेवः शंकरो ब्रह्म सत्परम् ।
शंभुरीशान ईशश्च शूली चन्द्रकलाधरः ॥ २ ॥
शर्वः पशुपतिः साक्षी हरः श्रीकण्ठ= अद्भुतः ।
उग्रः कपर्दी गिरिशो भवः सर्वज्ञ ईश्वरः ॥ ३ ॥

तान्यनुक्रामति—शिवो रुद्र इति । ब्रह्म सत्परमिति । " सदेव सोम्येदमग्र आसीत् " " ब्रह्मविदाप्नोति परम् " इत्यादिश्रुतिप्रसिद्धेरित्यर्थः ॥ २ ॥ ३ ॥

उमापतिः कपर्दी च भूतेशस्त्रिपुरान्तकः ।
अन्तकारिस्त्रिनेत्रश्च दक्षयज्ञविनाशकः ॥ ४ ॥
धूर्जटिर्वामदेवश्च स्थाणुः सर्वविनाशकः ।
स्रष्टा च पालकश्चैव ततस्तत्पुरुषः प्रभुः ॥ ५ ॥
वामदेवः कपाली च सद्योजातः समः सुखी ।
अघोरश्च सुघोरश्च प्रशान्तः पापनाशकः[२] ॥ ६ ॥

अन्तकारिरिति । मनुजपशुपक्षिमृगादेः संहर्ता वैवस्वतोऽन्तकस्तस्यापि संहर्ता परमेश्वरः । श्रूयते हि—" यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः " इति ॥ ४ ॥ ५ ॥ ६ ॥

भवारिर्भोगदः पुण्यः कामध्वंसी कपिञ्जरः ।
व्योमकेशो विशालाक्षो वह्निरेता वरप्रदः ॥ ७ ॥
भीमो भर्गः पिनाकी च वृषाङ्कः कालकूटधृक् ।
कृत्तिवासाः किरातश्च भिक्षुको मूलकारणम् ॥ ८ ॥

कपिञ्जर इति । कं शिरस्तत्र पिङ्गलवर्णाभिर्जटाभिर्युक्त इत्यर्थः । यास्क-

= आर्षत्वादुत्वाभावे यत्वे यलोपे च सिद्धम् ।

१ ख. °कारी त्रिन° । २ घ. पाशनाशकः ।

स्त्वाह—" कपिञ्जरः कपिवरवैत्कीर्णः । ईषत्पिञ्जरो वा कमनीयशब्दं पिञ्जरयतीति च " इति ॥ ७ ॥ ८ ॥

अहिर्बुध्न्यो विरूपाक्षो विरूपो विश्ववेषधृक् ।
शिपिविष्टो महादेवो गणेशः पार्वतीपतिः ॥ ९ ॥
मृडो मेरुधरो मेधा महामायी महेश्वरः ।
सर्वाधिष्ठानमाधारः सर्वाधिकरणः स्वराट् ॥ १० ॥
सर्वेश्वरः सर्वनिधिः सर्वात्मा सर्वसाधकः ।
सेतुः सीमा समुद्रश्च विशिष्टश्च विधारकः ॥ ११ ॥

अहिर्बुध्न्य इति । अहि गतौ " अंहति गच्छतीत्यहिः । बुध्नमन्तरिक्षं तत्र भवो बुध्न्यः । यदाह यास्कः—" अहिरयनादेत्यन्तरिक्षं योऽहिः स बुध्न्यो बुध्नमन्तरिक्षं तन्निवासात् " इति । शिपिविष्ट इति । शिपयो रश्मयस्तैराविष्टः शिपिविष्टः । ' शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति ' इति यास्कः ॥ ९ ॥ १० ॥ ११ ॥

जन्मादिकारणं हेतुः शास्त्रयोनिः सुखासनः ।
तत्समो वाऽधिकोऽसङ्ग आत्मा चामलसाधनम् ॥ १२ ॥

जन्मादिकारणमिति । जायतेऽस्ति वर्धते विपरिणमत इत्यादिभावविकारषट्कस्य कारणमित्यर्थः । शास्त्रयोनिरिति । प्रवृत्तिनिवृत्तिप्रतिपादकं विधिनिषेधात्मकं वेदवाक्यं शास्त्रं तस्य योनिः कारणम् । यद्वा प्रत्यगात्मनः परशिवस्वरूपप्रतिपादकमुपनिषद्वाक्यं शास्त्रं तद्योनिर्ज्ञप्तिकारणमस्येति शास्त्रयोनिः । अत एव भगवान्बादरायणोऽपि सूत्रयामास—" शास्त्रयोनित्वात् " इति । तत्सम इति । तस्य प्रसिद्धस्य परमेश्वरस्य सदृशोऽपि परमेश्वरः स्वयमेव नान्यो विद्यते । श्रूयते हि—" न तत्समश्चाभ्यधिकश्च दृश्यते " इति । तथाच परशिवस्योपमानान्तरनिरासाय तस्यैवोपमानोपमेयभावे सति तत्सम इति नाम संपन्नम् ॥ १२ ॥

पुराणः पुरुषः पूर्णोऽनन्तरूपः पुरातनः ।
सत्यं ज्ञानं सुखं साक्षादाकाशः प्राण आस्तिकाः ॥ १३ ॥

---

१ घ. कपिर° । छ. कपेवरिवरित्की° । २ ख. °पिरिव कीर्णः । ३ ङ. च. °वरिकीर्णः । ४ °र्वधारकः । ५ ग. ङ. °राणपु° ।

ज्योतिष्प्रकाशः प्रथितः स्वयंभानः स्वयंप्रभुः ।
स्वप्रकाशः स्वतन्त्रश्च स्वस्थः स्वानुभवोऽगमः ॥ १४ ॥

आकाश इति । आ समन्तात्काशते स्वरूपप्रकाशतद्रूपतया सर्वाधिष्ठानत्वेन स्फुरतीत्याकाशः परशिवः । " आकाशो वै नाम नामरूपयोर्निर्वहिता " " आकाश इति होवाच " इत्यादिश्रुतिष्वप्याकाशशब्दः परशिवप्रतिपादक इति बादरायणेन निरणायि " आकाशस्तल्लिङ्गात् " इत्यादिना । प्राण इति । प्रकर्षेण चेष्टते नित्यं वर्तत इति प्राणः । " आनीदवातं स्वधया तदेकम् " । " प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्स्व " इति श्रुतिः ॥ १३ ॥ १४ ॥

अत्ता चानशनः शङ्कुः परमात्मा परात्परः ।
देवदेवश्च देवश्च जगन्नाथो निरञ्जनः ॥ १५ ॥

अत्ता चानशन इति । ' यस्य ब्रह्म च ' इति प्रागुदाहृतश्रुतेः । ब्रह्मक्षत्रादिसकलजगत्संहर्तृत्वमेवात्तृत्वम् । तथाच वैयासिकं सूत्रम्—" अत्ता चराचरग्रहणात् " इति । " अनश्नन्नन्यो अभिचाकशीति " इतिश्रुतेरनशनः ॥ १५ ॥

निर्भयो निर्गुणो नित्यो नित्यानन्दो निरामयः ।
विदो विदार्धिर्वेदान्तो देवता परदेवता ॥ १६ ॥
पतिः पाशहरः पारः पारशून्यः प्रजापतिः ।
धाता धारयिता धृष्टो धाम धामविवर्जितः ॥ १७ ॥
भुवनेशः सभानाथः सभापतिरतिप्रभुः ।
सभ्यः स्तुत्यः समस्तात्मा साम्बः संसारवर्जितः ॥ १८ ॥
संसारवैद्यः सत्यार्थः सारः संसारभेषजम् ।
संसारमोचको मोच्यो मुक्तो मूलधनं मुनिः ॥ १९ ॥
महर्षिश्च महाग्रासो महात्मा मधुरः सुरः ।
सुरज्येष्ठो विरूपाक्षो विश्वरूपो विनायकः ॥ २० ॥
विश्वाधिकश्च वेद्यश्च वेदार्थो विगतस्पृहः ।
अहमर्थोऽप्रमेयश्च तत्त्वं निर्वाणमुत्तमम् ॥ २१ ॥

१ ख. कथितः ।

विदो विदाधिरिति । वेत्तीति विदः । इगुपधलक्षणः कप्रत्ययः । विज्ञानमतिशयात्सर्वगोचरमाधीयतेऽस्मिन्निति विदाधिः । " कर्मण्याधिकरणे च " इति किप्रत्ययः । तथाच पातञ्जलं सूत्रम्—"तत्र निरतिशयं सर्वज्ञबीजम् " इति ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

कैवल्यं पदमव्यक्तं कालकालश्च कोमलः ।
अन्तर्यामी समाहारः सोमः सौख्यं सुहृत्सुधा ॥ २२ ॥
अदृश्यो दृश्यनेता च नेत्रं दृष्टिश्च दर्शनम् ।
दृग्दृष्टिः पवमानश्च वशी वैश्वानरो नरः ॥ २३ ॥

कालोत्पादकत्वं चान्यत्र स्पष्टमाम्नायते—"सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि" इति । समाहार इति । समाहियन्ते संक्षिप्यन्त उपहियन्तेऽस्मिन्निति समाहारः । "यत्प्रयन्त्यभिसंविशन्ति" इति श्रुतेः ॥ २२ ॥ २३ ॥

मूलाचार्यो मुकुन्देशो मूलमायतनं महान् ।
दहरो दिव्य अद्वैतमनाख्यं वस्तु वास्तवम् ॥ २४ ॥

दहर इति । उपलब्धिस्थानस्य दहराकाशस्याल्पपरिमाणत्वात्तदवच्छिन्नत्वेनोपलभ्यमानः शिवोऽपि दहरः । श्रूयते हि—" अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् " इति ॥ २४ ॥

भूमा भोजयिता भोक्ता रुचिर्भस्मानुभूः रसः ।
हकारो हुं फडग्रस्तो हार्दो हृत्पावनोऽवधिः ॥ २५ ॥

भूमेति । "भूमा त्वेव विजिज्ञासितव्यो भूमानं भगवो विजिज्ञासे" इति वाक्यस्य "भूमा संप्रसादादध्युपदेशात्" इति बादरायणेन ब्रह्मपरतया निर्णीतत्वाद्भूमेति परशिवस्य मुख्यं नाम । अनुभूः । अनुभवज्ञानात्मक इत्यर्थः । श्रुतिश्च—"अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्" इति । रस इति । निरतिशयानन्दरूपतया सर्वैरास्वादनीय इत्यर्थः । श्रूयते हि—"रसो वै सः" "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" । हकार इति । भुवनेश्वर्यजपाप्रासादादिषु मन्त्रेषु हकारस्य प्रथमाक्षरत्वादाचार्यैरपि " प्रकृतिः सा हसंज्ञा भवेद्बुद्ध्याप्य विश्वम्" इति जगन्मूलकारणस्य हकारवाच्यत्वाभिधानाद्धकारः परशिवस्य नाम । हुं फडिति । हुंशब्दस्तेजोवाची " हुं तेजस्तेजसा देहो गृह्यते कवचं ततः"

१ ग. °त्सुधीः ॥ २२ ॥ । २ ख. ग. °तमाना° ।

इत्याचार्यैरुक्तत्वात् । अतस्तेजोरूपत्वात्परशिवो हुंकारवाच्यः । मन्त्रानुष्ठानप्रतिबन्धकभौमान्तरिक्षरक्षःपिशाचादिनिवारकमाग्नेयं तेजः फट्शब्दार्थः । उक्तं ह्याचार्यैः—

" ताभ्यामनिष्टमाक्षिप्य चालयेत्फट्पदाग्निना " इति ।

तादृग्विधतेजोमयस्य परशिवस्य फडिति नाम । हार्द इति । हृदये वर्तमानो हार्दः " हृदि ह्येष आत्मा " इति श्रुतेः । अवधिरिति । निरधिष्ठानभ्रमस्य निरवधिकबाधस्य चानुपपत्तेः । " अथात आदेशो नेति नेति नेह नानाऽस्ति किंचन " इत्यादिना बाध्यमानस्याऽऽरोपितसकलप्रपञ्चस्य बाधावधित्वेन परमार्थस्य परशिवस्यावस्थानात्तस्यावधिरिति व्यपदेशः ॥ २५ ॥

रूढ्यैवैतानि नामान्यनिशमतितरामादितत्त्वे महेशे
वर्तन्ते नैव नारायणहरिमुरजिद्वासुदेवादिशब्दाः ।
योगादस्मिन्कथंचित्परममुनिवरा वासुदेवादिशब्दा-
स्तस्मात्पूर्वोक्तनामान्यमलमतिरवश्यं सदा कीर्तयेच्च ॥२६॥

रूढ्यैवैतानीति । अवयवप्रसिद्धिनैरपेक्ष्येण समुदायप्रसिद्ध्यैवैतानि नामानि परशिवे वर्तन्ते । अवयवव्युत्पत्तिसापेक्षत्वे नामोच्चारणसमनन्तरं तद्व्युत्पत्त्यनुसंधानव्याजेन विलम्बिता प्रतीतिः स्यात् । रूढौ तु नायं दोषः । अत एवोच्यते—" अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी " इति । यद्येवं महादेवः कपर्दी वामदेवो विरूपाक्ष इत्यादीनि नामानि पुनरुच्यन्ते तेषामानर्थक्यं स्यात् । भवेदेवं यदि केवला रूढिरश्वकर्णादिशब्दवदाश्रीयेत । अत्र तु पङ्कजादिवद्योगरूढिर्विवक्षिता । अतोऽवयवव्युत्पत्तेरपि विवक्षितत्वान्नानात्वप्रतिपादनेन प्रागुक्तदोषः परिहर्तुं शक्यते । तथाहि महच्छब्दस्य तावत्पूजितवचनत्वमधिकपरिमाणवाचित्वं चोभयं प्रसिद्धम् । तथाच पूजितो देवो महादेव इत्येकत्रार्थः । अन्यत्र तु सर्वव्यापी देवो महादेव इति । तथा—" भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने " इति स्मरणात्कपर्दशब्दादेकत्र प्रशंसार्थ इत्यपरत्र नित्ययोग इत्यपौनरुक्त्यम् । तथा वामो वननीयो देवो वामदेव इत्येकत्रार्थः । श्रूयते चैतरेयके—'तं देवा अब्रुवन्नयं वै नः सर्वेषां वामयति तस्माद्वामदेवः' इति । अपरत्र तु वामेन भागेन दीव्यतीत्यर्धनारीश्वरप्रतिपादको वामदेवशब्दः । विपुलं ललाटमक्षि यस्येति विरूपाक्ष इत्येकत्र व्युत्पत्तिः । अपरत्र तु विशिष्टरूपाण्यक्षाणीन्द्रियाणि यस्येति । ऐन्द्रियकदेहस्येश्वरोपाधेर्विशुद्ध-

१ ज. ण. °ति । वैन्द्रवदे° । ग. छ. °ति । वैन्द्रवदे° । ङ. °ति । वैद्रयदे° । घ. ति । वैद्रवदे° । च. °ति । चैन्द्रवदे° ।

सत्त्वपरिणामात्मकत्वादित्येषां दिक् । योगादिति । विष्णुमूर्तौ रू
नारायणादिशब्दा रुद्रमूर्तौ महता प्रयासेनावयवव्युत्पत्तिबलादेव
र्तन्त इति विलम्बितप्रतीतिजनकत्वाच्छिवरुद्रादिशब्दवच्च मुख्याः ॥

शिवादिशब्दं परिवर्ज्य मर्त्या
वदन्ति नारायणविष्णुपूर्वम् ।
मुनीश्वरा नास्ति विमुक्तिरेषां
विभूतिरेव क्रमशो विमुक्तिः ॥ २७ ॥

विभूतिरेवेति । ऐश्वर्यमेवेत्यर्थः ॥ २७ ॥

सद्य एव परमं पदं ययुः
सद्य एव सकलं सुखं ययुः ॥
मुख्यशब्दपरिकीर्तनेन ते
सत्यमेव पठितं मयैव तु ॥ २८ ॥
नामानि सर्वाणि च कल्पितानि
स्वमायया नित्यसुखात्मरूपे ।
तथाऽपि मुख्यास्तु शिवादिशब्दा
भवन्ति संकल्पनया शिवस्य ॥ २९ ॥
मुख्यशब्दजपतो मुनीश्वराः
सत्यमेव परमेश्वरो भवेत् ।
तस्य वक्त्रकमले सदाशिवो
नृत्यति स्म परमेशया सह ॥ ३० ॥
पापवह्निपरिदह्यमानसो
देवरुद्रशिवशंकरादिषु ।
क्रोधमेति मुनयस्त्वहो नरः
कीटपूर्वजनिरेव तस्य हि ॥ ३१ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

बहुप्रलापेन किमास्तिकोत्तमाः
शिवादिनामानि परात्परस्य तु ।
अधोक्षजादेस्तु विशेषतः स्वतो
भवन्ति नामानि परस्य चाऽऽज्ञया ॥ ३२ ॥
अतो महादेवशिवादिशब्दं
द्विजो मुदा नित्यमतन्द्रितो[1] यः ।
विहाय नारायणपूर्वशब्दं
जपेदशेषाशुभनाशनाय ॥ ३३ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां यज्ञवैभवखण्डे पर-
तत्त्वनामविचारो नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

॥ ३२ ॥ ३३ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां परतत्त्वनामविचारो
नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

अथ चतुस्त्रिंशोऽध्यायः ।

सूत उवाच--

अथातः संप्रवक्ष्यामि संप्रदायसमन्वयम् ।
महादेवप्रसादस्य कारणं झटिति द्विजाः ॥ १ ॥
सत्यास्तेयदयापूर्वैः सर्वधर्मैः समन्वितः ।
कामक्रोधमहालोभपैशुन्यादिविवर्जितः ॥ २ ॥
आचार्यं सत्यसंपन्नं साक्षात्कारुणिकोत्तमम् ।
अभिगम्य महात्मानं प्रणम्य भुवि दण्डवत् ॥ ३ ॥

प्रागुक्तशिवस्वरूपसाक्षात्कारस्य परमपुरुषार्थत्वेन गुरूपसदनव्यतिरेकेणा-
संभवात्तत्प्रकारं वक्तुं प्रतिजानीते—अथात इति ॥ १ ॥ २ ॥ ३ ॥

---

१ ख. ग. घ. 'न्द्रितश्च ॥ वि° ।

चन्दनागरुकर्पूरप्रमुखैः पूज्य देशिकम् ।
त्रिसहस्रं सहस्रं वा द्विसहस्रमथापि वा ॥ ४ ॥
उत्तमं काञ्चनं दत्त्वा यथाशक्ति धनं तु वा ।
बहुशो दण्डवद्भूमौ प्रणम्य श्रद्धया सह ॥ ५ ॥
तस्य पादाम्बुजं मूर्ध्नि निधाय परयोगिणः ।
अधीहि भगवो ब्रह्मेत्येवं विज्ञापयेत्सुधीः ॥ ६ ॥
सोऽपि कारुणिकः श्रीमान्गुरुः सर्वार्थवित्तमः ।
सुसमे सुप्रदेशे तु निर्जने निर्भये शुभे ॥ ७ ॥
गोमयेनोपलिप्ते तु पुष्पैरभ्यर्चिते तथा ।
पूर्णकुम्भैश्च संयुक्ते दीपैर्दिक्षु समन्विते ॥ ८ ॥
वितानतोरणैर्युक्ते धूपदीपादिवासिते ।
अपक्वैस्तण्डुलैः शुद्धैः शुद्धैर्वा शालितण्डुलैः ॥ ९ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

विलिख्य मण्डलं साक्षाद्गुरूक्तेनैव वर्त्मना ।
एतन्मन्त्रेण संपूज्य कुसुमैश्चन्दनादिभिः ॥ १० ॥
पारम्पर्यक्रमं बुद्ध्या संचिन्त्य श्रद्धया सह ।
स्थापयित्वा गुरुः शिष्यं मण्डलस्य तु मध्यमे ॥ ११ ॥
कृताञ्जलिपुटं पूर्णप्रकाशनिकरात्मके ।
शिवानन्दे समासीनमेवं भावनया युतम् ॥ १२ ॥

विलिख्य मण्डलमिति । अधिकारानुरूपेण कुण्डमण्डपादिनिरपेक्षा चाक्षुषी दीक्षा प्रागुक्ता । अधुना तु तत्सापेक्षा क्रियावती दीक्षा प्रतिपाद्यते । अतो मण्डपादिकं निर्माय तत्र दीक्षामण्डलं सर्वतोभद्रादिकं विलिखेदित्यर्थः । गुरूक्तेनेति । आचार्यैः प्रपञ्चसारादिषूक्तमार्गेण । " ततो मण्डपमध्ये तु स्थण्डिलं गोमयाम्बुना " इत्यादिनेत्यर्थः ॥ १० ॥ ११ ॥ १२ ॥

देशिकः स्वात्मनाऽऽत्मानमवलोक्य सुनिश्चलः ।
शिष्यं चाऽऽत्मतया साक्षाद्दृढं संचिन्त्य साक्षिणः ॥ १३ ॥
स्वात्मनोऽन्यतया भातं स्वात्ममात्रतया स्वयम् ।
चिन्तयेन्निश्चलो मन्त्रं जपित्वा पूर्वमेव तु ।
ग्रन्थिच्छेदं पुनः कुर्याद्गुरूक्तेनैव वर्त्मना ॥ १४ ॥

स्वात्मनाऽऽत्मानमिति । स्वात्मभावेन परमात्मानं साक्षात्कृत्येत्यर्थः । साक्षिण इति । साक्षिरूपेणावस्थितात्स्वात्मनोऽन्यत्वेनावगतं शिष्यं स्वात्ममात्रत्वेन गुरुश्चिन्तयेत् । उभयत्रानुगतस्य साक्षिचैतन्यस्यैकत्वादित्यर्थः । ग्रन्थिच्छेदमिति । उक्तं ह्यागमिकैर्निर्वाणदीक्षामधिकृत्य—

" सूत्रं मूलेन बध्नीयान्मुमुक्षोस्तु शिखाग्रके ।
तत्सूत्रं दक्षिणे भागे पादाङ्गुष्ठान्तमानयेत् ॥
भुमुक्षोर्विपरीतेन नारीणां वामभागके ।
मलाद्यन्तस्थपाशस्य निवृत्तिस्थानगस्य च ।
गुल्फान्तं वाञ्छितस्यास्य कुर्यात्पाशस्य च्छेदनम् " इति ।

ईदृग्विधेन गुरूपदिष्टमार्गेण षट्त्रिंशत्तत्त्वात्मकस्य पाशस्य यो ग्रन्थिस्तस्य च्छेदनं कुर्यादित्यर्थः ॥ १३ ॥ १४ ॥

कृते कारुणिकेनैवमाचार्येण द्विजोत्तमाः ॥ १५ ॥
महादेवो महानन्दो महाकारुणिकोत्तमः ।
स्वात्मभूतां परां शक्तिं प्रेरयत्येव सुव्रताः ॥ १६ ॥
प्रसन्ना सा महादेवी महाकारुणिकोत्तमा ।
शिष्यस्याऽऽत्मनि चिद्रूपे स्वयं पतति निर्मला ॥ १७ ॥
शक्तिपाते तु संजाते शिष्यस्याऽऽत्मनि संस्थिता ।
माया दग्धा भवेत्किंचिन्नात्र संदेहकारणम् ॥ १८ ॥
सर्वसाधनसंयुक्तः साक्षादास्तिक्यसंयुतः ।
महादेवस्य भक्तश्चेच्छिष्यः सद्गुरुभक्तिमान् ॥ १९ ॥

स्वात्मभूतां परामिति । सच्चिदानन्दरूपस्य स्वप्रतिष्ठस्य परशिवस्वरूपस्यैव

१ ख. ध. ङ. च. छ. ज. साक्षिणा । २ ङ. च. ज. शिवायाः । ३ ग. °न्दस्वरू° । ४ छ. °तिष्ठितस्य ।

शक्त्यप्रतियोगिकमायापरिणामरूपजगदङ्कुरात्मकशक्त्याकारानुप्रवेशेन शक्तित्वात्परा शक्तिः परशिवस्वरूपान्न व्यतिरिक्तेत्यर्थः । तदेतदुक्तं प्राक्—

" चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः ।
अनुप्रविष्टा या संविन्निर्विकल्पा स्वयंप्रभा ॥
सदाकारा परानन्दा संसारोच्छेदकारिणी ।
सा शिवा परमा देवी शिवाभिन्ना शिवंकरी " इति ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

तस्य शिष्यस्य विप्रेन्द्राः कर्मसाम्ये सति द्विजाः ।
शांभवी शक्तिरत्यर्थं तस्मिन्पतति चिद्घने ॥ २० ॥

कर्मसाम्ये सतीति । परमेश्वरानुग्रहवशाद्दीक्षासंस्कारेण भाविजन्मापादककर्मक्षयाद्वर्तमानजन्मनि च सुखदुःखहेतुभूतयोः पुण्यपापयोरुपभोगेन क्षीणत्वादारब्धफलयोः संचितवर्तमानकर्मणोः । तदुक्तम्—

" जन्तोरपाश्चिमतनोः सति कर्मसाम्ये
निःशेषपाशपटलाच्छिदुरा निमेषात् ।
कल्याणदेशिककटाक्षसमाश्रयेण
कारुण्यतो भवति शांभववेधदीक्षा " इति ॥

आगमिका अप्याहुः—

" अधर्मधर्मयोः साम्ये जाते शक्तिः पतत्यसौ ।
ज्ञानात्मिका परा शक्तिः शंभोर्यस्मिन्निपातिता " इति ॥ २० ॥

तदा शिष्यस्य चिद्रूपे कल्पिता मोहरूपिणी ।
माया दग्धा भवेत्किंचित्तदा पतति विग्रहः ॥ २१ ॥
शिष्यस्य देहे विप्रेन्द्रा धरण्यां पतिते सति ।
प्रसादः शांकरस्तस्य द्विजाः संजात एव हि ॥ २२ ॥
यस्य प्रसादः संजातो देहपातावसानकः ।
कृतार्थ एव विप्रेन्द्रा न स भूयोऽभिजायते ॥ २३ ॥
तस्य प्रसादयुक्तस्य विद्या वेदान्तवाक्यजा ।
देहत्यविद्यामखिलां तमः सूर्योदयो यथा ॥ २४ ॥

---

१ ङ. °पापप° । २ ङ. दहेद्वि° । ३ ग. घ. ङ. च. छ. सूर्योदये ।

शक्तिपातविहीनोऽपि सत्यवाग्गुरुभक्तिमान् ।
आचार्याच्छ्रुतवेदान्तः क्रमान्मुच्येत बन्धनात् ॥ २५ ॥
शक्तिपातेन संयुक्ता विद्या वेदान्तवाक्यजा ।
यदा यस्य तदा तस्य विमुक्तिर्नात्र संशयः ॥ २६ ॥

मोहरूपिणीति । शिष्यस्य चिद्रूपे स्वात्मनि चिच्छक्तितिरोधायिका हेयोपादेयविवेकज्ञानमावृण्वती मोहात्मिका या मायाऽऽश्रिता सा सच्चिद्रूपिण्याः शिष्यस्य स्वात्मन्यभिव्यक्तायाः परशक्तेः प्रसादेन किंचिदपसरतीत्यर्थः । तदा पतति विग्रह इति । मायासंबन्धनिबन्धनो ह्यात्मनः कर्तृत्वभोक्तृत्वादिसंबन्धस्तथाविधस्याऽऽत्मनः स्वोपभोक्तव्यसुखदुःखहेतुभूतपुण्यपापात्मककर्मनिबन्धनो भोगायतनभूतदेहेन संबन्धस्तथा च शक्तिपातेन मायाया अपसरणादात्मनः कर्तृत्वभोक्तृत्वादिसंबन्धशैथिल्ये पुण्यपापनिमित्तस्य देहसंबन्धस्यापि गलितत्वात्तदभिमानाभावेन तत्पात इत्यर्थः । तदुक्तमागमे——

"देहपातस्तथा कम्पः परमानन्दहर्षणे ।
स्वेदो रोमाञ्च इत्येतच्छक्तिपातस्य लक्षणम्" इति ।

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

शक्तिपातप्रकारस्य[1] रहस्यांशश्च कश्चन ।
मया नोक्तो रहस्यत्वादाज्ञाभङ्गभयादपि ॥ २७ ॥
प्रसादकामी विप्रेन्द्राः प्रसन्नो गुरुभक्तिमान् ।
दिने दिने गुरोः पूजां कुर्यादर्थादिभिर्नरः ॥ २८ ॥
संप्रदायसमन्वयमुत्तमं गुह्यमेतदिदं कथितं मया ।
शंकरेण पुरा कथितं गुरोः शंकरः खलु सर्वहिते रतः ॥ २९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे महादेवप्रसादकारणकथनं नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

रहस्यांशश्च कश्चनेति । अयमत्र रहस्यांशः—परमेश्वरस्वरूपभूतेन सर्वगतायाः संविद्रूपिण्याः परशक्तेः[2] पतनासंभवाच्छिष्यस्याऽऽत्मनि प्रागेवावस्थिता सा पाशजालावृतत्वेन तिरोहिता सती पश्चाद्दीक्षासंस्कारेणाऽऽवरणापनये सत्य-

१ ङ. काशस्य । २ छ. °ताया श्चिद्रू' ।

भिव्यक्तिमासादयन्ती पतितेत्युपचर्यते । ऊर्ध्वदेशादधोदेशप्राप्तिर्हि पतनं न खलु तादृशमस्याः संभवतीति । आगमेऽप्युक्तम्—

"व्यापिनी परमा शक्तिः पतितेत्युच्यते कथम् ।
ऊर्ध्वादधोगतिः पातो मूर्तस्यासर्वगस्य च ॥
सत्यं सा व्यापिनी नित्या सहजा शिववत्स्थिता ।
किं त्वियं मलकर्मादिपाशबन्धेषु संवृता ॥
पक्वपाकेषु सुव्यक्ता पतितेत्युपचर्यते" इति ॥ २७ ॥ २८ ॥ २९ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे
महादेवप्रसादकारणकथनं नाम चतुस्त्रिंशोऽध्यायः ॥३४॥

अथ पञ्चत्रिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि संप्रदायपरम्पराम् ।
यज्ज्ञानेन द्विजश्रेष्ठो गुरुर्भवति सुव्रताः ॥ १ ॥
यः शिवः सर्वभूतानामीश्वरः स्वत एव तु ।
ईशानः सर्वविद्यानां स एवाऽऽदिगुरुर्बुधाः ॥ २ ॥
तस्य शिष्यो महाविष्णुः सर्वज्ञानमहोदधिः ।
तस्मादाप्तपरिज्ञानो ब्रह्मा सर्वजगत्प्रभुः ॥ ३ ॥
सनत्कुमारो भगवान्ब्रह्मणा श्रुतवेदनः ।
सनत्कुमारात्सर्वज्ञात्कृष्णद्वैपायनो मुनिः ॥ ४ ॥
अवाप्ताखिलविज्ञानस्तस्मादेव श्रुतं मया ।
मत्तो लब्धपरिज्ञाना यूयं सत्यपरायणाः ॥ ५ ॥

गुरूपसत्तिवद्गुरुपरम्पराज्ञानमपि विद्याहेतुरिति तद्वक्तुं प्रतिजानीते—अथात इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

---

१ ग. °न्द्गुरु ॥ २ ॥

एवं बुद्ध्वा मुनिश्रेष्ठाः संप्रदायपरम्पराम् ।
तत्तन्नाम्ना नमस्कृत्य श्रद्धया देशिकानिमान् ॥ ६ ॥
पूर्वोक्तेनैव मार्गेण कुर्यादज्ञाननाशनम् ।
आचार्याच्छ्रुतवेदान्तः सत्यवाग्गुरुभक्तिमान् ॥ ७ ॥
॥ ६ ॥ ७ ॥

यो विद्यासंततिज्ञानविहीनो देशिको भवेत् ।
स घोरं याति नरकं नास्ति संदेहकारणम् ॥ ८ ॥
यो विद्यासंततिज्ञानविहीनो देशिको भवेत् ।
स नभोभक्षणेनैव क्षुद्व्याधिं[2] विनिवर्तयेत् ॥ ९ ॥
यो विद्यासंततिज्ञानविहीनो देशिको भवेत् ।
स विनैव तिलांस्तैलं लभते सिकतासु च ॥ १० ॥
यो विद्यासंततिज्ञानसहितो देशिको भवेत् ।
सोऽनायासेन संसारान्नृणामुत्तारको भवेत् ॥ ११ ॥
स्वगोत्रपिं नमस्कृत्य गुरूक्तेनैव वर्त्मना ।
स्वगुरुं च नमस्कृत्य श्रद्धया च गुरोर्गुरुम् ॥ १२ ॥
विघ्नेशं षण्मुखं चापि शिवां विद्यास्वरूपिणीम् ।
अन्यांश्च सकलान्देवान्ब्रह्मविष्णुपुरोगमान्[3] ॥ १३ ॥
पुनः शिष्यस्य मेधावी चित्तपाकं परीक्ष्य च ।
अविद्यापाशविच्छेदं कुर्यात्प्राज्ञस्तु देशिकः ॥ १४ ॥

गुरुपरम्पराऽवश्यं ज्ञातव्येत्यमुमर्थं व्यतिरेकमुखेन द्रढयति—यो विद्यासंततिज्ञानविहीन इति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

विदित्वा शिष्यचित्तस्य विपाकं पुनरास्तिकाः ।
दद्यात्पाकानुरूपेण विद्यामेतां महेश्वरीम् ॥ १५ ॥
मूर्खशिष्योपदेशेन विद्यागर्वेण सुव्रताः ।
गुरुद्रोहेण सर्वज्ञोऽप्यन्धकूपे पतत्यधः ॥ १६ ॥

---

१ घ. क्षुधादिं । २ क. ङ. विनिवर्तते । ३ छ. °ह्मरुद्रपु° ।

दद्यात्पाकानुरूपेणेति । शिष्यस्य चित्तं बुद्ध्वा परीक्ष्य तद्गतमलकर्मादिपाशजालपाकानुसारेण विद्यामुपदिशेदित्यर्थः । उक्तं हि तत्त्वप्रकाशे—

"परिपक्वमला ये तानुत्सादनहेतुशक्तिपातेन ।
योजयति परे तत्त्वे स दीक्षयाऽऽचार्यमूर्तिस्थः" इति ॥ १५ ॥ १६ ॥

तस्मात्संवत्सरं शिष्यं परीक्ष्याक्त्रिमं पुनः ।
प्रदद्याद्वैदिकीं विद्यां गुरुर्विद्याभिवृद्धये ॥ १७ ॥
विद्यासंततिविज्ञानं शिष्यचित्तपरीक्षणम् ।
अवश्यंभावि विप्रेन्द्रा देशिकस्येश्वराज्ञया ॥ १८ ॥
संप्रदायविहीना या विद्या वेदान्तपारगाः ।
साऽविद्या नैव विद्या स्यादिति तत्त्वविदां स्थितिः ॥ १९ ॥
पारम्पर्यपरिज्ञानं पराविद्याप्रवर्तकम् ।
पारम्पर्यविबोधेन विद्या सा वीर्यवत्तरा ॥ २० ॥

तस्मात्संवत्सरमिति । "भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ नासंवत्सरवासिने प्रब्रूयात्" इति हि श्रुतिः ॥ १७ ॥ १८ ॥ १९ ॥ ॥ २० ॥

पारम्पर्यपरिज्ञानादेव पाशनिकृन्तनम् ।
तस्मात्प्राज्ञः स्वविद्यायाः संततिज्ञानवान्भवेत् ॥ २१ ॥
यथा गोत्रपरिज्ञानं विवाहस्योपकारकम् ।
पारम्पर्यपरिज्ञानं तथा ज्ञानोपकारकम् ॥ २२ ॥

अतः स्वगुरुपरम्पराज्ञानस्य विद्याहेतुत्वेन श्रुत्यादिप्रतिपादितत्वात्तत्तत्स्वकीयगुरुपरम्पराज्ञानमवश्यमेष्टव्यमित्युपसंहरति—तस्मात्प्राज्ञ इत्यादिना ॥ २१ ॥ ॥ २२ ॥

विद्यासंततयो विप्रा बहुरूपाः श्रुतौ श्रुताः ।
तत्तत्संततिविज्ञानं विद्यासिद्धेस्तु कारणम् ॥ २३ ॥

बहुरूपाः श्रुतौ श्रुता इति । बृहदारण्यकादिश्रुतिषु "अथ वंशः पौतिमाषि" इत्यारभ्य "ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः" इत्यन्तेन बहुधा गुरुपरम्परा समाम्नातेत्यर्थः ॥ २३ ॥

१ क. °ने प्रब्रूयान्नैवासंवत्सरवासिने प्र° । २ ग. 'रणम् ।

यो गुरुर्भवति यस्य सुव्रताः
सोऽपि तस्य परवेदनाय तु।
स्वस्य देशिकपरम्परामिमां
तस्य भक्तिसहितस्य बोधयेत् ॥ २४ ॥
शक्तिरस्य महती विजृम्भते
यस्य देशिकपरम्परा धृता।
मुक्तिसिद्धिरपि चास्ति सद्गुरोः
शुद्धवंशपरवेदनेन तु ॥ २५ ॥
संतानविज्ञानविहीनदेशिकः
पिशाचपूर्वैरतिपीडितो भवेत्।
संतानविज्ञानवतः सदाशिवः
स्वकं वपुस्तस्य ददाति चित्सुखम् ॥ २६ ॥
शृणुध्वमन्यत्प्रवदामि संतति-
प्रबोधहीनस्य नरस्य बाधनम्।
न मुक्तिसिद्धिर्न च तस्य वेदनं
न देशिकत्वं न सुखित्वमास्तिकाः ॥ २७ ॥
शिष्यस्तु मुक्तिं परवेदनं सुखं
चित्तस्य शुद्धिं न च याति सुव्रताः।
बद्धश्च कष्टश्च विमोहितश्च
भ्रष्टश्च सत्यं परिभाषितं मया ॥ २८ ॥
किमिह बहुभिरुक्तैः संततिज्ञानहीनाः
सकलदुरितराशिं सत्यमुक्तं[2] विशन्ति।
परमपदसमाख्यं ब्रह्मरूपं न यान्ति
स्फुरणसुखमनन्तं संततिज्ञानहीनाः ॥ २९ ॥

१ ङ. °कं पुनस्त° । २ ग. ङ. सत्यमुक्ति ।

इति श्रीसूतसंहितायां चतुर्थे यज्ञवैभवखण्डे संप्रदाय-
परम्पराविचारो नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे संप्रदायप-
रम्पराविचारो नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

अथ षट्त्रिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि सद्योमुक्तिकरं परम् ।
आम्नायान्तैकसंसिद्धं सुकरं सर्वदेहिनाम् ॥ १ ॥
पुरा भगवती देवी भोगमोक्षफलप्रदा ।
पुराणी पूर्णविज्ञानस्वरूपा परमा शिवा ॥ २ ॥

गुरुपरम्पराज्ञानवत्कालहस्त्याख्यक्षेत्रविशेषे व्रतविशेषानुष्ठानमप्यनायासेन मुक्तिहेतुरिति तद्वक्तुं प्रतिजानीते—अथात इति ॥ १ ॥ २ ॥

देवदेवं जगन्नाथं देवेषु च नरेषु च ।
क्रिमिकीटपतंगेषु समं सर्वेषु संस्थितम् ॥ ३ ॥

समं सर्वेषु संस्थितमिति । " तत्सृष्ट्वा तदेवानुप्राविशत्[1] " " एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत " " अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नाम-रूपे व्याकरवाणि" इत्यादिश्रुतेः । देवतिर्यङ्मनुष्यादिषु[2] क्रिमिकीटकादिषु तद्धि चैतन्यरूपेण साम्येनावस्थितमित्यर्थः । यद्वा प्राणरूपेण सर्वजन्तुषु[3] साम्येनावस्थितम् । तथाच बृहदारण्यके समाम्नायते " यद्वै[4] व समः पुरुषो समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण " इति ।

गीतासु च स्मर्यते—

"समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ॥
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः " इति ॥ ३ ॥

---

१ ख. 'तू । स एतमे° । २ ग. 'षु सिद्धिचै° । घ. °षु सइ चै' । ३ ख. म. घ. ङ. साम्येना° । ४ ख. ग. घ. ङ. च. छ. यदेव ।

सत्यविज्ञानसंपूर्णं सुखलक्षणमव्ययम् ।
स्वप्रकाशैकसंसिद्धं स्वविलक्षणवर्जितम् ॥ ४ ॥

स्वविलक्षणवर्जितमिति । स्वस्मात्स्वप्रकाशचिद्रूपाद्विलक्षणो जडप्रपञ्चस्तस्य मायामयत्वेनापरमार्थत्वात्तद्रहितमित्यर्थः ॥ ४ ॥

घृतकाठिन्यवद्विप्राः केवलं कृपयैव तु ।
आविर्भूतमहानन्दताण्डवं करुणालयम् ॥ ५ ॥

अत्र दृष्टान्तो घृतकाठिन्यवदित्यर्थः । यथा घृतस्य काठिन्यमग्निसंयोगाद्विलीनावस्थायां घृतस्वरूपातिरेकेण नोपलभ्यत एवमेवाद्वितीयपराशिवस्वरूपसाक्षात्कारेण तदाश्रितायां मायायां विलापितायां तन्मयस्तत्स्वरूपे परिकल्पितः प्रपञ्चोऽपि तत्रैव लीयत इत्यर्थः ॥ ५ ॥

गुणातीतं गुरुं गुह्यमुपास्यं गुणमूर्तिभिः ।
प्रणम्य दण्डवद्देवी शिवाऽपृच्छदिदं बुधाः ॥ ६ ॥

गुणातीतमिति । प्रकृत्यवयवाः सत्त्वाद्या गुणास्तानतिक्रम्य वर्तमानमित्यर्थः । गुणमूर्तिभिरिति । सृष्टिस्थितिसंहृतिव्यापारा ब्रह्मविष्णुरुद्रा गुणमूर्तय इत्यर्थः ॥ ६ ॥

श्रीदेव्युवाच——

देवदेव जगन्नाथ जगतामार्तिभञ्जन ।
सद्योमुक्तिकरं पुंसां सुकरं ब्रूहि मे शिव ॥ ७ ॥

सूत उवाच——

एवं पृष्टो महादेवो महादेव्या वृषध्वजः ।
हिताय जगतां तस्यै बभाषे तन्महेश्वरः ॥ ८ ॥

महेश्वर उवाच——

साधु साधु महादेवि त्वया पृष्टं जगद्धितम् ।
इतः पूर्वं मया नोक्तं वदामि तव तच्छृणु ॥ ९ ॥

॥ ७ ॥ ८ ॥ ९ ॥

---

१ ख. °व विली° । २ ङ. प्रत्यगव° ।

ब्राह्मणो वाऽन्त्यजो वाऽपि स्त्री पाखण्डोऽथवा बुधः ।
दरिद्रो वा समृद्धो वा मूर्खो वा पण्डितोऽथ वा ॥ १० ॥
समर्थो वाऽसमर्थो वा बालो वा स्थविरोऽपि वा ।
आस्तिको वा महादेवि नास्तिक्येन युतोऽथवा ॥ ११ ॥
भूमौ दक्षिणकैलासे सर्वस्थानवरे शुभे ।
सुवर्णमुखरीतीरे सुस्थिते सर्वसेविते ॥ १२ ॥
त्वया मया च पुत्राभ्यां नन्दिना वृषभेण च ।
मम भक्तैरशेषैश्च ब्रह्मणा विष्णुनाऽपि च ॥ १३ ॥
इन्द्रादिलोकपालैश्च सोमसूर्यादिभिस्तथा ।
देवताभिश्च सर्वाभिर्यक्षराक्षसपूर्वकैः ॥ १४ ॥
सर्वदा सेविते शुद्धे सर्वकामार्थसाधके ।
संवत्सरव्रतं कुर्यात्सद्योमुक्तिकरं तु तत् ॥ १५ ॥
आदित्ये मेषसंयुक्ते चित्रानक्षत्रके नरः ।
सुवर्णमुखरीतोये पवित्रे पापनाशने ॥ १६ ॥
प्रातः स्नात्वा यथाशक्ति धनं दत्त्वा प्रियेण तु ।
श्रीकालहस्तिनाथाख्यं देवि मामादरेण तु ॥ १७ ॥
प्रदक्षिणं यथाशक्ति कृत्वा भूमौ तु दण्डवत् ।
प्रणम्य दृष्ट्वा देवेशि नक्तभोजनमाचरेत् ॥ १८ ॥
आदित्ये वृषभं प्राप्ते विशाखर्क्षे समाहितः ।
सुवर्णमुखरीतोये प्रातः स्नात्वा यथाबलम् ॥ १९ ॥
दत्त्वा प्रदक्षिणं कृत्वा देवं दृष्ट्वाऽभिवन्द्य च ।
समाहितमना भूत्वा नक्तभोजनमाचरेत् ॥ २० ॥
आदित्ये मिथुनं प्राप्ते मूलाख्ये तारके बुधः ।
सुवर्णमुखरीस्नानं कृत्वा प्रातः समाहितः ॥ २१ ॥

१ ग. समर्थो ।

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥
॥ १९ ॥ २० ॥ २१ ॥

प्रदत्त्वा धनमन्यद्वा यथाशक्ति महर्षयः ।
देवं प्रदक्षिणीकृत्य प्रणम्य भुवि दण्डवत् ।
दृष्ट्वा तथैव मां देवि नक्तभोजनमाचरेत् ॥ २२ ॥

प्रदत्त्वेति । छान्दसो ल्यबभावः । यद्वा प्रोपसर्गो व्यस्तनिर्दिष्ट इति समासाभावाल्ल्यपो न प्रसक्तिः । महर्षय इति चतुर्थ्यन्तः पाठः ॥ २२ ॥

आदित्ये कर्कटं प्राप्ते गर्भर्क्षे सुसमाहितः ॥ २३ ॥
सुवर्णमुखरीस्नानं कृत्वा प्रातर्द्विजोत्तमाः ।
दृष्ट्वा तत्रैव मां देवि देवं भक्तिपुरःसरम् ॥ २४ ॥
प्रदक्षिणं यथाशक्ति कृत्वा दृष्ट्वाऽभिवन्द्य च ।
त्यक्त्वाऽहर्भोजनं धीमान्रात्रौ भोजनमाचरेत् ॥ २५ ॥

गर्भर्क्ष इति । गर्भर्क्षं पूर्वाषाढाख्यं नक्षत्रम् । तथा ज्योतिर्विदः—

"पूर्वाषाढागते भानौ जीमूतैः परिवेष्टिते ।
आर्द्रादीनि प्रवर्ष्यन्ते(?) त्येकैकस्य त्रयोदश" इति ।

॥ २३ ॥ २४ ॥ २५ ॥

सिंहराशौ स्थिते सूर्ये वैष्णवे तारके नरः ।
प्रातरेव महानद्यामस्यां स्नात्वा यथाबलम् ॥ २६ ॥
दत्त्वा प्रदक्षिणं कृत्वा स्तुत्वा मामभिवन्द्य च ।
त्यक्त्वाऽहर्भोजनं मर्त्यो रात्रौ भोजनमाचरेत् ॥ २७ ॥

वैष्णवं श्रवणनक्षत्रम् । 'विष्णुर्देवता" इति श्रुतेर्वैष्णवं श्रवणाख्यम् ॥
॥ २६ ॥ २७ ॥

आदित्ये कन्यकायुक्ते तथाऽजैकपदे दिने ।
स्नात्वा चास्यां नरः प्रातर्दत्त्वा विप्राय भोजनम् ॥ २८ ॥
श्रीकालहस्तिनाथाख्यं देवं पूर्वोक्तवर्त्मना ।
दृष्ट्वाऽहर्भोजनं त्यक्त्वा रात्रौ भोजनमाचरेत् ॥ २९ ॥

---

१ ख. °न्तेऽस्यैकै° ।

तुलां प्राप्ते तु मार्तण्डे चाश्विन्यां प्रातरेव च ।
नद्यामस्यां नरः स्नात्वा दत्त्वा विप्राय भोजनम् ॥ ३० ॥
प्रदक्षिणप्रणामादि कृत्वा नक्तं समाचरेत् ।
सूर्ये वृश्चिकसंयुक्ते कृत्तिकायां द्विजर्षभाः ॥ ३१ ॥
पूर्वोक्तेनैव मार्गेण नरः कृत्वा समाहितः ।
त्यक्त्वाऽहर्भोजनं मर्त्यो रात्रौ भोजनमाचरेत् ॥ ३२ ॥

अजैकपद इति । ' अज एकपाद्देवता प्रोष्ठपदा नक्षत्रम् ' इति श्रुतेः पूर्वप्रोष्ठपदाख्यमजैकपदम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

आदित्ये चापसंयुक्ते चान्द्रनक्षत्रके नरः ।
कृत्वा तु पूर्ववद्देवि नक्तभोजनमाचरेत् ॥ ३३ ॥

चान्द्रेति। मृगशीर्षं नक्षत्रम् । 'सोमो देवता' इति श्रुतेश्चान्द्रं मृगशीर्षाख्यम् । पूर्ववदिति । सुवर्णमुखरीस्नानादिकं कृत्वेत्यर्थः ॥ ३३ ॥

सूर्ये मकरसंयुक्ते पुष्यनक्षत्रके नरः ।
पूर्ववत्सकलं कृत्वा नक्तभोजनमाचरेत् ॥ ३४ ॥
माघे मासि मघर्क्षे तु कृत्वा पूर्ववदास्तिकाः ।
त्यक्त्वाऽहर्भोजनं विप्रो नक्तभोजनमाचरेत् ॥ ३५ ॥
मार्तण्डे कुम्भराशिस्थे मघानक्षत्रके नरः ।
पूर्ववत्सकलं कृत्वा नक्तभोजनमाचरेत् ॥ ३६ ॥
आदित्ये मीनराशिस्थे फल्गुन्यां देवि मानवः ।
पूर्ववत्सकलं कृत्वा रात्रौ भोजनमाचरेत् ॥ ३७ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

मासि मासि मनुजः समाचरे-
देवमेव परया मुदा सह ।
देहनाशमवलोक्य तत्क्षणे
ज्ञानमस्य परमं ददाम्यहम् ॥ ३८ ॥

१ घ. °त्क्षणाज्ज्ञान° ।

अत्र द्वादशस्वपि मासेषु तिथिविशेषस्यानुपादानात्पौर्णमासीयोगाभावेऽपि चित्रादितत्तन्नक्षत्रमेव प्राधान्यात्तद्व्रताङ्गत्वेन विवक्षितम् ॥ ३८ ॥

व्रतसमाचरणेन महेश्वरि
ध्रुवमवाप पदं मम मानवः ।
इति समीरितमीश्वरि ते मया
सुकरमेतदशेषजनस्य तु ॥ ३९ ॥
अत्र दत्तमणुमात्रमप्युमे
मेरुतुल्यमिति शास्त्रनिश्चयः ।
नित्यमत्र मनुजस्य वर्तनं
मुक्तिसिद्धिकरमित्यसंशयः ॥ ४० ॥
स्थानमेतदमरेन्द्रवन्दिते
दोषतूलनिकरस्य पावकः ।
भोगहेतुरपि कामिनां नृणां
भागधेयसहितस्य सिध्यति ॥ ४१ ॥
अस्य वैभवमशेषनायिके
नैव वेद परिमोहितो जनः ।
मत्प्रसादमवलम्ब्य केवलं
देवि वेद न च कारणान्तरैः ॥ ४२ ॥
पापराशिसहितोऽपि नास्तिक-
श्चाविवेकसहितोऽपि मानवः ।
कालहस्तिमवलम्ब्य केवलं
देवि याति परमं पदं मम ॥ ४३ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

सद्योमुक्तिकरं परं सकलदं[1] सम्यक्परिज्ञानदं
भक्त्या लभ्यमिदं मयाऽपि हरिणा धात्राऽपि देवैरपि ।

---

१ ग. °रं समस्तफल° । घ. °रं तथा सकल° ।

स्थानं नित्यमतन्द्रितो मतिमतामग्रेसरश्चाऽऽश्रये
त्यक्त्वा सर्वमशङ्कितः परतरा साध्वी श्रुतिश्चाऽऽह हि॥४४॥

परमेश्वरादन्यस्य परित्यागेन तस्यैव मुक्त्युपायत्वेनाऽऽश्रयणे श्रुतिं संवादयति—साध्वीति। सा च "तेन त्यक्तेन भुञ्जीथाः" "ज्ञात्वा देवं मुच्यते सर्वपाशैः" इत्यादिका ॥ ४४ ॥

सूत उवाच—

एवमुक्त्वा महादेव्यै महातापण्डवपण्डितः।
आलिलिङ्गे शिवां शंभुः स्मरन्नैक्यं तयाऽऽत्मनः ॥ ४५ ॥

स्मरन्नैक्यमिति। परशिवस्वरूपस्यैव शक्त्यप्रतियोगिशक्त्यनुप्रवेशेन शक्तित्वादुपाधिकृतं शिवशक्त्योर्भेदं परित्यज्य पारमार्थिकमेकत्वमनुसंदधान इत्यर्थः। प्रागप्युक्तम्—

"न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।
उमाशंकरयोरैक्यं यः पश्यति स पश्यति ॥ ४५ ॥

देवदेवी जगन्माता दयार्द्रहृदयाम्बुजा।
प्रणम्य पूजयामास भवं भवहरं परम् ॥ ४६ ॥
यदुक्तं देवदेवेन देव्यै रहसि तद्द्विजाः।
मयोक्तं परमप्रीत्या युष्माकं ब्रह्मवादिनाम् ॥ ४७ ॥
भवन्तोऽपि परित्यज्य समस्तं परया मुदा।
सद्योमुक्तिकरं स्थानं भजध्वमिदमुत्तमम् ॥ ४८ ॥
सर्वमुक्तं समासेन सादरं मुनिपुंगवाः।
एतदन्यन्मनुष्याणां कालक्षेपस्य कारणम् ॥ ४९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे सद्योमुक्तिकरक्षेत्रमहिमकथनं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे सद्योमुक्तिकरक्षेत्रमहिमकथनं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

अथ सप्तत्रिंशोऽध्यायः।

सूत उवाच--

अथातः संप्रवक्ष्यामि मुनयः शंसितव्रताः।
मुक्त्युपायमयत्नेन मया नोक्तमितः पुरा ॥ १ ॥
पुरा जैमिनिरत्यन्तश्रद्धया सह सुव्रताः।
स्वगुरुं वेदवेदान्तविशारदमनुत्तमम् ॥ २ ॥
तपसा दीप्तसर्वाङ्गं पराशरसुतं प्रभुम्।
प्रणम्य परया प्रीत्या दण्डवत्पृथिवीतले ॥ ३ ॥
निधाय मूर्ध्नि तत्पादपङ्कजं भवभेषजम्।
अपृच्छल्लोकरक्षार्थमतिगुह्यमनुत्तमम् ॥ ४ ॥

जैमिनिरुवाच--

भगवन्सर्वजन्तूनामयत्नेन विमुक्तिदम्।
वद कारुण्यतो नाथ मम मायाविषापहम् ॥ ५ ॥

श्रीकालहस्तिस्थानवद्वृद्धाचलपुरादिस्थानविशेषेष्वनुष्ठितव्रतस्यापि मुक्त्युपायत्वमीश्वरप्रोक्तमिति तद्वक्तुं प्रतिजानीते—अथात इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ॥ ५ ॥

व्यास उवाच--

साधु साधु मुनिश्रेष्ठ त्वया पृष्टं जगद्धितम्।
पुरा पुराणं ब्रह्माणमिदं पृष्टं मयाऽपि च ॥ ६ ॥
ब्रह्मणा च महाविष्णुः पृष्टस्तेनापि शंकरः।
स पुनः शंकरः श्रीमानम्बिकापतिरुत्तमः ॥ ७ ॥
स्वस्वरूपमहानन्दप्रमोदजलधिस्थितः।
विष्णवे लोकरक्षार्थं बभाषे करुणानिधिः ॥ ८ ॥

ब्रह्माणमिदं पृष्टमिति। प्रष्टव्यार्थस्य सामान्यावगतत्वेन माधान्याविवक्षणाद्ब्रह्मणश्चोपदेष्टृत्वेन गुरुत्वात्प्राधान्यं विवक्षितमिति पृच्छेरप्रधाने कर्मणि

निष्ठा । प्रधानकर्मणि त्वनभिहिताधिकारविहिता द्वितीयैव । स्मर्यते हि—

"प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः" इति ॥६॥७॥८॥

ईश्वर उवाच—

स्थाने पृष्टं त्वया विष्णो जगतः पालने रतः ।
वदामि संग्रहेणाहं मुक्त्युपायमयत्नतः ॥ ९ ॥
श्रीमद्व्याघ्रपुरं नाम स्थानमस्ति महीतले ।
सर्वदा परमप्रीत्या यत्र नृत्यं करोम्यहम् ॥ १० ॥
तत्र मामादरेणैव नृत्यमानं दिने दिने ।
दृष्ट्वा पञ्चाक्षरं मन्त्रं सतारं सर्वसिद्धिदम् ॥ ११ ॥
यस्तु द्वादशसाहस्रं जपति श्रद्धया सह ।
तस्य सिद्धा परा मुक्तिर्विना विज्ञानमुत्तमम् ॥ १२ ॥
श्रीमद्दक्षिणकैलासे तथा वृद्धाचलाभिधे ।
तथा गोपर्वते शुद्धे तथा वल्मीकसंज्ञिते ॥ १३ ॥
आधिग्रामसमाख्ये च स्थाने सर्वफलप्रदे ।
सोमनाथे तु गोकर्णे तथा भीमेश्वराभिधे ॥ १४ ॥
वेदारण्ये विशिष्टे तु श्वेतारण्ये तु शोभने ।
हस्तिकाननसंज्ञे च तथा जम्बेश्वराभिधे ॥ १५ ॥
कुम्भकोणे महास्थाने तथा मध्यार्जुनाभिधे ।
वाराणस्यां तु केदारे तथा रामेश्वराभिधे ॥ १६ ॥
हालास्ये[1] च हरे नित्यं दृष्ट्वा मामादरेण च ।
जपित्वा पूर्ववन्मन्त्रं मुच्यते भवबन्धनात् ॥ १७ ॥

स्थाने पृष्टमिति । सतारं सप्रणवमित्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

---

१ ग. हालाख्ये ।

पुरा कश्चिन्महापापी[1] द्विजः पुण्यविवर्जितः ।
महामोहावृतः साक्षान्मातरं तु पतिव्रताम् ॥ १८ ॥

महापातकदूषितस्यापि स्थानविशेषमहिम्ना मुक्तिसिद्धिरितीतिहासमुखेन दर्शयति—पुरा कश्चिदित्यादिना ॥ १८ ॥

गत्वा संवत्सरं हत्वा पितरं वृत्तसंयुतम् ।
निर्घृणो निर्भयो नित्यं चचार वसुधातले ॥ १९ ॥
चरतस्तस्य मूर्खस्य सदा तीव्रभयंकरः ।
मुसलोद्यतपाणिस्तु विभाति ब्रह्मराक्षसः ॥ २० ॥
तं दृष्ट्वा भीतिसंयुक्तः पूर्वपुण्यबलेन तु ।
हालास्याख्यं महास्थानमगमत्पुरुषोत्तम ॥ २१ ॥
अदृष्टस्तत्क्षणादेव तेनैव ब्रह्मराक्षसः ।
सोऽपि विस्मयमापन्नो विचार्य कमलेक्षण ॥ २२ ॥
अहो माहात्म्यमस्यैव स्थानस्यातिभयंकरः ।
अस्मिन्देशे न दृष्टस्तु मया स ब्रह्मराक्षसः ॥ २३ ॥
अतो देहविनाशान्तं मयैवात्रैव वर्तनम् ।
कार्यमित्यभिसंधिं च हरे कृत्वा सुनिश्चलः ॥ २४ ॥
अवर्तत महास्थाने सेवनेनैव तस्य तु ।
समस्तानि च पापानि विनष्टानि जनार्दन ॥ २५ ॥
मत्प्रसादेन विप्रस्य कस्यचिद्वचनं हरे ।
श्रुत्वा दृष्ट्वा तु मां नित्यं हालास्याख्येऽतिशोभने ॥ २६ ॥
जपित्वा पूर्ववन्मन्त्रं षडक्षरसमाह्वयम् ।
अयत्नेन विमुक्तोऽभूत्संसारजलधेस्तु सः ॥ २७ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

---

१ ख. ग. घ. °पी पुण्यलेशवि° ।

अत्र दत्तं महादानं भवेत्स्थाने मम प्रिये ।
हुतमिष्टं तपश्चाल्पमप्यत्र सुमहद्भवेत् ॥ २८ ॥
अतो विशिष्टे मत्स्थाने चात्रैवान्यत्र वा नरः ।
दृष्ट्वा मामादरेणैव जपेन्मन्त्रं षडक्षरम् ॥ २९ ॥
एवमाचरतस्तस्य प्रसादादेव मे हरे ।
मुक्तिसिद्धिरयत्नेन भवत्येव न संशयः ॥ ३० ॥
इतोऽन्यत्सकलं विष्णो नराणां पापकर्मणाम् ।
अशक्यं कर्तुमत्यर्थं तस्मादुक्तं समाचरेत् ॥ ३१ ॥

सूत उवाच—

एवं शिवेनैव समस्तदेहिनां
विमुक्तिसिद्ध्यर्थमयत्नतः पुरा ।
सुभाषितं कारुणिकेन तन्मया
प्रभाषितं वो मुनयः सुसाधनम् ॥ ३२ ॥

इति श्रीसूतसंहितायां चतुर्थे यज्ञवैभवखण्डे मुक्त्युपायविचारो नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

इति श्रीसूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे मुक्त्युपायविचारो नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अथाष्टात्रिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि सर्वसाधनमुत्तमम् ।
शृणुतातिप्रियेणैव द्विजाः सारतरोत्तमम् ॥ १ ॥
पुरा सत्यवतीसूनुः सर्वविज्ञानसागरः ।
सर्ववेदोदधेः पारो गुरुर्मे करुणानिधिः ॥ २ ॥

सर्वलोकोपकाराय साम्बं संसारभेषजम् ।
ध्यायमानो महाभक्त्या तताप परमं तपः ॥ ३ ॥
पुनः पुष्पादिभिर्देवं समाराध्य यथाबलम् ।
षडक्षरेण मन्त्रेण तुष्टाव च महेश्वरम् ॥ ४ ॥

व्याघ्रपुरादिशिवक्षेत्रानुष्ठितव्रतवच्छिवोपदिष्टं भुक्तिमुक्त्योरसाधारणं वक्तुं प्रतिजानीते—अथात इति । सर्वसाधनमिति । ऐहिकामुष्मिकभोगात्मिकायां भुक्तेः परापरमुक्त्योश्चायमसाधारण उपाय इत्यर्थः । सारतरोत्तमामिति । सांख्यादिभिः श्रेयःसाधनतया प्रतिपादितोऽर्थः सारः । तदपेक्षया स्वतःप्रमाणत्वेन निर्दुष्टवेदवाक्यप्रतिपादितानि ज्ञानकर्माणि सारतराणि तेषूत्तममिति पुरुषोत्तमपदवत्सप्तमीसमासः । षष्ठीसमास[1]स्तु न शक्यः "न निर्धारणे" इति तन्निषेधात् । न च "सन्महत्परमोत्तम" इति प्रथमासमासोऽपि । सारतरशब्दस्य पूज्यमानवचनत्वाभावात् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

परतत्त्वाय तत्त्वानां तत्त्वभूताय वस्तुतः ।
स्वस्मादन्यविहीनाय नमस्तस्मै स्वयंभुवे ॥ ५ ॥

सच्चिदानन्दस्वप्रतिष्ठाद्वितीयसायुज्यरूपाया मुक्तेः साधनस्य प्राधान्येन बुभुत्सितत्वात्तदनुगुणैर्विशेषणैः परमेश्वरं स्तोतुमारभते—परतत्त्वायेत्यादिना । षट्त्रिंशत्तत्त्वातीतत्वेन परतत्त्वात्परमार्थत्वाच्च सच्चिदानन्दैकरसं स्वप्रतिष्ठाद्वितीयं परशिवस्वरूपं परं तत्त्वम् । तस्य परतत्त्वत्वमुपपादयति—तत्त्वानां तत्त्वभूतायेति । आप्रलयस्थायीनि शिवतत्त्वशक्तितत्त्वादीनि पृथिव्यन्तानि शुद्धमिश्राविशुद्धादिभेदेनावस्थितानि षट्त्रिंशत्तत्त्वानि । तदुक्तम्—

"आप्रलयं यत्तिष्ठति सर्वेषां भोगदायि भूतानाम् ।
तत्तत्त्वमिति प्रोक्तं न शरीरघटादितत्त्वमतः" इति ॥

यथा रज्ज्वामारोपितस्य मायामयस्य सर्पसर्पादेर्बाधोत्तरकालं तत्रैव लयादधिष्ठानभूता रज्जुरेव तत्त्वम्, एवमुक्तानां तत्त्वानामपि प्रागुक्तपरशिवस्वरूपे परिकल्पितत्वात्तेषां वास्तवं रूपं सच्चिदानन्दात्मकं सर्वाधिष्ठानं परशिवस्वरूपमेवेत्यर्थः । स्वस्मादिति । यतस्तत्परशिवस्वरूपं तत्त्वानामपि तत्त्वमतः परशिवः स्वस्मादन्यविहीनः । ननु वियदादिभूतभौतिकप्रपञ्चः परमेश्वररूपादन्यतयाऽनुभूयत एवेत्यत आह—वस्तुत इति । अनुभूयमानस्य सर्वस्य माया-

---

१ च. °व परमेश्व° । २ घ. पृथिव्यादीनि ।

परिकल्पितस्यावस्तुत्वात्परमार्थतोऽन्यस्य विरहादन्यविहीनत्वम् । नमस्कारस्य नन्तृनन्तव्यसापेक्षत्वान्नन्तव्यात्परशिवस्वरूपादन्यो नन्ताऽवश्यमङ्गीकर्तव्यः । तथा च कथमन्यविहीनतेति तत्राऽऽह—स्वस्मादिति । " अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि " इति श्रुतेः । जीवभावेनानुप्रविश्य परशिवस्वरूपस्यैवावस्थानान्नन्तुः स्वात्माऽपि न ततोऽतिरिक्त इत्यर्थः । स्वयंभुव इति । स्वयमेव भवति सत्तां लभत इति स्वयंभूः स्वात्मनैव लब्धसत्ताको न वस्त्वन्तरवदन्याधीनसत्ताक इत्यर्थः । " नेह नानाऽस्ति किंचन " " अथात आदेशो नेति " " अतोऽन्यदार्तम् " नान्योऽतोऽस्ति द्रष्टा " " स्वयंभु ब्रह्म परमं तपो यद्ब्रह्म स्वयंभु ब्रह्मणे नमः " इत्यादिश्रुतिषु परशिवस्वरूपस्यान्यविहीनत्वं स्वयंभुत्वं च बहुश आम्नातम् ॥ ५ ॥

चिच्छक्तिर्जडशक्तिश्च तद्भेदाश्च तथैव च ।
यदेव तत्त्वतो नित्यं तस्मै सर्वात्मने नमः ॥ ६ ॥

एतदेवान्यविहीनत्वमुपपादयति—चिच्छक्तिरित्यादिना । सृष्टव्यजगदात्मकशक्त्यप्रतियोगिको मायापरिणामविशेषो जडशक्तिस्तदवच्छिन्ना परशिवस्वरूपभूता चिदेव चिच्छक्तिः । तद्भेदा इति । तयोः शक्त्योर्भेदा इच्छाज्ञानक्रियाद्याः । अखिलजगत्सृष्टुः परमेश्वरस्योपकरणभूतं चिच्छक्त्यादिकं सर्वं तत्त्वतः परमार्थतो निरूपणे तदेव वस्तु भवति । अयमभिप्रायः—येयं परमेश्वरस्य जडशक्तिर्ये च तद्भेदास्तस्य सर्वस्य मायामयत्वेन स्वरूपतोऽपि परतत्त्वेऽध्यासाद्यदिदं रजतं न तद्रजतं किंतु शुक्तिरिति तद्भाधायां सामानाधिकरण्यं यदिदं जडशक्त्यादिकं नैतदपि तु परतत्त्वमेवेति । अत एव पञ्चपादिकायां जडप्रपञ्चस्य स्वरूपतोऽप्यध्यस्तत्वेन मिथ्यात्वं सत्यानृते मिथुनीकृत्येतिभाष्यव्याख्यानावसरेऽभिहितम्—सत्यमनिदं चैतन्यमनृतं युष्मदर्थस्तस्य स्वरूपतोऽप्यध्यस्तत्वादिति । चिच्छक्तेस्तु परशिवस्वरूपत्वेन यथार्थत्वात् । द्वौ चन्द्रमसावित्यादौ भेद एव केवलं मायामयत्वेनाध्यस्तः । अतस्तन्निवृत्तये संसर्गसामानाधिकरण्यम् । येयं परशिवस्वरूपभूता चिद्या च चिच्छक्तिर्ने ते भिन्ने अपि त्वेकैव चिदिति । एवमुत्तरत्रापि सामानाधिकरण्यविशेषो द्रष्टव्यः ॥ ६ ॥

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
विराडाद्याश्च देवाश्च यन्मात्रं तं नुमः शिवम् ॥ ७ ॥

ब्रह्मेति । सृष्टिस्थितितिरोधानानुग्रहनिग्रहव्यापाराः सद्योजातादिपञ्चब्रह्ममूर्तयो

ब्रह्माद्या विराडाद्या इत्याद्यपदेन स्वराट्सम्राजोः संग्रहः । ते च शिवमाहात्म्यखण्डे पूर्वमेवोक्ताः——

" द्विधाकृत्य मुनिश्रेष्ठा अर्धेन पुरुषो भवेत् ।
अर्धेन नारी तस्यां तु विराजमसृजत्पुनः " इति ॥

आदिशब्देनोक्तव्यतिरिक्ता इन्द्राद्या इत्यर्थः । यन्मात्रमिति । रज्ज्वा इदमंशे स्रक्सर्पादिवत्सर्वाधिष्ठानभूते सच्चिदानन्दात्मके परशिवस्वरूपे तदाश्रितमायावशेन ब्रह्मादीनां परिकल्पितत्वाद्वास्तवमेतेषामधिष्ठानादनन्यत्वं तन्मात्रमवधार्यते ॥ ७ ॥

महासत्त्वाश्च ये जीवा मध्यसत्त्वाश्च[1] चेतनाः ।
विहीनाश्चैव यन्मात्रं तं नमामि महौजसम् ॥ ८ ॥
यस्य सत्ता जगत्सत्तारूपेणैवावभासते[2] ।
यं विना न जगत्तस्मै सदा साक्षात्सते नमः ॥ ९ ॥

महासत्त्वा इति । गजाद्या महासत्त्वाः । मध्यमसत्त्वा मनुष्याद्याः । विहीनाः क्रिमिकीटादयः । एवं प्रतीयमानस्य ब्रह्मादिस्तम्बान्तस्य मायामयप्रपञ्चाधिष्ठानयाथात्म्यज्ञानेनापोह्यमानस्य बाधावधित्वेन परशिवस्वरूपं तटस्थेन लक्षितम् । अथ "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिप्रसिद्धं तत्स्वरूपं लक्षयन्नग्रतः पूर्वोक्तमधिष्ठानमात्रत्वं समर्थयते—— यस्य सत्तेत्यादिना ॥ ८ ॥ ९ ॥

यस्य भानं जगद्भानस्वरूपेण विभासते ।
यमृते न जगद्भानं तस्मै भानात्मने नमः ॥ १० ॥
यदानन्दोऽखिलानन्दो विभाति स्वयमेव तु ।
तं नुमः परमानन्दं परापरविवर्जितम् ॥ ११ ॥
यद्देशकालदिग्भागैर्न भिन्नं सर्वदाऽद्वयम् ।
यदेव विश्वं तद्ब्रह्म यथार्थं प्रणमाम्यहम् ॥ १२ ॥
अनन्तमद्वयं पूर्णमेकमित्यामनन्ति[3] यत् ।
आगमा अखिला नित्यं वन्दे तद्ब्रह्मसंज्ञितम् ॥ १३ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

१ घ. °श्च ये जनाः । २ ख. ग. ङ. °णैव विभा° । ३ ङ. आनन्द्म° ।

यत्स्वरूपमविज्ञाय सांख्ययोगौ विनिर्गतौ ।
तं तदज्ञानचित्रस्य भित्तिभूतं नुमः शिवम् ॥ १४ ॥
यत्स्वरूपमविज्ञाय शब्दशास्त्रं समुद्गतौ ।
तं तदज्ञानचित्रस्य भित्तिभूतं नुमः शिवम् ॥ १५ ॥
यत्स्वरूपमविज्ञाय कारणं परमाणवः ।
कल्पिता जगतो विप्रास्तं नुमः परमेश्वरम् ॥ १६ ॥
॥ १४ ॥ १५ ॥ १६ ॥

यत्स्वरूपमविज्ञाय क्रियां सर्वफलप्रदाम् ।
कल्पयन्ति विना देवं तं वन्दे सकलप्रदम् ॥ १७ ॥
यत्स्वरूपमविज्ञाय देहमात्मेति मन्वते ।
तर्काभासैस्तमीशानं वन्दे देहविलक्षणम् ॥ १८ ॥
यत्स्वरूपमविज्ञाय देहजानीन्द्रियाणि तु ।
आत्मेति मन्वते वन्दे तमिन्द्रियविलक्षणम् ॥ १९ ॥
यत्स्वरूपमविज्ञाय प्राणमात्मेति मन्वते ।
वन्दे तं प्राणवेत्तारं प्राणं प्राणस्य सर्वदा ॥ २० ॥
यत्स्वरूपमविज्ञाय मनः संकल्पलक्षणम् ।
आत्मेति मन्वते भक्त्या वन्दे तं मनसः परम् ॥ २१ ॥
यत्स्वरूपमविज्ञाय बुद्धिमात्मेति मन्वते ।
तं वन्दे बुद्धिबोद्धारं बोधरूपमविक्रियम् ॥ २२ ॥
॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

यत्स्वरूपमविज्ञाय सर्वप्रत्ययकारणम् ।
अन्तःकरणमात्मेति मन्वते तं नुमः शिवम् ॥ २३ ॥
यस्मिन्नाद्यदवस्थैषा भातीव भवतीव च ।
तं तदन्तेरधिष्ठानं वन्दे साक्षिणमीश्वरम् ॥ २४ ॥
॥ २३ ॥ २४ ॥

यस्मिन्स्वप्नप्रपञ्चोऽयं भातीव भवतीव च ।
तं तद्भान्तेरधिष्ठानं वन्दे साक्षिणमीश्वरम् ॥ २५ ॥
यस्मिन्सुषुप्त्यवस्थेयं भातीव भवतीव च ।
तं तद्भान्तेरधिष्ठानं वन्दे साक्षिणमीश्वरम् ॥ २६ ॥
यस्मिन्कृतं तुरीयत्वं त्रिधामापेक्षयैव तु ।
तं तुरीयत्वनिर्मुक्तं वन्दे चिद्घनमीश्वरम् ॥ २७ ॥
यस्मिंस्तुरीयातीतत्वमध्यस्तं तदभावतः ।
तं वन्दे केवलं शुद्धं निर्विशेषं महेश्वरम् ॥ २८ ॥
एकत्वं च तथा द्वित्वं त्रित्वं यस्मिन्प्रकल्पितम् ।
बहुत्वं च तमीशानमसंख्येयं नुमः शिवम् ॥ २९ ॥
अभिन्नं च तथा भिन्नं भिन्नाभिन्नं वदन्ति यम् ।
तं सदा केवलं वन्दे केषांचिल्लभ्यमीश्वरम् ॥ ३० ॥
यस्य विज्ञानसंपन्ना ब्रह्मविष्णुमहेश्वराः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३१ ॥
यस्य विज्ञानसंपन्नाः सदेश्वरसदाशिवौ ।
यथार्थं ब्रह्म जानीतस्तं नुमः परमाद्वयम् ॥ ३२ ॥
यस्य विज्ञानसंपन्नाः सर्वदेवानशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३३ ॥
यस्य विज्ञानसंपन्ना विभिन्नाञ्जीवचेतनान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३४ ॥
यस्य विज्ञानसंपन्नाः सर्ववेदानशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३५ ॥
यस्य विज्ञानसंपन्नाः स्मृतीः सर्वा अशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३६ ॥

। २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥
॥ ३४ ॥ ३५ ॥ ३६ ॥

यस्य विज्ञानसंपन्ना पुराणानि च भारतम् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३७ ॥
यस्य विज्ञानसंपन्नाः सर्वाञ्शैवागमानपि ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३८ ॥
यस्य विज्ञानसंपन्ना विविधान्वैष्णवागमान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ३९ ॥
यस्य विज्ञानसंपन्ना ब्राह्मानेतांस्तथाऽऽगमान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४० ॥
यस्य विज्ञानसंपन्ना बुद्धार्हतागमानिमान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४१ ॥
यस्य विज्ञानसंपन्नाः शब्दान्सत्येतरादिकान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४२ ॥
यस्य विज्ञानसंपन्ना विद्याः सर्वा अशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४३ ॥
यस्य विज्ञानसंपन्नास्तर्कानन्योन्यबाधकान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४४ ॥
यस्य विज्ञानसंपन्ना मानमध्यक्षपूर्वकम् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४५ ॥
यस्य विज्ञानसंपन्ना ब्राह्मणान्क्षत्रियान्विशः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४६ ॥
यस्य विज्ञानसंपन्नाः शूद्रानपि च संकरान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४७ ॥
यस्य विज्ञानसंपन्ना आश्रमानखिलानपि ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४८ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥
॥ ४६ ॥ ४७ ॥ ४८ ॥

यस्य विज्ञानसंपन्ना धर्माधर्मानशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ४९ ॥
यस्य विज्ञानसंपन्ना वर्ज्यावर्ज्यानशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५० ॥
यस्य विज्ञानसंपन्ना विद्याविद्या अशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५१ ॥
यस्य विज्ञानसंपन्ना देहादीनखिलानिमान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५२ ॥
यस्य विज्ञानसंपन्ना जाग्रदादित्रयं सदा ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५३ ॥
यस्य विज्ञानसंपन्नास्तुरीयत्वादिकल्पनाम् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५४ ॥
यस्य विज्ञानसंपन्ना भूमिं तद्भेदमास्तिकाः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५५ ॥
यस्य विज्ञानसंपन्ना जलं तद्भेदमास्तिकाः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५६ ॥
यस्य विज्ञानसंपन्ना अग्निं तद्भेदमास्तिकाः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५७ ॥
यस्य विज्ञानसंपन्ना वायुं तद्भेदमास्तिकाः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५८ ॥
यस्य विज्ञानसंपन्ना आकाशं तत्र कल्पितम् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ५९ ॥
यस्य विज्ञानसंपन्नाः शब्दस्पर्शादिकानिमान् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ६० ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥
॥ ५९ ॥ ६० ॥

यस्य विज्ञानसंपन्ना महदाद्यखिलं जगत् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ६१ ॥
यस्य विज्ञानसंपन्नाः सर्वमेतदशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ६२
यस्य विज्ञानसंपन्ना महामायामशङ्किताः ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ६३ ॥
यस्य विज्ञानसंपन्नाश्चिच्छक्तिं विमलामिमाम् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ६४ ॥
यस्य विज्ञानसंपन्नाः प्रतीतमखिलं जगत् ।
यथार्थं ब्रह्म जानन्ति तं नुमः परमाद्वयम् ॥ ६५ ॥
यस्य विज्ञानसंपन्नाः फलावाप्त्यै कदाचन ।
न किंचिदपि कुर्वन्ति तं नुमः परमाद्वयम् ॥ ६६ ॥
यस्य विज्ञानसंपन्नाः प्रत्यग्ज्योतिषि संस्थिताः ।
तमेव प्रत्यगात्मानं वन्देऽहंतादिवर्जितम् ॥ ६७ ॥
इदंरूपमहंरूपं यस्य भाति तमीश्वरम् ।
वन्दे लक्षणमद्वंद्वमनिर्देश्यं स्वयंप्रभम् ॥ ६८ ॥
स्तुतिमतिनिवहस्य नैव गोचरं
भवभयजलधेः सदैव तारकम् ।
अहमहमिति सततोदितप्रभं
निखिलजगद्धितं नमामि शश्वत् ॥ ६९ ॥

सूत उवाच—

एवं व्यासेन सर्वज्ञः साम्बः सर्वफलप्रदः ।
अभिष्टुतो महादेवः प्रत्यक्षमभवन्मुने ॥ ७० ॥

॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

तं दृष्ट्वा देवदेवेशं देव्या सहितमव्ययम् ।
प्रणम्य प्रार्थयामास सर्वसाधनवेदनम् ॥ ७१ ॥
देवदेवोऽपि सर्वज्ञः प्रसन्नः सर्वसाधनम् ।
प्राह गम्भीरया वाचा मुनये मुनिसत्तमाः ॥ ७२ ॥
॥ ७१ ॥ ७२ ॥

ईश्वर उवाच--

वक्ष्ये विप्र समासेन सर्वसाधनमुत्तमम् ।
शृणुष्व श्रद्धया सार्धं मया नोक्तमितः पुरा ॥ ७३ ॥
अपेक्षितार्थः सर्वेषां भुक्तिर्मुक्तिश्च सुव्रताः ।
मुक्तिर्नानाविधा प्रोक्ता मया वेदानुसारतः ॥ ७४ ॥
तत्र सायुज्यरूपाया मुक्तेः साक्षात्तु साधनम् ।
सम्यग्ज्ञानं न कर्मोक्तं न तयोश्च समुच्चयः ॥ ७५ ॥
नित्यसिद्धाऽथवा मुक्तिः साध्यरूपाऽद्वयी गतिः ।
नित्यसिद्धा तु सर्वेषामात्मरूपाऽथवाऽपरा ॥ ७६ ॥
आत्मरूपैव चेन्मुक्तिर्नित्यप्राप्ता हि साऽऽत्मनः ।
नित्यप्राप्तस्य चाप्राप्तिर्विभ्रमः खलु देहिनाम् ॥ ७७ ॥
विभ्रमस्य निवृत्त्या सा प्राप्तेति व्यपदिश्यते ।
विभ्रमस्य निवृत्तिस्तु सिध्यत्यज्ञाननाशतः ॥ ७८ ॥
॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

अज्ञानस्य विनाशस्तु ज्ञानादेव न चान्यतः ।
ज्ञानादज्ञाननाशस्तु प्रसिद्धः सर्वदेहिनाम् ॥ ७९ ॥

प्रागुदीरितस्य सर्वजगदधिष्ठानस्य परशिवस्वरूपभूतं सत्त्वमेव तस्मिन्माययाऽऽरोपिते जगति रज्जुसर्पादिषु रज्ज्वा इदंतानुगामिरिव लौकिकविभ्रमे प्रसिद्धेति दर्शयति— ज्ञानादिति ॥ ७९ ॥

अपरा सा परा मुक्तिर्नाऽऽत्मरूपैव चेन्मतम् ।
तदाऽपि मुक्तिः प्राप्या वा न प्राप्या वाऽऽत्मनो भवेत् ॥८०॥

१ ब. प्रसिद्धमिति ।

एवं सिद्धान्तमभिधाय पूर्वपक्षं दूषयितुमाद्यपक्षस्य द्वितीयं विकल्पमाश-ङ्क्ते—अपरेति । सा नित्यसिद्धा मुक्तिर्नाऽऽत्मरूपाऽपि त्वपराऽऽत्मनोऽन्यैव चेन्मतमित्यर्थः । विकल्पासहत्वेनेमं पक्षं दूषयितुं विकल्पयति—तदेति ॥८०॥

प्राप्या चेदात्मनो मुक्तिरप्राप्तप्राप्तिरेव सा ।
अप्राप्तप्राप्तिरप्यस्य संबन्धो वैक्यमेव वा ॥ ८१ ॥
संबन्धश्चेत्स साध्यो वा नित्यो वा साध्य एव चेत् ।
अनित्यः स तु संबन्धो भवेन्नित्यो न सर्वथा ॥ ८२ ॥

आत्मव्यतिरिक्ता किंवा प्राप्या न प्राप्या वाऽऽद्यं पुनर्विकल्पं दूषयितुं फलितमर्थमाह—प्राप्या चेदिति । अथ तमाद्यं पक्षं विकल्पयति—अप्राप्त-प्राप्तिरिति । अप्राप्तप्राप्तिरूपा प्राप्या मुक्तिः किं संबन्धद्वयघटितसंबन्धात्मि-कोत संबन्धिनोस्तादात्म्यरूपा । प्रथमेऽपि किमसौ संबन्धः साध्यो नित्यो वेति विकल्प्याऽऽद्यं प्रत्याह—साध्य एव चेदिति । साध्यसंबन्धात्मिका मुक्तिः सर्वप्रकारेणानित्या स्यान्न च नित्यत्वमासादयेत् । तथा च मुक्ताना-मपि पुनः संसारप्रसङ्गः ॥ ८१ ॥ ८२ ॥

साध्यानामपि भावानामनित्यत्वं व्यवस्थितम् ।
अभावस्य न साध्यत्वं प्रध्वंसाख्यस्य सर्वदा ॥ ८३ ॥
साध्यत्वाख्यस्तु धर्मश्च नैवाभावाश्रयो भवेत् ।
नित्यो यदि स संबन्धस्तर्हि संबन्धसंज्ञिता ॥ ८४ ॥
मुक्तिश्च नित्यसिद्धैव मुमुक्षोरात्मनो भवेत् ।
तदाऽपि नित्यप्राप्तायां मुक्तेः प्राप्तिस्तु पूर्ववत् ॥
विज्ञानेनैव नान्येन सत्यमुक्तं द्विजोत्तम ॥ ८५ ॥

व्याप्तिं दर्शयति—साध्यानामिति । चक्रचीवरतुरीवेमादिसाध्यानां घटपटा-दीनां भावानामनित्यत्वं दृश्यते । अतः साध्यत्वमनित्यत्वेन व्याप्तमित्यर्थः । अनैकान्तिकत्वं परिहरति—अभावस्येति । प्रध्वंसाभावस्य भावरूपसाध्यत्वधर्म-योगो न घटते । तथाविधधर्मयोगे तस्य घटादिवद्भावत्वमेव स्यात् । केनाचि-दपि धर्मेण निरूपाख्यस्यैवाभावत्वात् । अङ्गीकृत्येदं प्रध्वंसाभावस्य नित्यत्वम-नैकान्तिकत्वं परिहृतम् । सोऽप्यनित्य इत्युपरिष्टात्प्रतिपादयिष्यते । अथाप्राप्त-

प्राप्तिर्नित्यः संबन्ध इति प्रथमस्य द्वितीयं कल्पं दूषयति-नित्यो यदीति । नित्यसंबन्धात्मिका मुक्तिरपि नित्यसिद्धैव न केनचित्साधनेन निष्पाद्या । तथाच नित्यप्राप्तैव सेति पूर्वोक्तं ज्ञानमात्रसाध्यत्वमावर्तत इत्यर्थः ॥ ८३ ॥ ॥ ८४ ॥ ८५ ॥

अप्राप्तप्राप्तिरूपाया मुक्तेरैक्यं भवेद्यदि ॥ ८६ ॥
तन्न युक्तं द्वयोरैक्यं न सिध्यति कदाचन ।
भिन्नयोर्भेदनाशे वा मुक्तिर्भेदे स्थितेऽथवा ॥ ८७ ॥

अप्राप्तप्राप्तिस्तादात्म्यमिति द्वितीयं दूषयितुमनुभाषते-अप्राप्तेति । तं दूषयति-तन्नेति ॥ ८६ ॥ ८७ ॥

भेदनाशे तयोरैक्यं घटते वेदवित्तम ।
भेदे सति[1] तयोरैक्यमिति चेत्तन्न संगतम् ॥ ८८ ॥

तत्र वक्तव्यं किं भिन्नयोर्जीवेश्वरयोर्भेदनाशे तादात्म्यमुत भेदे सत्येव तत्राऽऽद्यो भवद्भिर्भेदस्यान्योन्याभावरूपत्वाङ्गीकारात्तस्य चानाद्यनन्तत्वाद-नङ्गीकारः परास्त इत्याह-भेदनाश इति । नापि द्वितीय इत्याह-भेदे सतीति ॥ ८८ ॥

भेदस्य संनिधावैक्यं विरोधान्नैव सिध्यति ।
न प्राप्या ह्यात्मनो मुक्तिरिति चेत्तन्न संगतम् ॥ ८९ ॥
अप्राप्यायास्तु मुक्तेश्च नास्त्यपेक्षा हि साधने ।
साधनेऽसति सा मुक्तिरप्राप्यैव सदा खलु ॥ ९० ॥

कुत इत्यत आह-भेदस्येति । अभेदैकार्थसमवायिन एकत्वस्य भेदेन सहा-वस्थानानुपपत्तेरित्यर्थः । एवमात्मस्वरूपव्यतिरिक्ताया मुक्तेः प्राप्यत्वपक्षं दूषयित्वाऽप्राप्येति द्वितीयपक्षमनूद्य दूषयति-न प्राप्येति । अप्राप्यस्वभावाया मुक्तेः साधनशतेऽप्यनुमितेऽप्यप्राप्यत्वमेव स्वभावस्यानपायात् । अतः साधना-पेक्षाभावादयत्नेन सर्वे मुच्येरन्नित्यर्थः ॥ ८९ ॥ ९० ॥

न नित्यसिद्धा सा मुक्तिः साध्यरूपैव चेन्मतम् ।
साध्यत्वे सत्यनित्यत्वं पूर्वमेवाभिभाषितम् ॥ ९१ ॥

---

१ घ. °ति भवेदैक्य° । २ घ. °नुष्ठि° ।

एवं सायुज्यरूपा मुक्तिः किं नित्यसिद्धोत साध्यरूपेति विकल्प्याऽऽद्यपक्षसंभवच्छङ्कानिरासेन कर्मनैरपेक्ष्येण सम्यग्ज्ञानस्य मुक्तिसाधनत्वमुपपाद्योक्तदोषानुवृत्तेर्द्वितीयो न युक्त इत्याह—न नित्यसिद्धेति । मुक्तेः साध्यत्वे घटादिवदनित्यत्वं स्यादिति पूर्वमेवोक्तमित्यर्थः ॥ ९१ ॥

प्रध्वंसस्य तु नित्यत्वं सर्वथा न भविष्यति ।
अचिद्रूपस्य सर्वस्य विनाशो गम्यते यतः ॥ ९२ ॥

ननु साध्यत्वेऽपि प्रध्वंसाभाववन्मुक्तेर्नित्यत्वं किं न स्यादित्यत आह- प्रध्वंसस्येति । चिदात्मव्यतिरिक्तस्य सकलस्य चेत्यप्रपञ्चस्य नेह नानाऽस्तीत्यादिनिषेधकश्रुत्या बाधितत्वादनित्यत्वमवश्यमेष्टव्यमित्यर्थः ॥ ९२ ॥

भावत्वे सति साध्यत्वाद्विनाशोऽचेतनस्य तु ।
प्रध्वंसस्य तु साध्यत्वेऽप्यभावत्वेन हेतुना ॥ ९३ ॥

ननु संगतिग्रहणादौ प्रत्यक्षानुमानादिप्रमाणान्तरसापेक्षशब्दस्य तद्विरोधे प्रामाण्यानुपपत्तेर्भावत्वे सति साध्यत्वमनित्यत्वसाधनम् । तथा च न प्रध्वंसेव्यभिचारः । तस्य साध्यत्वेऽपि भावत्वाभावादिति शङ्कते— भावत्वे सतीति ॥ ९३ ॥

न सिध्यति विनाशस्तु तच्च नैव सुसंगतम् ।
प्रागभावसमाख्यस्याप्यनित्यत्वस्य दर्शनात् ॥ ९४ ॥
प्रागभावस्य साध्यत्वाभावे सत्यप्यभावतः ।
अनित्यत्वं यदीष्येत प्रध्वंसस्यापि तत्समम् ॥ ९५ ॥

तदेतदव्याप्त्या दूषयति–तच्च नैवेति । भवतु भावत्वे सति साध्यत्वादनित्यत्वं घटादिषु प्रागभावस्यानित्यत्वेऽवश्यं कारणान्तरं वक्तव्यमुक्तहेत्वभावात् । तच्चाभावत्वमेवाभावे धर्मान्तरसमन्वयस्य प्रागेव निरस्तत्वात् । तद्वत्प्रध्वंसस्यापि समानमिति तस्याप्यनित्यत्वमभ्युपगन्तव्यमित्यर्थः ॥९४॥९५॥

भावानामप्यभावानां साध्यानां मुनिसत्तम ।
असाध्यानां च सर्वेषामनित्यत्वे प्रयोजकम् ॥ ९६ ॥

एवं च भावत्वे सति साध्यत्वं घटादीनां भावानामनित्यत्वे प्रयोजकं प्रागभावस्यानित्यत्वेऽभावत्वमिति प्रयोजकद्वयाङ्गीकारकल्पनागौरवं स्यात्तस्मादु-

१ क. घ. °मेव ध° । २ घ. °मवाय° ।

भयत्रानुगतं जडत्वमेवानित्यत्वप्रयोजकमङ्गीकार्यमित्याह-भावानामिति। असाध्यानामिति। परमाण्वाकाशकालदिगादीनि परैर्नित्यतयाऽङ्गीकारादसाध्यत्वेनाभिमतानि तेषामपीत्यर्थः ॥ ९६ ॥

अचेतनत्वमेवोक्तं नेतरद्व्यभिचारतः।
चेतनस्य तु नित्यत्वं श्रुतिराह सनातनी ॥ ९७ ॥
तस्मादुक्तप्रकारेण मुक्तिः सायुज्यरूपिणी।
ज्ञानलभ्या क्रियामात्रान्न लभ्या न समुच्चयात् ॥ ९८ ॥

नेतरादिति। इतरत्कृतकत्वादिकमिति यावत्। कुत इत्यत आह—व्यभिचारत इति। प्रागभावादावनित्यत्वे सत्यपि तदव्याप्त्याऽनुगमादित्यर्थः। श्रुतिराहेति। सा च "नित्यो नित्यानां चेतनश्चेतनानाम्" इत्यादिका। प्रतिपादितमर्थं निगमयति—तस्मादिति ॥ ९७ ॥ ९८ ॥

ज्ञानं नामाखिलं चेदं सद्रूपेणावभासनम्।
क्रिया तु कारकापेक्षा न ज्ञानालम्बिनी सदा ॥ ९९ ॥
अतः क्रियाया ज्ञानेन विरोधादेव सर्वदा।
समुच्चयो न युज्येत कुतस्तेन परा गतिः ॥ १०० ॥

किं तज्ज्ञानमित्यत आह—ज्ञानं नामेति। अखिलस्य भोक्तृभोग्यात्मकस्य प्रपञ्चस्य योऽयं सच्चिदानन्दाद्वितीयब्रह्मात्मत्वसाक्षात्काररूपस्तस्य युज्यमुक्तिसाधनमित्यर्थः। श्रूयते हि—"सर्वं खल्विदं ब्रह्म" "इदं सर्वं यदयमात्मा" इत्यादि। ज्ञानकर्मणोः समुच्चयस्य प्रतिज्ञातं परमुक्त्यसाधनत्वमुपपादयति—क्रियात्विति। अग्निहोत्रादिक्रिया हि कर्तृकरणकर्मादिभेदाभिन्नकारकसापेक्षा सती तद्गोचरं द्रव्यदेवतादिविषयं शास्त्रजनितं विज्ञानमेव केवलमवलम्बते न तु कर्तृकारणादिसकलभेदोपमर्देन जायमानं प्रतीचः परमात्मतत्त्वसाक्षात्कारात्मकं ज्ञानम्। तेन सह विरोधात्। उक्तं हि भगवद्भाष्यकारैः—"अनुपयोगादधिकारिविरोधाच्च" इति। अतो विरोधित्वे समसमयवर्तित्वाभावाद्द्वैतज्ञानकर्मणोः समुच्चय एव न संभवति। कुतस्तेन मुक्त्याशङ्क्येत्यर्थः ॥ ९९॥ १००॥

सारूप्याख्या तु या मुक्तिः सामीप्याख्या च याऽपरा।
सालोक्याख्या च या तासां केवलं कर्म साधनम् ॥ १०१॥

ऐहिकामुष्मिकाकारा मुक्तयः सर्वदेहिनाम् ।
कर्मणैव हि सिध्यन्ति न ज्ञानेन विरोधतः ॥ १०२ ॥
ज्ञानं कर्म च वेदोक्तमेव नान्योदितं भवेत् ।
अन्योदितं तु विप्रेन्द्र व्यवहारेऽविवेकिनाम् ॥ १०३ ॥

केवलं कर्मेति । उक्ताद्वितीयब्रह्मात्मत्वज्ञानरहितं द्रव्यदेवतादिज्ञानसहकृतं चरमभावेनावस्थितमग्निहोत्रादिकं हिरण्यगर्भादिसगुणब्रह्मोपासनरूपं च कर्मैव सारूप्याद्यपरमुक्तेः साधनमित्यर्थः ॥ १०१ ॥ १०२ ॥ १०३ ॥

अपेक्ष्य बुद्धिं विज्ञानं कर्म चेति विधीयते ।
तथाऽपि व्यवहारे ते व्यावहारिकसिद्धिदे ॥ १०४ ॥
तस्मात्सर्वत्र नास्तिक्यं न कुर्यान्मतिमत्तमः ।
नास्तिक्यादेव सर्वेषां संसारे परिवर्तनम् ॥ १०५ ॥

अपेक्ष्य बुद्धिमिति । उत्तममध्यमाधमभावेनावस्थितानामधिकारिणां बुद्धितारतम्यमपेक्ष्य हिरण्यगर्भादिसगुणब्रह्मविज्ञानमग्निहोत्रादिकर्म चोभयं समुच्चित्याभिधीयते—"विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह" इत्यादिना । एते च ज्ञानकर्मणी व्यवहारदशायां व्यावहारिकफलप्रयोजने इत्यर्थः ॥ १०४ ॥ ॥ १०५ ॥

सर्वमुक्तं समासेन साधनं मुनिसत्तम ।
गोपनीयमिदं तस्मादास्तिकस्य सदाऽद्भुतम् ॥ १०६ ॥

सूत उवाच—

एवमुक्त्वा महादेवः साम्बः सर्वावभासकः ।
प्रनृत्य संनिधौ तस्य तत्रैवान्तर्हितोऽभवत् ॥ १०७ ॥

साधनं तु सकलं परिभाषितं
केवलं कृपयैव तु वो मया ।
नेतरत्कथितव्यमिह द्विजा
मोह एव हि समस्तमितोऽन्यथा ॥ १०८ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
मुक्तिसाधनविचारो नामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥

॥ १०६ ॥ १०७ ॥ १०८ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां चतुर्थे यज्ञवैभवखण्डे मुक्ति-साधनविचारो नामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥

अथैकोनचत्वारिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि समासेन न विस्तरात् ।
अविरोधं तु वेदानामशेषाणां मुनीश्वराः ॥ १ ॥

अद्वैतवत्कर्तृकरणफलादिभेदभिन्नस्य द्वैतस्यापि श्रुतत्वाद्द्वैताद्वैतश्रुत्योर्मिथो विरोधेनाप्रामाण्यमाशङ्क्य तयोरविरोधं प्रतिपादयितुमारभते—अथात इति॥ १ ॥

द्विविधो वेदराशिस्तु मुनयः संशितव्रताः ।
सत्याद्वैतपरः कश्चिद्वेदभागः समासतः ॥ २ ॥
कल्पितद्वैतनिष्ठस्तु वेदभागोऽपरस्तथा ।
सत्यमेव सदाऽद्वैतमसत्यं द्वैतमास्तिकाः ॥ ३ ॥

कर्मज्ञानकाण्डयोरविरोधं दर्शयितुं तावद्विषयभेदमाह—सत्याद्वैतेति । कश्चिदुपनिषल्लक्षणो यो वेदभागः स सर्वदा बाधविधुरमद्वितीयं परशिवस्वरूपं तात्पर्येण प्रतिपादयति । अपरस्तु कर्मकाण्डात्मको वेदभागस्तत्स्वरूपे परिकल्पितं द्वैतप्रपञ्चमुपजीव्य स्वर्गादिफलाय यागहोमादिकं तात्पर्येण विधत्ते । अतो विषयभेदादविरोध इत्यभिप्रायः । विपरीतं न कुत इत्यत आह—सत्यमेवेति ॥ २ ॥ ३ ॥

द्वैतस्यापि च सत्यत्वं वर्णयन्तीह केचन ।
तदसंगतमध्यस्तं द्वैतं यस्मात्परात्मनि ॥ ४ ॥

नन्वद्वैतात्मतत्त्ववद्द्वैतस्य जडप्रपञ्चस्याप्यविसंवादिव्यवहारदर्शनेनाऽऽरोपितरजतादिवैलक्षण्यात्पारमार्थिकत्वं किं न स्यादिति पराभिमतां शङ्कामनुभाषते—द्वैतस्यापीति । परिहरति—तदिति । विमतमसत्यमध्यस्तत्वाच्छुक्तिरूप्यवदिति भावः ॥ ४ ॥

अध्यस्तं हि सदा द्वैतं दृश्यत्वाच्छुक्तिरूप्यवत् ।
दृश्यत्वं द्वैतजातस्य संमतं सर्वदेहिनाम् ॥ ५ ॥

हेत्वसिद्धिं[1] परिहरति—अध्यस्तं हीति । अविसंवादिव्यवहारदर्शनेऽपि दृश्यत्वहेतुना शुक्तौ रूप्यवद्द्वैतप्रपञ्चस्यापि दृग्रूपेऽद्वितीये परमात्मन्यध्यस्तत्वमङ्गीकार्यं तेन चासत्यत्वमित्यर्थः । हेतोः पक्षधर्मतामाह—दृश्यत्वमिति । द्वैतप्रपञ्चस्य स्वतो जडत्वेन भानासंभवाद्दृग्रूपेण स्वप्रकाशपरशिवस्वरूपचैतन्येनैव भास्यत्वाद्दृश्यत्वहेतुः कृत्स्नं पक्षं व्याप्य वर्तत इत्येतत्सर्वसंमतमित्यर्थः ॥ ५ ॥

तस्माद्द्वैतपरो भागः कल्पितद्वैतगोचरः ।
अद्वैतं सर्वदा सत्यं भेदाभावात्कथंचन ॥ ६ ॥

एतद्द्वैतजालस्य परिकल्पितत्वप्रतिपादनात्तद्गोचरस्य कर्मकाण्डस्य कल्पितविषयत्वं सिद्धमित्युपसंहरति—तस्मादिति । नन्वेवमद्वितीयस्याऽऽत्मनोऽप्यसत्यत्वं कस्मान्न स्यादित्यत आह—भेदाभावादिति । ईदृग्रूपदृश्यभावस्य भेदसापेक्षत्वान्निर्भेदे परमात्मनि तस्याभावाद्दृश्यत्वाभावेनाध्यस्तत्वासंभवाद्द्वैतस्य सर्वदा बाधवैधुर्यात्सत्यत्वमित्यर्थः ॥ ६ ॥

अद्वैतमपि चाध्यस्तं यदि वेदविदां वराः ।
कुत्रैवाद्वैतमध्यस्तं नाद्वैते तदभावतः ॥ ७ ॥

एतदेवोपपादयितुं विकल्पयति—अद्वैतमिति । अद्वैतमपि द्वैतवद्यद्यध्यस्तं स्यात्तर्हि तस्य केनचिदधिष्ठानेन भवितव्यम् । निरधिष्ठानभ्रमानुपपत्तेः । किं तदधिष्ठानमद्वैतमेवोत द्वैतमिति विकल्प्याऽऽद्यं प्रत्याह—नाद्वैत इति । तदभावत इति । तस्याऽऽरोप्यादद्वैतादन्यस्याद्वैतान्तरस्याभावादित्यर्थः ॥ ७ ॥

केवलं कल्पिते द्वैते नाद्वैताध्याससंभवः ।
व्यवहारदशायां तु सत्येऽध्यासस्य दर्शनात् ॥ ८ ॥

न द्वितीय इत्याह—केवलमिति । अद्वैतस्याऽऽरोपेऽन्यस्याधिष्ठानस्यासंभवात्केवलं कल्पिते द्वैते तदध्यासो वक्तव्यः सोऽपि न युक्त इत्याह—व्यवहारेति । परमार्थभूते शुक्तिशकलादौ रजताद्यध्यासस्य लोके दृष्टत्वात्तदनुसारेणाद्वैताध्यासस्याप्यधिष्ठानत्वेन सत्यभूतमेव किंचिद्वक्तव्यं न परिकल्पितमित्यर्थः ॥ ८ ॥

---

१ ब. °सिद्धं प° । २ ब. °जातस्य ।

द्वैते चाद्वैतमध्यस्तमिति वक्तुं न शक्यते ।
तस्याध्यासस्वरूपत्वाद्द्वैतस्य ब्रह्मवित्तमाः ॥ ९ ॥

भवतु लोके सत्याधिष्ठानत्वमद्वैताध्यासे त्वन्यस्यासंभवात्कल्पितस्यैवाधिष्ठानत्वमिति नियमः करमान्न भवतीत्यत आह—द्वैते चेति । द्वैतस्याध्यस्तैकशरीरत्वादध्यस्तस्य चाधिष्ठानात्परमात्मस्वरूपादनतिरेकादेकस्यैवाधिष्ठानत्वमारोपितत्वं चेति व्याहतमित्यर्थः ॥ ९ ॥

द्वैतं चापि तथाऽद्वैतमुभयं कल्पितं न हि ।
द्वैताद्वैतातिरेकेण नास्तित्वादेव वस्तुनः ॥ १० ॥

किंच द्वैतवदद्वैतस्यापि परिकल्पितत्वे निरधिष्ठानभ्रमप्रसङ्गादद्वैतस्य सत्यत्वमेष्टव्यमित्याह—द्वैतं चेति । यदि द्वैताद्वैते उभे अप्यारोपिते स्यातां तर्हि तद्व्यतिरिक्तस्य वस्त्वन्तरस्याभावान्निराधिष्ठानभ्रमप्रसङ्ग इत्यर्थः ॥ १० ॥

शून्यमात्रे न चाध्यस्तमुभयं वेदवित्तमाः ।
निरुपाख्यस्य चाध्यासाधिष्ठानत्वायसंभवात् ॥ ११ ॥

ननु शून्यमेवाधिष्ठानमस्त्वित्यत आह—शून्येति । तत्र हेतुमाह—निरुपाख्यस्येति । केनचिदप्याकारेण निर्वक्तुमशक्यस्य शून्यस्याध्यासाधिष्ठानत्वबाधावधित्वलक्षणधर्मयोगासंभवादित्यर्थः ॥ ११ ॥

अतो द्वैतं समध्यस्तमद्वितीये परात्मनि ।
तस्मादुक्तेन मार्गेण कश्चिदंशः श्रुतेर्बुधाः ॥ १२ ॥
सत्याद्वैतपरः प्रोक्तः सर्वशास्त्रार्थवेदिभिः ।
तथैव वेदराशेस्तु कश्चिदंशस्तपोधनाः ॥
कल्पितद्वैतनिष्ठस्तु कथितः सत्यवादिभिः ॥ १३ ॥

एवमद्वैतस्याध्यासासंभवात्प्रतिपादितं द्वैतस्यैवाध्यस्तत्वं निगमयति—अत इति । कर्मज्ञानकाण्डयोः प्रतिज्ञातं विषयभेदेनाविरोधं निगमयति—तस्मादिति ॥ १२ ॥ १३ ॥

द्वैताद्वैतश्रुतीनां तु विरोधोऽपि प्रतीतितः ।
उक्तेनैव प्रकारेण विरोधाभाव एव हि ॥ १४ ॥

---

१ ङ. 'त्वाद्द्वैतव' । २ ग. घ. °रोधेऽपि ।

प्रत्यक्षादेरगम्यत्वाददृैतस्य तु सर्वदा ।
तत्रैवार्थवती साक्षाददृैतश्रुतिरास्तिकाः ॥ १५ ॥

मा भूत्कर्मज्ञानकाण्डयोर्विरोधः । ज्ञानकाण्ड एव द्वा सुपर्णेत्यादिवाक्यात्क-चिद्भेदोऽवगम्यते । क्वचित्पुनस्तत्त्वमस्यादिवाक्यैस्तदभेद इति द्वैताद्वैतश्रु-त्योर्विरोधादप्रामाण्यं स्यादित्याशङ्क्याऽऽह—द्वैताद्वैतेति । विरोधस्य प्रातीतिकत्वमुपपादयति—उक्तेनेति । उक्तरीत्या कल्पितद्वैतपरैव भेदश्रुतिः पर-मार्थाद्वैतपरा त्वभेदश्रुतिरिति तयोरविरोध इत्यर्थः । ननु भेदाभेदयो-रुभयोरपि श्रुत्यर्थत्वे समानेऽप्यभेदस्यैव परमार्थत्वं भेदस्य तु परिकल्पि-तत्वमित्येतत्कुतो लभ्यत इत्यत आह—प्रत्यक्षादेरिति । अनधिगतार्थगन्तृ-प्रमाणमिति मीमांसकाः । अतः प्रमाणभूता श्रुतिः प्रत्यक्षादिप्रमाणान्तरा-विषयमर्थं प्रतिपादयन्ती प्रामाण्यं भजते । अद्वैतं च प्रत्यक्षाद्यगम्यमतस्तदेव श्रुत्या तात्पर्येण प्रतिपाद्यते ॥ १४ ॥ १५ ॥

अन्तरेण श्रुतिं भेदो लोकसिद्धः सदैव तु ।
तेन नार्थवती तत्र श्रुतिर्मानातिगामिनी ॥ १६ ॥
प्रमाणान्तरसंवादापेक्षा नास्ति श्रुतेः सदा ॥ १७ ॥

अन्तरेणेति । घटपटादिभेदस्य प्रत्यक्षादिप्रमाणाधिगतत्वाच्छ्रुतेस्तत्र तात्पर्यं न युक्तम् । तथाच ह्यनुवादकत्वादप्रामाण्यं स्यादित्यर्थः । ननु प्रत्यक्षा-दिप्रमाणाविषयं शशविषाणकल्पमद्वैतं श्रुतिः कथं तात्पर्येण प्रतिपादयितुं शक्नुयादित्यत आह—मानातिगामिनीति । प्रत्यक्षादिप्रमाणान्यतीत्य तदवि-षयं स्वर्गापवर्गादिकं यथाऽवगमयति तद्वदद्वैतमपि बोधयितुं शक्तेत्यर्थः । ननु श्रुत्यर्थस्य प्रमाणान्तराविषयत्वे संवादज्ञानाभावाच्छ्रुतेरप्रामाण्यं स्यादित्यत आह—प्रमाणान्तरेति । सर्वज्ञानानां स्वतःप्रामाण्याङ्गीकाराच्छ्रुतेर्न संवादज्ञा-नापेक्षेत्यर्थः ॥ १६ ॥ १७ ॥

स्वतश्च परतो दोषो नास्ति तस्याः श्रुतेरपि ।
प्रत्यक्षादिप्रमाणानां दोषबद्भावता सदा ॥
अस्त्यतः श्रुतिरेतेषां प्रमाणानां बलीयसी ॥ १८ ॥

ननु मा भूत्संवादज्ञानापेक्षा बाधादन्यथात्वं कस्माच्च भवतीत्यत आह—स्वत

---

१ ख. छ. ज. 'र्गापूर्वादि' ।

श्रेति। दुष्टप्रमाणजनितस्य हि बाध्यत्वं श्रुतेस्तावत्स्वतो दोषो नास्ति। अर्थप्रत्यायनसमर्थत्वात्। परतोऽपि दोषो नास्ति। अपौरुषेयत्वात्। एवं निर्दुष्टप्रमाणत्वेन बाधशङ्कायां अप्यभावाच्छ्रुतेः स्वतः सिद्धं प्रामाण्यमप्रत्यूहमित्यर्थः। एवं श्रुतेर्निर्दोषत्वमभिधाय तस्याः प्रबलतरप्रामाण्यं प्रतिपादयितुं प्रत्यक्षादीनां दोषसद्भावमाह—प्रत्यक्षादीति। दोषवद्भावतेति। दोषसाहित्येनोत्पन्नतेत्यर्थः ॥ १८ ॥

कल्पितद्वैतमात्रे तु नैव मानमियं श्रुतिः।
तत्र प्रयोजनाभावात्परमार्थनिरूपणे ॥ १९ ॥
अद्वैतं परमानन्दं ब्रह्मवस्तु न चापरम्।
तत्र प्रयोजनं विप्रा अस्त्येव हि न संशयः ॥ २० ॥

एवमनधिगतार्थगन्तृ प्रमाणमितिलक्षणपर्यालोचनया प्रत्यक्षाद्यनधिगतेऽद्वैते श्रुतेः प्रामाण्यं प्रतिपादितम्। अथ प्रयोजनसद्भावादपि तत्रैव तत्प्रामाण्यं समर्थयितुं द्वैतपरत्वे प्रयोजनराहित्यमाह—कल्पितेति। प्रयोजनाभावादिति। कल्पितस्य द्वैतस्य मायामयत्वेनावस्तुत्वात्तत्प्रतिपादने श्रुतेः प्रेक्षावत्प्रवृत्तिहेतुभूतस्य कस्यचिदपि फलस्याभावादित्यर्थः। अद्वैतप्रतिपादने तु प्रयोजनसद्भावं दर्शयति—अद्वैतमिति। यस्मादद्वैतं ब्रह्मवस्तु निरतिशयानन्दरूपं तस्मात्तत्प्रतिपादनेन तत्स्वरूपावाप्तिलक्षणं सर्वोत्कृष्टं प्रयोजनं विद्यत इत्यर्थः ॥ १९ ॥ २० ॥

यत्र प्रयोजनं तत्र श्रुतिर्मानमिति स्थितिः ॥ २१ ॥
अतः प्रयोजनाभावाद्द्वैतं न प्रतिपाद्यते।
अनूद्य द्वैतमद्वैतं प्रतिपादयति श्रुतिः ॥ २२ ॥

ननु प्रयोजनवशात्प्रामाण्यव्यवस्था न युक्ता प्रमाणानुवर्तित्वात्प्रयोजनस्येत्यत आह—यत्र प्रयोजनमिति। सत्यं प्रत्यक्षादिषु प्रमाणानुवर्ति प्रयोजनम्। श्रुतिस्तु प्रयोजनवशादेव पुरुषं स्वार्थे प्रवर्तयतीति तत्प्रामाण्यं प्रयोजनाधीननिरूपणम्। अतो यस्मिन्नर्थे प्रयोजनमस्ति तत्रैव श्रुतेः प्रामाण्यमिति प्रामाणिकानां स्थितिरित्यर्थः। ननु तर्हि द्वा सुपर्णेत्यादिश्रुत्या निष्प्रयोजनो भेदः कस्मात्प्रतिपाद्यत इत्यत आह—अनूद्येति। द्वैतं प्रत्यक्षादिप्रमाणैर्लोकसिद्धं जीवेश्वरभेदमनूद्य समाने वृक्षे पुरुषो निमग्न इत्यादिना जीवभावस्याज्ञानमूलत्वप्र-

१ क. ग. प्रमाणव°।

तिपादनपुरःसरमद्वैतमेव तात्पर्येण प्रतिपादयतीत्यर्थः । एवं सर्वत्र भेदश्रुतिर्लोकसिद्धभेदानुवादार्था । अभेदश्रुतिस्तु तात्पर्येण परमार्थाद्वितीयप्रतिपादनार्थेति द्रष्टव्यम् ॥ २१ ॥ २२ ॥

स्मृतीनां च पुराणानां भारतादेस्तथैव च ।
तथा शैवागमादीनां तर्काणां च द्विजोत्तमाः ॥
अद्वैतनिष्ठतैवोक्ता न द्वैतपरता सदा ॥ २३ ॥

स्मृतिपुराणादीनामप्येवमेवाद्वैतपरत्वं न्यायतोऽवगन्तव्यमित्याह—स्मृतीनामित्यादिना । अद्वैतपरत्वं च स्मृत्यादीनां सर्वेषां षडक्षरमन्त्रार्थकथनप्रस्तावे प्रागेव प्रतिपादितम् ॥ २३ ॥

अध्यस्ताज्ञानतत्कार्यनिवृत्तिद्वारतोऽद्वयम् ।
बोधयन्ति मुदा काश्चिच्छ्रुतयः पण्डितोत्तमाः ॥ २४ ॥

ननु जातिगुणक्रियायदृच्छाभेदेन चतुष्टयी हि सकलशब्दानां प्रवृत्तिस्तत्कथं जात्यादिसकलधर्मरहितमद्वयं परशिवस्वरूपं श्रुतिस्तात्पर्येण प्रतिपादयितुं शक्नुयादित्यत आह—अध्यस्तेति । समस्तप्रपञ्चकल्पनामूलं मायाविद्यापरपर्यायं भावरूपमज्ञानं तत्कार्यं भूतभौतिकदेहेन्द्रियादिकमेतत्सर्वं परमार्थतो निरवद्ये परशिवस्वरूपेऽनादिवासनयाऽध्यस्यते तस्य च निवृत्तिस्तदधिष्ठानयाथात्म्यज्ञानात् । एवं च तां मायां तत्कार्यनिवृत्तिं प्रतिपादयन्त्यः काश्चिच्छ्रुतयस्तद्द्वारोक्तविधमखण्डैकरसं परशिवस्वरूपं तात्पर्येण प्रतिपादयन्ति । ताश्च श्रुतयः "यत्तदद्रेश्यमग्राह्यम्" "अशब्दमस्पर्शमरूपमव्ययम्" " अस्थूलमनण्वह्रस्वम् " इत्यादिकाः ॥ २४ ॥

साक्षाद्विधिमुखेनैव ब्रह्म सत्यादिलक्षणम् ।
बोधयन्ति मुदा काश्चिच्छ्रुतयः पण्डितोत्तमाः ॥ २५ ॥

विधिमुखेनेति । " सत्यं ज्ञानमनन्तं ब्रह्म " इत्यादिकाः काश्चिच्छ्रुतयो न पूर्ववन्निषेधमुखेनापि तु यत्सत्यज्ञानादिलक्षणं तद्ब्रह्मेति विधिमुखेनैव प्रतिपादयन्ति । अस्थूलमनण्वह्रस्वमित्यादिनिषेधश्रुतिष्वपि यत्स्थूलत्वादज्ञानकार्यनिवृत्त्यवधिभूतं पारमार्थिकं वस्तु तद्ब्रह्मेत्यर्थाद्विधानमस्ति ततो विशिनष्टि—साक्षादिति । अयमभिप्रायः । लोके तावत्सत्यत्वादिप्रवृत्तिनिमित्तकत्वेन सत्य-

१ ग. कार्याणां । २ ख. घ. °र्वं नि° । ३ ग. छ. ज. निरविधे ।

ज्ञानादिशब्दा व्युत्पन्नाः । अखण्डैकरसेऽद्वितीये परमात्मनि तथाविधधर्मयोगो न संभवति । अतः सत्यादिशब्दा लौकिकमेव सत्यत्वादिकं प्रवृत्तिनिमित्तत्वेनोपादायाखण्डं वस्तु सर्वदा व्यभिचाररहितत्वाभिप्रायेण सत्यमिति लक्षयन्ति । स्वपरव्यवहारप्रकाशत्वाभिप्रायेण ज्ञानमिति । अत्यन्तानुकूलवेदनीयत्वेनाऽऽनन्दमिति । तथाच सत्यादिशब्दा लौकिकमेव सत्यत्वादिकमादाय साक्षाद्विधिमुखेनैवाखण्डं वस्तु लक्षणया प्रतिपादयन्तीत्यर्थः । उक्तं हि—— " लौकिकान्येव सत्यादीन्यखण्डं लक्षयन्ति " इति । एवमतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च श्रुतिस्तात्पर्येणाद्वैतं प्रतिपादयितुं शक्तेत्यर्थः ॥ २५ ॥

साधकस्यैव जीवस्य स्वाभाविकशिवात्मताम् ।
बोधयन्ती श्रुतिर्भ्रान्तजीवत्वं बाधते खलु ॥ २६ ॥

एवं श्रुतेरद्वितीयपरशिवस्वरूपप्रतिपादनप्रकारमभिधाय तत्त्वमस्यादिमहावाक्यैर्जीवेश्वरतादात्म्यप्रतिपादनप्रकारं दर्शयति—साधकस्यैवेति । " तत्सृष्ट्वा तदेवानुप्राविशत् " " अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि " इत्यादिश्रुतेः परमेश्वर एव हि साक्षाज्जीवः । अतो जीवभावापन्नस्य यत्स्वाभाविकमद्वितीयपरशिवात्मत्वं तत्प्रतिपादयन्ती तत्त्वमस्यादिका श्रुतिर्मलिनसत्त्वप्रधानमायोपाधिकं परमार्थवत्प्रतीयमानमात्मनो यद्भ्रान्तं जीवत्वं तन्निवारयति । जगत्कारणोपाधिकं यत्सत्यज्ञानादिलक्षणं यच्चाज्ञानतत्कार्योपाधिकं सर्वप्रत्यग्भूतं चैतन्यं तदुभयमेकमेवेति सोऽयं देवदत्त इतिवद्विरुद्धांशपरिहारेण वाक्यं बोधयतीत्यर्थः ॥ २६ ॥

जीवत्वं चेतनस्यास्य स्वाभाविकमिति द्विजाः ॥
केचिद्वदन्ति वार्तैषा न तत्स्वाभाविकं सदा ॥ २७ ॥
यदि स्वाभाविकं तर्हि जीवत्वं सर्वदा भवेत् ।
नास्ति तस्य निवृत्तिर्हि स्वतःसिद्धं न नश्यति ॥ २८ ॥

अथ पराभिमतमात्मस्वाभाविकजीवत्वपक्षमनुभाष्य दूषयति—जीवत्वं चेतनस्येत्यादिना । यद्यात्मनो जीवत्वं स्वाभाविकं स्यात्तर्हि तस्य मुक्तावस्थायामपि निवृत्तिर्न स्यात्स्वभावस्यानपायात् । अतो मुक्तानामपि सुखदुःखानुवृत्तिः स्यादित्यर्थः । २७ ॥ २८ ॥

---

१ क. ग. घ. ङ. च. छ. ज. 'दिकं सा' । २ ङ. 'तं बोधयेत्खलु' ।

यथा भेषजसंपर्कात्ताम्रस्य मलनाशनम् ।
तथा जीवस्य दुःखादिनिवृत्तिः केनचिद्भवेत् ॥ २९ ॥

जीवत्वस्य स्वाभाविकत्वेऽपि मुक्तिसंभवमाशङ्क्य ते—यथेति । यथाऽम्लसंपर्कात्ताम्रस्य स्वभावभूतं मलं निवर्तते । एवं केनचित्परमेश्वरसमाराधनादिना साधनेन जीवस्य सुखदुःखादिसंसारभावात्मकजीवत्वनिवृत्तौ सत्यां परशिवसायुज्यरूपा मुक्तिः किं न स्यादित्यर्थः ॥ २९ ॥

रसविद्धमयः स्वर्णं यथा भवति सर्वदा ।
केनचित्साधनेनैव तथा जीवः शिवो भवेत् ।
इति केचित्स्वमोहेन प्रवदन्ति तु वादिनः ॥ ३० ॥

अम्लेन निवर्तितस्यापि ताम्रमलस्य कालान्तरे पुनरुद्भवदर्शनात्तद्वदेव मुक्तानामपि जीवत्वस्य पुनरुद्भवमाशङ्क्य निदर्शनान्तरेण तामाशङ्कां निरस्यति—रसविद्धमिति । अयसो यथा रसवेधेन स्वाभाविकमयस्त्वं निवर्तते स्वर्णत्वमेव सर्वदा भवति न पुनः कालान्तरेऽप्ययस्त्वस्यानुवृत्तिस्तथैव स्वाभाविकजीवत्वस्याप्यात्यन्तिकनिवृत्त्या हि शिवसायुज्यमित्यर्थः ॥ ३० ॥

तन्न संप्रतिपन्नं हि स्वतःसिद्धं न नश्यति ॥ ३१ ॥
यथा स्वाभाविकं वह्नेरौष्ण्यं नैव विनश्यति ।
प्रकाशो वा तथाऽस्यापि न दुःखादिर्विनश्यति ॥ ३२ ॥

तदेतन्निराकरोति—तन्नेति । यथा स्वाभाविकमिति । अग्निस्वभावभूतस्य दाहप्रकाशादेर्विनाशाभावात्स्वाभाविकजीवत्वस्यापि विनाशो दुर्घट इत्यर्थः ॥ ३१ ॥ ३२ ॥

मणिमन्त्रौषधादीनां शक्तिवैचित्र्यमात्रतः ।
[1]नष्टवत्प्रतिबद्धं तु न नष्टं संमतं हि तत् ॥ ३३ ॥

ननु मणिमन्त्रादिसामर्थ्यादग्नेरौष्ण्यप्रकाशयोर्निवृत्तिमुपलभामहे तद्वत्साधनवैचित्र्यात्स्वाभाविकजीवत्वस्यापि निवृत्तिरित्यत आह—मणीति । अस्मिन्स्वभावभूतमौष्ण्यादिकं मणिमन्त्रादिसामर्थ्यात्प्रतिबद्धमेव केवलं न तु नष्टम् ॥ ३३ ॥

यथा ताम्रमलं नैव केनचित्प्रविनश्यति ।
नष्टवत्प्रतिबद्धं हि विनष्टं मन्वतेऽबुधाः ॥ ३४ ॥

---

१ ग. °रेण पु° । २ ङ. नष्टप्रवृत्तिव° ।

एवमेव ताम्रमलस्यापि स्वभावसिद्धस्य नाशासंभवमाह—यथेति । अबुधा अज्ञजनाः । प्रतिबद्धमित्येतदजानाना विनष्टमिति मन्वत इत्यर्थः ॥ ३४ ॥

जीवत्वं च तथाऽस्यापि सुखदुःखादिलक्षणम् ।
नष्टवत्प्रतिबद्धं स्यान्नैव नश्यति केनचित् ॥ ३५ ॥

उक्तमर्थं दार्ष्टान्तिके योजयति—जीवत्वमिति । सुखदुःखादिलक्षणस्य स्वाभाविकस्य जीवत्वस्य केनचित्साधनेन प्रतिबन्ध एव केवलं स्यान्न तु नाशः संभवतीत्यर्थः ॥ ३५ ॥

पयसा वेष्टितं तोयं पय इत्यभिधीयते ॥ ३६ ॥
रजतं काञ्चनग्रस्तं हेम इत्यभिधीयते ।
तथैव रसवीर्येण वह्निसंपर्कतोऽपि च ॥ ३७ ॥
अयसो हेमवर्णत्वं न हेमत्वं कदाचन ।
रसवीर्यविनाशो तु वर्णस्तस्य विनश्यति ॥ ३८ ॥

ननूक्तं रसवेधदृष्टान्तेन स्वाभाविकस्याप्यत्य.तनिवृत्तिरिति तत्राऽऽह—पयसेत्यादिना । यथा पयसा मिश्रितं नीरं पयोवर्णमेव यथा वा काञ्चनेन मिश्रितं रजतं काञ्चनवर्णमेव तथैव ह्ययो रसवीर्येण संपर्कात्केवलं हेमवर्णं स्यान्न त्वयसः कदाचिदपि हेमत्वमिति संबन्धः ॥ ३६ ॥ ३७ ॥ ३८ ॥

कृतकस्य न नित्यत्वमिति वार्ता भुवि स्थिरा ।
तथाऽपि मानवा भ्रान्ताः काञ्चनं मन्वते ह्ययः ॥ ३९ ॥

ननु रसवीर्यस्यामोघत्वेन विनाशाभावात्तत्कृतो वर्णनाशः कथं स्यादित्यत आह—कृतकस्येति । यत्कृतकं तदनित्यमिति व्याप्तेः सर्वत्र निरङ्कुशत्वादित्यर्थः ॥ ३९ ॥

सूक्ष्मदर्शनहीनानां सुलभः खलु विभ्रमः ।
तथा शिवत्वं जीवस्य भ्रान्त्या सिद्धं भविष्यति ॥ ४० ॥

तथा शिवत्वमिति । यथा सूक्ष्मदर्शनराहित्येन वर्णमात्रदर्शनादयसि काञ्चनत्वभ्रमस्तथा स्वभावतो जीवस्य शिवात्मकत्वं भ्रान्त्यैव भवेन्न तु परमार्थतः संभवतीत्यर्थः ॥ ४० ॥

साधनेन स्वतो जीवो न शिवः सर्वथा भवेत् ।
ततो जीवः शिवः साक्षान्न भवेत्तु कदाचन ॥

शिव एव स्वतः साक्षाच्छिवो भवति नान्यथा ॥ ४१ ॥

कुत इत्यत आह—साधनेनेति । यदि परमार्थतो जीवः शिवादन्यः स्यात्साधनशतेनापि तस्य शिवत्वं न घटते । अन्योन्याभावस्यानाद्यनन्तत्वेन निष्टस्यानुपपत्तेरित्यर्थः । तस्माच्छिवस्य शिवत्वं न तु तद्व्यतिरिक्तस्य जीवस्य कदाचिदपि शिवत्वमिति प्रतिपादितमर्थमुपसंहरति—तत इति ॥ ४१ ॥

यथैव वह्निसंपर्कात्तोयं वह्निर्न वस्तुतः ।
उष्णं तोयमिति प्राज्ञाः प्रतीतावपि देहिनाम् ॥ ४२ ॥
तथाऽशिवः स्वतो जीवः कदाचित्पाण्डितोत्तमाः ।
शिवत्वेन प्रतीतोऽपि स्वतो नैव शिवो भवेत् ॥ ४३ ॥

ननु " मुक्तात्मानोऽपि शिवाः किं त्वेते तत्प्रसादतो मुक्ताः ।
सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुः " ॥

इत्यादिवचनप्रामाण्यात्स्वतो भिन्नानामपि जीवानां परमेश्वरानुग्रहवशाच्छिवत्वं किं न स्यादित्यत आह—यथैवेत्यादिना । अग्निधर्मस्यौष्ण्यस्य तत्संपर्कवशाज्जले प्रतीतावपि जलं नाग्निर्भवति किंतूष्णं जलमित्येव निर्दिश्यते। एवं स्वभावतो भिन्नस्य जीवस्य शिवस्वभावभूतधर्माश्रयत्वे सत्यपि न शिवात्मत्वमित्यर्थः ॥ ४२ ॥ ४३ ॥

स्वतोऽशिवस्तु जीवोऽयं सर्वथा न शिवो भवेत् ॥ ४४ ॥
केनचित्साधनेनैव मुक्तो शिवसमो भवेत् ।
इत्येवं केचिदिच्छन्ति वादिनो मुनिपुंगवाः ॥ ४५ ॥

ननु न वयं जीवस्य शिवतादात्म्यलक्षणां मुक्तिं ब्रूमः । अपि तर्हि तत्साम्यमिति केषांचिन्मतं दूषयितुमुपन्यस्यति—स्वतोऽशिव इति ॥ ४४ ॥ ४५॥

वार्तामात्रमिदं प्रोक्तं सर्वथा न तदर्थवत् ।
एकदेशेन वा जीवः किंवा सर्वात्मना समः ॥ ४६ ॥

तान्निराचष्टे—वार्तेत्यादिना ॥ ४६ ॥

एकदेशेन चेत्सर्वे शिवाः संसारवर्तिनः ।
एकदेशेन सर्वेषामस्ति साम्यं शिवेन हि ॥ ४७ ॥

जीवस्य किमेकदेशेन शिवसाम्यं विवक्षितमुत सर्वात्मनेति विकल्याऽऽद्यं

प्रत्याह—एकदेशेनेति । संसारिणामपि जीवानां चैतनत्वादिनैकदेशेन शिवसाम्यं विद्यत एवेति तेऽपि मुक्ताः स्युरित्यर्थः ॥ ४७ ॥

सर्वात्मना चेत्साम्यं तत्सर्वथा शिव एव सः ।
भेदकारणशून्यत्वाद्भेदाभावाच्च वस्तुतः ॥ ४८ ॥

नापि द्वितीय इत्याह—सर्वात्मनेति । यदि सर्वेणैवाऽऽकारेण शिवसाम्यं विवक्षितं स्यात्तर्हि तत्साम्यं न युज्यते केनचिदाकारेण व्यावृत्तयोरेव हि समानधर्मयोगादुपमानोपमेयभाव इत्यभिप्रेत्याऽऽह—भेदेति । सर्वात्मना समयोर्जीवेश्वरयोर्भेदजनकव्यावृत्ताकारविरहादत एव भेदाभावाज्जीवः शिव एव स्यान्न तु शिवसम इत्यर्थः ॥ ४८ ॥

किंच मुक्तौ शिवेनैव समो जीवो भवेद्यदि ।
कंचित्कालं हि तत्साम्यमागतं खलु गच्छति ॥ ४९ ॥

किंचास्मिन्पक्षे मुक्तेरप्यनित्यत्वमापादयति—किंचेति ॥ ४९ ॥

तस्माज्जीवः स्वतः साक्षाच्छिवः सत्यादिलक्षणः ।
अप्रच्युतात्मभावेन स्थितः सन्पराविद्यया ॥ ५० ॥
स्वाज्ञानं तत्प्रसूतं च संसारं स्वात्मना ग्रसन् ।
स्वपूर्णशिवरूपेण स्वयमेवावशिष्यते ॥ ५१ ॥

एवं पराभिमतमुक्तिस्वरूपं निराकृत्य सिद्धान्तं निगमयति—तस्मादिति । सत्यज्ञानादिलक्षणः साक्षाच्छिव एव सत्त्वपरिणामरूपनानाविधतत्तदन्तःकरणोपहितः सन्नैनपक्रान्तात्मभावेन नानाविधजीवभावं भजते । स च जीवभावापन्नः पराविद्यया स्वात्मनः पराशिवात्मत्वज्ञानेन स्वस्वरूपस्याऽऽच्छादकं भावरूपमज्ञानं तत्कार्यं संसारं चाऽऽत्ममात्रतया विलापयन्स्वात्मनो यत्परिपूर्णशिवरूपत्वं तेन स्वयमेवावशिष्यते न तु भावाभावात्मकं किमपीत्यर्थः ॥ ५० ॥ ५१ ॥

शुक्तिकाकलधौतं तु शुक्तिकावेदनेन तु ।
शुक्तिकामात्ररूपेण यथा लोकेऽवशिष्यते ॥ ५२ ॥

अमुमर्थं दृष्टान्तेन प्रतिपादयति—शुक्तिकेति । यथा शुक्तावारोपितस्य रजतस्याधिष्ठानशुक्तियाथात्म्यज्ञानेन निवृत्तौ सत्यामधिष्ठानभूता शुक्तिरेव

१ घ. घटत । २ घ. च. 'अप° । ३ ङ. °वे ना° ।

केवलमवशिष्यते न त्वन्यद्व्रजतं तदभावलक्षणं किमपि । तद्वदेव सकलजगदधिष्ठानपरशिवस्वरूपयाथात्म्यज्ञानेन समारोपितजगन्निवृत्तावधिष्ठानमात्रावशेषोऽवगन्तव्य इत्यर्थः ॥ ५२ ॥

शिवात्मना जगद्बाधो न चैवं संभविष्यति ।
अभाव एव मुक्तौ तु जगतो हि भविष्यति ॥ ५३ ॥

ननु मुक्तावस्थायां जगतः प्रतीत्यभावात्तदभावो विद्यत इति कथमधिष्ठानमात्रावशेषतेति केषांचिच्छङ्कामनुभाषते—शिवात्मनेति । मुक्तावस्थायामधिष्ठानशिवरूपेणैव जगदवतिष्ठते न तु तद्व्यतिरिक्तभावाभावात्मना रूपेणेत्येतन्न संभवति । भावाभावयोरन्यतरनिषेधस्येतरविधिनान्तरीयकत्वेन जगत्सद्भावाभावे तदभावनियमावश्यंभावात् । अतो मुक्तौ जगतोऽभाव एव न तु शिवात्मनाऽवस्थानमिति कथमधिष्ठानमात्रावशेषतेत्यभिप्रायः ॥ ५३ ॥

इत्येवं केचिदिच्छन्ति स च मन्दमतिभ्रमः ।
भावरूपं तु वस्त्वेव ह्यभावि भवति द्विजाः ॥ ५४ ॥
जगन्न भावो नाभावो भावाभावविलक्षणम् ।
तस्मादध्यस्तबाधस्तु न भावोऽभाव एव न ॥ ५५ ॥
अधिष्ठानावशेषो हि केवलं पण्डितोत्तमाः ।
जगद्भ्रमस्याधिष्ठानं शिवः सत्यस्वभावतः ॥ ५६ ॥

तदेतान्निराकरोति—स चेत्यादिना । यदेतदभावप्रतियोगित्वं जगतोऽभिमतं तन्न युज्यते । यतो भावरूपमेव घटपटाद्यभावप्रतियोगि भवति न तावज्जगद्भावरूपम् । तथात्व आत्मवत्सर्वदाऽवस्थाननियमेनाबाध्यत्वप्रसङ्गात् । नाप्यभावात्मकम् । नरविषाणवत्कदाचिदप्यप्रतिभासप्रसक्तेः । अतः प्रतीतिबाधान्यथानुपपत्त्या भावाभावविलक्षणं तदिति जगतो भावरूपत्वाभावादभावप्रतियोगित्वं न युक्तमित्यर्थः । अतोऽध्यस्तबाधो नामाधिष्ठानमात्रावशेषो नान्यद्भावाभावात्मकं किमपीति निगमयति-तस्मादिति । शुक्तिकादावध्यस्तस्य मायामयरजतादेर्भावरूपत्वाभावेनाभावप्रतियोगित्वानुपपत्त्या तद्बाधस्यावश्यमधिष्ठानमात्रावशेषत्वं स्वीकर्तव्यम् । तद्वदध्यस्तजगद्बाधोऽप्यधिष्ठानमात्रावशेषो नाभावप्रतियोगित्वमित्यर्थः । भवेदेवं यदि जगच्छुक्तौ रजतमिव क्वचिदध्यस्तं स्यात्तत्तु नाध्यस्तं योग्याधिष्ठानानुपपत्तेरित्यत आह—जगद्भ्रमस्येति । सत्य-

१ ग. °तो न भ° । घ. °तो नु भ° । २ ङ. मुक्त्यव° । ३ घ. °वात्म° । ४ घ. °षो न भ° ।

स्वभावत इति । सत्यस्यैव शुक्तिशकलादिकस्य रजताद्यधिष्ठानत्वं दृष्टमिति तदनुसारात्सत्यस्वभावः परमात्मैव जगद्विभ्रमस्याधिष्ठानमित्यर्थः ॥ ५४ ॥ ॥ ५५ ॥ ५६ ॥

तदन्यदखिलं भ्रान्तं युक्तितश्च प्रमाणतः ।
तस्मात्सर्वजगद्बाधे शिव एवावशिष्यते ॥ ५७ ॥

ननु भवत्वधिष्ठानम् । शुक्तिरजतादिवैलक्षण्याज्जगतोऽध्यस्ततत्वमयुक्तमित्त आह—तदन्यदिति । युक्तितश्च प्रमाणत इति । यदि जगदध्यस्तं न स्यात्तर्ह्यात्मवज्ज्ञाननिवर्त्यत्वमपि न स्यादित्याद्यनुकूलतर्को युक्तिः । प्रमाणं तु विमतमध्यस्तं दृश्यत्वाच्छुक्तिरूप्यवदित्याद्यनुमानम् । " सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् " " नेह नानाऽस्ति किंचन " इत्यद्वैतश्रुतिश्च । एवं प्रमाणतर्काभ्यां जगतोऽध्यस्ततत्वप्रतिपत्तेस्तन्नाशोऽधिष्ठानपरशिवस्वरूपमात्रमेव न त्वभाव इत्युपसंहरति—तस्मादिति ॥ ५७ ॥

शिवावशेषं सर्वस्य जगतः श्रुतिरादरात् ।
वक्ति तत्र न संदेहस्त्रिवः शपथयाम्यहम् ॥ ५८ ॥
तस्मात्सत्यपरानन्दप्रकाशाद्वैतमीश्वरम् ।
बोधयन्त्यादरेणैव श्रुतयः स्मृतिभिः सह ॥ ५९ ॥

श्रुतिरादरादिति । ' यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ' इति सकलभौतिकप्रपञ्चस्याधिष्ठानात्मयाथार्थ्यविज्ञानेनाऽऽत्ममात्रावशेषतां तात्पर्येण प्रतिपादयतीत्यर्थः ॥ ५८ ॥ ५९ ॥

एकत्वबोधकस्यास्य वेदवाक्यस्य सुव्रताः ।
वाक्यान्तराणि सर्वाणि शेषभूतानि संततम् ॥ ६० ॥
वेदो नान्यस्य शेषस्तु यथा देवो महेश्वरः ।
शिवस्य शेषं सकलं श्रुतेर्मानानि सर्वशः ॥ ६१ ॥

एकत्वबोधकस्येति । जीवेश्वरयोर्भेदभ्रमनिरासेन पारमार्थिकमैक्यं बोधयतस्तत्त्वमस्यादिवाक्यस्य निरतिशयानन्दावाप्तिलक्षणफलवदर्थप्रतिपादकत्वात् । 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायेन ' सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ' इत्यादीनि सर्वाण्युपनिषद्वाक्यानि तावत्तदपेक्षिततत्त्वंपदार्थप्र-

१ ख. ग. ङ. °ज्ञाधि° । २ ख. °लभूतभो° ।

तिपादनद्वाराऽङ्गभूतानि तदनुसारिस्मृतिपुराणागमवाक्यान्यपि वेदवाक्यस्योक्तरीत्या शेषभूतान्येवेत्यर्थः ॥ ६० ॥ ६१ ॥

यथा माता स्वपुत्रस्य सत्यमेवाभिभाषते ।
तथा सर्वजनस्यापि सत्यं वदति हि श्रुतिः ॥ ६२ ॥
श्रुतौ चापि महादेवे त्रिपुण्ड्रे भस्मगुण्ठने ।
श्रद्धां न कुरुते मर्त्यः पुण्यलेशविवर्जितः ॥ ६३ ॥
पापिष्ठानां मनुष्याणां त्रिपुण्ड्रोद्धूलने श्रुतौ ।
महादेवे च विद्वेषः स्वत एव विजायते ॥ ६४ ॥
वेदोत्कर्षे शिवोत्कर्षे वियोत्कर्षे तथैव च ।
त्रिपुण्ड्रोद्धूलनोत्कर्षे श्रद्धा पुण्यवतां भवेत् ॥ ६५ ॥
अविरोधे तु वेदानां पुरोक्तेनैव वर्त्मना ।
वेदानुसारिस्मृत्यादौ पापिष्ठस्य न हि स्पृहा ॥ ६६ ॥
विष्ण्वादेः शिवसाम्यत्वे वेदसाम्ये परस्य च ।
कुर्वन्तीच्छामविद्वांसः पापमेवात्र कारणम् ॥ ६७ ॥
वेदानामपकर्षे तु त्रिपुण्ड्रादेस्तथैव च ।
तथा शिवापकर्षे च यतन्ते पापयोनयः ॥ ६८ ॥
महादेवश्च वेदश्च तथा तिर्यक्त्रिपुण्ड्रकम् ।
व्यर्थमित्याहुरत्यर्थं पाषण्डाः पापयोनयः ॥ ६९ ॥
महादेवस्य माहात्म्यं वेदानामपि वैभवम् ।
त्रिपुण्ड्रस्य च माहात्म्यं न शक्यं वर्णितुं मया ॥ ७० ॥

॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

कर्मशेषत्वमायासाद्बह्वकाण्डस्य केचन ।
वर्णयन्ति न ते सन्तः किं तु ते विप्रलम्भकाः ॥ ७१ ॥

कर्मशेषत्वमिति । स्वर्गाद्याधुष्मिकफलसाधनस्य ज्योतिष्टोमादिकर्मणोऽनुष्ठाने तत्फलभोगादेहातिरिक्तः कश्चिदात्मा विद्यत इत्यवश्यमधिगन्तव्यम् ।

१ घ. 'भोगी देहा' ।

तथाच कर्मापेक्षितदेहव्यतिरिक्तात्मप्रतिपादनद्वारा ज्ञानकाण्डस्य कर्मकाण्डशेषत्वं केचिन्मन्यन्ते। न चैतद्युक्तं ज्ञानकाण्डस्य कर्मोपयुक्तकर्तृत्वभोक्तृत्वादिसकलसंसारधर्मरहितात्मस्वरूपप्रतिपादनपरत्वादित्याशङ्क्याऽऽह—आयासादिति। उक्तविधात्मस्वरूपप्रतिपादकवाक्यसंदर्भस्योपासनाविषयत्वसमर्थनलक्षणमायासात्प्रा(सं प्रा)प्येत्यर्थः। तदेतन्निराकारोति- न त इति। विप्रलम्भका इति। 'ब्रह्मविदाप्नोति परम्' 'ब्रह्म वेद ब्रह्मैव भवति' 'यत्तदद्रेश्यमग्राह्यम्' 'स पर्यगाच्छुक्रमकायमव्रणम्' "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्" इत्यादीनामुपासनाविधिगन्धेनाप्यसंस्पृष्टानां तात्पर्येणासंसार्यात्मबोधकानां वाक्यानामन्यथाभिप्रायकल्पनात्तेषां विप्रलम्भकत्वमित्यर्थः ॥ ७१ ॥

कर्तृत्वं चैव भोक्तृत्वं नियोज्यत्वं क्रियाफलम्।
ग्रसते ब्रह्मविज्ञानं ततस्तच्छेषताऽस्य न ॥ ७२ ॥

ज्ञानकर्मणोः स्वरूपफलादिपर्यालोचनयाऽङ्गाङ्गिभावानुपपत्तेरिति हेतुमाह—कर्तृत्वं चेत्यादिना। देहातिरिक्तस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्याऽऽत्मनो ज्ञानं हि कर्मापेक्षितम्। ज्ञानकाण्डस्तु कर्तृत्वभोक्तृत्वादिसकलसंसारधर्मासंस्पृष्टमद्वितीयमात्मतत्त्वं तात्पर्यतोऽवगमयति न तु देहातिरिक्तकर्त्रात्मस्वरूपमात्रम्। तथा चौपनिषदमद्वितीयात्मविज्ञानं प्रत्यगात्मन्युपाधिवशाद्भासमानं कर्मापेक्षितं कर्तृत्वभोक्तृत्वादिसकलधर्मं विलापयत्कथं कर्मणः शेषभूतं स्याद्विरोधादित्यभिप्रायः। नियोगो नाम यद्यभिधेयमपूर्वं तद्धोढृत्वेन पुरुषस्य नियोज्यत्वं तन्निष्पादकत्वं कर्तृत्वम्। एतच्च द्वादशेऽध्याये—"नियोज्यत्वं च कर्तृत्वं भोक्तृत्वं च तथैव च" इत्यत्र विस्तरेण प्राक्प्रतिपादितमित्युपरम्यते ॥ ७२ ॥

अल्पलाभप्रदं कर्म ज्ञानं पूर्णफलप्रदम्।
तथा सति मुनिश्रेष्ठास्तच्छेषत्वं कथं भवेत् ॥ ७३ ॥

अल्पलाभप्रदमिति। स्वर्गपशुपुत्रादिकं स्वल्पमेव फलं कर्म प्रयच्छति। विज्ञानं तु परमानन्दावाप्तिलक्षणं परिपूर्णं फलं प्रयच्छति। अल्पं हि लोकेऽधिकं प्रत्यङ्गत्वेन दृष्टं स्वामिभृत्यादौ। तस्मादधिकफलं ज्ञानं न्यूनफलस्य कर्मणोऽङ्गमित्येतन्न युक्तमित्यर्थः ॥ ७३ ॥

---

१ ख. घ. °संसृष्टा°। २ ग. °दिति भावः। नि°। ३ घ. ङ. °ल्पफलप्र° । ४ घ. ङ. °ल्पफलप्र°।

फलवत्कर्मशेषत्वमफलस्य हि सिध्यति ।
फलवद्धि परं ज्ञानं ततस्तच्छेषताऽस्य न ॥ ७४ ॥

फलवदिति । अफलस्य हि प्रयाजादेः कैमर्थक्यवशात् " फलवत्संनिधावफलं तदङ्गम् " इति न्यायेन फलवदाग्नेयादियागशेषत्वं दृश्यते । ज्ञानस्य तु पृथक्फलसद्भावस्य श्रुतत्वेन फलाकाङ्क्षाया अभावान्नान्यशेषत्वमित्यर्थः ॥ ७४ ॥

कर्मप्रकरणस्थं हि ज्ञानं कर्माङ्गमिष्यते ।
भिन्नप्रकरणं ज्ञानं ततस्तच्छेषताऽस्य न ॥ ७५ ॥

ननु यथा प्रयाजविधिवाक्यशेषेण "वर्म वा एतद्यज्ञस्य क्रियते" इत्यादिना श्रुतस्य फलस्य "अङ्गे फलश्रुतिरर्थवादः" इति न्यायेनार्थवादत्वं तथा ज्ञानफलस्याप्यर्थवादत्वात्प्रयाजवदङ्गत्वं किं न स्यादित्यत आह—कर्मप्रकरणेति । प्रयाजादेर्हि दर्शपूर्णमासप्रकरणपठितत्वेनाङ्गाङ्गिभावस्य निर्णीतत्वाद्युक्तं तदीयफलश्रवणस्यार्थवादत्वम् । तथा ज्ञानं कस्यचित्कर्मणः प्रकरणे स्थितं येन फलश्रुतेरर्थवादता कल्प्येत । अतः प्रकरणभेदादपि ज्ञानस्य न कर्माङ्गत्वम् ॥ ७५ ॥

कर्म साध्यफलं ब्रह्मज्ञानं सिद्धफलं बुधाः ।
तथा सति मुनिश्रेष्ठास्तच्छेषत्वं कथं भवेत् ॥ ७६ ॥

कर्म साध्यफलमिति । यागहोमादिक्रियानिष्पाद्यत्वात्स्वर्गादेः । सिद्धफलमिति । ज्ञानप्राप्यस्य फलस्य नित्यशुद्धबुद्धमुक्तात्मस्वरूपत्वादित्यर्थः ॥ ७६ ॥

अधिकारिविभेदेन प्रवृत्तं मुनिपुंगवाः ।
काण्डद्वयमतोऽन्यस्य कथमन्यद्गुणो भवेत् ॥ ७७ ॥

अधिकारिविभेदेनेति । कर्मकाण्डे स्वर्गपुत्रादिफलरागयुक्तोऽधिकारी वैराग्यादियुक्तस्तु ज्ञानकाण्डस्येत्यधिकारिविशेषमुपादाय प्रवृत्तत्वेनेत्यर्थः ॥ ७७ ॥

कर्माज्ञानस्य सद्भावे न तथा ब्रह्मवेदनम् ।
तथा सति कथं विप्रा ज्ञानकर्मसमुच्चयः ॥ ७८ ॥

ज्ञानकर्मणोः सहावस्थानासंभवादप्यङ्गाङ्गिभावो न युक्त इत्याह—कर्माज्ञानस्येति । सर्वानर्थप्रपञ्चस्य मूलभूतं प्रत्यगात्मनः पारमार्थिकपरशिवस्वरूपत्वाच्छादकमज्ञानं सविलासे तस्मिन्सत्येव कर्म तत्प्रसादेन स्वात्मानं लभते ।

अद्वैतज्ञानं तु तदज्ञानं निवर्तयदाविर्भवति । तथाच ज्ञानकर्मणोः सहावस्थान-विरोधादङ्गाङ्गिभावेन न समुच्चयो घटत इत्यर्थः ॥ ७८ ॥

अप्रकाशात्मकं कर्म स्वप्रकाशं तु वेदनम् ।
तथा सति कथं विप्रा ज्ञानकर्मसमुच्चयः ॥ ७९ ॥

अप्रकाशात्मकमिति । अज्ञानकार्यत्वात्कर्माप्रकाशात्मकम् । प्रकाशब्रह्मात्मकत्वाज्ज्ञानं प्रकाशात्मकम् । तथाच तमःप्रकाशयोरिवानयोः सहावस्थानानुपपत्त्या कथमङ्गाङ्गिभावेन समुच्चय इत्यर्थः ॥ ७९ ॥

तस्माद्वेदान्तभागस्तु ब्रह्मकाण्डसमाह्वयः ।
सर्वथा कर्मकाण्डस्य नैव शेषः कदाचन ॥ ८० ॥

एवं ज्ञानस्य कर्मशेषत्वानुपपत्तेस्तत्प्रतिपादको वेदान्तभागो न कर्मकाण्ड-शेष इत्युपसंहरति—तस्मादिति ॥ ८० ॥

तथैव कर्मभागश्च ब्रह्मकाण्डस्य सर्वथा ।
न साक्षादेव शेषः स्याज्ज्ञानं वेदान्तवाक्यजम् ॥ ८१ ॥

ननु तर्हि कर्मकाण्ड एव ज्ञानकाण्डस्य शेषो भवत्वित्यत आह—तथैवेति। परम्परया शेषत्वस्योपरिष्टाद्वक्ष्यमाणत्वात्तद्व्यावृत्तये विशिनष्टि—न साक्षादिति । ननु तदद्वितीयपरशिवस्वरूपज्ञानं केन प्रमाणेन जन्येत कानि पुनस्तदुत्पत्त्यनुकूलव्यापारनिष्पादनेनाङ्गभावं भजन्ते किंवा तदुत्पत्तौ करणं फलोपकार्यङ्गं च किमित्येतत्सर्वं क्रमेणाऽऽह—ज्ञानं वेदान्तवाक्यजमित्यादिना ॥ ८१ ॥

शान्तिदान्त्यादयः सर्वे गुणा एव मुनीश्वराः ।
अङ्गानि ब्रह्मविद्यायाः श्रवणं करणं बुधाः ॥ ८२ ॥

शान्तिदान्त्यादय इति । " शान्तो दान्त उपरतस्तितिक्षुः " इत्यादिश्रुत्युक्तमुपरत्यादिकमादिशब्दग्राह्यम् ॥ ८२ ॥

विद्याफलोपकारि स्यान्मननं चिन्तनं तथा ।
ज्ञानमज्ञानविच्छित्तौ न सहायमपेक्षते ॥ ८३ ॥

विद्याफलोपकारीति । करणभूतस्य वेदान्तवाक्यार्थविचारात्मकस्य श्रवणस्य जीवब्रह्मतादात्म्यगोचरविद्याजननलक्षणं यत्फलं तदुपकारकमित्यर्थः । अत एवाऽऽम्नायते—' आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ' इति । सा च श्रुतिरेवमाचार्यैर्व्याख्याता—" आत्मदर्शनमुद्दिश्य

मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां श्रवणं नामाङ्गि विधीयते" इति ॥ ८३ ॥

तमोनिवृत्तौ सूर्यस्तु यथा नान्यदपेक्षते ।
तथाऽज्ञाननिवृत्तौ तु ज्ञानं नान्यदपेक्षते ॥ ८४ ॥

विद्यायाः स्वोत्पत्तावेव करणोपकरणाद्यपेक्षा न तु स्वकार्येऽन्यदपेक्षत इत्येवं दृष्टान्तेनोपपादयति—तमोनिवृत्ताविति ॥ ८४ ॥

क्षणध्वंसिक्रियायास्तु धर्माधर्मात्मकं फलम् ।
न ज्ञानं तेन विद्याया न साक्षात्कर्म साधनम् ॥ ८५ ॥
अधर्मस्य फलं साक्षान्नरकप्राप्तिरेव हि ।
न ज्ञानं तेन विद्याया नाधर्मः साधनं भवेत् ॥ ८६ ॥
धर्मस्य पापविच्छित्तिद्वारा शुद्धिस्तु मानसी ।
फलं न ब्रह्मविज्ञानं तेन धर्मो न साधनम् ॥ ८७ ॥

श्रवणादिवत्कर्मणोऽपि प्रसक्तं विद्योत्पत्तिसाधनत्वं निराकरोति—क्षणध्वंसीत्यादिना ॥ ८५ ॥ ८६ ॥ ८७ ॥

कर्मणा शुद्धचित्तस्य संसृतेर्दोषदर्शनम् ।
पुनर्विरक्तिः संसारान्मोक्षेच्छा जायते तथा ॥ ८८ ॥

एवं साक्षाद्विद्यासाधनत्वं कर्मणो निराकृत्य "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इत्यादिश्रुत्या विहितं परम्परया तत्साधनत्वमाह—कर्मणा शुद्धचित्तस्येति ॥ ८८ ॥

तस्मात्कर्म प्रनाड्यैव ज्ञानशेषं न चान्यथा ।
अत एवोक्तमार्गेण तयोः समसमुच्चयः ॥ ८९ ॥
सुतरामेव नास्त्येव सम्यगुक्तं मयाऽनघाः ।
अतश्चान्योन्यसंबन्धः काण्डयोर्नैव विद्यते ॥ ९० ॥

उक्तमार्गेणेति। विज्ञानस्य कर्मशेषत्वनिराकरणप्रस्तावे कर्माज्ञानस्य सद्भाव इति यदुक्तं तेनेत्यर्थः ॥ ८९ ॥ ९० ॥

१ च॰ °र्थे वेदेनेऽन्य°।

न्यायाभासं महामोहादवलम्ब्य नराधमाः ।
विप्लावयन्ति वेदार्थं नैतेषां मतिरुत्तमा ॥ ९१ ॥
प्रत्युत भ्रान्तिविज्ञानाद्वेदान्तार्थस्य बाधनात् ।
कदा संसारवर्तित्वमेव तेषां न संशयः ॥ ९२ ॥
अहो मोहस्य माहात्म्यं सर्ववेदार्थवर्जिताः ।
परिभ्रमन्ति वेदार्थादन्यत्रैव विचेष्टिताः ॥ ९३ ॥
वेदानशेषानवधार्य मर्त्यो मदुक्तवेदान्तविचारमार्गम् ।
उपैति पुण्येन च शंभुभक्त्या शिवप्रसादेन न चेतरेण ॥९४॥
अविरोधः कथितो मया द्विजाः कृपयैव श्रुतिगोचरस्तु वः ॥
मतिरेषा मनुजस्य मुक्तिदा विपरीता मतिरस्य नाशिनी॥९५॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे वेदा-
नामविरोधनिरूपणं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे वेदानामवि-
रोधनिरूपणं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

अथ चत्वारिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि सर्वसिद्धिकरं नृणाम् ।
मया नोक्तमितः पूर्वमतिगुह्यमनुत्तमम् ॥ १ ॥
कायिकं वाचिकं चैव मानसं च तथैव च ।
त्रिविधं कर्म कर्तव्यं सर्वसिद्ध्यर्थमास्तिकैः ॥ २ ॥

एवं कर्मणां चित्तशुद्धिद्वारा परम्परया ज्ञानशेषत्वमुक्तम् । अथ किं तत्कर्मेति तद्वक्तुं प्रतिजानीते—अथात इति ॥ १ ॥ २ ॥

१ घ. 'र्थं न ते° ।

सर्वसिद्धिकरं कर्म कायिकं बहुधा स्मृतम् ।
लिङ्गे शिवार्चनं चैव रुद्राक्षाणां च धारणम् ॥ ३ ॥
अग्निरित्यादिभिर्मन्त्रैर्जाबालोक्तैश्च सप्तभिः ।
त्रियायुषेण मन्त्रेण भस्मना सजलेन च ॥ ४ ॥
सर्वाङ्गोद्धूलनं चैव त्रिपुण्ड्रस्य च धारणम् ।
शिवस्योत्सवसेवा च शिवक्षेत्रेषु वर्तनम् ॥ ५ ॥
॥ ३ ॥ ४ ॥ ५ ॥

वाचिकं कर्म विप्रेन्द्राः सर्वसिद्धिकरं नृणाम् ।
चिन्मन्त्रस्य जपस्तद्वत्पदाख्यस्य जपस्तथा ॥ ६ ॥
प्रणवस्य जपस्तद्वद्धंसाख्यस्य मनोर्जपः ।
षडक्षरस्य मन्त्रस्य सावित्र्याश्च जपस्तथा ॥ ७ ॥
वेदपारायणं चैव वेदाङ्गानां च कीर्तनम् ।
मानसं कर्म विप्रेन्द्राः सर्वसिद्धिकरं नृणाम् ॥ ८ ॥
महादेवस्मृतिः साक्षान्महादेव्याः स्मृतिस्तथा ।
वेदान्तार्थविचारश्च वेदे ऽन्यत्र विस्मृतिः ॥ ९ ॥
विरक्तिः सर्वलोकेभ्यो वेदार्थे निश्चयोऽचलः ।
स्मार्ते पौराणिकेऽप्यर्थे निश्चयश्च तथैव च ॥ १० ॥
शिवस्योत्कर्षताबुद्धिः शिवोऽहमिति भावना ।
एते धर्मा विशिष्टाः स्युः सर्वसिद्धिकरा अपि ॥ ११ ॥

चिन्मन्त्रस्येति । संविद्रूपिण्याः परशक्तेर्वाचको हृल्लेखामन्त्रश्चिन्मन्त्रः । पदाख्यस्येति । मातृकोत्पत्तावपदं पदमापन्नमित्यादिना चतुर्थेऽध्याये प्रतिपादितत्वात्पदाख्योऽयं मातृकामन्त्रः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

एभ्योऽतिरिक्ता ये धर्माः श्रौतस्मार्तास्तथाऽपरे ।
ते तु वेदविदां मुख्याः सर्वसिद्धिकरा न हि ॥ १२ ॥
महादेवस्तु सर्वात्मा सर्ववस्त्ववभासकः ।
सर्वानन्दकरः पूर्णः सर्वदेवोत्तमोत्तमः ॥ १३ ॥

यद्यपि शिवार्चनभस्मोद्धूलनचिन्मन्त्रपदमन्त्रजपादिकमात्मविद्याहेतुत्वेन प्रागेव प्रतिपादितं तथाऽपि सर्वसिद्धिकरत्वमेतस्यैव नान्येषां श्रौतस्मार्तानां कर्मणामित्येतद्दर्शयितुं पुनः प्रतिपादनम् । तदाह—एभ्योऽतिरिक्ता इत्यादिना ॥ १२ ॥ १३ ॥

तस्यासाधारणा धर्मा एत एव न चापरे ।
तस्मादेते हि सर्वेषां सर्वसिद्धिकरा नृणाम् ॥ १४ ॥
सत्तासिद्धिश्च सर्वेषां महादेवप्रसादतः ।
विष्ण्वादीनामतो धर्माः पूर्वोक्ताः सर्वसिद्धिदाः ॥ १५ ॥
मुखतो मोक्षदा ह्येते पृष्ठतः सर्वसिद्धिदाः ।
शीघ्रसिद्धिकराश्चैव शिवासाधारणत्वतः ॥ १६ ॥
शिवेन सदृशो देवो यथा विप्रा न विद्यते ।
तथैवैभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ १७ ॥
शिवज्ञानसमं ज्ञानं यथा नास्ति द्विजर्षभाः ।
तथैवैभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ १८ ॥
वेदमानसमं मानं यथा नास्ति द्विजर्षभाः ।
तथैवैभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ १९ ॥
भूमिदेवसमो मर्त्यो यथा नास्ति द्विजर्षभाः ।
तथैवैभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ २० ॥
मेरुणा पर्वतस्तुल्यो यथा लोके न विद्यते।
तथैवैभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ २१ ॥
अन्नपानसमं किंचिन्न हि देहस्थितौ यथा ।
तथैवैभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ २२ ॥
यथा भागीरथीतुल्या नदी लोके न विद्यते ।
तथैवैभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ २३ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

१ ग. च. 'तस्य सा°' ।

शिवस्थानसमं स्थानं यथा लोके न विद्यते ।
तथैवौभिः समा धर्मा न विद्यन्ते श्रुतौ स्मृतौ ॥ २४ ॥
सर्वसिद्धिकरा मुनिपुंगवा
एत एव सदैव न चापरे ।
चोदितेषु न संशयकारणं
केवलं कृपयैव मयोदितम् ॥ २५ ॥
इति श्रीसूतसंहितायां चतुर्थे यज्ञवैभवखण्डे सर्वसिद्धिकरधर्मविचारो नाम चत्वारिंशोऽध्यायः ॥ ४० ॥

॥ ७४ ॥ २५ ॥

इति श्रीसूतसंहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे सर्वसिद्धिकरधर्मविचारो नाम चत्वारिंशोऽध्यायः ॥ ४० ॥

अथैकचत्वारिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि पातकानि समासतः ।
शृणुत श्रद्धया सार्धं परिहाराय सुव्रताः ॥ १ ॥
पातकानि समासेन दश प्रोक्तानि सूरिभिः ।
तारतम्यक्रमेणैव तेषामस्त्येव लाघवम् ॥ २ ॥

एवं विद्योत्पत्त्यनुकूलं कायिकवाचिकमानसभेदेन त्रिधाऽवस्थितं कर्म प्रतिपाद्य तदुत्पत्तिप्रतिबन्धकानां पापानामनिर्ज्ञातस्वरूपाणां परिहारासंभवात्तत्परिहाराय तत्स्वरूपं वक्तुमारभते—अथात इति । परिहारायेति परित्यागार्थमित्यर्थः । अत एवोक्तं शाबरभाष्ये—" अधर्मोऽपि विजिज्ञास्यः परिहाराय " इति ॥ १ ॥ २ ॥

प्रथमं पातकं प्रोक्तं महापातकसंज्ञितम् ।
द्वितीयमतिपापाख्यं ततः प्रासङ्गिकाभिधम् ॥ ३ ॥

---

१ ग. एतदेव ।

चतुर्थं पातकं प्रोक्तं पञ्चमं चोपपातकम् ।
जातिभ्रंशकरं षष्ठं संकीर्णकरणं ततः ॥ ४ ॥
अपात्रीकरणं पश्चान्नवमं तु मलावहम् ।
प्रकीर्णकसमाख्यं तु दशमं पातकं द्विजाः ॥ ५ ॥
प्रतिषिद्धसुरापानं ब्रह्महत्या तथैव च ।
ब्राह्मणानां सुवर्णस्य हरणं मुनिपुंगवाः ॥ ६ ॥
जननीगमनं चैव संयोगस्तैः सह द्विजाः ।
महान्ति पातकान्याहुर्मुनयः सूक्ष्मदर्शिनः ॥ ७ ॥
असाक्षान्मातृगमनं स्वपुत्रीगमनं तथा ।
स्नुषाया गमनं तद्वद्भगिनीगमनं तथा ॥ ८ ॥
शिवस्य मूर्तिचलनं विष्णोश्च ब्रह्मणस्तथा ।
अतिपातकमित्याहुर्मुनयो वेदवित्तमाः ॥ ९ ॥
॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥
राजन्यवैश्ययोर्हिंसा यज्ञसंबन्धिनस्तथा ।
रजस्वलाया गर्भिण्या आर्तायाश्च वधस्तथा ॥ १० ॥
यज्ञसंबन्धिन इति । प्रवृत्तयज्ञस्य दीक्षितस्येत्यर्थः ॥ १० ॥
अविज्ञातस्य गर्भस्य शरणागतदेहिनः ।
कौटसाक्ष्यं सुहृद्धिंसा ब्राह्मणस्य तपोधनाः ॥ ११ ॥
पृथिवीहरणं तद्वत्पितृव्यस्य तथैव च ।
मातामहस्य विप्रेन्द्रा मातुलस्य नृपस्य च ॥ १२ ॥
भार्याभिगमनं तद्वत्प्राहुः प्रासङ्गिकाभिधम् ।
स्वमातुः सोदरायास्तु गमनं तद्वदेव तु ॥ १३ ॥
मातृष्वसुर्मातृसख्युर्दुहितुर्गमनं तथा ।
मातुलानीस्नुषाश्वश्रूगमनं च तथैव च ॥ १४ ॥
॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

१ ब. 'तिभ्रष्टक' । २ ग. अत्रेया' । घ. ङ. आत्रेयाश्च ।

त्रिपुण्ड्रधारणाभावो भूत्याऽनुद्धूलनं तथा ।
पुण्ड्रान्तरस्य विप्रेन्द्रा धारणं तद्वदेव तु ॥ १५ ॥
पाशाङ्कुशगदादण्डशङ्खचक्रादिभिर्द्विजाः ।
अङ्कनं विग्रहे सन्तः पातकं प्राहुरास्तिकाः ॥ १६ ॥
मातापित्रोः स्वसुश्चैव गमनं श्रोत्रियस्य च ।
ऋत्विगध्यापकस्यापि मित्रस्य च तथैव च ॥ १७ ॥
भार्याभिगमनं तद्वत्स्ववधूसख्युरास्तिकाः ।
स्वगोत्रायास्तथा विप्रकन्यकायास्तथैव च ॥ १८ ॥
चतुर्थाश्रमनिष्ठाया निक्षिप्तायास्तथैव च ।
पाषण्डेषु च निष्ठानां संबन्धो द्विजपुंगवाः ॥ १९ ॥
स्वस्यैव शरणं प्राप्तस्त्रिया गमनमेव च ।
दुर्गादित्यादिदेवानां चालनं विग्रहस्य च ॥ २० ॥
मुख्योपपातकं प्राहुर्महान्तो वेदवित्तमाः ।
असत्यभाषणं तद्वत्पैशुन्यं राजगामि च ॥ २१ ॥
गुरोश्चालीकनिर्बन्धो वेदनिन्दा तथैव च ।
अधीतायाः श्रुतेस्त्यागः स्वाग्नेस्त्यागस्तथैव च ॥२२॥
पितृमातृस्वसृत्यागः स्वभार्यात्याग एव च ।
अभक्ष्यभक्षणं तद्वत्परार्थग्रहणं तथा ॥ २३ ॥
परदारनिषेवा च तथाऽयाज्यस्य याजनम् ।
भृतकाध्यापनं तद्वद्भृताध्ययनमेव च ॥ २४ ॥
॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥२३॥२४॥
सर्वाधिकारकरणं महायन्त्रप्रवर्तनम् ।
द्रुमगुल्मलतादीनां हिंसया जीवनं तथा ॥ २५ ॥

महायन्त्रप्रवर्तनमिति । इक्षुयन्त्रादिप्रवर्तनमित्यर्थः ॥ २५ ॥

---

१ म. ङ. च. °र्वाकारासिकारं च स° ।

अभिचारक्रिया तद्वत्स्वस्यैव पचनं तथा।
अनाहिताग्निना तद्वद्ब्रह्मचर्यविवर्जनम् ॥ २६ ॥
यज्ञस्याकरणं तद्वत्पुत्रानुत्पादनं तथा।
असच्छास्त्राभिगमनं नास्तिक्यं च कुशीलता ॥ २७ ॥
मद्यपस्त्रीनिषेवा च प्राहुर्गौणोपपातकम्।
विप्राणां रोगकारित्वमघ्रेयघ्रातिमेव च ॥ २८ ॥
सुराघ्रातिं तथा जैह्म्यं पशौ पुंसि च मैथुनम्।
जातिभ्रंशकरं प्राहुर्धार्मिका वेदपारगाः ॥ २९ ॥
ग्राम्यारण्यपशूनां तु हिंसनं मुनिपुंगवाः।
संकीर्णकरणं प्राहुः सर्वशास्त्रविशारदाः ॥ ३० ॥
निन्दितेभ्यो धनादानमन्नदानं तथैव च।
कुसीदजीवनं चैव वाणिज्यमनृतोक्तिता ॥ ३१ ॥
शूद्रस्य याजनं प्राहुरपात्रीकरणात्मकम्।
पक्षिणां घातनं चापि जलस्थलनिवासिनाम् ॥ ३२ ॥
मद्यस्पृष्टस्य भुक्तिं च प्राहुः सन्तो मलावहम्।
अनुक्तानि समस्तानि प्रकीर्णकसमाह्वयम् ॥ ३३ ॥
प्रवदन्ति हि विद्वांसः सत्यधर्मपरायणाः।
अदण्ड्यदण्डनं चैव युद्धे भीत्या पलायनम् ॥ ३४ ॥
क्षत्रियस्य विशेषेण महापातकमुच्यते।
वञ्चनं च तुलामाने महापापं विशो भवेत् ॥ ३५ ॥
मांसस्य विक्रयं चैव सुराविक्रयणं तथा।
ब्राह्मणीगमनं चापि पयःपानं तु कापिलम् ॥ ३६ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ॥ ३५ ॥ ३६ ॥

१ ग. °स्त्रानु°। २ क. °तिरेव।

महापापं मया प्रोक्तं शूद्राणां च विशेषतः ।
संकराणां द्विजद्वेषो महापातकमुच्यते ॥ ३७ ॥
पुरुषाणां तथा स्त्रीणां समानं पातकं स्मृतम् ।
नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् ॥ ३८ ॥
भर्तुः शिष्यस्य गमनं मत्या भर्तुर्गुरोरपि ।
विशेषेण स्त्रियाः सन्तः पातकं प्रवदन्ति हि ॥ ३९ ॥
बहुनाऽत्र किमुक्तेन श्रुतिस्मृत्युदितं विना ।
यत्किंचिदपि कुर्वाणः पातकी स्यान्न संशयः ॥ ४० ॥
वेदसारतरः कथितस्तु वः
शोकमोहसमुद्रनिवारकः ।
पातकानि विहाय महामति-
र्देवदेवमनिशं शरणं व्रजेत् ॥ ४१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे पातकविचारकथनं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां तात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे पातकविचारकथनं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

अथ द्विचत्वारिंशोऽध्यायः ।

सूत उवाच-

प्रायश्चित्तरहस्यं वः प्रवक्ष्यामि समासतः ।
श्रद्धया सहिता यूयं शृणुत ब्रह्मवित्तमाः[1] ॥ १ ॥

परिहरणीयत्वेनोक्तानां दशविधपातकानां द्वादशवार्षिकादिप्रायश्चित्तं वक्तुमारभते—प्रायश्चित्तेति ॥ १ ॥

---

१ घ. व्रतवित्तमाः ।

वेदान्तवाक्यजं ज्ञानं ब्रह्मात्मैकत्वगोचरम् ।
बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥ २ ॥

ब्रह्मात्मैकत्वगोचरमिति । जीवब्रह्मणोरज्ञानकृतभेदभ्रमनिरासेन यत्पारमार्थिकमेकत्वं तद्गोचरं तत्त्वमस्यादिवेदान्तवाक्यजनितमपरोक्षज्ञानमित्यर्थः । बुद्धिपूर्वकृतमिति । अन्यद्धि प्रायश्चित्तमबुद्धिपूर्वकृतस्यैव निवर्तकम् । अद्वैतात्मविज्ञानं तु बुद्धिपूर्वकृतं प्रमादकृतं चोभयविधमपि पातकं निवर्तयतीत्यर्थः । असहायस्यैव ज्ञानस्य बहुविधपापसंघनिवर्तकत्वं दृष्टान्तेन समर्थयते—वह्निवदिति । भगवता व्यासेनापि स्मर्यते—

" यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा " इति ॥ २ ॥

कर्तारं कर्म बध्नाति खलु वेदविदां वराः ।
ज्ञानिनो नैव कर्तृत्वं कर्तृत्वस्य तु साक्षिणः ॥ ३ ॥

ज्ञानस्य प्रतिज्ञातं सर्वपातकनिवर्तकत्वमुपपादयति—कर्तारमित्यादिना । लोके तावत्कर्तुरेव हि यज्ञदत्तादेः स्वकृतकर्मतत्फलसंबन्धात्मको बन्धो नाकर्तुर्देवदत्तादेः । तथाचाऽऽत्मानात्मनोर्विवेकं जानानः साक्षिचिन्मात्रस्वरूप आत्माऽपि यदि कर्ता स्यात्तर्हि तस्य कर्तृत्वधर्मसंसर्गनिबन्धनपुण्यपापाश्रयत्वलक्षणो बन्धः स्यात् । न च तस्य कर्तृत्वमस्ति । तत्साक्षितया टाटस्थ्याल्लौकिकसाक्षिवत्स हि विवदमानयोर्मध्यस्थः सन्केवलं जयपराजयलक्षणौ तद्व्यवहारौ साक्षात्करोति न तु ताभ्यां संसृज्यते । एवं कर्तृत्वस्य साक्षिणोऽपि न तत्संसर्ग इत्यर्थः । अयमभिप्रायः—कर्तृत्वं नाम क्रियाश्रयत्वम् । तच्च सर्वगतस्य नित्यस्याऽऽत्मनो न संभवति । तस्याऽऽकाशवन्निष्क्रियत्वात् । तदाश्रयत्वे "उपयन्नपयन्धर्मो विकरोति हि धर्मिणम्" इति न्यायेनानित्यत्वप्रसङ्गाच्च । नापि देहस्य कर्तृत्वम् । तस्य सत्यपि क्रियाश्रयत्वेऽचेतनत्वेन तदनुपपत्तेः । चेतनो हि ममेदमिष्टसाधनमिति जानञ्ज्ञानं कर्म क्रमेणानुतिष्ठन्कर्ता भवति । यदि देहस्यैव कर्तृत्वं स्यात्तदा यागादिक्रियाश्रयस्य तस्य भस्मीभूतत्वाद्देहातिरिक्तस्याकर्तुरात्मनो लोकान्तरोपभोग्यं स्वर्गनरकादिफलं निर्हेतुकं स्यात् " कर्तुरेव फलम् " इति नियमात् । तथाच पारमर्षं सूत्रम् " शास्त्रफलं प्रयोक्तरि तल्लक्षणात् " इति । न च देहातिरिक्तस्य प्राणस्यैव कर्तृत्वमिति वाच्यम् । तस्य सुषुप्त्यवस्थायां सद्भावेऽपि विशेषज्ञानादर्शनादचेतनत्वेनोक्तदोषानु(नि)वृत्तेः । नापि चक्षुरादीन्द्रियाणामेव कर्तृत्वम् । तेषां करणत्वेन कर्तुर-

१ ग. °ते—गीतासु "य° । २ ख. °र्तृत्वादिध° ।

न्यत्वावश्यंभावात् । अत एवान्तःकरणस्यापि न कर्तृत्वम् । ननु न क्रियाश्रयत्वमात्रं कर्तृत्वं येन निष्क्रियस्याऽऽत्मनो न स्यात्किं तु प्रयत्नगुणाश्रयत्वमपि तदिति चेतनस्याऽऽत्मनः कर्तृत्वं किं न स्यादिति चेत् । मैवम् । उपगमापगमयुक्तप्रयत्नलक्षणधर्माश्रयत्वे प्रागुक्तन्यायेनाऽऽत्मनो विकारित्वप्रसङ्गेनानित्यत्वं स्यात् । अतः परैरात्मनो गुणत्वेनाभिमता बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नादय आन्तरत्वेन प्रतीयमानाः सर्वे धर्मा विकारिणोऽन्तःकरणस्यैव न त्वविक्रियस्याप्यात्मन इत्यनिच्छताऽप्यङ्गीकार्यम् । अत एव साक्षिभूतस्याऽऽत्मनो निर्गुणत्वमाम्नायते—" साक्षी चेता केवलो निर्गुणश्च " इति । एवं च परेषामपि संसार्यात्मनि कर्तृत्वलक्षणधर्मसंसर्गप्रतीतिरयो दहतीत्यादिवत्क्रियाश्रयदेहादिधर्मितादात्म्याध्यासनिबन्धनैव न तु पारमार्थिकी । अत एव देहादिसंघातविशिष्टस्याऽऽत्मनो भोक्तृत्वमाम्नायते—" आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः " इति ।

गीतासु च स्मर्यते—

" अधिष्ठानं तथा कर्ता कारणं च पृथग्विधम् ।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः " इति ।

एवं चाऽऽत्मानात्मविवेकज्ञानेन देहादिधर्मतादात्म्याध्यासनिवृत्त्या तद्धर्मभूतक्रियाश्रयत्वादिधर्मसंसर्गनिवृत्तिरिति सिद्धं । साक्षिभूतस्य चिन्मात्रस्वरूपस्य केवलस्याऽऽत्मनोऽकर्तृत्वम् । स्मर्यते हि—

"तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः" इति ॥

एवं केवलस्याकर्तुरात्मनः कर्मसंबन्धाभावादेहादितादात्म्याध्यासेन कृतं पातकशतमपि न स्पृशतीति सिद्धमकर्त्रात्मज्ञानस्य[1] सकलपापनिवर्तकत्वम्॥३॥

कायिकं वाचिकं चैव मानसं कर्म नान्यथा ।
तथा सति कथं कर्म भवेत्तत्साक्षिरूपिणः ॥ ४ ॥

एतदेव कर्तृत्वमुपपादयति—कायिकमित्यादिना । कायिकादिभेदेन त्रिधाऽवस्थितं कर्म देहादितादात्म्याध्यासवतः कर्त्रात्मन एव बन्धकं न तु विवेकज्ञानेन

---

१ ग. घ. °कर्तात्म° ।

निवर्तिततादात्म्यस्य । देहादिसंबन्धिन एव त्रिविधं कर्म नान्यस्य चिन्मात्रस्वरूपस्य तत्कर्मसाक्षिण इत्यर्थः ॥ ४ ॥

घटवद्दृश्यभूतस्य शरीरस्य तु साक्षिणः ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ ५ ॥
इन्द्रियाणां समस्तानां सदा साक्षिस्वरूपिणम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ ६ ॥
प्राणापानादिभेदेन विभक्तस्य तु साक्षिणम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ ७ ॥

ननु देहेन्द्रियप्राणमनोबुद्ध्यहंकारादिसाक्ष्यगतमेव कर्म तत्तत्साक्षिरूपेणावस्थितस्याऽऽत्मनो बन्धकं किं न स्यादित्याशङ्क्य क्रमेण निरस्यति—घटवदित्यादिना । देह आत्मा न भवति दृश्यत्वाद्घटवदिति देहस्यानात्मत्वं विवेकज्ञानेन निश्चित्य तद्विविक्तं तत्साक्षिणं चिन्मात्रस्वरूपिणमात्मानमात्मना प्रकाशान्तरनिरपेक्षेण स्वरूपप्रकाशेनैव पश्यन्देहाद्याश्रितेन कर्मणा कथं बद्धः स्यात् । घटगतरूपादिवच्छरीराश्रितकर्मणोऽपि विविक्तत्वेन तत्संबन्धविरहादित्यर्थः । एवमुत्तरत्रापि दृश्यत्वहेतुना साक्ष्यस्येन्द्रियादेः साक्षिणः सकाशाद्घटादिवदेव विविक्तत्वमिति तदाश्रितकर्मणा तत्साक्षिणो बन्धो न युक्त इत्ययमर्थः सर्वत्र योजनीयः ॥ ५ ॥ ६ ॥ ७ ॥

संकल्पलक्षणस्यास्य मनसः साक्षिरूपिणम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ ८ ॥
निश्चयात्मकविज्ञानसाक्षिणं ब्रह्मवित्तमाः ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ ९ ॥
अहंकारस्य दुःखादिविशिष्टस्य तु साक्षिणम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १० ॥
चेतनालक्षणस्यास्य चित्तसंज्ञस्य साक्षिणम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ ११ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

---

१ ग. °दात्म्याध्यासस्य ।

देहेन्द्रियादिसंघातसाक्षिणं निरुपद्रवम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १२ ॥

ननु देहेन्द्रियादीनां दृश्यत्वेन घटवद्विविक्तत्वात्प्रत्येकं तदाश्रितकर्मणा बन्धासंभवेऽपि तत्संघाताश्रितेन कर्मणा बन्धः किं न स्यादित्याशङ्क्याऽऽह-देहेन्द्रियादीति ॥ १२ ॥

जाग्रत्स्वप्नसुषुप्त्याख्यावस्थासाक्षिणमव्ययम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १३ ॥

देहादिविवेकप्रतिपादितेनैव जाग्रदाद्यवस्थानामपि दृश्यतयाऽतिविविक्तत्वात्तदाश्रितेनापि कर्मणा बन्धो न घटत इत्याह—जाग्रदिति ॥ १३ ॥

सच्चिदानन्दसंपूर्णलक्षणं तमसः परम् ।
ब्रह्मात्मानं सदा पश्यन्कथं बध्येत कर्मणा ॥ १४ ॥

एवं साक्षित्वाकारेण साक्ष्याद्देहादेर्विविच्य साक्षित्वस्यापि साक्ष्यप्रतियोगित्वेनौपाधिकत्वात्तन्निर्मुक्तं प्रत्यगात्मनः पारमार्थिकं रूपं दर्शयति—सच्चिदिति । जीवात्मनोऽपि परशिववत्सच्चिदानन्दरूपत्वं हंसमन्त्रार्थकथनावसरे "अहं चाव्यभिचारित्वात्स्वस्वभावो न संशयः" इत्यादिना सप्तमेऽध्याये प्रागेव प्रतिपादितम् । तमसः परमिति । स्वस्वरूपस्याऽऽच्छादकाद्देहेन्द्रियाद्युपादानभूताद्भावरूपाज्ज्ञानात्परं विविक्तमित्यर्थः । स ईदृग्विधमात्मानमहं ब्रह्मास्मीति नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मस्वरूपतया जानन्कर्मणा कथं बध्येतेत्यर्थः ॥ १४ ॥

अविक्रियमसङ्गं च परिशुद्धं सदोदितम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १५ ॥

ननु दृशिक्रियया व्याप्यत्वादुक्तस्य ब्रह्मात्मभावस्य कर्मत्वमवसीयते । परसमेतक्रियाजन्यफलभाक्त्वात्तन्निमित्तो[1] बन्धः किं न स्यादित्यत आह—अविक्रियमिति । क्रियाजन्यफलं हि चतुर्विधं कर्मकारकगतमुत्पत्तिविकृतिप्राप्तिसंस्कृतिरूपम् । तच्चतुष्टयमत्र विशेषणैर्निरस्यते । एवंलक्षणस्याऽऽत्मनो नित्यत्वेन विकारासंभवाद्विक्रियाहेतोर्वस्त्वन्तराभावाच्चाविक्रिय एव स इति न तस्य विकार्यकर्मत्वम्[2] । " असङ्गो ह्ययं पुरुषः " इति श्रुतेः केनचिदप्यसौ न संबध्यत इत्यसङ्गः । अतः प्राप्तिकर्मत्वमस्य न भवति । संस्कारश्च द्वेधा गुणाधा-

---

१ छ. 'न्निमित्तो ब° । २ ख. °र्यत्व° ।

नलक्षणो मलापकर्षणलक्षणश्चेति । तत्रानाधेयातिशयत्वेनाऽऽत्मनस्तावदाद्यो न युक्तः । द्वितीयं प्रत्याह—परिशुद्धमिति । पूर्वोत्तरकालयोरिव जगद्भमावस्थायामप्यविद्यातत्कार्यसंस्पर्शकृतस्य मलस्य परमार्थतो विरहात्स्वत एव परिशुद्ध इति मलापकर्षणलक्षणसंस्कारोऽपि तत्र निष्प्रयोजन इत्यर्थः । नाप्युत्पाद्यकर्मत्वम् । स्वप्रकाशसाक्षिरूपेण सर्वदाभावत्वेनोत्पाद्यत्वाभावादित्याह—सदोदितमिति ॥ १५ ॥

सदाऽऽकाशादिभूतानां शब्दादीनां च साक्षिणम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १६ ॥

ननु मा भूद्भौतिकदेहादितादात्म्याध्यासनिबन्धनो बन्धः । वियदादिभूततादात्म्यनिबन्धनस्तु किं न स्यादित्यत आह—सदेति ॥ १६ ॥

अनियोज्यमकर्तारमभोक्तारं परामृतम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १७ ॥

अनियोज्यमिति । नियोज्यत्वधर्मविशिष्टस्यैव ह्यात्मनः कर्मण्यधिकारस्तस्यैव कर्मनिबन्धननिमित्तको बन्धो न तु चिन्मात्रस्वरूपस्य केवलात्मन इत्यर्थः ॥ १७ ॥

स्वयंभातं प्रमातीतं प्रमाणानां च साक्षिणम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १८ ॥

ननु मा भूदुक्तरीत्याऽऽत्मनः कर्तृत्वं क्रियाजन्यफलभागित्वं च प्रमाणप्रेरकत्वलक्षणं प्रमातृत्वं स्वगोचरप्रमाविषयत्वं च किं न स्यादित्यत आह—प्रमातीतमिति । चिदात्मनः प्रमाणसाक्षित्वमेव केवलं न तु तत्प्रेरकत्वमहंकारविशिष्टस्यैव तत्प्रेरकत्वात् । सम्यगर्थविषयाऽन्तःकरणवृत्तिः प्रमा साऽपि[1] सोपाधिकमेव स्वरूपं विषयी करोति न तूक्तविधं निरुपाधिकस्वरूपमिति प्रमामतीत्य वर्तत इत्यर्थः । ननु स्वसत्ताबोधकप्रमाविषयत्वाभावे कथं तत्स्वरूपसिद्धिरिति तत्राऽऽह—स्वयंभातमिति ॥ १८ ॥

आविर्भावतिरोभावसंकोचरहितं सदा ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ १९ ॥

आविर्भावेति । अस्वप्रकाशस्य घटादेः स्वगोचरज्ञानेनाऽऽविर्भावस्तद्राहित्ये

---

१ ग. घ. च. °षयं च । २ ग. घ. ङ. च. ज. °पि त्वौपा° । ङ. °पि चौपा° ।

तु तिरोभाव इत्येवमनात्मनः संकोचो भवति न तु स्वयंप्रकाशस्य चिदात्मनः स्वसत्ताप्रकाशव्यतिरेकविरहादित्यर्थः ॥ १९ ॥

सर्वसाक्षिणमात्मानं सर्वहीनं तु वस्तुतः ।
आत्मानमीश्वरं पश्यन्कथं बध्येत कर्मणा ॥ २० ॥

ननु घटपटादिविभिन्नलक्ष्यसत्त्वे घटसाक्षीति विशिष्टरूपेण साक्षिणोऽपि भेदः प्रतीयते । तथा च यदा घटसाक्षी न तदा पटसाक्षीति घटादिवदेव साक्षिणोऽप्याविर्भावतिरोभावलक्षणः संकोचः किं न स्यादित्यत आह—सर्वसाक्षिणमिति । एक एव हि चिदात्मा सर्वस्य घटपटादेः साक्षी तस्य सर्वसाक्ष्यभासकत्वोपाधिना सर्वदा भानमस्तीति न संकोच इत्यर्थः । ननु तस्याऽऽत्मनः सर्वसाक्षित्वं सर्वकृतं चेत्तद्वदेव साक्ष्यस्यापि सर्वस्य सर्वदाऽऽवस्थानप्रसङ्ग इत्यत आह—सर्वहीनमिति । नन्वेतत्सर्वसाक्षित्वं सर्वहीनत्वं चोभयं व्याहतमित्यत आह—वस्तुत इति । परमार्थोपाधौ सर्वहीनत्वं मिथ्योपाधौ सर्वसाक्षित्वमिति वास्तवावास्तवभेदेनाविरोध इत्यर्थः । एवं साक्ष्युपलक्षितस्य चिन्मात्रस्वरूपस्याऽऽत्मनः प्राकृतादेहेन्द्रियाद्यनात्मनः सकाशाद्विवेकख्यातिरेव श्रेयःसाधनं तन्निरस्यति—आत्मानमीश्वरमिति ॥ २० ॥

स्वस्मिन्नध्यस्तरूपस्य प्रपञ्चस्य तु साक्षिणम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ २१ ॥

नन्वात्मनः सर्वहीनत्वमयुक्तं प्रतिभासमानस्य प्रपञ्चस्यापलापासंभवादित्यत आह—स्वस्मिन्निति । शुक्त्यादौ रजतादिवत्स्वात्मनि मायापरिकल्पितः प्रपञ्चः स्वाधिष्ठानरूपेण साक्षिणा भास्यते तस्य च रजतादिवदेवाधिष्ठानयाथात्म्यज्ञानेन निवृत्तेः प्रतियोग्युपाधावभावप्रतियोगित्वेन मिथ्यात्वात्प्रतीतिबाधसाक्षिण आत्मनो वस्तुतः सर्वहीनत्वमित्यर्थः ॥ २१ ॥

निर्लेपं निर्मलं सूक्ष्मं निरस्तसकलक्रियम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ २२ ॥
पूर्णानन्दं बुभुत्सोस्तु स्वरूपं भोगवर्जितम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ २३ ॥
भेदत्वादिनिर्मुक्तं क्रियाक्रियादिवर्जितम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ २४ ॥

१ ग. घ. °देन वि° ।

एवं कार्यप्रपञ्चस्य मिथ्यात्वं प्रसाध्य कारणभूतमज्ञानमपि तस्मिन्वस्तुतो नास्तीत्याह—निर्मलमिति । कार्यानुरूपं हि कारणं कल्पनीयं कार्यं च मिथ्याभूतं दृष्टमिति तत्कारणत्वेन कल्पितमज्ञानमपि तादृशमेवेति तदपि तस्मिन्वस्तुतः सर्वदा नास्तीत्यर्थः । एवमज्ञानसंबन्धाभावात्तद्विलासक्रियासंबन्धोऽपि नास्तीत्याह—निरस्तेति । निर्लेपमिति । उक्तरीत्या क्रियासंस्पर्शाभावात्तज्जनितपुण्यपापलेपरहितमित्यर्थः । अत एव भगवतोक्तम्—"न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा" इति । नन्वीदृशमात्मतत्त्वं कस्मात्सर्वैर्नानुभूयत इत्यत आह—सूक्ष्ममिति । प्रतिबन्धकपापजनितप्रत्यूहभाजुर्यादृसंस्कृताचित्तैः स्थूलदर्शिभिर्विकल्पहेत्वभावेनात्यन्तनिर्विकल्पकमात्मतत्त्वं तन्न द्रष्टुं शक्यमित्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥

नेति नेतीति वेदान्तैर्निरस्तस्वविलक्षणम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ २५ ॥

उक्तं सर्वविहीनत्वं श्रुतिसंवादेन प्रपञ्चयति—नेतीति । "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च" इति प्रक्रम्य "अथात आदेशो नेति नेति" इति मूर्तामूर्तसकलानात्मप्रपञ्चनिषेधस्य श्रुतत्वादपि स्वात्मव्यतिरिक्तं नास्तीत्यर्थः ॥ २५ ॥

अनण्वह्रस्वमस्थूलमदीर्घं सत्यचिद्घनम् ।
आत्मानमात्मना पश्यन्कथं बध्येत कर्मणा ॥ २६ ॥

उक्तपुण्यपापलेपादिसकलधर्मराहित्यमेव श्रुतिप्रमाणसिद्धमिति दर्शयति—अनण्वह्रस्वमिति । "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितम्" इत्यादिना स्थौल्यादिसर्वधर्मनिषेधावधितयाऽतद्व्यावृत्तिमुखेन श्रुत्या प्रतिपादितमित्यर्थः । नन्वेवं सर्वधर्मनिषेधेऽन्ततः शून्यमेव पर्यवस्येन्न हि निर्धर्मकं किंचिदस्तीत्यत आह—सत्यचिद्घनमिति । यदनुवेधात्सर्वं जगदस्ति भातीति प्रतीयते तत्सच्चिन्मात्रं सर्वाधिष्ठानमवशिष्यत इति न शून्यपर्यवसानमित्यर्थः । न च सच्चितोर्भेदाशङ्क्य तयोरेकतरत्वादिति घनशब्दार्थः । अत एव सैन्धवाखिल्यदृष्टान्तेनैकरसत्वमाम्नायते— "एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एव" इति ॥ २६ ॥

---

१ ख. घ. °वघनद्व° ।

अज्ञानजन्यकर्त्रादिकारकोत्पन्नकर्मणा ।
श्रुत्युत्पन्नात्मविज्ञानप्रदीपो बध्यते कथम् ॥ २७ ॥

अज्ञानजन्येति । क्रियानिष्पादकस्य कर्तृकरणकर्मादिकारकज्ञानस्य सर्वस्याज्ञानकार्यत्वादज्ञानस्य चाधिष्ठानब्रह्मयाथात्म्यज्ञानेन निवृत्तेरुपादाननिवृत्त्या कार्यस्य कर्मणोऽपि निवृत्तिः सिद्धेति निःस्वरूपेण कर्मणा कथं निरवद्यब्रह्मात्मतया स्वात्मानमनुसंदधानस्य बन्धाशङ्का । न हि रज्जुयाथात्म्यज्ञानेन निवर्तितः सर्पः पुरुषस्य भ्रान्तिं जनयति तद्वदित्यर्थः ॥ २७ ॥

अज्ञानान्धतमोरूपं कर्मधर्मादिलक्षणम् ।
स्वप्रकाशकमात्मानं नैव संस्प्रष्टुमर्हति ॥ २८ ॥

एवं ज्ञानाज्ञानयोर्निवर्त्यनिवर्तकतामुपजीव्य ज्ञानिनां बन्धाभाव उक्तः । अथ तत्स्वरूपपर्यालोचनया संस्पर्शोऽप्यज्ञानस्याऽऽत्मना सह दुर्घट इत्याह— अज्ञानेति । अज्ञानं नाम तमोवदाच्छादकं चित्प्रकाशाविरोधिभावरूपं न तु ज्ञानाभावस्तथा सति कार्यरूपेण क्रियातत्साधनफलाद्यात्मना व्यवस्थितं तत्कथं स्वविरोधिस्वप्रकाशचिदात्मानं स्पृशेदित्यर्थः ॥ २८ ॥

आदित्यं शार्वरं यद्वत्तमो न स्पृशति स्वतः ।
चित्प्रकाशमहादित्यं तमोरूपक्रिया तथा ॥ २९ ॥

एतदेव दृष्टान्तमुखेनोपपादयति—आदित्यमिति । शार्वरस्य तमसोऽपि नाऽऽलोकाभावमात्रत्वं [किंतु] निवर्त्यभावत्वं प्रतिपादितम् ।

"तमः खलु चलं नीलं परापरविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति" इति ॥

तद्वदज्ञानतमसोऽपि भावरूपत्वामिति तमःशब्दमज्ञानं निर्दिशतोऽभिप्रायः ॥ २९ ॥

तमोरूपो रविं राहुः समाश्रित्य प्रतीयते ।
यत्प्रकाशेन संबन्धस्तयोर्नास्ति तथाऽपि तु ॥ ३० ॥
तद्वदज्ञानतत्कार्यं समाश्रित्य स्वयंप्रभम् ।
तद्भासा भाति संबन्धस्तयोर्नास्ति तथाऽपि तु ॥ ३१ ॥

---

१ ख. ङ. बाध्यते । २ ग. घ. ङ. च. छ. ज. °ज्ञानेनास्या° । ३ घ. छ. °सोऽप्यालो° । ४ ग. छ. ज. °त्वं तन्निवर्त्यत्वं च प्र° ।

नन्वज्ञानस्य स्वप्रकाशचिदात्मना संस्पर्शो न चेत्कथं तस्य संसारदशायां प्रतीतिरित्याशङ्क्य सदृष्टान्तमुपपादयति—तमोरूप इति। यत्प्रकाशेनेति। यस्याऽऽश्रयभूतस्य सूर्यस्य प्रकाशेन प्रतीयत इत्यन्वयः। यद्यप्येवं तथाऽपि तयोः परस्परं संबन्धो नास्ति। सूर्यलक्षान्तरे राहोर्विप्रकृष्टदेशवर्तित्वेन व्यवधानात्। यथैव हि संबन्धाभावेऽपि राहोः सूर्यप्रकाशेन प्रतीतिराश्रयबलात्तथैवाज्ञानकार्यमसङ्गोदासीनमपि स्वप्रकाशचिदात्मानमाश्रित्य तदीयप्रकाशेन भासते। तावन्मात्रेण तयोः संबन्धो वस्तुतो नास्तीत्यर्थः ॥ ३० ॥ ३१ ॥

कर्मसंबन्धमज्ञानादात्मनो मन्यते भ्रमात्।
विदुषो न भ्रमस्तस्मात्कर्मणा नास्ति संगतिः ॥ ३२ ॥

ननु "एष ह्येव साधु कर्म कारयति तम्" इत्यादिना प्रत्यगात्मनः कर्मसंबन्धः श्रुत्यैव प्रतिपादित इत्यत आह—कर्मेति। अज्ञाननिमित्तकादेहादितादात्म्यभ्रमादेवाऽऽत्मनः कर्मसंबन्धो न वास्तवः। उदाहृतश्रुतेः स्वभ्रमसिद्धमेव तमुपजीव्येश्वरस्य फलप्रदातृत्वप्रतिपादने तात्पर्यम्। ज्ञानिनस्तु पराविद्यया भ्रममूलस्याज्ञानस्य निवर्तनात्कर्मसंबन्धो नास्तीत्यर्थः ॥ ३२ ॥

तस्मादेहादिसंघातेऽहंमतिं कुरुते तु यः।
तस्यैव कर्मणा योगः संभ्रान्तस्य सदा बुधाः ॥ ३३ ॥
यस्तु विज्ञानसंपन्नः कर्मणा तस्य संगतिः।
नैव सत्यं मया प्रोक्तं नास्ति संदेहकारणम् ॥ ३४ ॥

एवं देहादितादात्म्यभ्रमवत एव कर्मसंबन्धो न तु तद्विविक्तस्य विशुद्धात्मज्ञानवत इति प्रतिपादितमर्थमुपसंहरति—तस्मादिति। व्यासेनापि देहादावहमभिमानहीनस्य कर्मणा संबन्धाभावः स्मर्यते—

"यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते॥"

इति ॥ ३३ ॥ ३४ ॥

तस्माद्ब्रह्मात्मविज्ञानं शाब्दं देशिकपूर्वकम्।
बुद्धिपूर्वकृतं पापं कृत्स्नं निर्दहति क्षणात् ॥ ३५ ॥

वेदान्तवाक्यजं ज्ञानमिति यत्प्राक्प्रतिपादितं तदुपसंहरति—तस्मादिति।

---

१ स. ग. घ. °तिज्ञातं।

अहं ब्रह्मास्मीति यज्जीवपरतादात्म्यगोचरमाचार्योपदिष्टं वेदान्तवाक्यजनितं यन्निर्विचिकित्सं परोक्षज्ञानं तद्बुद्धिपूर्वकृतमपि सर्वपापजालं निर्दहतीत्यर्थः ॥ ३५ ॥

अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकम् ।
संसारकारणाज्ञानतमसश्चण्डभास्करः ॥ ३६ ॥

अपरोक्षात्मविज्ञानमिति । आत्मन्यपरोक्षेण भासमानस्याविद्यातत्कार्यभूतदेहेन्द्रियादिभ्रमस्यापरोक्षात्मयाथात्म्यज्ञानव्यतिरेकेण निवृत्त्यनुपपत्तेः परोक्षज्ञानेन केवलमज्ञानकार्यस्य पापसंचयस्यैव प्रायश्चित्तेनेव नाशो न तु मूलाज्ञानस्य । अपरोक्षब्रह्मात्मज्ञानं तु स्वात्मन्यध्यस्तसर्वानर्थनिदानसंसारकारणभूतं भावरूपमज्ञानं समूलं नाशयतीत्यर्थः ॥ ३६ ॥

महापातकपूर्वाणां पातकानां मुनीश्वराः ।
रहस्यानां प्रसिद्धानां प्रायश्चित्तं हि वेदनम् ॥ ३७ ॥

एवं परोक्षापरोक्षरूपेण ब्रह्मात्मविज्ञानस्य द्वैविध्यमभिधाय तत्र परोक्षज्ञानस्य प्रायश्चित्तरूपतामाह—महापातकेति ॥ ३७ ॥

अपरोक्षात्मविज्ञानवतां नैवास्ति पातकम् ।
प्रायश्चित्तं परिज्ञानं परोक्षज्ञानिनां नृणाम् ॥ ३८ ॥
तेषां निष्ठामविज्ञाय मनुष्याश्चर्मचक्षुषा ।
विलोक्य पातकैर्युक्तान्मन्वते सत्तमानपि ॥ ३९ ॥

नैवास्ति पातकमिति । सति हि पातके तत्परिहाराय प्रायश्चित्तमनुष्ठेयं देहादिव्यतिरिक्तस्य चिन्मात्रस्य प्रत्यगात्मनः परशिवस्वरूपसाक्षात्कारेण तत्स्वरूपाच्छादकाविद्यानिवृत्तौ तत्कार्यकर्तृत्वादिनिवृत्तेः पातकप्रसक्तिरेव नास्तीत्यपरोक्षज्ञानस्य संसारकारणाविद्यानिवृत्तिरेव फलमित्यर्थः । "प्रायश्चित्तं परिज्ञानं प्रायश्चित्तं हि वेदनम्" इति परोक्षब्रह्मात्मज्ञानस्य प्रायश्चित्तरूपत्वप्रतिपादनेन तदेतत्परोक्षज्ञानविषयमित्यर्थः ॥ ३८ ॥ ३९ ॥

यथा ब्रह्मात्मविज्ञानं पातकानां मुनीश्वराः ।
प्रायश्चित्तं मया प्रोक्तं तथैव ब्रह्मभावना ॥ ४० ॥

---

१ घ. ङ. ज. ज्ञानवि° ।

यथा ब्रह्मेति । निर्विचिकित्सपरोक्षब्रह्मात्मविज्ञानेनैव प्रायश्चित्तरूपेण यथा सर्वपापनिवृत्तिस्तथा श्रुत्याचार्यमुखादौपासप्रतिपन्नस्य ब्रह्मात्मभावनस्य ध्यानमपि प्रायश्चित्तं भवतीत्यर्थः ॥ ४० ॥

श्रुत्याचार्यप्रसादेन सर्वं ब्रह्मेति भावयन् ।
मुच्यते पातकैः सर्वैर्घटिकामात्रतो नरः ॥ ४१ ॥
दिनार्धं सकलं ब्रह्म भावयन्गुरुपूर्वकम् ।
बुद्धिपूर्वकृतैः सर्वैः पातकैर्मुच्यते नरः ॥ ४२ ॥

श्रुत्याचार्यप्रसादेनेति । "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इति श्रुत्यर्थं गुरुमुखादधिगत्य यत्स्थावरजङ्गमात्मकं सर्वं यथावद्ब्रह्म भावयेत्तर्ह्युपासनमपि सर्वपातकनिवृत्तिहेतुरित्यर्थः ॥ ४१ ॥ ४२ ॥

विग्रहं परतत्त्वस्य त्रिनेत्रं साम्बमद्भुतम् ।
मुहूर्तं चिन्तयन्मर्त्यो मुच्यते सर्वपातकैः ॥ ४३ ॥

निर्गुणब्रह्मज्ञानवत्सगुणब्रह्मोपासनस्यापि प्रायश्चित्तरूपतामभिधाय स्वलीलास्वीकृतमूर्तिध्यानमपि सर्वपातकप्रायश्चित्तमित्याह—विग्रहमित्यादिना ॥४३॥

स्वस्वरूपानुसंधानान्नृत्यन्तं सर्वकारणम् ।
मुहूर्तं चिन्तयन्मर्त्यो मुच्यते सर्वपातकैः ॥ ४४ ॥
नृत्यमानं महादेवं साम्बमूर्तिधरं तु वा ।
दिनार्धं चिन्तयन्पापात्प्रसिद्ध्यान्मुच्यतेऽखिलात् ॥ ४५ ॥
त्रिमूर्तीनां तु रुद्रस्य विग्रहं चिन्तयन्दिनम् ।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ४६ ॥
दिनत्रयमभिध्यायन्रुद्रमूर्तिमतन्द्रितः ।
मुच्यते पातकैः सर्वैः प्रसिद्धैर्नात्र संशयः ॥ ४७ ॥
विष्णोश्च विग्रहं ध्यायन्मर्त्यः शुद्धं दिनत्रयम् ।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ४८ ॥

॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

---

१ ख. °दापातसंघ° ।

सप्तरात्रं महाविष्णोर्विग्रहं चिन्तयन्नरः ।
मुच्यते पातकैः सर्वैः प्रसिद्धैर्नात्र संशयः ॥ ४९ ॥
ब्रह्मणो विग्रहं शुद्धं सप्तरात्रं विचिन्तयन् ।
महापातकसंघैश्च मुच्यते पातकान्तरैः[1] ॥ ५० ॥
मासमात्रमभिध्यायन्ब्रह्मणो विग्रहं परम् ।
मुच्यते पातकैः सर्वैः प्रसिद्धैर्नात्र संशयः ॥ ५१ ॥
॥ ४९ ॥ ५० ॥ ५१ ॥

जपित्वा दशसाहस्रं मन्त्रं चैतन्यवाचकम् ।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ५२ ॥
पातकानां समस्तानां लाघवापेक्षया क्रमात् ।
जपेऽपि लाघवं कार्यं चिन्मन्त्रस्य क्रमेण तु ॥ ५३ ॥

मन्त्रं चैतन्यवाचकमिति । स च भुवनेश्वरीमन्त्रः ॥ ५२ ॥ ५३ ॥

पदं द्वादशसाहस्रं जपित्वा मातृकाश्रयम् ।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ५४ ॥

मातृकाश्रयमिति । मातृकारूपेण स्थितं पदाख्यं मन्त्रमित्यर्थः ॥ ५४ ॥

पातकानां समस्तानां लाघवापेक्षया क्रमात् ।
जपेऽपि लाघवं कार्यं पदाख्यस्य मनोरपि ॥ ५५ ॥
जपित्वा लक्षमेकं तु प्रणवं ब्रह्मवाचकम् ।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ५६ ॥
कण्ठमात्रोदके लक्षं जपित्वा हंसमन्त्रकम् ।
महापातकसंघैश्च मुच्यते पाकान्तरैः ॥ ५७ ॥
नाभिमात्रोदके लक्षं जपित्वा तु षडक्षरम् ।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ५८ ॥
॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

---

१ ब. °रैः । आत्तमा° ।

कण्ठमात्रोदके लक्षं जपित्वा व्याहृतित्रयम्।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ५९ ॥
वाग्यतस्तु जपेल्लक्षं सावित्रीमादरेण तु(यः)।
महापातकसंघैश्च मुच्यते पातकान्तरैः ॥ ६० ॥
सव्याहृतिसप्रणवाः प्राणायामास्तु षोडश।
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः ॥ ६१ ॥
॥ ५९ ॥ ६० ॥ ६१ ॥

गवां गोष्ठे तु भिक्षाशी पावमानीर्जपन्मुदा।
वत्सरात्पातकैः सर्वैर्मुच्यते न हि संशयः ॥ ६२ ॥
दशवारं जपेन्नित्यं पावमानीर्महामतिः।
गवानुगमनं प्रोक्तं गोघ्नस्यैव न चान्यथा ॥ ६३ ॥

पावमानीर्जपन्निति। पवमानसोमदेवताका ऋचः पावमान्यः ॥६२॥६३॥

उपवासत्रयं कृत्वा कण्ठमात्रोदके स्थितः।
मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाऽघमर्षणम् ॥ ६४ ॥
गायत्र्यष्टसहस्रं तु जपित्वा तु दिने दिने।
सप्ताहात्सर्वपापेभ्यो मुच्यते भैक्षभुङ्नरः ॥ ६५ ॥

त्रिर्जपित्वाऽघमर्षणमिति। "ऋतं च सत्यं च" इति सूक्तमघमर्षणम् ॥
॥ ६४ ॥ ६५ ॥

उपवासत्रयं कृत्वा चत्वारिंशद्घृताहुतीः।
कूष्माण्डैर्जुहुयात्सर्वपापेभ्यो मुच्यते नरः ॥ ६६ ॥

कूष्माण्डैरिति। "यद्देवा देवहेडनम्" इत्यादिकाः स्वयंभुवकाण्डसमाम्नाता मन्त्राः कूष्माण्डाः ॥ ६६ ॥

जपित्वा शिवसंकल्पमस्यवामीयमेव च।
सुवर्णस्तेयदोषेण मुच्यते न हि संशयः ॥ ६७ ॥

---

१ क. ख. ग. घ. 'हृतीः स°।

जपित्वा शिवसंकल्पमिति । " तन्मे मनः शिवसंकल्पमस्तु " इति यस्मिन्सूक्ते शि(तच्छि)वसंकल्पम् ! " अस्य वामस्य " इति सूक्तमस्यवामीयम् ॥ ६७ ॥

जपित्वा पौरुषं सूक्तं हविष्पान्तीयमेव च ।
गुरुतल्पगदोषेण मुच्यते न हि संशयः ॥ ६८ ॥
उपवासत्रयं कुर्याद्धोमश्चाऽऽज्येन धीमता ।
पौरुषेण च सूक्तेन सर्वपापनिवृत्तये ॥ ६९ ॥

"हविष्पान्तमजरं स्वर्विदम् " इति सूक्तं हविष्पान्तीयम् ॥ ६८ ॥ ६९ ॥

पवित्रमृषभं तोये स्थित्वा जप्त्वा दशावरम् ।
त्रिरात्रोपोषितः स्तेयान्मुच्यते न हि संशयः ॥ ७० ॥
उपवासत्रयं कृत्वा भस्मोद्धूलितविग्रहः ।
रुद्राध्यायी विमुच्येत सुरापानान्न संशयः ॥ ७१ ॥

पवित्रमृषभमिति । " यश्छन्दसामृषभो विश्वरूपः " इति श्रुतेः प्रणव ऋषभः ॥ ७० ॥ ७१ ॥

द्रुपदा नाम गायत्री वेदे वाजसनेयके ।
पञ्च जप्त्वा जले मग्नो मुच्यते सर्वपातकैः ॥ ७२ ॥

द्रुपदा नामेति । " द्रुपदादिव मुमुचानः " इत्येषा ॥ ७२ ॥

अवेत्यृचं जपेदब्दं यत्किंचेदमितीति वा ।
महापातकसंघैश्च मुच्यते हि दशावरैः ॥ ७३ ॥

अवेत्यृचमिति । " अव ते हेळो वरुण " इत्येषा " यत्किंचेदं वरुण " इति ॥ ७३ ॥

जपेत्तरत्समन्दीयमभक्ष्यस्य तु भक्षणे ।
तद्दोषेण विमुच्येत मानवस्तु न संशयः ॥ ७४ ॥

जपेत्तरत्समन्दीयमिति । " तरत्समन्दी धावति " इति सूक्तम् ॥ ७४ ॥

इन्द्रं मित्रं तदेनस्वी जपेदब्दार्धमादरात् ।
भैक्ष्याहारो विशुध्येत पातकैश्च महत्तरैः ॥ ७५ ॥

इन्द्रमिति । "इन्द्रं मित्रं वरुणमाग्निमाहुः" इति ॥ ७५ ॥

प्राणायामशतं कुर्वन्सर्वपापैः प्रमुच्यते ।
प्राणायामसहस्रैस्तु मुच्यते भवबन्धनात् ॥ ७६ ॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेत्तु जले मग्नः सर्वपापैः प्रमुच्यते ॥ ७७ ॥
तिलहोमसहस्रेण व्याहृत्या प्रणवेन वा ।
महापातकसंघैश्च मुच्यते न हि संशयः ॥ ७८ ॥
महादेवेति यो ब्रूयात्प्रातरुत्थाय नित्यशः ।
जन्मान्तरसहस्रेषु कृतं पापं विनश्यति ॥ ७९ ॥
ब्राह्मे मुहूर्ते चोत्थाय शुचिर्भूत्वा समाहितः ।
शिवेति कीर्तयेन्मर्त्यः पातकैस्तु विमुच्यते ॥ ८० ॥
पुण्या भागीरथी लोके पुण्या वाराणसी पुरी ।
पुण्या वेदाः शिवः पुण्यः पुण्यं तिर्यक्त्रिपुण्ड्रकम् ॥८१॥
पञ्च पुण्यानि यो मर्त्यः प्रातरुत्थाय कीर्तयेत् ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ ८२ ॥
विषुवायनकालेषु ग्रहणे चन्द्रसूर्ययोः ।
शिवशब्दजपं कुर्वन्मुच्यते सर्वपातकैः ॥ ८३ ॥
व्यतीपाते तिलं धान्यं ब्राह्मणाय ददाति यः ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ ८४ ॥
पञ्चदश्यां समुद्दिश्य महादेवं सितेतरे ।
ब्राह्मणं भोजयित्वा तु मुच्यते सर्वपातकैः ॥ ८५ ॥

७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

१ ख. ग. घ. इन्द्रमित्येत° । २ ख. ग. °यन्सर्वैः पा° । ३ ख. ग. घ. नित्यं ।

यस्तु कृष्णचतुर्दश्यां शिवमुद्दिश्य भोजयेत् ।
ब्राह्मणं पातकैः सर्वैर्मुच्यते न हि संशयः ॥ ८६ ॥
कृष्णाष्टम्यां द्विजश्रेष्ठं भोजयेच्छंकरात्मना ।
सर्वपापविनिर्मुक्तः शंकरं याति मानवः ॥ ८७ ॥
अर्कवारे तु सावित्रीं जपित्वाऽष्टोत्तरं शतम् ।
भोजयित्वा द्विजश्रेष्ठं मुच्यते सर्वपातकैः ॥ ८८ ॥
आर्द्रायां रुद्रमुद्दिश्य भोजयित्वा द्विजोत्तमम् ।
सर्वपापविनिर्मुक्तः सम्यग्ज्ञानमवाप्नुयात् ॥ ८९ ॥

॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥

महामघे महादेवमभिषिच्य घृतेन तु ।
ब्रह्महत्यादिभिः पापैर्मुच्यते हि महत्तरैः ॥ ९० ॥
माघे मासि चतुर्दश्यां कृष्णपक्षे महेश्वरम् ।
बिल्वपत्रेण संपूज्य मुच्यते सर्वपातकैः ॥ ९१ ॥

महामघ इति । माघपौर्णमासीयुक्तं मघर्क्षं महामघम् ॥ ९० ॥ ९१ ॥

उत्तरे फाल्गुने मासि पलाशकुसुमेन च ।
महादेवं समाराध्य मुच्यते सर्वपातकैः ॥ ९२ ॥

उत्तरे फाल्गुन इति । फाल्गुनमासस्योत्तरफल्गुन्यामित्यर्थः ॥ ९२ ॥

वसन्तकाले चित्रायां सुगन्धकुसुमैर्हरम् ।
पूज्य प्रासङ्गिकायैस्तु मुच्यते पातकैर्नरः ॥ ९३ ॥
सकृद्गङ्गाजले स्नात्वा वाराणस्यां महेश्वरम् ।
दृष्ट्वा विश्वेश्वराख्यं तु मुच्यते सर्वपातकैः ॥ ९४ ॥
गोदावर्यां सकृत्स्नानात्[1]सिंहयुक्ते बृहस्पतौ ।
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥ ९५ ॥

॥ ९३ ॥ ९४ ॥ ९५ ॥

---

१ ख. घ. °त्स्नात्वा सिंह°।

माघमासि मघर्क्षे तु सुवर्णमुखरीजले ।
स्नात्वा दत्त्वा महापापैर्मुच्यते नात्र संशयः ॥ ९६ ॥
स्नात्वा तु शिवगङ्गायां पर्वयुक्तेऽर्कवासरे ।
महापातकसंघैश्च मुच्यते नात्र संशयः ॥ ९७ ॥
सोमवारे त्वमावस्यां सप्तम्यामर्कवासरे ।
सकृत्स्नानेन कावेर्यां मुच्यते सर्वपातकैः ॥ ९८ ॥
स्नात्वा दत्त्वा तु विप्राय गन्धमादनपर्वते ।
दृष्ट्वा रामेश्वरं देवं मुच्यते सर्वपातकैः ॥ ९९ ॥
अन्नपानादिभिर्भक्त्या ब्रह्मनिष्ठं समर्चयेत् ।
सर्वपापविनिर्मुक्तः शंकरं याति मानवः ॥ १०० ॥
श्रीमद्दभ्रसभामध्ये नृत्यन्तं देवनायकम् ।
दृष्ट्वा दिने दिने पापैर्मुच्यते दशभिर्दिनैः ॥ १०१ ॥
संन्यासश्चापि पापानां प्रायश्चित्तं प्रकीर्तितम् ।
पापिष्ठानामयोग्यानां योग्यानां मुक्तिसाधनम् ॥ १०२ ॥
चतुर्विधस्तु संन्यासो वृत्तिभेदेन सत्तमाः ।
एकः कुटीचकः प्रोक्तस्तथाऽन्यश्च बहूदकः ॥ १०३ ॥
हंसश्चान्यस्तथैवान्यः परहंससमाश्रयः ।
कुटीचकादपि श्रेष्ठो भिक्षुकश्च बहूदकः ॥ १०४ ॥
हंसो बहूदकाच्छ्रेष्ठः परहंसस्ततः परः ।
परहंसादपि श्रेष्ठ आश्रमी नास्ति कश्चन ॥ १०५ ॥
कुटीचकाश्च हंसाश्च तथैव च बहूदकाः ।
नित्यानुष्ठानतः शुद्धा भवन्ति द्विजपुंगवाः ॥ १०६ ॥

॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥

---

१ ख. ग. घ. °वारके ॥ म° ।

चित्तशुद्ध्या मुमुक्षुत्वं क्रमात्तेषां विजायते ।
मुमुक्षुत्वे तु संजाते भवेयुः परहंसकाः ॥ १०७ ॥
परहंसस्तु नित्याख्यं कर्म त्यक्त्वा विधानतः ।
शमादिसाधनो भूत्वा वेदान्तज्ञानमभ्यसेत् ॥ १०८ ॥
कुटीचकाख्यः संन्यासी तथैव च बहूदकः ।
गोवालरज्जुसंबन्धं त्रिदण्डं च कमण्डलुम् ॥ १०९ ॥
पात्रं जलपवित्रं च तथा काषायमेव च ।
शिखां यज्ञोपवीतं च पवित्रं चैव धारयेत् ॥ ११० ॥
पात्रं जलपवित्रं च पवित्रं च तथैव च ।
कुण्डिकां चोपवीतं च हंसस्यापि समं बुधाः ॥ १११ ॥
हंसः परमहंसश्च सत्वचं सौम्यमव्रणम् ।
एकं तु वैणवं दण्डं काषायं चैव धारयेत् ॥ ११२ ॥
परहंसस्य हंसस्य समानं मौण्ड्यमास्तिकाः ।
स्नानं शौचं शिवध्यानं शिवार्चा भस्मगुण्ठनम् ॥११३॥
त्रिपुण्ड्रधारणं शान्तिर्दान्तिः क्रोधादिवर्जनम् ।
चातुर्मास्यं च सर्वेषां समानं परिकीर्तितम् ॥ ११४ ॥
पापिष्ठः कर्मसंन्यासं कृत्वा शास्त्रोक्तवर्त्मना ।
प्राणत्यागं पुनः कुर्यात्पापानां च विशुद्धये ॥ ११५ ॥
योगी संन्यासमापन्नः प्राणत्यागं कदाचन ।
न कुर्यान्मोहतो वाऽपि ज्ञानमेव सदाऽभ्यसेत् ॥ ११६ ॥
संन्यासेन समं नास्ति प्रायश्चित्तं द्विजर्षभाः ।
ततः पापनिवृत्त्यर्थं संन्यसेत्परितापितः ॥ ११७ ॥

॥ १०७ ॥ १०८ ॥ १०९ ॥ ११० ॥ १११ ॥ ११२ ॥ ११३ ॥ ११४॥
॥ ११५ ॥ ११६ ॥ ११७ ।

१ ङ. भस्मधारणम्।

रहस्यानां च संन्यासः प्रायश्चित्तं तथैनसाम् ।
प्रसिद्धानां च पापानां प्रायश्चित्तमयं तथा ॥ ११८ ॥
शिवज्ञानं शिवध्यानं शिवशब्दजपस्तथा ।
अग्निरित्यादिभिर्मन्त्रैर्भस्मना चावगुण्ठनम् ॥ ११९ ॥
रुद्राक्षधारणं भक्त्या त्रिपुण्ड्रस्य च धारणम् ॥
संन्यासश्चैव पापानां प्रायश्चित्तं महत्तरम् ॥ १२० ॥
सर्ववेदरहस्यमिदं मया
केवलं कृपयैव समीरितम् ।
प्राह कारुणिकः सकलार्थवि-
देशिकप्रवरप्रवरस्तु मे ॥ १२१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे प्रायश्चित्तविचारो नाम द्वाचत्वारिंशोऽध्यायः ॥४२॥

॥ ११८ ॥ ११९ ॥ १२० ॥ १२१ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां तात्पर्यदीपिकायां प्रायश्चित्तविचारो नाम द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥

अथ त्रिचत्वारिंशोऽध्यायः ।

सूत उवाच—

भूयोऽपि पापशुद्ध्यर्थमुपायं प्रवदाम्यहम् ।
महत्या श्रद्धया युक्ताः शृणुत ब्रह्मवित्तमाः ॥ १ ॥

एवं वेदाधिकृतानां चित्तपरिपाकानुसारेण वेदान्तवाक्यजनितब्रह्मात्मज्ञानतद्ध्यानवैदिकमन्त्रजपादिकं प्रायश्चित्तत्वेनोपदिष्टम् । अथ सर्वसाधारणममरेशादिस्थानविशेषेषु शक्तिसहितस्य परमेश्वरस्य तत्तन्नाम्ना पूजनात्मकं पापक्षयोपायं वक्तुमारभते—भूयोऽपीति ॥ १ ॥

---

१ ख. °र्ववर्णसा° ।

निर्मितानि शिवेनैव भूमौ स्थानानि देहिनाम् ।
सर्वपापविशुद्ध्यर्थं तानि वक्ष्याम्यशेषतः ॥ २ ॥
अमरेशमिति प्रोक्तं स्थानं सर्वार्थसाधकम् ।
ओंकारसंज्ञस्तत्रेशश्चण्डिकाख्या महेश्वरी ॥ ३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ४ ॥
प्रभासाख्यं महास्थानमस्ति भूमितले द्विजाः ।
सोमनाथः शिवस्तत्र शिवा सा पुष्करेक्षणी ॥ ५ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ६ ॥
नैमिषाख्यं महास्थानमस्ति तत्र महेश्वरः ।
देवदेवाभिधः[1] प्राज्ञा देवी सा लिङ्गधारिणी ॥ ७ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ८ ॥
पुष्कराख्यं महास्थानमन्यदस्ति महीतले ।
रजोगन्धिर्महादेवः पुरुहूता महेश्वरी ॥ ९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ १० ॥
आषाढी नाम विप्रेन्द्राः स्थानमस्ति महीतले ।
आषाढीशो हरस्तत्र रतिः सा परमेश्वरी ॥ ११ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ १२ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

---

१ ङ. °भिधस्तत्र दे° ।

चण्डमुण्डीसमाख्यं तु स्थानमन्यन्महत्तरम् ।
दण्डी तत्र महादेवो दण्डिनी परमेश्वरी ॥ १३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ १४ ॥
भारभूतिरिति ख्यातमस्ति स्थानं महत्तरम् ।
भारभूतिर्महादेवो भूतिः सा परमेश्वरी ॥ १५ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ १६ ॥
नाकुलं नाम संशुद्धमस्ति स्थानं महीतले ।
नकुलीशो हरस्तत्र शिवा सैव प्रकीर्तिता ॥ १७ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ १८ ॥
हरिश्चन्द्रसमाख्यं च स्थानमस्ति महीतले ॥
हराख्यः शंकरस्तत्र चण्डिकाख्या महेश्वरी ॥ १९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ २० ॥
॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

श्रीपर्वतसमाख्यं च स्थानमस्ति महत्तरम् ।
मायावी शंकरी तत्र शंकरस्त्रिपुरान्तकः ॥ २१ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ २२ ॥

मायावीति । यद्यपि " अस्मायामेधास्रजो विनिः " इति विन्नन्तात्स्त्रियां ङीपि मायाविनीति भवितव्यं तथाऽपि पुराणानामप्यार्षत्वेन च्छन्दोवद्भावत्वात् " बहुलं छन्दसि " इति बहुलग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् " नस्तद्धिते " इत्युच्यमानष्टिलोपोऽतद्धिते ङीप्यपि द्रष्टव्यः ॥ २१ ॥
॥ २२ ॥

जप्येश्वरमिति ख्यातं स्थानमस्ति महत्तरम् ।
त्रिशूला शंकरी तत्र त्रिशूली परमेश्वरः ॥ २३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ २४ ॥
आम्रातकेश्वरं नाम स्थानमन्यत्सुशोभनम् ।
तत्र सूक्ष्माभिधो रुद्रः सूक्ष्माख्या परमेश्वरी ॥ २५ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ २६ ॥
महाकाल इति प्रोक्तमन्यदस्ति महत्तरम् ।
महाकालो हरस्तत्र शंकरी सा महेश्वरी ॥ २७ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ २८ ॥
मध्यमाख्यं महास्थानमस्ति मायाविषापहम् ।
तत्र शर्वः शिवः साक्षाच्छर्वाणी परमेश्वरी ॥ २९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ३० ॥
केदाराख्यं महास्थानमस्ति भूमितले शुभम् ।
ईशानाख्यो हरस्तत्र देवी सा मार्गदायिनी ॥ ३१ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ३२ ॥
भैरवाख्यं महास्थानं भवरोगस्य भेषजम् ।
भैरवः शंकरस्तत्र भैरवी परमेश्वरी ॥ ३३ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

१ घ. ङ. °शूली शंकरस्तत्र त्रिशूली परमेश्वरी ॥ २३ ॥

तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ३४ ॥
गया नाम महाक्षेत्रमस्ति भूमितले शुभम् ।
मङ्गलाख्या महादेवी शंकरः प्रपितामहः ॥ ३५ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तनाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ३६ ॥
कुरुक्षेत्रमिति ख्यातमस्ति क्षेत्रं महीतले ।
शिवा स्थाणुप्रिया तत्र शिवः स्थाणुसमाह्वयः ॥ ३७ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ३८ ॥
लांकुलाख्यं महास्थानमस्ति सर्वार्थसाधकम् ।
स्वयंभूस्तत्र देवेशः शिवा स्वायंभुवी मता ॥ ३९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य सर्वपापैः प्रमुच्यते ॥ ४० ॥
अन्यत्कनखलं नाम स्थानमस्ति महत्तरम् ।
उग्रस्तत्र महादेवः शिवोग्रा मुनिपुंगवाः ॥ ४१ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ४२ ॥
विमलेश्वरमित्युक्तमन्यदस्ति महीतले ।
विश्वस्तत्र महादेवो विश्वेशा परमेश्वरी ॥ ४३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ४४ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ॥ ४३ ॥ ४४ ॥

१ घ. लाकुलाख्यं ।

अट्टहासमिति प्रोक्तमन्यदस्ति महत्तरम् ।
महानन्दो हरस्तत्र महानन्दा महेश्वरी ॥ ४५ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ४६ ॥
महेन्द्रमिति विख्यातमदन्यदस्ति महीतले ।
हरो महान्तकस्तत्र शिवा सा तु महान्तका ॥ ४७ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ४८ ॥
भीमं नाम महास्थानमस्ति भीतिविनाशनम् ।
तत्र भीमेश्वरो देवः शिवा भीमेश्वराभिधा ॥ ४९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ५० ॥
वस्त्रापथमिति ख्यातमस्ति स्थानं महत्तरम् ।
भवस्तत्र शिवः साक्षाद्भवानी परमेश्वरी ॥ ५१ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ५२ ॥
अर्धकोटिरिति ख्यातमन्यदस्ति सुशोभनम् ।
देवस्तत्र महायोगी रुद्राणी च महेश्वरी ॥ ५३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ५४ ॥
अविमुक्तमिति ख्यातमन्यदस्ति सुशोभनम् ।
महादेवाभिधः शंभुर्विशालाक्षी शिवा परा ॥ ५५ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ॥ ५४ ॥ ५५ ॥

---

१ ख भीमनाथं म° । २ ग महादेवो ।

तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ५६ ॥
महालयमिति ख्यातमन्यदस्ति सुशोभनम् ।
रुद्रस्तत्र हरः साक्षान्महाभागाभिधा शिवा ॥ ५७ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ५८ ॥
गोकर्णाख्यं महास्थानमस्ति भूमितले शुभम् ।
महाबलो हरस्तत्र शिवा सा भद्रकर्णिका ॥ ५९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ६० ॥
भद्रकर्णं महास्थानमस्ति भद्रंकरं परम् ।
भद्रा तत्र महादेवी महादेवः शिवाभिधः ॥ ६१ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ६२ ॥
सुवर्णाक्षमिति प्रोक्तमन्यदस्ति महत्तरम् ।
शिवस्तत्र सहस्राक्ष उत्पलाक्षी शिवा परा ॥ ६३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ६४ ॥
स्थाणुसंज्ञं महास्थानमस्ति भूमितले शुभम् ।
शिवः स्थाण्वीश्वरस्तत्र शिवा स्थाण्वीश्वरी परा ॥ ६५ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ६६ ॥
कमलालयमित्युक्तमस्ति स्थानं महत्तरम् ।
कमलाख्यो हरस्तत्र कमलाख्या महेश्वरी ॥ ६७ ॥

॥५६॥५७॥५८॥५९॥६०॥६१॥६२॥६३॥६४॥६५॥६६॥६७॥

तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ६८ ॥
छागण्डलमिति प्रोक्तमन्यदस्ति महत्तरम् ।
कपर्दी तत्र देवेशः प्रचण्डाख्या महेश्वरी ॥ ६९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ७० ॥
कुरण्डमिति विख्यातमन्यदस्ति सुशोभनम् ।
ऊर्ध्वरेता हरस्तत्र त्रिसंध्याख्या शिवा परा ॥ ७१ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ७२ ॥
माकोटाख्यं महास्थानमन्यदस्ति महीतले ।
महोत्कटो हरस्तत्र शिवा सा मुकुटेश्वरी ॥ ७३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ७४ ॥
मण्डलेश्वरसंज्ञं च स्थानमस्ति महत्तरम् ।
श्रीकण्ठस्तत्र देवेशः शंकरी शाण्डकी मता ॥ ७५ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ७६ ॥
कालंजरमिति ख्यातमस्ति स्थानं महीतले ।
नीलकण्ठो हरस्तत्र शिवा काली प्रकीर्तिता ॥ ७७ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ७८ ॥

॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ॥ ७७ ॥ ७८ ॥

---

१ ग. करण्डलमिति ख्या° । २ ग. °ख्या महेश्वरी ॥ ७१ ॥ त° । ३ ग. शार्ङ्गकी ।

शङ्कुकर्णं महास्थानं सर्वदोषनिवारणम् ।
महातेजा हरस्तत्र ध्वनिः सा परमेश्वरी ॥ ७९ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ८० ॥
स्थूलेश्वरसमाख्यं तु स्थानमस्ति महत्तरम् ।
स्थूलस्तत्र महादेवः स्थूला सा परमेश्वरी ॥ ८१ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ८२ ॥
श्रीमद्व्याघ्रपुराख्यं तु स्थानमस्ति महीतले ।
हरः सभापतिस्तत्र शिवा दक्षसभापती ॥ ८३ ॥
तत्र देवं च देवीं च श्रद्धया परया सह ।
तत्तन्नाम्ना तु संपूज्य मुच्यते सर्वपातकैः ॥ ८४ ॥
यत्र नृत्यति देवेशः स्वात्मानन्दप्रमोदतः ।
यत्र नृत्यन्तमीशानमम्बिका परिपश्यति ॥ ८५ ॥
यत्र भक्तिमतां नृणां प्रसीदति महेश्वरः ।
यत्र नृत्यन्तमीशानमम्बिका परिपश्यति ॥ ८६ ॥
स्थानानामपि सर्वेषामेतत्स्थानं महत्तरम् ।
अत्र जप्तं हुतं दत्तमसंख्येयगुणाधिकम् ॥ ८७ ॥
अस्मिन्नेव महास्थाने शिवगङ्गाभिधं परम् ।
तटाकमस्ति तत्तीरे दक्षिणे नृत्यतीश्वरः ॥ ८८ ॥
तस्मिन्नेव तटाके यो नित्यं स्नात्वा द्विजा नरः ।
दृष्ट्वा दक्षसभानाथं परमश्रद्धया सह ॥ ८९ ॥

॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ॥ ८८ ॥ ८९ ॥

१ ख. दक्षसभा पती मता । ८३ ॥ त° । २ ङ. °गुणात्मक° ।

अष्टोत्तरसहस्रं तु मन्त्रमाद्यं षडक्षरम् ।
जपति प्रीतिसंयुक्तः प्रसिद्धैरपि मुच्यते ॥ ९० ॥
आदित्ये मेषसंयुक्ते पर्वण्यार्द्रादिने तथा ।
तटाकेऽस्मिन्नरः स्नात्वा प्रसिद्धैरपि मुच्यते ॥ ९१ ॥
आदित्ये वृषभं प्राप्ते तटाकेऽस्मिन्वृषोदये ।
स्नात्वा दत्त्वा महापापैः प्रसिद्धैरपि मुच्यते ॥ ९२ ॥
आदित्ये मिथुनं प्राप्ते तटाकेऽस्मिन्महत्तरे ।
कृष्णाष्टम्यां नरः स्नात्वा प्रसिद्धैरपि मुच्यते ९३ ॥
आषाढे तु चतुर्दश्यां कृष्णपक्षे समाहितः ।
तटाकेऽस्मिन्नरः स्नात्वा प्रसिद्धैरपि मुच्यते ॥ ९४ ॥
श्रावण्यां पौर्णमास्यां तु तटाकेऽस्मिन्समाहितः ।
स्नात्वा तु पातकैः सर्वैः प्रसिद्धैरपि मुच्यते ॥ ९५ ॥
कन्यकायां स्थिते चार्के जन्मर्क्षे चार्कवारके ।
नरः स्नात्वा तटाकेऽस्मिन्प्रसिद्धैरपि मुच्यते ९६ ॥
॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ४ ॥ ९५ ॥ ९६ ॥

आदित्ये च तुलां प्राप्ते भगनक्षत्रके नरः ।
प्रातः स्नात्वा तटाकेऽस्मिन्प्रसिद्धैरपि मुच्यते ॥ ९७ ॥

भगनक्षत्रक इति । " फल्गुनीनक्षत्रं भगो देवता " इति श्रुतेः पूर्वाफल्गुन्याख्यं भगनक्षत्रम् ॥ ९७ ॥

आदित्ये वृश्चिकं प्राप्ते पावकस्य दिने नरः ।
प्रातः स्नात्वा तटाकेऽस्मि[1]न्प्रसिद्धैरपि मुच्यते ॥ ९८ ॥

पावकस्य दिन इति[2] । कृत्तिकायामित्यर्थः ॥ ९८ ॥

आदित्ये चापसंयुक्ते रौद्रनक्षत्रके नरः ।
स्नानं कृत्वा तटाकेऽस्मिन्प्रसिद्धैरपि मुच्यते ॥ ९९ ॥
॥ ९९ ॥

१ ख. ग. घ. ङ. च. छ ज. श्रुतेरुत्तराफ°। २ ख. ग. घ. ङ. °ति.। उत्तराफाल्गुन्यामि°।

आदित्ये मकरं प्राप्ते पुष्यर्क्षे चार्कवारके ।
नरः स्नात्वा तटाकेऽस्मिन्प्रसिद्धैरपि मुच्यते ॥ १०० ॥
माघमासि मघर्क्षे तु तटाकेऽस्मिन्महत्तरे ।
स्नानं कृत्वा महापापैः प्रसिद्धैरपि मुच्यते ॥ १०१ ॥
फाल्गुने चोत्तरे मर्त्यस्तटाकेऽस्मिन्महत्तरे ।
स्नानं कृत्वा महापापैः प्रसिद्धैरपि मुच्यते ॥ १०२ ॥
अनेन सदृशं स्थानं नास्ति लोकत्रयेष्वपि ।
अत्रैव वर्तमानस्तु मुच्यते भवबन्धनात् ॥ १०३ ॥
अत्र ब्रह्मविदां नित्यमन्नं पेयं ददाति यः ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ १०४ ॥
गृहं वा मठिकां वाऽपि प्रदत्त्वाऽत्रैव योगिने ।
सर्वपापविनिर्मुक्तः शंकरं याति मानवः ॥ १०५ ॥
स्थानमेतत्पुरा शंभुः सर्वदोषनिवृत्तये ।
निर्ममे सर्वजन्तूनां केवलं करुणाबलात् ॥ १०६ ॥
अनेककोटिभिः कल्पैरर्जितैः पुण्यराशिभिः ।
स्थानं मनुष्यैः संसिद्ध्यत्यन्तशोभनम् ॥ १०७ ॥

वर्णितमतिशोभनं मया
पापराशिविनिवर्तकं नृणाम् ।
स्थानमेतदतिशोभनं सदा
सेवनीयमखिलैस्तु जन्तुभिः ॥ १०८ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
पापशुद्ध्युपायकथनं नाम त्रिचत्वारिंशोऽध्यायः॥४३॥

॥ १०० ॥ १०१ ॥ १०२ ॥ १०३॥१०४॥१०५॥१०६॥१०७॥१०८

इति श्रीसूतसंहिताटीकायां तात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डे
पापशुद्ध्युपायकथनं नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

अथ चतुश्चत्वारिंशोऽध्यायः ।

सूत उवाच—

अथातः संप्रवक्ष्यामि द्रव्यशुद्धिं समासतः ।
श्रद्धया सह विप्रेन्द्राः शृणुताऽऽत्मविशुद्धये ॥ १ ॥

सच्चिदानन्दरूपस्याऽऽत्मनः स्वाभाविकशुद्धिं सिद्धवत्कृत्य तदुपजीवनेन तत्स्वरूपेऽध्यस्ताविद्यातत्कार्यविलसितरूपस्य दोषजातस्य निवर्तकप्रायश्चित्तमुक्तम् । अथ तां स्वतःशुद्धिमात्मनः प्रतिपादयितुं द्रव्यशुद्धिं प्रतिजानीते— अथात इति ॥ १ ॥

आत्माऽनात्मेति विप्रेन्द्रा द्विधा द्रव्यं व्यवस्थितम् ।
आत्मद्रव्यं स्वयं[1] शुद्धं सत्यज्ञानादिलक्षणम् ॥ २ ॥

द्रव्यं व्यवस्थितमिति । द्रव्यशब्दो वस्तुपर्यायो न तु पराभिमतद्रव्यत्वजातिप्रवृत्तिनिमित्तकस्तथात्वे त्वात्मनो द्रव्यत्वजातिसंसर्गविरहेण द्रव्यशब्दवाच्यता न स्यात् । सत्यज्ञानानन्दादिकं ह्यात्मनः पारमार्थिकं स्वरूपम् । यद्यपि तदखण्डैकरसं तथाऽपि सर्वदा बाधराहित्यादुपाधिभेदेन सच्चिदा[2]दिभेदेन व्यवहियते । उक्तं ह्याचार्यैः—"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः । अपृथक्त्वेऽपि चैतन्यात्पृथ[3]गिवावभासन्ते" इति ॥ २ ॥

सत्तामात्रं[4] न दोषोऽस्ति स्वतः शुद्धं यतः सदा ।
यदि सत्ता स्वतोऽशुद्धा दुष्टं सर्वं[5] भवेत्सदा ॥ ३ ॥

तत्र स्वरूपस्य स्वतःशुद्धिं प्रतिपादयति—सत्तामात्र इति । स्वस्मिन्परिकल्पितनानाव्यक्तिष्वधिष्ठानसद्रूपस्यानुगमात्तदभिप्रायेणाधिष्ठानभूतं सन्मात्रमेव सत्तेत्युच्यते । तस्य सत्तामात्रस्य यस्मात्स्वतःशुद्धिरङ्गीकार्या अतस्तत्र न दोषस्पर्श इत्यर्थः । विपक्षे बाधकमाह—यदि सत्तेति । स्वत इति । कारणान्तरमनपेक्ष्य स्वरूपत एवेत्यर्थः ॥ ३ ॥

दुष्टसत्ताभिसंबन्धाद्दुष्टस्पृष्टं सदा खलु ।
तथा सति विशुद्धं तु न सिध्यत्येव किंचन[5] ॥ ४ ॥

विमतं सर्वं दुष्टं दुष्टसत्तासंस्पृष्टत्वाद्दुष्टस्पृष्टभाण्डवदित्यभिप्रायः । तथा सति दोषाभावव्याप्तायाः शुद्धेर्न क्वचिदप्यात्मलाभ इत्यर्थः ॥ ४ ॥

---

१ ख. स्वतः । २ ख. घ. °दानन्दभे । ३ छ. °थग्विभा° । ४ ङ. ब्रेणादो° । ग. घ. °ब्रेण दो° । ५ घ. ज. °ति निर्दोषभा° । ग. ङ. च. °ति निर्देषाभा° ।

सत्ताशून्यं तु तुच्छं स्यात्सत्ता शुद्धा स्वतस्तथा।
ज्ञप्तिरूपमपि ज्ञानं शुद्धमेव स्वतः सदा ॥ ५ ॥

सत्ताशून्यं त्विति। निर्दुष्टत्वाय यदि सर्वं जगत्स्वात्मनो दुष्टसत्तासंसर्गं जह्यात्तदा तन्निरुपाख्यमेव भवेत्। अतः सत्तायाः स्वतः शुद्धिरङ्गीकार्येत्यर्थः। चिन्मात्रस्यापि स्वतःशुद्धिमाह—ज्ञानमिति। ज्ञायतेऽनेनेति ज्ञानमिति करणत्वेन व्युत्पत्तिसंभवात्तद्व्यावृत्त्यर्थं ज्ञप्तिरूपमिति विशेषणम् ॥ ५ ॥

अशुद्धिर्जडरूपे हि दृष्टा सर्वजनैरपि।
स्वतःस्फुरणरूपं तु ज्ञानं दुष्टं भवेद्यदि ॥ ६ ॥
दुष्टमेव भवेत्सर्वं दुष्टस्फुरणसंगमात्।
तथा सति विशुद्धं तु न सिध्यत्येव किंचन ॥ ७ ॥

अशुद्धिर्जडरूप इति। अनात्मप्रपञ्चे ह्यशुद्धत्वं जडत्वव्याप्तं दृश्यते तज्जडत्वं स्वप्रकाशचिदात्मनो व्यावर्तमानं स्वव्याप्यमप्यशुद्धत्वं व्यावर्तयतीत्यर्थः। तत्रापि पूर्ववद्विपक्षे बाधकमाह—ज्ञानं दुष्टमित्यादिना ॥ ६ ॥ ७ ॥

वस्तु स्फुरणशून्यं तु तुच्छमेव भवेत्सदा।
दुष्टकारणविज्ञाने दोषोऽस्तीति वदेद्यदि ॥ ८ ॥
अभिव्यञ्जकवृत्त्या[3] तु ज्ञाने दोषो न च स्वतः।
अन्यथा सकलं ज्ञानं दुष्टमेव स्वतो भवेत् ॥
अतः स्फुरणरूपं तु ज्ञानं शुद्धं सदैव तु ॥ ९ ॥

स्फुरणशून्यं त्विति। स्वगोचरज्ञानाधीनत्वाद्वस्तुसिद्धेस्तस्य च ज्ञानस्य दुष्टत्वेनाङ्गीकारे सर्वदाऽप्रतिभातं जडं जगच्छशविषाणवत्तुच्छमेव भवेदित्यर्थः। विपक्षे बाधकमभिधाय ज्ञानस्य पुनर्दोषसद्भावमाशङ्क्य निरस्यति—दुष्टकारणेति। काचकामलादिदोषदूषितचक्षुरादिकारणजनिते शुक्तिरजतादिभ्रमज्ञाने दोषो दृश्यते तत्सामान्यादन्यत्रापि दोषसंभावना किं न स्यादिति न शङ्कनीयम्। तत्र हि शुक्त्यधिष्ठानचैतन्याभिव्यञ्जिका[4] तदाश्रितमायामयरजतविषयेदंकारास्पदमनोवृत्तिवच्चित्तचैतन्यस्थाविद्यावृत्तिरेव दुष्टकारणजनिता न तु वृत्त्यवच्छिन्नस्फुरणम्। ततश्चोपाधिवशादेव स्फटिके लौहित्यमिव स्फुरणे दोषाव-

---

ग. ङ. °नानङ्गी। २ च. °दि-२°। ३ घ. °व्यञ्जकात्तद्वा°। ४ ब. °क्तिर्भाति निर्मिता चै°।

भासो न तु स्वभाव इत्यर्थः। अन्यथेति । विभ्रमज्ञानगतस्फुरणमात्रस्य स्वाभाविकदुष्टत्वाङ्गीकारे तत्सामान्यात्सर्वमपि ज्ञानं स्वभावतो दुष्टं स्यात्। तथाच पूर्वोक्तो बाध इत्यभिप्रायः ॥ ८ ॥ ९ ॥

आनन्दस्तु स्वयं शुद्धः पुरुषैरर्थ्यते यतः ।
अशुद्धः सर्वथा भावो नार्थ्यते पुरुषैः खलु ॥ १० ॥
ब्रह्मादिस्तम्बपर्यन्तैरर्थ्यते हि सुखं सदा ॥ ११ ॥

आनन्दरूपस्यापि स्वतः शुद्धिमुपपादयति—आनन्दस्त्विति । पुरुषैरर्थ्यमानत्वादानन्दस्यापि स्वतः शुद्धिरङ्गीकार्या न ह्यविशुद्धः पदार्थः पुरुषैरर्थ्यते ॥ १० ॥ ११ ॥

विषयेन्द्रियसंपर्काज्जन्यते हि सुखं सदा ।
न दृश्यते ततो दुष्टमिति चेत्तन्न संगतम् ॥ १२ ॥
अभिव्यञ्जकवृत्त्या हि सुखे दोषो न च स्वतः ।
आत्मरूपं सुखं नित्यं नैव जन्मविनाशवत् ॥ १३ ॥

ब्रह्मादिस्तम्बान्तैरर्थनीयस्य तस्याऽऽनन्दस्य नश्वरत्वमाशङ्क्य निरस्यति—विषयेन्द्रियेति । शुभकर्मोपस्थापितविषयैरिन्द्रियसंप्रयोगवशात्सुखं जन्यते। अनन्तरक्षणे च दृश्यते। तथा च सत्युत्पत्तिविनाशवत्त्वेन सुखस्य दुष्टत्वमिति शङ्काभिप्रायः । विषयेन्द्रियसंप्रयोगात्सुखविषया मनोवृत्तिरेव केवलं जन्यते न तु तद्वृत्त्यवच्छिन्नसुखमतो व्यञ्जकवृत्तिगतावेव जन्मविनाशौ व्यङ्ग्ये सुखेऽवभासेते अतो नश्वरत्वदोषप्रसङ्गः स्वाभाविकसुखे नास्तीत्यर्थः। आत्मरूपमिति। सुखस्य नित्यात्मस्वरूपत्वादपि जन्मविनाशौ स्वाभाविकौ न स्त इत्यर्थः॥ १२ ॥ १३ ॥

प्रेमालम्बनतः स्वात्मा सुखमेव न संशयः ।
आत्मनश्च सुखस्यापि प्रेमालम्बनता सदा ॥ १४ ॥
विद्यतेऽतस्तयोरैक्यं वस्तुतस्तु सुखात्मनोः ।
अतश्चाऽऽत्मतया नित्यं सुखं निर्दोषमेव हि ॥ १५ ॥

सुखस्याऽऽत्मरूपत्वमुपपादयति—प्रेमालम्बनत इति । परप्रेमास्पदत्वादात्मनः सुखरूपत्वम् । एतदेव सुखात्मनोरैक्यमुपपादयति—आत्मनश्चेति । शुभकर्मोपस्थापितविषयेन्द्रियसंपर्कजनितान्तःकरणवृत्त्यवच्छिन्नस्य सुखस्य

तदनुभवित्रात्मनश्चोभयोरपि प्रेमास्पदत्वात्तस्मादुपाधिकृतभेदविरहे वास्तवमैक्यमध्यवसेयमित्यर्थः ॥ १४ ॥ १५ ॥

अतः सत्यचिदानन्दः स्वतः शुद्धो न संशयः ॥
सत्यादिलक्षणं चाऽऽत्मद्रव्यं शुद्धं ततः स्वतः ॥ १६ ॥

सत्यादिलक्षणमिति । परिकल्पितभेदभिन्नानां सत्ताज्ञानसुखानां निर्दुष्टत्वेन स्वतःशुद्धिप्रतिपादनात्कल्पितभेदविरहादखण्डैकरसभावेनैतेषामेवाऽऽत्मस्वरूपत्वात्सत्यज्ञानादिलक्षणमात्मवस्त्वपि स्वतः शुद्धमित्यर्थः ॥ १६ ॥

अज्ञानोपाधिसंपर्कादशुद्धमिव भाति तत् ॥
विशुद्धिः परमा तस्य ज्ञानादेव न कर्मणा ॥ १७ ॥

ज्ञानादेवेति । अविशुद्ध्यापादकस्याज्ञानस्य कर्मणा सह विरोधाभावात्स्वाभाविकशुद्धात्मज्ञानादेव तस्य निवृत्तिरित्यर्थः ॥ १७ ॥

स्वतःशुद्धस्य चाज्ञानादशुद्धिः स्वात्मवस्तुनः ॥
अज्ञानस्य निवृत्त्यैव शुद्धिः स्वाभाविकी भवेत् ॥ १८ ॥

अज्ञानस्य निवृत्त्यैवेति । ज्ञानेनाज्ञाननिवृत्तिरेव केवलं निष्पाद्या तथैव ज्ञानप्राप्त्याऽशुद्धिनिवृत्तावात्मनः स्वाभाविकी शुद्धिरावरणाभावादाविर्भवतीत्यर्थः ॥ १८ ॥

कर्मणा शुद्धिरुत्पन्ना यदि सा तस्य नश्यति ॥
कर्मसाध्यमनित्यं हि न नित्यं संमतं हि तत् ॥ १९ ॥

तस्य नश्यतीति । वस्तुकृतमात्मनोऽशुद्धत्वमङ्गीकृत्य तस्य प्रायश्चित्तरूपेण कर्मणा निवर्तितत्वादसती शुद्धिरिदानीमुत्पद्यते चेत्तर्हि सा शुद्धिस्तस्याऽऽत्मनोऽवश्यं नश्यति । कृतकत्वस्यानित्यत्वनियमादित्यर्थः । व्याप्तिं दर्शयति—कर्मसाध्यमिति ॥ १९ ॥

सच्चिदानन्दरूपात्मा नित्यशुद्धः स्वयं स्वतः ॥
अज्ञानाज्जीवता तस्य नैव स्वाभाविकी सदा ॥ २० ॥

अज्ञानाज्जीवतेति । सच्चिदानन्दरूपः परमेश्वर एव प्रत्यगात्मा तस्य तादृक्स्वरूपत्वाच्छादकादज्ञानादेव जीवत्वे तदभिमानत एव तस्याशुद्धिः ॥ २० ॥

अतो जीवेश्वरैकत्वज्ञानादेवाऽऽत्मवस्तुनः ॥
विशुद्धिः परमा प्रोक्ता कर्मणा न कथंचन ॥ २१ ॥

तन्निवृत्त्युपायमाह—अतो जीवेश्वरैकत्वज्ञानादिति । जीवभावेनावस्थितस्य प्रत्यक्चैतन्यस्य नित्यशुद्धबुद्धमुक्तस्वभावपरशिवात्मैत्वज्ञानादज्ञानपरिकल्पित-जीवत्वलक्षणाया अविशुद्धेः स्वकारणभूताज्ञाननिरासेन निःशेषं निवर्तितत्वा-त्पुनरुत्पत्त्यभावेन परमा विशुद्धिरात्मनो भवतीत्यर्थः । याज्ञवल्क्येनापि स्मर्यते—" क्षेत्रज्ञस्याऽऽत्मविज्ञानाद्विशुद्धिः परमा मता " इति ॥ २१ ॥

अज्ञानेनाऽऽवृतो जीवो व्यवहारे तु कर्मणा ॥
वेदोदितेन शुद्धिः स्याज्ज्ञानाच्छुद्धिः पराऽस्य तु ॥ २२ ॥

परत्वस्यापरसापेक्षत्वादीदृशीं शुद्धिं दर्शयति—अज्ञानेति । सच्चिदानन्दलक्षणः परमेश्वर एव ह्यज्ञानेनाऽऽवृतो जीवो भवति तस्य व्यवहारदशायां श्रुति-स्मृत्युदितेन कर्मणा या शुद्धिः सा परमा । तेन ह्यज्ञानकार्यं पापमेव केवलं निवर्त्यते न तु तन्मूलभूताज्ञानं तेन सह कर्मणो विरोधाभावादेव मूलभूते तस्मिन्सति निवर्त्यसजातीयस्यापुण्यस्य[2] पुनरुत्पत्तेरवश्यंभावात्कर्मजन्या शुद्धिस्तात्कालिकीति तस्या अपरमत्वम् । ज्ञानजन्या शुद्धिस्तु नेदृशीति तस्याः परत्वम् ॥ २२ ॥

अनात्मरूपं यद्द्रव्यमशुद्धं तत्स्वभावतः ॥
तथाऽपि व्यवहारे तु विशुद्धिस्तस्य कीर्तिता ॥ २३ ॥
आध्यात्मिकादिभेदेन द्विधाऽनात्मा व्यवस्थितः ॥
देहेन्द्रियाद्यहंबुद्धिग्राह्यमाध्यात्मिकं भवेत् ॥ २४ ॥
पृथिव्यादीनि भूतानि भौतिकानि तथैव च ॥
शब्दस्पर्शादयः प्रोक्ता आधिभौतिकसंज्ञिताः ॥ २५ ॥

अशुद्धं तत्स्वभावत इति । अनात्मवस्तुनः सर्वस्य मायापरिकल्पितस्वरूप-त्वादविचारितरमणीयत्वेन स्वाभाविकमेवाशुद्धत्वमित्यर्थः । कीर्तितेति । जीवात्मनोऽपि श्रुतिस्मृत्युदितेन कर्मणा व्यावहारिकी शुद्धिर्मन्वादिभिरभिहि-तेत्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥

वेदोदिताच्च संस्काराच्छिवभावनयाऽपि च ।
तथा हिंसादिराहित्याद्देहशुद्धिर्द्विजा भवेत् ॥ २६ ॥

---

१ ख. °त्मैकत्व° । २ ब. °र्त्यजातीयस्य पापस्य पुन° ।

वेदोदिताश्च संस्कारादिति । गर्भाधानपुंसवनसीमन्तजातकर्मादिको देहादेरनात्मनो वेदोदितः संस्कारः ॥ २६ ॥

इन्द्रियाणामधिष्ठातृदेवतास्मरणादपि ।
शिवभावनया चापि विशुद्धिर्द्विजपुंगवाः ॥ २७ ॥
प्राणायामादधिष्ठातृदेवतास्मरणादपि ।
शिवभावनया शुद्धिर्भवेत्प्राणस्य सुव्रताः ॥ २८ ॥

इन्द्रियाणामिति । श्रोत्रत्वगादीनामिन्द्रियाणाम् " दिग्वाय्वादित्यवरुणपृथिव्याख्यास्तु देवताः" इत्यादिना चतुर्दशेऽध्यायेऽधिष्ठातृदेवताः प्रतिपादितास्तन्मयत्वेन तेषां स्मरणं विशुद्धिहेतुः । अपिशब्दः पूर्वोक्तसंस्कारसमुच्चयार्थः ॥ २७ ॥ २८ ॥

निषिद्धचिन्तनाभावाच्छिवभावनयाऽपि च ।
मनआदेस्तु विप्रेन्द्रा भवेच्छुद्धिर्न संशयः ॥
समाधौ विलयश्चापि विशुद्धिः परिकीर्तिता ॥ २९ ॥

समाधौ विलय इति । विजातीयवृत्त्यव्यवहितेन[1] ब्रह्माकारमनोवृत्तिप्रवाहेण ध्येयपरशिवस्वरूपावरणाज्ञानापनयनेन यद्ध्येयमात्रस्य स्फुरणं स समाधिः । तत्र विद्यमाना अपि मनोवृत्तयः स्वगोचरविषयवृत्तेरभावे तद्विषया इवासच्छायाः । तथा च पातञ्जलं सूत्रम्—"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" इति । एवं समाध्यवस्थायामुक्तलक्षणेन विलयः सोऽप्यन्तःकरणस्य शुद्धिहेतुरित्यर्थः ॥ २९ ॥

देहादेस्तु विशुद्ध्याऽऽत्मा शुद्धोऽहमिति विभ्रमात् ।
स्वात्मानं मन्वते शुद्धं सा शुद्धिर्व्यावहारिकी ॥ ३० ॥

विभ्रमादिति । तीर्थस्नानादिजन्यशुद्ध्यधिकरणदेहेन्द्रियादितादात्म्यविभ्रमात्स्वात्मनि तदीयधर्मसंसर्गाध्यासेन शुद्धोऽहमिति सा व्यावहारिकी न तु पारमार्थिकी ॥ ३० ॥

अशुद्ध्याऽशुद्धवद्भाति शरीरादेस्तु चेतनः ।
व्यवहारे यथा चन्द्रो निश्चलोऽपि चलत्यपि ॥ ३१ ॥

---

१ ख. °त्त्यन्तररहि° । २ ख. घ. °शुद्धिक° । ङ. च. °शुद्धान्तःक° ।

भूतभौतिकरूपाणां विशुद्धिर्ब्रह्मभावनात् ।
भवत्येव न संदेहः सत्यमुक्तं मयैव तु ॥ ३२ ॥
ब्रह्मभावनया सर्वं विशुद्धमिति पश्यतः ।
न हेयं विद्यते किंचित्सत्यमेव न संशयः ॥ ३३ ॥

तर्हि परमार्थतोऽशुद्ध एवाऽऽत्मा नेत्याह—अशुद्ध्येति। सच्चिदानन्दलक्षणस्य स्वात्मनः स्वतःशुद्धेः प्राक्प्रतिपादितत्वात्तादृशस्याप्यस्य व्यवहारावस्थायामविशुद्धदेहादितादात्म्याभिमानेन तदीययाऽशुद्ध इव भाति। यथा चन्द्रः स्वतो निश्चलोऽपि चञ्चलेषु जलतरङ्गबुद्बुदेषु प्रतिबिम्बितः सन्स्वाश्रयचलनाध्यासेन स्वयमपि चलानिव भाति तद्वत् ॥ ३१ ॥ ३२ ॥ ३३ ॥

ब्रह्म सर्वमिति ज्ञानाद्भावनाबलतोऽपि वा ॥ ३४ ॥
विना विशुद्धिर्द्रव्याणां न सिध्यति कदाचन ।
शुद्धिः कृच्छ्रेण सिद्धाऽपि द्विजा वेदार्थपरगाः ॥ ३५ ॥

ब्रह्म सर्वमिति। ज्ञानादिति। अनात्मप्रपञ्चस्य सर्वस्य सन्घटः सन्पटः सत्कुड्यमित्याद्यनुवेधबलेन सन्मात्रस्वरूपपरमात्मनि कल्पितत्वेन वस्तुतस्तत्स्वरूपानतिरिक्तत्वाद्वास्तवमखण्डैकरसमद्वितीयं तत्स्वरूपं साक्षात्कुर्वतो ब्रह्मैव सर्वं न ततोऽतिरिक्तं किंचिदिति निर्विचिकित्सं ज्ञानं जायते तस्मादित्यर्थः। भावनाबलत इति। यस्तु "इदं सर्वं यदयमात्मा" इत्यादिश्रुतेरुक्तलक्षणमर्थं जानानोऽप्यसंभावनाविपरीतभावनाभ्यां संदिग्धे तस्याऽऽपातज्ञानिनो ब्रह्मभावनयैव सर्वं शुध्यतीत्यर्थः। विनेति। सर्वस्य ब्रह्मरूपत्वज्ञानं तद्रूपत्वेन भावनं चैतदुभयमन्तरेणेत्यर्थः ॥ ३४ ॥ ३५ ॥

अशुद्ध्या चाऽऽवृतं सर्वं धूमेनाग्निर्यथाऽऽवृतः ।
तथाऽपि शुद्धिः कर्तव्या व्यवहारेऽखिलस्य तु ॥ ३६ ॥
वेदसिद्धेन मार्गेण श्रेयस्कामैर्मनीषिभिः ।
चण्डालाद्यैस्तु संस्पृष्टं मृन्मयं पक्वमुत्सृजेत् ॥ ३७ ॥

अशुद्ध्या चाऽऽवृतमिति। प्रायश्चित्तेन शुद्धोऽप्यनात्मपदार्थः स्वाभाविकयाऽशुद्ध्याऽऽवृत एव भवति। अग्निधूमयोरिव तयोरविनाभूतत्वादित्यर्थः।

---

१ ग. °मिव प°।

भगवताऽप्युक्तम्—"सर्वारम्भा हि दोषेण धूमेनाग्निरिवाऽऽवृताः" इति । श्रेयस्कामैरिति । अभ्युदयनिःश्रेयसलक्षणपुरुषार्थं कामयमानैर्विद्वद्भिः पूर्वोक्तब्रह्मरूपत्वज्ञानेन सद्भावनया चोक्तेन श्रुतिस्मृत्युक्तमार्गेणानात्मपदार्थस्य तात्कालिकी शुद्धिः कर्तव्या ॥ ३६ ॥ ३७ ॥

प्रक्षालयेदपक्वं तु प्रोक्षयेद्वा कुशोदकैः ।
पक्वं शूद्रेण संस्पृष्टं प्रोक्षणादेव शुध्यति ॥ ३८ ॥
त्याज्यमेवोपयुक्तं स्यात्पुनः पाकेन वा शुचि ।
आकारद्वितयात्मस्थं मृन्मयं तु पुरातनम् ॥ ३९ ॥
अग्निदाहेन संशुध्येन्नूतनं क्षालनेन तु ।
विष्ठया मृन्मयं स्पृष्टमुपयुक्तं परित्यजेत् ॥ ४० ॥
अपक्वं क्षालयेच्छुद्ध्यै बहुशस्तु कुशोदकैः ।
उदक्याशुचिसंस्पृष्टं यज्ञपात्रं तु दारवम् ॥ ४१ ॥
उपयुक्तं त्यजेदन्यत्क्षालयेच्च कुशाम्भसा ।
विलोक्य देशकालादि द्रव्यं द्रव्यप्रयोजनम् ॥ ४२ ॥
स्वोपपत्तिमवस्थां च पुनः शौचं समारभेत् ।
अन्नं द्रोणादिकं पक्वमन्त्याद्यस्पृश्यदूषितम् ॥ ४३ ॥
क्षालनेन विघातेन परिशुद्धं हि चाऽऽपदि ।
द्रोणादूनं त्यजेद्भारादधिकं प्रोक्षयेद्बुधः ॥ ४४ ॥
अनापदि न सर्वत्र क्षालयेद्द्रोणतः परम् ।
कुम्भादूर्ध्वं द्विजा धान्यं पक्वं प्रोक्षणतः शुचि ॥ ४५ ॥
अपक्वं क्षालनेनैव विशुद्धं भवति ध्रुवम् ।
भारादूनः परित्याज्यः पक्वधान्यस्य तण्डुलः ॥ ४६ ॥
भारद्वयादधः क्षाल्यस्तदूर्ध्वं प्रोक्षणाच्छुचिः ।
अन्नं पक्वं परित्याज्यमुदक्यान्त्यादिदूषितम् ॥ ४७ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ॥ ४७ ॥

भारषट्कौदनं क्षाल्यं प्रोक्षणीयं ततः परम् ।
उदक्यान्त्यादिसंस्पृष्टं वस्त्रं प्रक्षालयेत्तथा ॥ ४८ ॥
श्वसूकरखरोष्ट्रादिस्पृष्टं च क्षालयेत्तथा ।
नववस्त्रं च काषायं बहुवस्त्रं तथैव च ॥ ४९ ॥
रक्तवस्त्रं तथा कृष्णं प्रोक्षयेत्कम्बलादिकम् ।
तण्डुलेषु तथा धान्ये गुडे गव्ये रसात्मके ॥ ५० ॥
काकादिदूषितांशं तु त्यक्त्वा संप्रोक्षयेद्बुधः ।
द्रवद्द्रव्यस्य संशुद्धिर्भवेदुत्पवनेन तु ॥ ५१ ॥
दुष्टभाण्डस्थितस्यास्य भवेद्दोषो न चापरः ।
द्रव्याणामग्निपक्वानां धान्यवच्छुद्धिरीरिता ॥ ५२ ॥
अलभ्यलाभे संशुद्धिः प्रोक्षणेनैव केवलम् ।
केशलोमनखस्पृष्टं क्रिमिकीटादिदूषितम् ॥ ५३ ॥
अन्नं तु भस्मना शुद्धं प्रोक्षणेन घृतेन च ।
क्रीतं पिष्टमयं सर्वं पुनः पाकेन शुद्ध्यति ॥ ५४ ॥
शूद्रान्त्याशुचिसंस्पृष्टं त्याज्यमेव न संशयः ।
उच्छिष्टो द्रव्यहस्तस्तु भक्ष्यद्रव्यं तु किंचन ॥ ५५ ॥
निधाय शौचं कृत्वाऽथ गृह्णीयात्प्रोक्षितं ततः ।
अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ॥ ५६ ॥
प्रक्षालनेन त्वल्पानां शुद्धिर्वेदोदिताऽपरा ।
तैजसानां सुरास्पर्शे वह्निदाहेन शुद्धता ॥ ५७ ॥
ब्राह्मणस्य विशां राज्ञां क्षालनेन विशुद्धता ।
श्वचाण्डालादिसंस्पर्शे तैजसानां तु मार्जनात् ॥ ५८ ॥

॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥
॥ ५७ ॥ ५८ ॥

प्रोक्षणाच्च विशुद्धिः स्यात्तिन्तिण्या ताम्रशोधनम् ।
भस्मना मृज्जलाभ्यां च मार्जनेन विशुद्धता ॥ ५९ ॥
उदक्यया भुक्तकांस्यस्य घर्षणेन जलेन च ।
कल्याणे तीर्थयात्रायां राष्ट्रक्षोभे च संभ्रमे ॥ ६० ॥
देवोत्सवे च दारिद्र्ये स्पृष्टिदोषो न विद्यते ।
शूद्रानुलोमकाद्यैः प्रतिलोमैश्च दूषितम् ॥ ६१ ॥
मृज्जलाभ्यां विशुध्येत त्वेकविंशतिमार्जनात् ।
अश्मना निर्मितं पात्रं भस्मना सजलेन तु ॥ ६२ ॥
निर्लेपं शुद्धिमाप्नोति त्वेकविंशतिमार्जनात् ।
अब्जानि शङ्खशुक्त्यादिद्रव्याणि सकलानि तु ॥ ६३ ॥
प्रक्षालनेन शुद्धानि भस्मना मार्जनेन च ।
बहुनाऽत्र किमुक्तेन सर्वं ब्रह्मात्मना बुधाः ।
सर्वदोषनिवृत्त्यर्थं चिन्तयेत्सुदृढं सदा ॥ ६४ ॥
॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥

ब्रह्मरूपेण संग्राह्यं सर्वं शुद्धं सदा भवेत् ।
नित्यशुद्धस्य दृष्टिस्तु विशुद्ध्यै भवति ध्रुवम् ॥ ६५ ॥
नित्यशुद्धं हि तद्ब्रह्म सदा सत्यादिलक्षणम् ।
ततस्तद्दृष्टिसंयुक्तं विशुद्धं सकलं भवेत् ॥ ६६ ॥

ब्रह्मरूपेणेति । अनात्मद्रव्यस्य ब्रह्मरूपत्वभावनयेत्यर्थः ॥ ६५ ॥ ६६ ॥

अथवा सकलं कार्यं तर्कतश्च प्रमाणतः ।
कारणात्मतया पश्येत्सर्वदोषनिवृत्तये ॥ ६७ ॥

एवं परमार्थतो ज्ञानवतः पुरुषस्यानात्मवस्तुनि नाम ब्रह्मेत्यादाविव ब्रह्मदृष्ट्या भावनं शुद्धिहेतुरित्युक्तम् । अथ सम्यग्ज्ञानिनः कार्यप्रपञ्चस्य सर्वस्य कारणभूतसच्चिन्मात्रब्रह्मात्मनाऽनुसंधानमेव शुद्धिहेतुरित्याह—अथवेति । तर्कतश्च प्रमाणत इति । यदिदं कार्यं कारणमात्रादनन्यत्तस्य प्राक्प्रतिपादित-

१ ग. ब्रह्मरूपेत्या ।

त्वाज्जगदाकारविवर्तमानमायाधिष्ठानत्वेन कारणभूतं सन्मात्रं ब्रह्मैव सकल-कार्यजगदात्मकं न तु ततोऽतिरिक्तं कार्यं नाम किंचिदिति तर्कतः कार्यस्य कारणत्वावगमः । अस्यार्थस्य प्रतिपादकमुक्ततर्कानुग्राह्यं प्रमाणम् " इदꣳ सर्वं यदयमात्मा " " तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः " " स एषोऽणिमैतदात्म्यमिदꣳ सर्वं यदयमात्मा " इत्यादिका श्रुतिः ॥ ६७ ॥

कारणं सर्वकार्याणां परमात्मैव नेतरत् ।
प्रवदन्ति हि वेदान्ताः स्मृतयश्चाऽऽदरेण तु ॥ ६८ ॥

अतः समस्तं परमेश्वरात्मना
विचिन्तयेत्स्वानुभवेन मानवः ।
विचिन्तनेनैव समस्तमास्तिका
विशुद्धतामेति न चात्र संशयः ॥ ६९ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे
द्रव्यशुद्धिविचारो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

तत्र हि 'येनाश्रुतꣳ श्रुतं भवति' इत्येकविज्ञानात्सर्वविज्ञानं प्रतिज्ञाय कथमे-तद्युज्यत इत्याशङ्क्य घटशरावादिकार्यस्य विकारित्वान्मृदादिकारणमात्रस्यैव सत्यत्वम् "वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिना निर्धार्य तद्दृष्टान्तबलेन वियदादिभूतभौतिकात्मकस्य कार्यप्रपञ्चस्य वाचाऽऽर-म्भणमात्रत्वात् " सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् " इति प्रकृतस्य कारणभूतस्य सद्वस्तुन एव सत्यत्वमिति सत्यनिर्धारणात्कार्यं जगद्विकारमात्रं न तु तत्स्वरूपादन्यदिति कार्यस्य कारणमात्रप्रतिपत्तिस्तदाह—कारणं सर्व-कार्याणामिति ॥ ६८ ॥ ६९ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां तात्पर्यदीपिकायां चतुर्थे यज्ञवै-भवखण्डे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

अथ पञ्चचत्वारिंशोऽध्यायः ।

सूत उवाच–

अथातः संप्रवक्ष्यामि मुनयः संशितव्रताः[1] ।
अभक्ष्यस्य निवृत्त्या तु विशुद्धं हृदयं भवेत् ॥ १ ॥

एवमात्मानात्मनोरुक्तोपायेन शुद्धयोरप्यभक्ष्यभक्षणजनितचित्तमालिन्यद्वारा पुनरप्यविशुद्धिः स्यादिति तन्निवृत्त्यर्थं भक्ष्याभक्ष्यं विवेक्तुमारभते–अथात इति ॥ १ ॥

आहारशुद्धौ चित्तस्य विशुद्धिर्भवति स्वतः ।
चित्तशुद्धौ क्रमाज्ज्ञानं जायते पारमेश्वरम् ॥ २ ॥

आहारशुद्धाविति । कारणभूतस्यान्नस्य विशुद्धौ सत्यां च तत्परिणामरूपस्य कार्यस्यान्तःकरणस्यापि विशुद्धिर्भवतीत्यर्थः । मनसोऽन्नकार्यत्वं श्रूयते " अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः " इति । क्रमादिति ।

"कर्मणा शुद्धचित्तस्य संसृतेर्दोषदर्शनम् ।
पुनर्विरक्तिः संसारान्मोक्षेच्छा जायते ततः" ॥

इति प्रागुक्तादित्यर्थः ॥ २ ॥

पारमेश्वरविज्ञाने सति संसारहेतवः ।
ग्रन्थयस्तु विनश्यन्ति न हि संदेहकारणम् ॥ ३ ॥

ग्रन्थयस्त्विति । अग्न्ययःपिण्डयोरिव सत्त्वपरिणामरूपान्तःकरणचैतन्ययोरज्ञाननिमित्तको यस्तादात्म्यविभ्रमः स एको ग्रन्थिः । अन्तःकरणधर्माणां कर्तृत्वभोक्तृत्वादीनां धर्मितादात्म्याध्यासनिबन्धनो यश्चिदात्मना संसर्गाध्यासः सोऽपरः । चिद्व्याप्तान्तःकरणेन स्थूलदेहादेर्यत्तादात्म्यं सोऽपरः । एते च परमार्थतो निःसङ्गस्याऽऽत्मनः संसारबन्धहेतुत्वाद्ग्रन्थय उच्यन्ते । ततश्च प्रत्यगात्मनः परशिवस्वरूपसाक्षात्कारेण मूलाज्ञाननिवृत्तौ तत्कार्यभूता ग्रन्थयो ह्युपादाननिवृत्त्या निःशेषं निवर्तन्त इत्यर्थः । तथा च च्छान्दोगैराम्नायते– "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भात्सर्वग्रन्थीनां विप्रमोक्षः" इति ॥ ३ ॥

---

१ क. च, छ. ज. शंसितव्रताः ।

अभक्ष्यभक्षणाच्चित्तमशुद्धं भवति स्वतः ।
अशुद्ध्या भ्रान्तिविज्ञानं जायते सुदृढं नृणाम् ॥ ४ ॥

एतदेव विशुद्धाहारस्य क्रमान्मुक्तिसाधनत्वं व्यतिरेकमुखेणोपपादयति— अभक्ष्येति । अशुद्ध्या भ्रान्तिविज्ञानमिति । अविशुद्धाहारेण मालिनस्यानित्याशुचिदुःखादिलक्षणे संसारे नित्यशुचित्वादिलक्षणं भ्रान्तिज्ञानं जायते । "अनित्याशुचिदुःखानात्मसु शुचिनित्यसुखात्मख्यातिरविद्या" इति हि पातञ्जलाः ॥ ४ ॥

भ्रान्तिविज्ञानतः पुंसो निषिद्धाचरणे रतिः ।
जायते तु तया पापं कुरुते कर्म सर्वदा ॥ ५ ॥
तेन संसारवृद्धिः स्यान्न हि मुक्तिः कथंचन ।
तस्मादभक्ष्यं यत्नेन दूरतः परिवर्जयेत् ॥ ६ ॥

भ्रान्तिविज्ञानत इति । उदीरितलक्षणान्मिथ्याज्ञानान्निषिद्धविषयगोचरो रागो जायते तस्माच्च पापे प्रवृत्तिस्तत्फलभूतसंसाराभिवृद्धिरित्याहारशुद्ध्यभावे मुक्त्याशङ्कनऽपि नास्तीत्यर्थः । एतच्च विभ्रमज्ञानादीनामुत्तरोत्तरं प्रति पूर्वपूर्वस्य कारणत्वं नैयायिकैरपि सूत्रितम्—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति ॥ ५ ॥ ६ ॥

अभक्ष्यं ब्रह्मविज्ञानविहीनस्यैव देहिनः ।
न सम्यग्ज्ञानिनस्तस्य स्वरूपं सकलं खलु ॥ ७ ॥

देहिन इति । स्थूलसूक्ष्मकारणात्मना त्रिविधेनापि देहेन तादात्म्यमभिमन्यमानस्य विवेकज्ञानरहितस्यैव वक्ष्यमाणो भक्ष्याभक्ष्यविवेकः । यस्तु सम्यग्ज्ञानी न तस्याभक्ष्यवर्जनं संभवतीत्याह--न सम्यगिति । सम्यग्ज्ञानेन संशयनिरासज्ञानी हि निर्विचिकित्सं स्वात्मनः परं शिवात्मत्वं जानन्भक्ष्याभक्ष्यरूपेण विविधावस्थितमपि सर्वं स्वरूपतयैव जानाति न त्वभक्ष्यं स्वतोऽतिरिक्तं पश्यतीति यद्वर्जने प्रयतेतेत्यर्थः ॥ ७ ॥

अहमन्नं तथाऽन्नाद इति हि ब्रह्मवेदनम् ।
ब्रह्मविद्वसति ज्ञानात्सर्वं ब्रह्मात्मनैव तु ॥ ८ ॥

---

१ ग. °ज्ञानतस्त° । २ ख. ग. घ. °इयति ।

एतदेव सर्वात्मत्वमुपपादयति—अहमन्नमिति । भोक्तृभोग्यात्मकं हि सकलं जगत्तस्य सर्वस्य स्वस्मिन्नज्ञानपरिकल्पितत्वात्स्वरूपयाथात्म्यावबोधेन सकारणस्य तत्रैव विलये सति भोक्तृभोग्ययोः स्वात्ममात्रतया यदनुसंधानं तत्खलु ब्रह्मज्ञानमित्यर्थः । तथा चाऽऽम्नायते—'अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नादः' इति । एवमभक्ष्यवर्जनस्यासंभवं प्रतिपाद्य प्रत्युत तस्य सर्वं भक्ष्यमेवेत्युपपादयति—ब्रह्मविदिति ॥ ८ ॥

ब्रह्मक्षत्रादिकं सर्वं यस्य स्यादोदनं सदा ।
यस्योपसेचनं मृत्युस्तज्ज्ञानी तादृशः खलु ॥ ९ ॥

उक्तोऽर्थः श्रुतिसंमत इति दर्शयति—ब्रह्मक्षत्रादिकमिति । सा च श्रुतिरेवमाम्नाता—"यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः" इति । स्वात्मयाथात्म्यज्ञानेन ब्रह्मक्षत्राद्युपलक्षितं समृत्युकं सर्वं जगत्स्वात्ममात्रतया ग्रसतः सर्वं जगद्भक्ष्यमेव भवतीत्यर्थः ॥ ९ ॥

ब्रह्मस्वरूपं विज्ञातुर्ज्ञानात्तत्तस्य भासते ।
तथा सति जगद्भोज्यं भवेद्विज्ञानिनः खलु ॥ १० ॥

ब्रह्मस्वरूपमिति । सर्वात्मज्ञानवतस्तस्य पुरुषस्य तत्सर्वं जगत्सच्चिदानन्दानुभवबलेन[1] ब्रह्मस्वरूपं भासते । तथा च सति प्रतीयमानस्य जगतः स्वात्मना ग्रस्यमानत्वात्तस्य ज्ञानिनो भोज्यं भवतीत्यर्थः ॥ १० ॥

जगदात्मतया भाति यदा भोज्यं भवेत्तदा ।
यदा स्वात्मतया भाति भक्षितं सकलं तदा ॥ ११ ॥

एतदेव विवृणोति—जगदात्मतयेति । सद्रूपे ब्रह्मण्यध्यस्तं नामरूपात्मकं जगद्यदा यस्यां प्रतीत्यवस्थायामधिष्ठानसत्तासंसर्गवशाल्लब्धसत्ताकं भाति तदा तस्यामवस्थायामारोप्यस्य[2] जगतोऽधिष्ठानसत्त्वव्यतिरेकेण पृथक्सत्त्वानुपपत्तेः सन्मात्रब्रह्मात्मनाऽनुसंधानादभक्ष्यस्य पृथक्सत्त्वाभावेन वर्जयितुमशक्यत्वाच्च तथाविधज्ञानिनः सर्वं जगद्भोज्यमेव भवति । यदा तु बाधावस्थायामधिष्ठानयाथात्म्यज्ञानेनाज्ञानतत्कार्यजातस्य विनिवर्तितत्वात्सर्वं जगत्स्वात्मतया भाति बाधावधिभूतेन प्रत्यगात्मना स्वरूपभूतेन सद्ब्रह्मात्मनैव केवलं भासते न तु नामरूपात्मनेत्यर्थः । तदा सर्वं जगत्सन्मात्रे स्वात्मनि विलापनाद्भक्षितमेव भवतीत्यर्थः ॥ ११ ॥

---

१ ख. °ह्मरूपं तु वि° । २ घ. °नुवेधब° । ३ ङ. °रोपितस्य ।

तदा भातेन रूपेण जगद्भोज्यं भवेत्स्वयम् ।
मानतः स्वात्मना भातं भक्षितं भवति ध्रुवम् ॥ १२ ॥

एवमधिष्ठानसत्त्वोपजीवनेनाभोज्यत्वं निराकृत्याधिष्ठानचिन्मात्रपर्यालोचनयाऽपि तन्निराकरोति—तदेति । अधिष्ठानस्फुरणरूपेणाऽऽरोप्यं जगदपि यदा प्रतीतिसमये स्फुरणवद्भवति तदा सर्वस्य नामरूपात्मकस्य जगतः पृथक्स्फुरणाभावेनाधिष्ठानचिन्मात्रतयाऽनुसंधानाद्भोजयितुमशक्यत्वेन ज्ञानिनः सर्वं जगद्भोज्यं भवतीत्यर्थः । अन्यत्पूर्ववद्भोज्यम् । मानत इति । " इदꣳ सर्वं यदयमात्मा " इत्यादिकात्प्रमाणादित्यर्थः ॥ १२ ॥

जाग्रत्स्वप्नाभिधे काले प्रतीतं ग्रसतीश्वरः ।
स्वात्मनैव सुषुप्ते तु पुनस्तत्सृजति प्रभुः ॥ १३ ॥

ननु चक्षुरादीभिरिन्द्रियैर्घटपटादिलक्षणः प्रपञ्चः पृथक्सत्त्वेनैवानुभूयते कथं तस्य स्वात्ममात्रतया भक्षितत्वमित्याशङ्क्याऽऽह—जाग्रदिति । जागरस्वप्नावस्थयोः प्रतीयमानं सर्वं जगत्सुषुप्तिसमये जीवरूपेण स्थित ईश्वरः स्वात्ममात्रतया ग्रसति तदा तस्याप्रतिभासमानत्वात्तत्कारणभूतमज्ञानमेव हि केवलं प्रतिभासते । नन्वेवं सुषुप्तिसमये यदि सर्वं जगद्ग्रस्तं परेद्युः कथं तस्याऽऽविर्भाव इति तत्राऽऽह—पुनरिति । ग्रस्तसजातीयमन्यदेव जगत्स्वाज्ञानबलात्परस्मिन्दिने पुनरपि सृजति यतोऽयं प्रभुरीश्वरः । अज्ञानादेव तस्य जीवत्वमतस्तस्य सर्जनशक्तिरस्तीति ॥ १३ ॥

यथा स्वप्नप्रपञ्चस्थं समस्तं वस्तुतः स्वयम् ।
तथा जाग्रत्प्रपञ्चस्थं वस्तुतः स्वयमेव हि ॥ १४ ॥

अस्त्वेवं स्वप्नप्रपञ्चस्य जाग्रत्प्रपञ्चस्य तु नैवं संभवतीत्याशङ्क्य स्वप्नदृष्टान्तेनैव तस्यापि स्वात्ममात्रत्वं प्रतिपादयति–यथा स्वप्नेति । यथा स्वप्नप्रपञ्चस्योत्तरक्षणे बाधदर्शनान्मिथ्यात्वेन स्वात्ममात्रत्वमेवमद्वितीयब्रह्मयाथात्म्यज्ञानेनाविद्यातत्कार्यजाग्रत्प्रपञ्चस्यापि बाधितत्वात्परमार्थतः स्वात्ममात्रान्न व्यतिरिच्यत इत्यर्थः ॥ १४ ॥

स्वस्वरूपं स्वयं भुङ्क्ते नास्ति भोज्यं पृथक्स्वतः ।
अस्ति चेदास्तितारूपं ब्रह्मैवास्तित्वलक्षणम् ॥ १५ ॥

---

१ ख. ग. घ. ङ. च. छ. ज. यदेति ।

स्वस्वरूपमिति । यस्मादुक्तरीत्या सर्वं जगज्ज्ञानिनः स्वात्मभूतमेव तस्मा-
द्विषयाकारेण परिकल्पितं स्वात्मानमेव स्वयं भुङ्क्ते न तु स्वस्मात्पृथग्भूतं
भोज्यं नाम किंचिदस्ति यद्भक्ष्याभक्ष्यतया विविच्य विधीयेतेत्यर्थः । ननु
भोक्तुरात्मनः सकाशात्पृग्भूतमेव परिकल्पितमिति शब्दस्पर्शादि भोज्यमस्त्ये-
वेत्याशङ्क्य निरस्यति—अस्तिचेदिति । यद्यस्ति भोज्यं तदप्यस्तित्वानुवे-
धाद्घटपटादिवदस्तित्वरूपं ब्रह्मैव तत्खल्वस्तित्वलक्षणम् । " अस्तिब्रह्मेति
चेद्वेद " " अस्तीत्येवोपलब्धव्यः " इत्यादिश्रुतेः । अतोऽधिष्ठानास्तित्वमे-
मेवाऽऽरोपितभोज्येऽवभासत इति न पृथगस्तित्वं तस्येत्यर्थः ॥ १५ ॥

अस्तितालक्षणा सत्ता सदा ब्रह्म न चापरा ।
नास्ति सत्ताऽतिरेकेण किंचिदप्यास्तिकोत्तमाः ॥ १६ ॥

ननु जायतेऽस्ति विपरिणमत इति परिपठितस्य द्वितीयभावविकारस्या-
स्तित्वस्य कथं निर्विकारब्रह्मरूपतेत्याशङ्क्याऽऽह—अस्तितेति । नात्र भावावि-
कारो विवक्षितोऽपि तु तद्धेतुभूता सत्ता । सा च सन्मात्रं ब्रह्मैव न तु तद्व्य-
तिरिक्ता पराभिमता जातिरित्याह—नास्तीति ॥ १६ ॥

सत्तातिरिक्तं चेदस्ति शून्यवच्छून्यमेव तत् ।
भवेन्नैवात्र संदेहो नास्ति माया च वस्तुतः ॥ १७ ॥
अविचारितरूपा हि माया सर्वविमोहिनी ।
सा शिवज्ञानहीनानामेव भाति न योगिनः ॥ १८ ॥

सत्ताया जातित्वे तद्व्यञ्जकतयाऽन्यत्किंचिदवश्यमेष्टव्यम् । तच्च न संभवति
सत्तातिरिक्तस्य व्यञ्जकस्य तस्य सत्ताभिव्यक्तेः पूर्वमाद्यक्षणवर्तित्वनियमा-
त्तदा सत्तासंसर्गाभावात्स्वतःसत्ताभावाच्च शशविषाणवच्छून्यमेव तद्भवेत् ।
अतो व्यञ्जकानिरूपणात्सन्मात्रं ब्रह्मैव स्वस्मिन्परिकल्पितनानाव्यक्त्यनुगम-
वशात्सत्तेत्युच्यते न तु पराभिमता जातिरित्यर्थः । एतच्च पञ्चदशेऽध्याये—
"सत्ता या भासते सैका" इत्यादिना प्राक्प्रपञ्चितम् । नास्ति मायेति । जड-
प्रपञ्चकारणभूता सद्ब्रह्मातिरिक्ता माया परमार्थतो नास्ति । अवस्तुभूतेन
कार्यप्रपञ्चेन स्वानुरूपस्यैव कारणस्य कल्पनात्तदाह—अविचारितेति । सत्त्वा-
सत्त्वादिविचारासहरूपा सर्वजनसंमोहनशक्तिर्हि माया तथाविधाया एवैन्द्र-
जालिकादौ दर्शनादित्यर्थः ॥ १७ ॥ १८ ॥

१ ग ङ. सारत°।

योगिनामात्मनिष्ठानां माया साक्षिणि कल्पिता ।
साक्षिरूपतया भाति शिवज्ञानेन बाधिता ॥ १९ ॥

शिवज्ञानेन बाधितेति । यस्मादवस्तुभूततयैव साक्षिणि माया परिकल्पिता तस्मात्तस्य साक्षिणः परशिवात्मसाक्षात्कारेण बाधिता भवतीत्यर्थः ॥ १९ ॥

बाधिताऽपि पुनर्माया भाति दिङ्मोहभानुवत् ।
प्रारब्धकर्मपर्यन्तं ब्रह्मविज्ञानिनामपि ॥ २० ॥

ननु ज्ञानिनः परतत्त्वसाक्षात्कारेण मायाया निवर्तितत्वात्पुनः सा भातीति न युक्ता । न तु रज्जुयाथात्म्यज्ञानेन निवर्तितसर्पस्य पुनस्तत्प्रतीतिः संभवतीत्यत आह— बाधिताऽपीति । ब्रह्मात्मत्वसाक्षात्कारेण हि प्रारब्धकर्मव्यतिरिक्तं कर्मजातं निवर्त्यते प्रारब्धफलं तु कर्मभोगेणैव क्षपयितव्यम् । अतस्तावत्पर्यन्तं ज्ञानिनोऽपि संसारप्रतिभासावश्यंभावात्तदुपादानभूता माया तत्त्वसाक्षात्कारेण बाधिताऽपि पुनस्तस्य भाति पर्वतान्तादिदेशविशेषेषूपसंजातादिग्भ्रमस्य पुरुषस्य सूर्योदयादिकारणेन निर्णीतप्राच्यादिदिक्तत्त्वस्यापि पुनर्यथा दिङ्मोहानुवृत्तिस्तद्वत् ॥ २० ॥

ब्रह्मविज्ञानसंपन्नः प्रतीतमखिलं जगत् ।
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ॥ २१ ॥
तस्मादभक्ष्यं नैवास्ति विदुषः परयोगिणः ।
आत्मविज्ञानहीनानां खल्वेवाभक्ष्यमास्तिकाः ॥ २२ ॥

पश्यन्नपीति । घटपटाद्यात्मकं सर्वं जगच्चक्षुरादिभिरिन्द्रियैर्जानन्नपि सच्चिदानन्दरूपाधिष्ठानब्रह्मात्मनैव पश्यति । नतु तत्स्वरूपात्पृथग्भूतं पश्यति । आरोप्यस्य स्वाधिष्ठानादव्यतिरिक्तत्वादित्यर्थः ॥ २१ ॥ २२ ॥

द्विजानामात्मविज्ञानविहीनानामियं बुधाः ।
व्यवस्था शंकरेणैव निर्मिता भक्ष्यगामिनी ॥ २३ ॥
लशुनं गृञ्जनं चैव पलाण्डुं ग्रामकुक्कुटम् ।
छत्राकं विड्वराहं च मतिमान्नैव भक्षयेत् ॥ २४ ॥
॥ २३ ॥ २४ ॥

---

१ ख. °तीतिप्रथनं सं° । २ घ. ङ. च. कर्मकाण्डं ।

पलाण्डुसदृशं सर्वं गन्धवर्णरसादिभिः ।
कामतोऽकामतश्चैव ब्राह्मणो नैव भक्षयेत् ॥ २५ ॥
ब्रश्चनप्रभवं सर्वं हिङ्गुद्रव्यं विनैव तु ।
भूस्तृणं शिग्रुकं चैव ब्राह्मणो नैव भक्षयेत् ॥ २६ ॥
खट्वासंज्ञं च वार्ताकं तथैवोखरजं तृणम् ।
लवणं भूमिजं विप्रो मोहेनापि न भक्षयेत् ॥ २७ ॥
नखविष्किरसंज्ञं च तथा कोयष्टिसंज्ञितम् ।
सौलं वल्लूरसंज्ञं च मत्स्यादो नैव भक्षयेत् ॥ २८ ॥
बकं चैव बलाकं च खञ्जरीटकसंज्ञितम् ।
कोकिलं च द्विजश्रेष्ठाः प्रमादाच्च न भक्षयेत् ॥ २९ ॥
पाठीनरोहितावायौ नियुक्तौ हव्यकव्ययोः ।
राजीवान्सिंहतुण्डांश्च शशकान्नैव भक्षयेत् ॥ ३० ॥
केवलानि च शुष्काणि तथा पर्युषितानि च ।
ऋजीषपक्वं विप्रेन्द्राः कदाचिन्नैव भक्षयेत् ॥ ३१ ॥
विण्मूत्रं च सुरास्पृष्टं सर्वं द्रव्यं तथैव च ।
सुरास्पृष्टस्य च स्पृष्टं ब्राह्मणो नैव भक्षयेत् ॥ ३२ ॥
रेतो देहमलं चैव श्वकाकोच्छिष्टमेव च ।
विड्वराहखरोष्ट्राणां मूत्रं विप्रो न भक्षयेत् ॥ ३३ ॥
बिडालकाकाद्युच्छिष्टं नकुलोच्छिष्टमेव च ।
वेदबाह्येन संस्पृष्टं ब्राह्मणो नैव भक्षयेत् ॥ ३४ ॥
शकुनीसंज्ञितान्सर्वांस्तथा ग्रामनिवासिनः ।
अनिर्दिष्टांश्चैकशफान्क्रव्यादांश्च न भक्षयेत् ॥ ३५ ॥

॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ॥ ३४ ॥ ३५ ॥

१ ब. °तु ॥ २ - ॥ छेदनोत्पन्ननिर्यासं हि° ।

कलविङ्कसमाख्यं च टिट्टिभं प्लवमेव च ।
हंसं चक्रसमाख्यं च सारसं नैव भक्षयेत् ॥ ३६ ॥
रज्जुवालं च दात्यूहं शुकं सारिकसंज्ञितम् ।
प्रतुदाञ्जालपादांश्च ब्राह्मणो नैव भक्षयेत् ॥ ३७ ॥
तुरङ्गस्य गजस्यापि मण्डूकस्य तथैव च ।
पुरीषं च तथा मूत्रं ब्राह्मणो नैव भक्षयेत् ॥ ३८ ॥
नराणां च गजानां च मांसमश्वस्य सत्तमाः ।
महिषस्य च मांसं च ब्राह्मणो नैव भक्षयेत् ॥ ३९ ॥
अजाविमांसं रक्तं च गोमांसं च तथैव च ।
मृगाणां च तथा मांसं ब्राह्मणो नैव भक्षयेत् ॥ ४० ॥
मांसं पञ्चनखानां च विनैव सकलानि तु ।
कामतोऽकामतो वाऽपि ब्राह्मणो नैव भक्षयेत् ॥ ४१ ॥
मत्स्यं छत्त्रं दृतिस्पृष्टमाज्यं कीलालमेव च ।
रसं तालफलस्यापि ब्राह्मणो नैव भक्षयेत् ॥ ४२ ॥
ओदनं तु पुनःपक्वं नालिकेररसं तथा ।
पक्वं तोयमभूमिस्थं ब्राह्मणो नैव भक्षयेत् ॥ ४३ ॥
अनिर्दशाहगोक्षीरमौष्ट्रमेकशफं तथा ।
आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः ॥ ४४ ॥
आरण्यानां च सर्वेषां मृगाणां महिषीं विना ।
स्त्रीक्षीरं च भ्रमाद्वाऽपि ब्राह्मणो न पिबेत्सदा ॥ ४५ ॥
गोगजाश्वादिभिर्घ्रातं पादस्पृष्टं च कामतः ।
अनुलोमादिभिः स्पृष्टं ब्राह्मणो नैव भक्षयेत् ॥ ४६ ॥
उक्तान्येतानि सर्वाणि ब्राह्मणानां विशेषतः ।
अभक्ष्याणि मयोक्तानि भक्षकाश्च पतन्त्यधः ॥ ४७ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ॥ ४५ ॥ ४६ ॥ ४७ ॥

तस्मादभक्ष्यं संत्यज्य ब्राह्मणो मतिमत्तमः।
चित्तस्य परिशुद्ध्यर्थं भक्ष्यमेव तु भक्षयेत् ॥ ४८ ॥
क्षत्रियाणां च वैश्यानां भक्ष्यमेष्वपि विद्यते।
तथाऽपि भक्षणाभावस्तेषामत्यन्तशोभनः ॥ ४९ ॥
शूद्रादीनां च सर्वेषामभक्ष्यं नैव विद्यते।
तथाऽप्यभक्षणं तेषां फलाय महते भवेत् ॥ ५० ॥
भक्ष्यस्य भक्षणादेव विशुद्धहृदयः पुमान्।
पारमेश्वरविज्ञानान्मुच्यते भवबन्धनात् ॥ ५१ ॥

॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

परमेश्वरविज्ञानं वेदादेव न चान्यतः।
आगमान्तरजन्यं तु ज्ञानं न ज्ञानमास्तिकाः ॥ ५२ ॥

परमेश्वरविज्ञानमिति। प्रत्यगात्मनः परशिवस्वरूपत्वगोचरं विशिष्टं ज्ञानं साक्षात्कारात्मकं वेदान्तवाक्यादेव नान्यस्मादित्यर्थः। आगमान्तरेति। वेदविरुद्धागमवाक्याद्यत्पारमेश्वरं ज्ञानं तद्विकल्पज्ञानमेव स्वतःप्रमाणेन वेदवाक्येन बाधितविषयत्वादित्यर्थः ॥ ५२ ॥

अष्टादशानां विद्यानां वेदादन्याश्च सत्तमाः।
विद्या वेदानुसारेण प्रवृत्ताः सर्वशोभनाः ॥ ५३ ॥

अष्टादशानामिति।

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश" इति ॥

चतुर्दशविद्याः। आयुर्वेदो धनुर्वेदो गान्धर्वं नीतिशास्त्रं चेति चतस्रः। तासामष्टादशानां मध्ये वेदव्यतिरिक्ता या विद्यास्ताः सर्वा वेदप्रतिपादितार्थानुसारेण प्रवृत्ताः प्रमाणत्वेन ज्ञातव्या इत्यर्थः ॥ ५३ ॥

तथाऽपि तासु सर्वासु कश्चिदंशः क्वचित्क्वचित्।
शिवागमानुसारेण तत्प्रभेदानुसारतः ॥ ५४ ॥

तास्विति। वेदव्यतिरिक्तास्वित्यर्थः ॥ ५४ ॥

विष्ण्वागमानुसारेण तत्प्रभेदानुसारतः ।
ब्रह्मागमानुसारेण तत्प्रभेदानुसारतः ॥ ५५ ॥
अधिकारिविशेषेण क्रमेणैव विमुक्तये ।
प्रवर्तन्ते मुनिश्रेष्ठाः सत्यमेव मयोदितम् ॥ ५६ ॥
तत्तत्तन्त्रेषु ये मर्त्या दीक्षिता मुनिसत्तमाः ।
सोंऽशस्तैरेव संग्राह्यः सर्वथा नैव वैदिकैः ॥ ५७ ॥
मदुक्ता संहिता साध्वी वेदमानानुसारिणी ।
वेदेतरागमाधीनः कश्चिदंशो न विद्यते ॥ ५८ ॥
प्रसादादेव रुद्रस्य संहितेयं मयोदिता ।
प्रसादः शांकरः सम्यग्ज्ञानस्य खलु साधनम् ॥ ५९ ॥
अतो वेदानुसारेण द्विजानामात्मशुद्धये ।
अभक्ष्यमादरेणोक्तं मया वेदार्थवित्तमाः ॥ ६० ॥
सर्वमुक्तं समासेन केवलं करुणाबलात् ।
श्रद्दधानस्त्वभक्ष्याणि भ्रमाद्वाऽपि न भक्षयेत् ॥ ६१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभवखण्डेऽभक्ष्यनिवृत्तिकथनं नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां तात्पर्यदीपिकायामभक्ष्यनिवृत्तिकथनं नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

अथ षट्चत्वारिंशोऽध्यायः ।

सूत उवाच--

अथातः संप्रवक्ष्यामि समासेन न विस्तरात् ।
येन ज्ञानविशेषेण मृत्युं पश्यन्ति देहिनः ॥ १ ॥

आसन्नमरणः पुरुषो वाराणस्यादिस्थानविशेषमाश्रित्य संसारनिवृत्त्युपायं शीघ्रमनुतिष्ठेदित्यभिप्रेत्य मरणसूचकान्यरिष्टानि वक्तुं प्रतिजानीते--अथात इति ॥ १ ॥

सोमच्छायां ध्रुवं चैव महापथमरुन्धतीम् ।
अपश्यन्वत्सरादूर्ध्वं न जीवति न संशयः ॥ २ ॥

सोमच्छायामिति । शुद्धद्वितीयादितिथिषु कतिपयकलात्मकस्य तेजसोंऽशो दृश्यते सा सोमच्छाया । महापथमिति । प्रवाहरूपेणावस्थितो नक्षत्रश्रेणिस्तारापथपर्यायो महापथः ॥ २ ॥

अरश्मिमन्तमादित्यं रश्मिमन्तं च पावकम् ।
पश्यन्नेकादशान्मासादूर्ध्वं मर्त्यो न जीवति ॥ ३ ॥
रजतं वा सुवर्णं वा विण्मूत्रं वा वमेन्नरः ।
प्रत्यक्षमथवा स्वप्ने दश मासान्न जीवति ॥ ४ ॥

अरश्मिमन्तमादित्यमिति । उष्णकिरणरहितं चन्द्रमण्डलवदवस्थितं सूर्यमण्डलमित्यर्थः । ऐतरेयारण्यकेऽपि--"चन्द्रमा इवाऽऽदित्यो दृश्यते न रश्मयः प्रादुर्भवन्ति" इत्यादिना । प्रत्यक्षं स्वप्ने चैवमादीनि बहून्यरिष्टानि तानि सर्वाण्यत्र मूलप्रमाणत्वेनानुसंधेयानि ॥ ३ ॥ ४ ॥

भूतप्रेतपिशाचांश्च गन्धर्वनगराणि च ।
रुक्मवर्णान्द्रुमान्पश्यन्नव मासान्न जीवति ॥ ५ ॥
स्थूलो वाऽपि कृशोऽकस्माद्भवेन्मर्त्यः स्वयं यदि ।
कृष्णवर्णोऽथवा मासानष्टौ जीवति मानवः ॥ ६ ॥
स्वपादं खण्डितं पश्यन्नग्रतः पृष्ठतोऽपि वा ।
पङ्के वा पांसुके वाऽपि सप्त मासान्न जीवति ॥ ७ ॥
कपोतो वाऽथ गृध्रो वा काको वा यदि मूर्धनि ।
स्थितः कव्यादसंज्ञो वा षण्मासेन विनश्यति ॥ ८ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

---

१ ख. ग. °रणाद्हि° ।

* गच्छन्ती वायसी पङ्क्तिः पांसुवर्षं विमुञ्चति ।
= गच्छेद्वायसपङ्क्तीभिः पांसुवर्षेण वा नरः ।
स्वच्छायां विकृतां पश्येच्चतुर्वा पञ्च जीवति ॥ ९ ॥
विद्युतं दक्षिणे भागे पश्यन्मेघविवर्जिते ।
उदके चापमैन्द्रं वा त्रीणि द्वौ वा स जीवति ॥ १० ॥
दर्पणे वा जले वाऽपि परेषां वाऽथ चक्षुषि ।
आशिरस्कं तथाऽत्मानं पश्यन्मासेन नश्यति ॥ ११ ॥
बस्तगन्धस्तु वा देहः शवगन्धस्तु वा भवेत् ।
निम्बगन्धस्तु वाऽतीव मासार्धेन विनश्यति ॥ १२ ॥
शुष्यते हृदयं यस्य मस्तकं धूमसंवृतम् ।
सदा कम्पो भवेद्यस्य दशाहं नैव जीवति ॥ १३ ॥
संभिन्नो मारुतो यस्य मर्मस्थानानि कृन्तति ।
अद्भिः स्पृष्टो न हृष्येच्च मृत्युस्तस्य गृहं गतः ॥ १४ ॥
ऋक्षवानरसंयुक्तरथेनैव तु दक्षिणाम् ।
दिशं गच्छति यो मर्त्यो मृत्युस्तस्य गृहं गतः ॥ १५ ॥
कृष्णाः कृष्णाम्बराः स्वप्ने श्यामवस्त्रधराः स्त्रियः ।
येनैव सह गच्छन्ति दक्षिणां न स जीवति ॥ १६ ॥
छिन्नं कृष्णं स्वकं वासः स्वप्ने पश्यति यः पुमान् ।
नग्नं वा श्रमणं[2] तस्य गृहे मृत्युरुपस्थितः ॥ १७ ॥
नक्षत्राणि दिवा पश्यन्रात्रौ चेन्द्रधनुस्तथा ।
चन्द्रं रक्तं तु वा कृष्णं भानुं पश्यति मानवः ॥ १८ ॥
॥ ९ ॥ १० ॥ ११ ॥ १२ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

* इदमर्धं चपुस्तके नास्ति। = इदमर्धं खपुस्तके नास्ति ।

१ घ. °द्वा यदि प° । २ घ. ङ. भ्रमणं ।

आदित्यमण्डले पश्येत्सुषिरं चन्द्रमण्डले ।
आकाशे रक्तमालां वा सद्य एव विनश्यति ॥ १९ ॥
श्मशानं भस्म केशांश्च नदीं शुष्कां भुजंगमान् ।
पश्येत्स्वप्नदशायां यस्तस्य मृत्युर्गृहं गतः ॥ २० ॥
कृष्णैर्विकेशैः पुरुषैः स्वप्ने यः पीडितः पुमान् ।
पाषाणैस्ताड्यते यस्तु मृत्युस्तस्य गृहं गतः ॥ २१ ॥
आदित्योदयवेलायां प्रत्यक्षं यस्य वै शिवाः ।
क्रोशन्त्यभिमुखा ह्येत्य मृत्युस्तस्य गृहं गतः ॥ २२ ॥
भयकम्पादयो यस्य भूयो भूयो भवन्ति च ।
शोकमोहौ सदा यस्य मृत्युस्तस्य गृहं गतः ॥ २३ ॥
निर्जला यस्य जिह्वा तु दन्तघर्षस्तु यस्य च ।
हृदये यस्य वै वह्निर्मृत्युस्तस्य गृहं गतः ॥ २४ ॥
चक्षुरेकं स्रवेद्यस्य कर्णौ स्थानाच्च भ्रश्यतः ।
यस्य नासा च वक्रा स्यान्मृत्युस्तस्य गृहं गतः ॥ २५ ॥
यस्य जिह्वा च कृष्णा स्यात्सुमुखं दुर्मुखं भवेत् ।
गण्डे च कृष्णे रक्ते वा मृत्युस्तस्य गृहं गतः ॥ २६ ॥
मुक्तकेशो हसन्गायन्नृत्यन्गच्छति दक्षिणाम् ।
दिशं स्वप्नेऽस्य मृत्युः स्यादीदृशस्वप्नदर्शिनः ॥ २७ ॥
श्वेतभूतास्तथा श्वेता अश्वाः श्वेततरा अपि ।
वहन्ति याम्यदेशे यं तस्य मृत्युरुपस्थितः ॥ २८ ॥
उष्ट्रारासभसंयुक्तं रथमारुह्य दक्षिणे ।
स्वप्ने गच्छति यो मर्त्यस्तस्य मृत्युरुपस्थितः ॥ २९ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥
॥ २८ ॥ २९ ॥

---

१ ङ. °ष्कां विहंग° ।

घोषं न शृणुयात्कर्णे ज्योतिर्नेत्रे न पश्यति ।
स्वप्ने यो निपतेत्स्वप्ने तस्य मृत्युरुपस्थितः ॥ ३० ॥
ऊर्ध्वदृष्टिस्तथा रक्तकृष्णदृष्टिश्च यः पुमान् ।
ऊष्माविहीनदेहश्च तस्य मृत्युरुपस्थितः ॥ ३१ ॥
नाभौ वा हृदये वाऽपि सुषिरं यस्य भासते ।
यस्यात्युष्णं भवेन्मूत्रं तस्य मृत्युरुपस्थितः ॥ ३२ ॥
जाग्रत्कालेऽथवा स्वप्ने योऽदृष्टेन निहन्यते ।
जीवनं तस्य नास्त्येव मृत्युरग्र इति स्थितः ॥ ३३ ॥
अग्नौ यो निपतेत्स्वप्ने यो वा नष्टस्मृतिः सदा ।
याम्यशब्दं च यो ब्रूयात्तस्य मृत्युरुपस्थितः ॥ ३४ ॥
शुक्लं प्रावरणं रक्तं कृष्णं वा यस्य भासते ।
स्वप्ने नीलं पटं यस्य तस्य मृत्युरुपस्थितः ॥ ३५ ॥
एवमादीन्यरिष्टानि भासन्ते यस्य दुःस्थितम् ।
स भयं शोकमोहौ च त्यक्त्वैकाग्रमना दृढम् ॥ ३६ ॥
श्रीमद्वाराणसीं गत्वा स्नात्वा गङ्गाजले नरः ।
दृष्ट्वा विश्वेश्वरं देवं जपेत्पञ्चाक्षरं सदा ॥ ३७ ॥
सोमनाथेऽथवा स्नात्वा सोमतीर्थे महोदधौ ।
सोमनाथं महादेवं दृष्ट्वा पञ्चाक्षरं जपेत् ॥ ३८ ॥
श्रीपर्वतेऽथवा देवं दृष्ट्वा श्रीमल्लिकेश्वरम् ।
भस्मनोद्धूल्य मन्त्रेण सदा पञ्चाक्षरं जपेत् ॥ ३९ ॥
श्रीकालहस्तिनाथं वा सुवर्णमुखरीजले ।
स्नात्वा दृष्ट्वा महादेवं सदा पञ्चाक्षरं जपेत् ॥ ४० ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

१ ख. घ. सुस्थितम् । ग. सुस्थिरम् । २ श्रीमल्लिकार्जुनम् ।

गोपर्वते तथा देवं दृष्ट्वा शक्तीश्वराभिधम् ।
भस्मनोद्धूल्य मन्त्रेण सदा पञ्चाक्षरं जपेत् ॥ ४१ ॥
श्रीमद्वृद्धाचले वाऽपि स्नात्वा मुक्ताजले नरः ।
दृष्ट्वा वृद्धाचलेशानं सदा पञ्चाक्षरं जपेत् ॥ ४२ ॥
श्रीमद्रामेश्वरे वाऽपि स्नात्वा तत्र महोदधौ ।
दृष्ट्वा रामेश्वरं देवं सदा पञ्चाक्षरं जपेत् ॥ ४३ ॥
श्रीहालास्येऽथवा देवं दृष्ट्वा हालास्यनायकम् ।
यथाशक्ति धनं दत्त्वा सदा पञ्चाक्षरं जपेत् ॥ ४४ ॥
वेदारण्येऽथवा स्नात्वा वेदतीर्थे महोदधौ ।
वेदारण्याधिपं दृष्ट्वा सदा पञ्चाक्षरं जपेत् ॥ ४५ ॥
श्रीमद्वल्मीकसंज्ञे वा क्षीरकुण्डजले नरः ।
स्नात्वा दृष्ट्वा महेशानं सदा पञ्चाक्षरं जपेत् ॥ ४६ ॥
गजारण्येऽथवा स्नात्वा कावेर्यामेव मानवः ।
गजारण्याधिपं दृष्ट्वा सदा पञ्चाक्षरं जपेत् ॥ ४७ ॥
जप्येश्वरं तु वा गत्वा स्नात्वा कावेरिकाजले ।
दृष्ट्वा जप्येश्वरेशानं सदा पञ्चाक्षरं जपेत् ॥ ४८ ॥
अथवा दक्षिणावर्ते स्नात्वा कावेरिकाजले ।
दक्षिणावर्तनाथेशं दृष्ट्वा पञ्चाक्षरं जपेत् ॥ ४९ ॥
कुम्भकोणेऽथवा स्नात्वा कावेर्यामेव मानवः ।
कुम्भकोणाधिपं देवं दृष्ट्वा पञ्चाक्षरं जपेत् ॥ ५० ॥
मध्यार्जुने वा कावेर्यां स्नात्वा मर्त्यः समाहितः ।
मध्यार्जुनाधिपं देवं दृष्ट्वा पञ्चाक्षरं जपेत् ॥ ५१ ॥
श्रीमद्बोधदुतीर्थे वा तथा मङ्गलवंशके ।
श्रीमदग्नीश्वराख्ये वा कोटिहास्येऽथवा नरः ॥ ५२ ॥

॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥
॥ ५१ ॥ ५२ ॥

आम्रतीर्थे हतिस्थाने श्वेतारण्यसमाह्वये ।
श्रीमद्बिल्वपुरे वाऽपि कावेर्युदधिसंगमे ॥ ५३ ॥
स्नात्वा दत्त्वा यथाशक्ति धनं धान्यं तिलं तु वा ।
दृष्ट्वा महेश्वरं भक्त्या सदा पञ्चाक्षरं जपेत् ॥ ५४ ॥
अथवा मानवः शीघ्रं गत्वा व्याघ्रपुरं मुदा ।
शिवगङ्गाभिधे तीर्थे स्नात्वा दत्त्वा यथाबलम् ॥ ५५ ॥
प्रदक्षिणत्रयं कृत्वा श्रीमद्भ्रसभापतिम् ।
दृष्ट्वा पञ्चाक्षरं मन्त्रं सतारं सर्वदा जपेत् ॥ ५६ ॥
अस्मिन्व्याघ्रपुरे पुण्ये यो वा को वा तु मानवः ।
ममार परमा मुक्तिः सिद्धा तस्य न संशयः ॥ ५७ ॥
महापातकसंघाश्च स्थानस्यास्य प्रवेशनात् ।
नश्यन्ति दर्शनादेव मुक्तिः सिद्धा सभापतेः ॥ ५८ ॥
महाकारुणिको देवो महानन्दपरायणः ।
यत्र नृत्यति तं दृष्ट्वा मुच्यते भवबन्धनात् ॥ ५९ ॥
देशदर्शनमात्रेण विमुक्ता बहवो जनाः ।
किं पुनर्देवदेवस्य दर्शनेन सभापतेः ॥ ६० ॥
अविमुक्तादपि श्रेष्ठमिदं स्थानं न संशयः ।
अत्र नृत्यति देवेशस्तत्र देवो न नृत्यति ॥ ६१ ॥
अत्र दर्शनमात्रेण मुक्तिः सिद्धा हि देहिनाम् ।
तत्र नष्टस्य मर्त्यस्य ततः श्रेष्ठमिदं पुरम् ॥ ६२ ॥
श्रीमद्व्याघ्रपुरं मुक्त्वा यो वा वाराणसीं गतः ।
तत्र नष्टोऽपि कैवल्यं प्राप्नुयान्नैव मानवः ॥ ६३ ॥

॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ॥ ६२ ॥ ६३ ॥

१ ग. प्रशासनात् ।

पार्वती परमा शक्तिः श्रीमद्व्याघ्रपुरे सदा ।
प्रकाशते हि विद्याभिः संवृता करुणाबलात् ॥ ६४ ॥
सर्वविद्यालया देवी यत्रातीव प्रकाशते ।
खलु तत्र परा मुक्तिरतः श्रेष्ठमिदं पुरम् ॥ ६५ ॥
अतः समस्तं परिवर्ज्य सत्वरं
समस्तदोषस्य निवृत्तिसिद्धये ।
इदं तु मुख्यं पुरमाप्नुयान्नरः
शिवप्रसादेन हि तत्र मुच्यते ॥ ६६ ॥
इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डे मृत्युसूचकविवरणं नाम षट्चत्वा-
रिंशोऽध्यायः ॥ ४६ ॥

॥ ६४ ॥ ६५ ॥ ६६ ॥
इति श्रीस्कन्दपुराणे सूतसंहिताटीकायां तात्पर्यदीपिकायां चतुर्थे यज्ञवै-
भवखण्डे मृत्युसूचकविवरणं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

अथ सप्तचत्वारिंशोऽध्यायः ।

सूत उवाच—
अथातः संप्रवक्ष्यामि पापस्याकरणाय तु ।
भोगावशिष्टपापानां लक्षणं मुनिसत्तमाः ॥ १ ॥
ब्रह्महत्यादिपापपरिणामरूपं क्षयरोगादिकमप्यज्ञानिनः कर्त्रात्मन एव नाकर्तुर्ब्रह्मात्मन इति दर्शयितुमारभते—अथात इति ॥ १ ॥
ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः ।
स्वर्णापहारी कुनखी दुश्चर्मा गुरुतल्पगः ॥ २ ॥
परिवादरतः पङ्गुरन्धश्च बधिरस्तथा ।
अनुकीर्तनकृन्मर्त्यः खरस्वामी भवेत्सदा ॥ ३ ॥
॥ २ ॥ ३ ॥

गुरुनिन्दापरो नित्यमपस्मारी निरन्तरम् ।
भगंदरी गुरोराज्ञाभङ्गकारी न संशयः ॥ ४ ॥
गुरुमात्सर्यकृन्मर्त्यो विट्कृमिः स्यान्न संशयः ।
गुर्ववज्ञापरस्तद्वच्छिवद्रोही तथा भवेत् ॥ ५ ॥
गुरोः शुश्रूषणेऽसक्तो दुष्प्रज्ञः स्यात्तु मानवः ।
विष्णुद्रोही नरः साक्षात्कृकलासत्वमाप्नुयात् ॥ ६ ॥
यो वेददूषको मर्त्यः स चण्डालो भवेत्तथा ।
वेदान्तदूषकः साक्षात्पुल्कसः स्यान्न संशयः ॥ ७ ॥
उन्मत्तो वेदविज्ञानदूषकः पुरुषाधमः ।
रजस्वलाभिगन्ता स्यादन्त्यजातिस्तु मानवः ॥ ८ ॥
अग्निदो मनुजः कुष्ठी गरदश्च तथैव च ।
शस्त्रपाणिस्तथा मर्त्यो रूप्यचोरस्तु दर्दुरः ॥ ९ ॥
कूटकृन्मुखरोगी स्यात्कूटसाक्षी तथैव च ।
कूटकृत्यसहायश्च तदुपायप्रदोऽपि च ॥ १० ॥
पितृमातृपरित्यागी बालत्यागी तथैव च ।
अक्षिरोगी भवेन्नित्यं भार्यात्यागी तु मानवः ॥ ११ ॥
अल्पायुश्चाप्रदानेन प्रतिज्ञातस्य मानवः ।
पत्नीबहुत्वे त्वेकस्यां रमते षण्ढ एव सः ॥ १२ ॥
अन्नापहारी मन्दाग्निर्जिह्वारोगी भवेत्तथा ।
अग्रभुग्गलरोगी[1] स्यान्मिष्टभुक्च तथैव च ॥ १३ ॥
पञ्चयज्ञविनिर्मुक्तो विड्वराहो भवेन्नरः ।
पर्वमैथुनकृन्मर्त्यः प्रमेही स्यान्न संशयः ॥ १४ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

---

१ ख. घ. °भुग्भालरो° ।

अभ्यागतपरित्यागी कपोलपिण्डको भवेत् ।
तथाऽतिथिपरित्यागी भवेन्नात्र विचारणा ॥ १५ ॥
स्वात्मोत्कर्षपरो नित्यं वामनः पङ्गुरेव च ।
गोघ्नश्चैव कृतघ्नश्च जात्यन्धः स्यान्न न संशयः ॥ १६ ॥
निःस्नेहकः स्वभार्यायां गलगण्डी भवेन्नरः ।
वेश्यासेवापरो मर्त्यश्छिन्नलिङ्गो न संशयः ॥ १७ ॥
पिशुनः पूतिवक्त्रः स्यान्नरस्ताम्रादिविक्रयी ।
एडकाजगजाश्वादिविक्रेता व्याध एव हि ॥ १८ ॥
ज्ञानापहारी मूकः स्यान्मन्त्रचोरस्तथैव च ।
अभक्ष्यभक्षको मर्त्यो गण्डमाली भवेत्सदा ॥ १९ ॥
रङ्गोपजीवी कुमतिर्भवेन्नात्र विचारणा ।
अन्धः पुस्तकचोरः स्यात्तथा स्याल्लेखनीहरः ॥ २० ॥
सदा पुण्यकथाक्षेपी वक्रनासो भवेन्नरः ।
शिष्टाचारस्य धर्मस्य दूषको राक्षसो भवेत् ॥ २१ ॥
ज्ञानयोगगुरुद्वेष्टा वक्रास्यो[1] देवदूषकः ।
पुण्यकर्मप्रवृत्तस्य प्रतिषेधी क्रिमिर्भवेत् ॥ २२ ॥
देवद्रव्यापहारी स्यान्मनुष्यो वायुभक्षकः ।
तटाकारामभेत्ता स्यादङ्गहीनस्तु मानवः ॥ २३ ॥
मर्यादाभेदको दासो भवेन्नात्र विचारणा ।
परदाराभिगामी तु वातरोगी भवेन्नरः ॥ २४ ॥
मधुप्रमेही चोष्ट्रा(ष्ट्र्या)दिगन्ता नात्र विचारणा ।
पतिव्रताभिगन्ता तु सूकरः स्यात्तु मानवः ॥ २५ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ २४ ॥ २५ ॥

१ घ. °कादिग° । २ ध. च. छ. ज. °स्यो वेददू° ।

परापवादनिरतो व्यसनी चालसः सदा ।
अतिपातकदोषेण भवेयुः क्रिमयो नराः ॥ २६ ॥
तथा पातकदोषेण विड्वराहो न संशयः ।
उपपातकदोषेण तथा श्वानः सदा नरः ॥ २७ ॥
पातकैरपरैः क्षुद्रैर्जायन्ते क्षुद्रयोनिषु ।
महापातकपूर्वैश्च पातकैरखिलैः सदा ॥ २८ ॥
॥ २६ ॥ २७ ॥ २८ ॥

स्वस्वरूपापरिज्ञानाद्बध्यते खलु मानवः ।
स्वस्वरूपपरिज्ञानात्कर्मभिर्न स बध्यते ॥ २९ ॥

स्वस्वरूपापरिज्ञानादिति । कर्तृत्वभोक्तृत्वादिचञ्चलसंसारधर्मरहितं सच्चिदानन्दाखण्डैकरसं स्वप्रतिष्ठमद्वितीयं परब्रह्म हि स्वात्मनः पारमार्थिकं स्वरूपं तस्यापरिज्ञानादन्तःकरणादिधर्मितादात्म्याध्यासेन तद्धर्माणां कर्तृत्वभोक्तृत्वादीनामप्यात्मनि संसर्गाध्यासात्तत्कृतैः पातकैरपि बद्धो भवतीत्यर्थः । स्वस्वरूपपरिज्ञानादिति । स्वस्वरूपयाथात्म्यज्ञानिनस्तु कर्तृत्वभोक्तृत्वादिधर्मवदन्तःकरणतादात्म्याध्यासस्य निवृत्तेस्तत्कृतैः पापैरपि न संश्लेष इत्यर्थः ॥ २९ ॥

स्वस्वरूपं तु शुद्धं हि सततं सर्वदेहिनाम् ।
स्वस्वरूपं तु चिन्मात्रं सर्वदा सर्वदेहिनाम् ॥ ३० ॥

शुद्धं हीति । " आत्मद्रव्यं स्वयं शुद्धं सत्यज्ञानादिलक्षणम् " इत्यादिना स्वतःशुद्धेः प्राक्प्रतिपादितत्वात् । " अस्नाविरꣳ शुद्धमपापविद्धम् " इत्यादिश्रुतेः स्वात्मनः शुद्धत्वम् । चिन्मात्रमिति । देहेन्द्रियादिसंघातस्य जाग्रदादिसकलव्यवहारस्य यद्यत्प्रकाशकं साक्षिभूतं चैतन्यं तदेवाऽऽत्मनः स्वरूपमित्यर्थः ॥ ३० ॥

नैव देहादिसंघातः[1] पटवद्दृशिगोचरः ।
दृश्यरूपेण यद्रूपं दृश्यते देहपूर्वकम् ॥ ३१ ॥
तदनात्मैव दृश्यत्वाद्यदित्थं तत्तथा खलु ।
दृश्यत्वं देहपूर्वस्य संमतं सर्वदेहिनाम् ॥ ३२ ॥

१ ख. घ. °घातो घट° ।

मात्रचो व्यावृत्तिं दर्शयति—नैवेति। दृशिगोचर इति। हेतुगर्भविशेषणमेतत्। दृशिः प्रागुक्तं चैतन्यं यतस्तद्गोचरो देहादिरतः पटवदनात्मेत्यर्थः। ननु दृशिगोचरत्ववद्द्रष्टृत्वमपि देहादिसंघातस्य परिदृश्यमानं कथमपलपितुं शक्यत इत्याशङ्क्याऽऽह—दृश्येति। अहं मनुष्यः कृशोऽहं स्थूलोऽहमहं कर्ता भोक्तेत्येवं द्रष्टृरूपतया देहादेर्योऽनुभवः सोऽपि तत्संसारादिविभ्रमवन्मिथ्यानुभवो दृश्यत्वहेतुना देहादेरनात्मत्वस्य घटादेरिव सिद्धत्वादित्यर्थः। हेत्वसिद्धिं परिहरति—दृश्यत्वमिति। अज्ञाः स्त्रीबालादयोऽपि मम देहो मम चक्षुर्ममान्तःकरणमिति द्रष्टुरात्मनः सकाशाद्भेदेनैव ज्ञेयतया देहादिकं व्यवहरन्ति। तत्सर्वेषामपि तत्र दृश्यत्वं संमतमित्यर्थः॥ ३१॥ ३२॥

दृश्यत्वं द्रष्टृपूर्वं तु लोके दृष्टं हि चेतनैः।
द्रष्टुर्नास्ति हि दृश्यत्वं दृश्यत्वे द्रष्टृता न हि।
दृश्यरूपस्य कुड्यादेर्द्रष्टृता न हि दृश्यते॥ ३३॥

एवं दृश्यत्वहेतुना देहादेरनात्मत्वं प्रतिपाद्य द्रष्टुरात्मनस्तद्व्यतिरिक्तत्वं प्रतिपादयति—दृश्यत्वं द्रष्टृपूर्वं त्विति। द्रष्टृसमवेतया दृशिक्रियया व्याप्यं हि दृश्यं घटादिकं तच्च स्वव्यतिरिक्तद्रष्टृपूर्वकं दृष्टं लोके। अतो देहादेरपि स्वातिरिक्तेन केनचिद्द्रष्ट्रा भवितव्यमित्यर्थः। ननु देहातिरिक्तस्याऽऽत्मनोऽप्यहंप्रत्ययवेद्यत्वाद्दृश्यत्वमस्ति। अतो दृश्यस्य सर्वस्य स्वव्यतिरिक्तद्रष्टृपूर्वकत्वनियमो नास्तीत्यत आह—द्रष्टुरिति। द्रष्टुरात्मनो दृश्यत्वे द्रष्टृत्वं न स्याद्द्रष्टृत्वे न दृश्यत्वं कर्मकर्तृभावविरोधप्रसङ्गात्। न ह्येकस्यैव स्वसमवेतक्रियाश्रयत्वं तद्विषयत्वं च युगपत्संभवति। अतो द्रष्टुरात्मनो दृश्यत्वं न युक्तमित्यर्थः। विपक्षे बाधकमाह—दृश्येति। यद्यात्माऽपि दृश्यः स्यात्कुड्यादेरिव तस्य द्रष्टृत्वमपि न स्यादित्यर्थः॥ ३३॥

अंशभेदेन दृश्यत्वं द्रष्टृत्वं चेति चेन्मतम्।
अंशभेदे तु सांशत्वात्कुड्यवत्तदनात्मकम्॥ ३४॥
अंशभेदेऽपि दृश्यांशः समानः कुड्यवस्तुना।
द्रष्टृंशः केवलः साक्षादात्मैव स्यान्न संशयः॥ ३५॥
द्रष्टृंशेऽपि च कर्तृत्वमुपाधिजनितं सदा।
दृश्याभिव्यक्त्यपेक्षं वा न स्वतः पण्डितोत्तमाः॥ ३६॥

१ ग. घ. °णतो द्व°। २ ख. सर्वत्र।

उक्तं कर्मकर्तृभावविरोधं परिहर्तुं शङ्कते—अंशभेदेनेति । द्रव्यबोधस्वरूपो हि देहातिरिक्त आत्मा तत्र द्रव्यांशेन तस्य दृश्यत्वं बोधांशेन च द्रष्टृत्वं चेति कर्तृत्वकर्मत्वयोर्व्यवस्थितत्वाद्विरोधो नास्तीत्यर्थः । तदेतन्निरस्यति—अंशभेद इति । आत्मनो निरवयवद्रव्यत्वाभ्युपगमादंशभेदकल्पने च सावयवत्वप्रसङ्गात्कुड्यादिवदनात्मत्वमेव तस्य भवेदित्यर्थः । अङ्गीकृत्यापि दूषयति—अंशभेद इति । दृग्विषयो द्रव्यात्मकस्तस्याऽऽत्मनो योंऽशः सोऽयं दृश्यत्वात्कुड्यादिसदृशोऽनात्मा । दृशिधात्वर्थाश्रयभूतो योंऽशश्चिदात्मकः स एवाऽऽत्मा । अतो द्रष्टुर्दृश्यत्वं कदाचिन्न संभवतीत्यर्थः । नन्वन्तःकरणादेर्विविक्तं चिन्मात्रमेव ह्यन्तरात्मेति मतम् । तस्य च दृशिधात्वर्थरूपत्वेन तदाश्रयत्वानुपपत्तेर्द्रष्टृत्वं न संभवतीत्याशङ्क्याऽऽह—द्रष्टृंशेऽपीति । कर्तृत्वं नाम क्रियाश्रयत्वम् । क्रिया नाम हस्तपादादिचलनानुगुणप्रयत्नविशेषः स चान्तःकरणधर्मस्तद्विशिष्टान्तःकरणोपाधिसंबन्धवशाद्द्रष्टृंशे चिन्मात्रस्वरूप आत्मन्यपि स्फटिके लौहित्यवत्कर्तृत्वावभासो निगद्यते । अतस्तद्विषयात्मकं तद्द्रष्टृत्वमपि तस्मिन्नौपाधिकमित्यर्थः । पक्षान्तरमाह—दृश्याभिव्यक्तीति । दर्शनमात्ररूपस्यापि साक्षिचिदात्मनः क्रियानाश्रयत्वेऽपि दृश्याभिव्यक्तिहेतुत्वेनौपचारिकमेवद्रष्टृत्वं न तु स्वाभाविकमित्यर्थः ॥ ३४ ॥ ३५ ॥ ॥ ३६ ॥

स्वतः कर्तृत्वमस्यापि विद्यते यदि चाऽऽत्मनः ।
तर्हि दर्शनरूपेण परिणामी भवेद्धि सः ॥ ३७ ॥
परिणामी न चाऽऽत्मा स्यात्सर्वथा मृत्तिकादिवत् ।
अचित्त्वं च प्रसज्येत ततश्चिन्न हि विद्यते ॥ ३८ ॥

विपक्षे बाधमाह—स्वत इत्यादिना । यद्यात्मनः स्वाभाविकं द्रष्टृत्वं स्यात्तर्हि तद्दर्शनक्रियासंबन्धेन तस्य परिणामित्वं स्यात् "उपयन्नपयन्धर्मो विकरोति हि धर्मिणम्" इति न्यायात् । परिणामिनश्च मृदादिवदनात्मत्वं स्यात् । अनात्मत्वे च घटादिवदेवाचिद्रूपत्वमपि स्यात् । तथा च न किंचिदपि प्रतीयेतेत्यर्थः । प्रतीयते च । विपर्यये पर्यवसानमाह—चिन्न हीति । कोऽप्यर्थो न विद्यते न ज्ञायत इति न हि । अपि तु चिता सर्वमपि ज्ञायते । अतश्चिन्मात्रस्याऽऽत्मनः स्वाभाविककर्तृत्वं न युक्तमित्यर्थः ॥ ३७ ॥ ३८ ॥

चिद्विहीनं जडं नैव विभाति मुनिपुंगवाः ।
स्वतः प्रकाशहीनस्य प्रकाशो नोपपद्यते ॥ ३९ ॥

अथ तस्याऽऽश्रितप्रतीयमानभेदस्यौपाधिकत्वप्रतिपादनेनैक्यमुपपादयति—चिद्विहीनामित्यादिना । जडं जगत्तावच्चिद्रहितत्वान्नैव भाति । ननु यथा चिच्चिदन्तराभावेऽपि तन्निरपेक्षं भासते तद्वज्जडस्याप्यवभासः किं न स्यादित्यत आह—स्वत इति । स्वभावतः प्रकाशानात्मकस्य जडस्य चिन्नैरपेक्ष्येण प्रकाशो न युक्त इत्यर्थः ॥ ३९ ॥

चित्प्रकाशात्मसंबन्धादपि चेत्यं न भासते ।
तस्याभावात्ततश्चेत्यप्रतीत्या भिद्यते हि चित् ॥ ४० ॥

अथ चित्संबन्धवशाच्चेत्यप्रतीतिमाशङ्क्य निरस्यति—चिदिति । चित्प्रकाशस्य च स्वस्यार्थस्य च विषयविषयिभावादिलक्षणो यः संबन्धस्तस्मादपि चेत्यप्रपञ्चस्यावभासो न युक्तः । तत्र हेतुमाह—तस्याभावादिति । तादृशस्य संबन्धस्यैवानिरूपणाद्विषयविषयिभावलक्षणसंबन्धस्य संबन्धान्तरमूलत्वात्तदङ्गीकारेऽस्य ज्ञानस्यायमेव विषय इति नियमानुपपत्तेरवश्यं मूलभूतः संबन्धो वक्तव्यः । स च संयोगसमवायतादात्म्यादिलक्षणः । तथा च ज्ञानार्थयोस्तादृशः संबन्धो दुर्निरूप इति विषयविषयिभावोऽपि न युक्त इत्यर्थः । एवं च "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतेस्त्वनाद्यनन्ता ब्रह्मस्वरूपभूता स्वप्रकाशा या चित्तस्यामनाद्यविद्यावशाच्चेत्यप्रपञ्चोऽध्यस्ततयैव प्रतीयत इत्यवश्यमङ्गीकर्तव्यम् । ततश्चौपाधिक एव चितो नानात्वावभास इत्याह—तत इति । यत एवं ज्ञानार्थयोः परमार्थतः संबन्धाभावस्ततश्चेत्यप्रपञ्चस्य चिद्रूपेऽध्यस्ततयैव प्रतीतिर्वक्तव्या । तथाच जलतरङ्गबुद्बुदादिनानाविधोपाधिसंबन्धवशादेकमेव चन्द्रस्वरूपं यथा भिन्नं प्रतीयते तथा स्वात्मन्यध्यस्तनानाविधचेत्योपाधिसंबन्धवशादधिष्ठानभूता चिदपि भिद्यते । अतश्चितो भेदप्रतीतिश्चेत्यघटपटादिभेदनिबन्धनैव न तु पारमार्थिकीत्यर्थः ॥ ४० ॥

चिच्चिदेव सदा विप्रा न दृश्यैव हि केन चित् ।
या दृग्दृश्यत्वहीना सा सर्वदा भासते खलु ॥ ४१ ॥

ननु अयं घट इत्यादिज्ञानस्यापि ज्ञातो घट इत्याद्यनुव्यवसायज्ञानवेद्यत्वावेत्यप्रपञ्चवदध्यस्तता किं न स्यादित्यत आह—चिच्चिदेवेति । चेत्यप्रपञ्चाधिष्ठानभूता या चित्सा चिदेव सर्वदा प्रकाशमानैव न तु स्वप्रतिबद्धव्यहारेऽनान्तरमपेक्षते । अतः सा केनचिदपि द्रष्ट्रा न दृश्या यतश्चेत्यप्रपञ्चस्ये-

१ ग. घ. विद्यते ।

वाध्यस्तत्वमाशङ्क्यैतेत्यर्थः । तदेतदुपपादयति—या दृगिति । दृग्रूपा या चित्साऽवश्यं दृश्यत्वहीना। दृश्यत्वे हि यावत्स्वगोचरज्ञानं नोदेति तावत्पर्यन्तं न प्रतिभासते तदप्रतिभासेन विषयप्रतीतिरपि न स्यादतः सा सर्वदा ज्ञानान्तरनैरपेक्ष्येण भासत इत्यङ्गीकरणीयम् । तथासति यतः सर्वदा भासतेऽतो दृश्यत्वहीनेत्यर्थः ॥ ४१ ॥

सा कदाचिन्न भातीति यदि स्यान्मुनिपुंगवाः ।
तर्हि नैव विभातीति विभानं केन सिध्यति ॥ ४२ ॥

ननु दृग्रूपस्य ज्ञानस्य चक्षुरादिसंप्रयुक्तघटादिविषयवैशिष्ट्येन भासमानस्याऽऽशुतरविनाशित्वेन क्षणान्तरेऽनवस्थानात्तस्य सर्वदा भासनमसिद्धमित्यत आह—सेति । सा दृक्कदाचिद्विषयप्रतीतिदशायां न भातीति यदि स्यात्तर्हि न भातीत्येतदपि केन साधनेन सिध्येत् । न हि चित्प्रकाशमन्तरेण कस्यचित्प्रकाशः संभवति। अतश्चाभावगोचरं स्फुरणं तत्राप्यङ्गीकर्तव्यमित्यर्थः॥४२॥

न भातीति विभानं तु न भातमिति चेन्मतम् ।
तर्हि भानं हि नाभातं तज्ज्ञानं भानमेव हि ॥ ४३ ॥

ननु तदानीं न भातीति स्फुरणाभावः प्रतीयते कथं तदा स्फुरणस्य सद्भावो भावाभावयोर्विरोधादिति शङ्कते—न भातीति। घटादिकं वस्तु न भातीत्यज्ञानविषयतयैव ज्ञातं न तु भातमिति ज्ञानविषयतया। अतस्तस्मिन्समये निषेध्यस्याज्ञानस्य भानस्य कथमवस्थितिरित्यर्थः । परिहरति—तर्हीति । न भातीत्यज्ञानविषयतया भातमपि भातमेव न त्वभातम्। तत्र हेतुमाह—तज्ज्ञानमिति । ज्ञानं हि द्विविधं वृत्तिज्ञानं स्वरूपज्ञानं चेति । तत्र ज्ञायतेऽनेनेति ज्ञानमिति करणव्युत्पत्त्या सत्त्वपरिणामरूपचक्षुरादिसंप्रयुक्तविषयाकारान्तःकरणवृत्तिर्वृत्तिज्ञानम्। सविषयस्य तस्य साक्षाद्भासकं स्वरूपज्ञानं च वृत्तिज्ञानेनाविषयीकृतमज्ञाततया। अतस्तस्याज्ञातस्य भानमपि भानमेव । ज्ञाताज्ञातयोरुभयोरपि स्फुरणसाक्षिकत्वादित्यर्थः । अत एवोच्यते । सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एवेति ॥ ४३ ॥

भानं भानान्तरेणैव न भाति द्विजपुंगवाः ।
भानरूपेण भानं तु सदैकं न हि तद्द्वयम् ॥ ४४ ॥

---

१ घ. °बत्सत्यज्ञा° । २ ख. ङ. °भानगो° । ३ घ. भानमि° । ४ घ. नाभानं । ५ ङ. च, तद्भानं ।

अस्य च साक्षिचैतन्यस्फुरणस्य वृत्तिज्ञानतो विशेषमाह—भानमिति । वृत्तिज्ञानं हि जडत्वात्साक्षिचैतन्यरूपेण भानान्तरेणैव भाति । साक्षिरूपं भानं तु नैव भानान्तरेणापि तु स्वयमेव प्रकाशते । प्रकाशमानं हि ज्ञानमर्थस्य भासकं तत्प्रकाशनं च ज्ञानान्तरायत्तं चेत्तत्राप्येवमित्यनवस्था स्यात्ततो ज्ञानस्य ज्ञानान्तरवेद्यत्वं न संभवतीत्यर्थः । सति हि ज्ञानान्तरे तद्वेद्यत्वं ज्ञानस्याऽऽशङ्क्येत तदेव नास्तीत्याह—भानरूपेणेति । घटपटादिदृश्यभेदोपाधिना या(यद्)दृग्रूपं ज्ञानं विभिन्नं प्रतीयते तद्दृश्यसंबन्धं परित्यज्य केवलं स्फुरणरूपेण सर्वदैकमेव न तु भिन्नम् । घटपटादिज्ञानेषु स्फुरणमात्रस्याविशेषेण प्रत्यभिज्ञायमानत्वादित्यर्थः ॥ ४४ ॥

भातं भानं सदा स्वेन भासा भाति न चान्यतः ।
यत्स्वयं भाति तद्भानं खलु भास्यस्य भासकम् ॥ ४५ ॥

एवं भानस्यैकत्वेन तद्गोचरं स्फुरणान्तरं नास्ति चेत्कथं तर्हि तस्य प्रतीतिरित्यत आह—भातमिति । प्रतीयमानं स्फुरणरूपं साक्षिचैतन्यं स्वेनैव भासा भाति न चान्यस्मात्प्रकाशान्तरात् । श्रूयते हि "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति" इति स्वयंप्रकाशमानस्यैव प्रकाशकत्वं लोके प्रसिद्धमिति दर्शयति—यत्स्वयमिति । यत्प्रभादीपादिकं सजातीयप्रकाशान्तरनैरपेक्ष्येण भासते तस्य खलु लोके प्रकाशकत्वं दृष्टम् । अतो ज्ञानं ज्ञानान्तरनैरपेक्ष्येण स्वयंप्रकाशमानमेव सद्भास्यं विषयं प्रकाशयेत् । तस्य ज्ञानान्तरवेद्यत्वेऽनवस्थाप्रसक्तेः । ये तु चक्षुरादिवान्निलीनमेव विज्ञानं विषये ज्ञाततारूपं फलं जनयतीति वर्णयन्ति तैरपि विषयस्फुरणरूपा ज्ञातता स्वप्रकाशत्वेनैष्टव्या । तथा सति सैव चक्षुरादिकरणजन्याऽस्तु कृतमन्तर्गडुना ज्ञानेन ॥ ४५ ॥

अतः सर्वस्य साक्ष्यस्य साक्षिभूतः स्वयंप्रभः ।
आत्मा साक्ष्यगतैर्धर्मैः कर्माभिर्न स बध्यते ॥ ४६ ॥

एवमद्वितीयस्वप्रकाशचिन्मात्ररूपत्वमात्मनः प्रसाध्य सर्वसाक्षितया साक्ष्यानुप्रविष्टस्य प्रतिज्ञातं साक्ष्यगतकर्मसंबन्धाभावं निगमयति—अत इति ॥ ४६॥

दृग्रूपं दृश्यसंबद्धमिति वक्तुं न शक्यते ॥ ४७ ॥

---

१ घ. चेति तत्रा° । २ ग. घ. भासस्य । ३ ग. तद्भास्यं ।

संबन्धस्यापि साक्ष्यत्वात्संबन्धो दृश्यवस्तुगः ।
दृश्यभूतस्य रज्ज्वादेः खलु दृष्टस्तु संगमः ॥ ४८ ॥

दृग्रूपस्य तस्य पुनरपि कर्मसंबन्धमाशङ्क्य निरस्यति—दृगिति । दृश्यसंबन्धापेक्षो हि तथाविधस्याऽऽत्मनो दृग्व्यपदेशः । तथा तत्कर्मापि हि दृश्यमिति तेन सह दृग्रूपस्य संबन्धोऽवश्यं भावीति न शक्यते वक्तुम् । संबन्धिद्वयघटितो हि धर्मः संबन्धस्तस्य च दृग्रूपत्वे दृग्रूपसंबन्धिनाऽनतिरिक्तत्वात्संबन्धत्वमेव हीयते । दृश्यरूपत्वेऽपि दृश्यलक्षणसंबन्धिकोटिनिक्षिप्तत्वात्संबन्धित्वमेव न तु संबन्धरूपतेत्यर्थः । दृश्यस्य च दृशा सह संबन्धाभावः सुप्रसिद्ध इति दर्शयति—दृश्यभूतस्येति । यथा रज्ज्वादेर्दृश्यस्य दृशा सह परमार्थतः संबन्धो नास्ति । अध्यस्ततयैव प्रतीतिरिति प्राक्प्रतिपादितत्वात् ॥ ४७ ॥ ४८ ॥

असङ्गो ह्ययमित्येवं ब्रवीति च परा श्रुतिः ।
तस्मादात्मा तु चिद्रूपः कर्मभिर्न स बध्यते ॥ ४९ ॥

उक्तेऽर्थे श्रुतिं संवादयति—असङ्ग इति । सा च श्रुतिः—" असङ्गो ह्ययं पुरुषः " "असङ्गो न हि सज्जते" इत्यादिका । तस्मादिति । दृग्दृश्ययोर्वास्तवसंबन्धाभावादित्यर्थः ॥ ४९ ॥

चिद्रूपस्याऽऽत्मनः साक्षाद्ब्रह्मतामाह हि श्रुतिः ।
ब्रह्मणः कर्मसंबन्धाभावं चाऽऽह परा श्रुतिः ॥ ५० ॥

एवं प्रत्यगात्मनः साक्षिचिन्मात्ररूपतया कर्मसंबन्धाभावमभिधाय ब्रह्माभिन्नतयाऽपि तत्प्रतिपादयितुं ब्रह्मणः कर्मसंबन्धराहित्यं श्रुतिप्रसिद्धमिति दर्शयति—ब्रह्मण इति । श्रूयते हि—"स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्न कर्मणा वर्धते नो कनीयान् " इति ॥ ५० ॥

तथा सति कथं सोऽयं कर्मभिर्बध्यते बुधाः ।
तस्मादात्मा स्वमोहेन संसारीव प्रकाशितः ॥ ५१ ॥

सोऽयमिति । पुण्यपापसंस्पर्शवैधुर्येण श्रुत्या प्रतिपादितो यः परमात्मा स एवायं साक्षिरूपेणावस्थित आत्मेति तत्त्वमस्यादिवाक्यैस्तत्त्वादात्म्येन प्रतिपादित इत्यर्थः । यद्येवमात्मनः कर्मसंबन्धो नास्ति तर्हि कथं तस्य संसारि-

---

१ घ. दृग्रूपयो° ।

स्वप्रतीतिरित्यत आह—तस्मादिति । स्वमोहेनेति । स्वस्याऽऽत्मनः पारमार्थिकाद्वितीयस्वप्रकाशचिन्मात्ररूपत्वापरिज्ञानेनेत्यर्थः ॥ ५१ ॥

वर्णाश्रमवयोवस्थाविशेषानात्मविभ्रमात् ।
अध्यस्याशेषवेदानां नियोज्यः स्यान्न च स्वतः ॥ ५२ ॥

वर्णाश्रमेति । स्थूलदेहादितादात्म्याध्यासनिबन्धन एवाऽऽत्मनि ब्राह्मणत्वगृहस्थत्वलक्षणवर्णाश्रमादिसकलविशेषावभासः । अध्यस्येति ब्राह्मणत्वाद्यध्यासादित्यर्थः । अशेषवेदानामिति । " ब्राह्मणो बृहस्पतिसवेन यजेत राजा राजसूयेन यजेत " इत्यादीनामित्यर्थः ॥ ५२ ॥

अज्ञानादन्यथा ज्ञानं मनुष्यत्वादिमानयम् ।
आत्मा तु परमात्माऽपि कर्मभिर्बध्यतेऽवशः ॥ ५३ ॥

अज्ञानादन्यथा ज्ञानमिति । अविद्या हि द्विविधा । विक्षेपशक्तिरावरणशक्तिश्चेति । तत्राऽऽवरणशक्त्या नीलपृष्ठत्रिकोणत्वादिवदात्मनो विशेषरूपस्य ब्रह्मात्मत्वस्याऽऽवरणात् । विक्षेपशक्त्या रजतादिवन्मिथ्याभूतस्य मनुष्यत्वादेरुपस्थापनाच्चेत्यर्थः । अवश इति । देहादितादात्म्याभिमानवतस्तत्कृतपुण्यपापपारवश्यमेव न तु स्वातन्त्र्यमित्यर्थः ॥ ५३ ॥

कर्मभिर्व्यवहारे तु बद्धोऽपि स्वीयमायया ।
वस्तुतः परमात्माऽयं खलु तैर्न निबध्यते ॥ ५४ ॥

परमात्मनोऽपि जीवभावापन्नस्योक्तरीत्या कर्मपारवश्यं चेत्कृतमात्मनः परमात्मत्वज्ञानेनेत्यत आह—कर्मभिरिति । व्यवहारदशायां स्वात्मनः कर्मसंबन्धं मायामयत्वेन साक्षात्कुर्वतः परमात्मनो वास्तवो बन्धलेशोऽपि नास्तीत्यर्थः ॥ ५४ ॥

स्वात्मनः सर्वसाक्षित्वं देहादेर्व्यतिरिक्तताम् ।
ब्रह्मत्वं च श्रुतेर्ज्ञात्वा कर्मभिर्न हि बध्यते ॥ ५५ ॥

कथं तर्ह्यज्ञानाज्जीवभावमापन्नस्य तस्य कर्मपारवश्यनिरास इति तत्राऽऽह—स्वात्मन इति । प्रत्यगात्मनो देहादिव्यतिरिक्तत्वं साक्षिचिन्मात्ररूपत्वमुक्तयुक्तिभिर्निश्चित्य तस्य ब्रह्मरूपत्वमहं ब्रह्मास्मीत्यादिश्रुतिमुखाद्गुरूपदेशेन ज्ञात्वेत्यर्थः । परोक्षस्य ब्रह्मात्मज्ञानस्यापरोक्षसंसारभ्रमनिवर्तकत्वाभावेऽपि कर्म-

बन्धनिवर्तकत्वं प्राक्प्रतिपादितम्—"परोक्षं ब्रह्मविज्ञानं शाब्दं दैशिकपूर्वकम्" इत्यादिना ॥ ५५ ॥

सर्वसाक्षिणमात्मानं वर्णाश्रमविवर्जितम् ।
ब्रह्मरूपतया पश्यन्मुच्यते भवबन्धनात् ॥ ५६ ॥

पश्यन्निति । यस्तूदीरितं ब्रह्मात्मत्वं मननानिदिध्यासनाभ्यामसंभावना-विपरीतभावनानिरासेन साक्षात्करोति स तु साक्षात्कारसमय एव कारणभूत-स्याज्ञानस्य निवृत्तेस्तत्कार्यभूतात्संसारबन्धादपि तदैव मुक्तो भवतीत्यर्थः॥५६॥

अतः स्वात्मापरिज्ञानाद्देहेऽहंभावमाश्रितः ।
करोति सर्वशास्त्रोक्तं न ज्ञानी न हि संशयः ॥ ५७ ॥

एवं ब्रह्मात्मत्वज्ञानवतः कर्मसंबन्धाभावात्कर्मकाण्डविहितमग्निहोत्रादिकं सर्वं देहादितादात्म्याध्यासवत एवेत्युपसंहरति—अत इति ॥ ५७ ॥

ईदृशी परमा विद्या शांकरी भवनाशिनी ।
प्रसादादेव जन्तूनां शक्तेरेव हि जायते ॥ ५८ ॥

शक्तेरेव हीति । एवकारोऽन्ययोगव्यावृत्त्यर्थः । संविद्रूपिण्याः परशक्तेरेव नान्यस्या देवताया इत्यर्थः । प्रसादादेवेत्येवकारस्त्वयोगव्यावृत्तिपरः । शक्तेः प्रसादे सत्येव पराविद्योत्पत्तिर्नासतीत्यर्थः । शक्तिप्रसादाद्ब्रह्मत्वलाभश्च तलव-कारोपनिषद्याम्नायते—"तस्मिन्नेवाऽऽकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति ब्रह्मेति होवाच" इति ॥ ५८ ॥

वागुद्भूता परा शक्तिर्या चिद्रूपा पराभिधा ।
वन्दे तामनिशं भक्त्या श्रीकण्ठार्धशरीरिणीम् ॥ ५९ ॥

अतस्तत्प्रसादहेतुभूतं स्तोत्रमारभते—वागित्यादिना । या संविद्रूपिणी परमा शक्तिः सैव शब्दरूपेण विवर्तमाना प्रथमं पराख्याऽऽविर्भूता बिन्दुस्फो-टनोद्भूतात्सर्वत्रासावनुस्यूतशब्दः प्राणिनामर्थविवक्षाहेतुकप्रयत्नजनितपवनसं-बन्धहेतूनां मूलाधारेऽभिव्यक्तो निस्पन्दः परा वागित्युच्यते । उक्तं ह्याचार्यैः—"मूलाधारात्प्रथममुदितो यस्तु भावः पराख्यः" इति । तां विशिनष्टि—श्रीकण्ठेति । श्रीकण्ठादिन्यासे ह्यकारमूर्तिः श्रीकण्ठः । अकारस्य सर्ववागात्म-

१ ख. ग. ङ. 'हंमानमा' । २ ख. 'शब्दात्प्राणि' ।

कत्वम् । " अकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति " इत्यादिश्रुतेः । परा वाग्रूपा वा शक्तिः सा वैखरीरूपतया सकलफलात्मिकाऽतः सा सर्ववागात्मकत्वसाम्याच्छ्रीकण्ठस्य शक्तिभूतेत्यर्थः ॥ ५९ ॥

इच्छासंज्ञा च या शक्तिः परिपूर्णशिवोदरा ।
वन्दे तामादरेणैव ममेष्टफलदायिनीम् ॥ ६० ॥

इच्छासंज्ञेति । सैव परा शक्तिरिष्यमाणसकलजगल्लक्षणशक्त्या विशेषानिरूपिता सतीच्छाशक्तिरित्युच्यते । सा विशेष्यते—परिपूर्णेति । परिपूर्णेनाप्यनन्तशिवसत्यज्ञानादिलक्षणेन तेन सहितमुदरं यस्याः सा तथोक्ता । जपाकुसुमरागेण स्फटिकवत्स्वप्रकाशपरशिवचैतन्येन व्याप्तेत्यर्थः । एवं ह्रकारस्य श्रीकण्ठादिन्यासे शक्तिमूर्तिः " पूर्णोदरी च विरजा तृतीया शाल्मली तथा " इत्याचार्यैरुक्तत्वात् । यत इयमिच्छाशक्तिरतः स्तोतुरिष्टं फलं दातुं शक्तेत्यर्थः ॥ ६० ॥

शक्तिर्या परमा साक्षाद्बीजभूताऽखिलस्य च ।
वन्दे तामनिशं भक्त्या नकुलीशशिवान्विताम् ॥ ६१ ॥

बीजभूतेति । ग्रस्तसमस्तप्रपञ्चा पुनरुत्पत्स्यमानस्य सर्वस्य जगतः साक्षाद्बीजतया परमा चिच्छक्तिस्तामिति संबन्धः । नकुलीशशिवान्वितामिति । श्रीकण्ठादिन्यासे नकुलीशो नाम हकारमूर्त्याकारात्मनाऽवस्थितेन नकुलीशाख्येन शिवेन सहिता विश्वजननसमर्था बीजात्मिका संविद्रूपिणी शक्तिर्हकारवाच्या प्रकृतिः " अथ संज्ञा भवेद्व्याप्य विश्वम् " इत्याचार्यैरुक्तत्वात् । अतो हकाररूपेण नकुलीशशिवेन वाच्यवाचकभावेन संबद्धामित्यर्थः ॥ ६१ ॥

ऊर्ध्वरूपाऽप्यधोरूपा तथाऽधस्थाऽपि मध्यगा ।
मध्यरूपाऽपि चान्तःस्था या तां वन्दे वरप्रदाम् ॥ ६२ ॥

ऊर्ध्वरूपेति । ऊर्ध्वं कार्यप्रपञ्चस्योपरि मध्वंसस्योत्तरकाले वर्तमानं ग्रस्तसमस्तप्रपञ्चात्मनो रूपं यस्याः सा तथोक्ता । एवमूर्ध्वरूपाऽप्यधोरूपा कार्यप्रपञ्चस्याधस्तादुत्पत्तिकाले वर्तमानं तज्जननसमर्थकारणात्मकं रूपं यस्याः सा तथोक्ता । एवं कारणतया यथाऽधस्थाऽपि कार्यप्रपञ्चस्याधस्ताद्वर्तमानाऽपि सैव मध्यगा प्रपञ्चस्य प्रागभावप्रध्वंसयोर्मध्यकालेऽपि व्याप्य वर्तमानाया एव चिच्छक्तेः कालत्रयव्याप्तिर्दर्शिता । अन्तःस्थेति । कालव्याप्त्या मध्यरूपाऽपि कार्यप्रपञ्चस्यान्तःस्थोपादानकारणरूपेणान्तर्वर्तमाना । यद्वा स्थावरजङ्गमा-

त्मके स्वसृष्टे जगति स्वात्मकत्वतयाऽन्तरनुप्रविश्य स्थिता । श्रूयते हि—"तत्सृष्ट्वा तदेवानुप्राविशत्" इति ॥ ६२ ॥

विन्यासैर्वर्णसंकल्पैर्विश्वविद्यालयात्मना ।
विद्योतमाना या वाचि वन्दे तामादरेण तु ॥ ६३ ॥

अत्र चोर्ध्वरूपाया अधोरूपत्वमधोरूपायास्तु मध्यरूपत्वं मध्यमाया अन्तस्वस्थानं च प्रतीत्यैतद्विरुद्धं तादृशविरोधाभावं दर्शयति—विन्यासैरिति । अकारादिहकारान्तवर्णपरिकल्पितैर्विन्यासैर्गद्यपद्यादिसंस्थानविशेषैः सकलविद्याश्रयतया शब्दे या विद्योतमाना तामित्यर्थः ॥ ६३ ॥

एकधा च द्विधा चैव तथा षोडशधा स्थिता ।
द्वात्रिंशद्भेदभिन्ना च या तां वन्दे परात्मदाम् ॥ ६४ ॥

एकधा चेति । एकेनैव प्रकारेण तालवोष्ठपुटाभिव्यक्तवैखरीवागात्मना प्रथममवस्थिता । पुनः स्वरव्यञ्जनभेदेन द्विप्रकारं विभज्य स्थिता । पुनश्च षोडशधाऽकारादिविसर्गान्तषोडशस्वरूपेण विभज्य स्थिता । पुनरपि द्वात्रिंशद्भेदभिन्ना काद्याः पञ्चविंशतिर्यादयोऽष्टौ रलयोरभेदाल्लकारो न पृथग्गणनीयः । क्षकारश्च संयुक्ताक्षरतया न पृथग्भूतः । हकारोऽपि मूलप्रकृतिवाचकतया सकलजगन्मूलत्वेनावस्थितो व्यष्टिरूपेण गणनां नार्हति । अत एवोक्तं नकुलीशशिवान्विताभिति । अतो यादयः सप्तावशिष्यन्ते । तथा चायमर्थः—ककारादिसकारान्तद्वात्रिंशद्वयञ्जनात्मना विभज्यानस्थिता । इत्थं मातृकारूपेणावस्थिता या परमा शक्तिस्तामित्यर्थः ॥ ६४ ॥

अकारादिक्षकारान्तैर्वर्णैरत्यन्तनिर्मलैः ।
अशेषशब्दैर्या भाति तामानन्दप्रदां नुमः ॥ ६५ ॥

अकारादीति । उक्तभेदेन भिन्नायाः शक्तेरवयवभूता अकारादिक्षकारान्ता वर्णास्ते चात्यन्तनिर्मलाः । अमृतमयत्वात् । आधारादिषट्कमलदलेषु पातिता द्वादशान्तास्थितचन्द्रमण्डलात्सृता अमृतबिन्दवोऽकारादिक्षकारान्तवर्णात्मना परिणताः । उक्तं ह्याचार्यैः—

"मूलाधारात्स्फुरिततडिदाभाप्रभा सूक्ष्मरूपो-
ऽर्द्धच्छन्त्यामस्तकमणुतरा तेजसां मूलभूता ।

१ क. 'द्विताभाषनासू° । २ ख, 'भावनासू' ।

सौषुम्नाध्वाचरणनिपुणा सा सवित्राऽनुबद्धा
ध्याता सद्योऽमृतमथ रवेः स्रावयेत्सार्धसोमात्" ॥
"शिरसि निपतिता या बिन्दुधारा सुधारा
भवति लिपिमयी सा[1] ताभिरङ्गं मुखाद्यम्" ॥ इति ।

तथाविधैर्निर्मलैर्वर्णैस्तत्संस्थानभेदपदवाक्यात्मनाऽवस्थितैः शब्दैर्या शक्तिर्मातृकात्मिका भाति तामित्यर्थः ॥ ६५ ॥

लक्ष्मीवागादिरूपेण नर्तकीव विभाति या ।
तामाद्यन्तविनिर्मुक्तामहं वन्दे वराननाम् ॥ ६६ ॥

नर्तकीवेति । यथा नर्तकी स्वयमेकैव सत्याहार्यनानाविधरूपेण नानाविधा भात्येवमेकैव परा शक्तिः परिकल्पितभेदाल्लक्ष्मीवागादिनानाशक्त्यात्मना भातीत्यर्थः । आद्यन्तविनिर्मुक्तामिति । आदिरुत्पत्तिरन्तो विनाशस्तदुभयनिर्मुक्तां सर्वदा वर्तमानामित्यर्थः ॥ ६६ ॥

ब्रह्माद्याः स्थावरान्ताश्च यस्या एव समुद्गताः ।
यस्यामेव विलीयन्ते तस्यै नित्यं नमो नमः ॥ ६७ ॥

ब्रह्माद्या इति । ब्रह्मादिस्तम्बान्तो यो भोक्तृप्रपञ्चस्तस्य सर्वस्योत्पत्तिस्थितिलया यस्याः स्वरूपे परिकल्प्यन्ते तस्या इत्यर्थः । श्रूयते हि—"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति" इति ॥ ६७ ॥

महदादिविशेषान्तं जगद्यस्याः समुद्गतम् ।
यस्यामेव लयं याति वन्दे तामम्बिकामहम् ॥ ६८ ॥

न केवलमेव भोक्तृप्रपञ्चस्याधिष्ठानं भोग्यप्रपञ्चपरिकल्पनस्यापि सैवाधिष्ठानमित्याह—महदादीति । मूलप्रकृतेरत्यन्तनिर्विकल्पकतया चिच्छक्तितादात्म्येन क्षीरनीरवदविभागापन्नत्वान्महत्तत्त्वस्य च प्रथमकार्यत्वात्तदेवाऽऽदित्वेनोपादीयते । महदहंकारादिघटपटादिविशेषान्तं भोग्यरूपं जगदस्याः परशक्तेः समुद्भूतं समुद्भूयावस्थितमित्यर्थः ॥ ६८ ॥

गुरुमूर्तिधरां गुह्यां गुह्यविज्ञानदायिनीम् ।
गुह्यभक्तजनप्रीतां गुहायां निहितां नुमः ॥ ६९ ॥

१ ज. °सा नाभि° ।

य इदं पठते स्तोत्रं संध्ययोरुभयोरपि ।
सर्वविद्यालयो भूत्वा स याति परमां गतिम् ॥ ७० ॥
इति जनहितमेतत्प्रोच्य देव्याः प्रसादा-
द्गुरुगुरुमखिलेशं भक्तिपूर्वं प्रणम्य ।
मुनिगणमवलोक्य स्वानुभूत्यैव सूतः
स्वकपरशिवरूपे लीनबुद्धिर्बभूव ॥ ७१ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां चतुर्थे यज्ञवैभव-
खण्डेऽवशिष्टपापस्वरूपकथनं नाम सप्त-
त्वारिंशोऽध्यायः ॥ ४७ ॥

गुरुमूर्तिधरामिति । शमदमादिसाधनसंपन्नविरक्तजनाननुग्रहीतुं गुरुमूर्ति-रूपेणावस्थिताम् । गुह्यां रहस्यां दुरधिगमामित्यर्थः । गुह्यं रहस्यद्वितीयब्रह्मात्मैकत्वविषयं वेदान्तश्रवणमननादिसाधनजनितं यत्सम्यग्ज्ञानं तद्दातुं शीलमस्याः सा तथोक्ता । गुहायां निहितामिति । देहमध्येऽवस्थितहृदयकमल-मध्यं गुहा तस्यां निहिताम् । तत्र विशेषतोऽभिव्यक्तामित्यर्थः । श्रूयते हि— 'यो वेद निहितं गुहायां परमे व्योमन्' इति ॥ ६९ ॥ ७० ॥ ७१ ॥

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमद्वयम्बकपादाब्जसेवापरा-यणेनोपनिषन्मार्गप्रवर्तकेन श्रीमाधवाचार्येण विरचितायां सूत-संहितातात्पर्यदीपिकायां चतुर्थे यज्ञवैभवखण्डेऽवशिष्टपाप-स्वरूपकथनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

समाप्तोऽयं पूर्वो भागः ।

INDIAN INSTITUTE OF ADVANCED STUDY
59526
15-7-78

Library IIAS, Shimla
S 294.182 3 M 264.I S-M 264.II
00059526